NOT TO BE ISSUED
OUT OF THE LIBRARY.

00142040

THE
ASIATIC SOCIETY OF BOMBAY
Town Hall, Bombay.

Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018

The Department of Public Instruction, Bombay.

MÂLATÎ-MÂDHAVA

BY

BHAVABHÛTI

WITH

THE COMMENTARY OF JAGADDHARA

EDITED WITH NOTES, CRITICAL AND EXPLANATORY,

BY

RAMKRISHNA GOPAL BHANDARKAR, M. A.,

HONORARY MEMBER OF THE ROYAL ASIATIC SOCIETY OF GREAT BRITAIN AND IRELAND; ASSISTANT PROFESSOR OF SANSKRIT, AND ACTING PROFESSOR OF ORIENTAL LANGUAGES, ELPHINSTONE COLLEGE.

(*Registered for copy-right under Act XXV. of 1867.*)

B 446

ZZ d 27

Bombay:

GOVERNMENT CENTRAL BOOK DEPÔT.

1876.

All rights including that of copying the Text in its present recension are reserved.

Price Rs. 3—10—0.

BOMBAY:

PRINTED AT THE "INDU-PRAKASH" PRESS.

अथ

मालतीमाधवं नाम प्रकरणं

महाकविश्रीभवभूतिप्रणीतं

जगद्धरकृतटीकया समवेतं

लन्दनराजधानीवर्तिपौरस्त्यदेशवृत्तान्वेषणपरविद्वत्परिषदा स्वाधिपत्यपदं
प्रापितेनैल्फिन्स्तनविद्यालयस्थसंस्कृताध्यापकेन

भाण्डारकरोपाभिधेन

गोपालसूनुना रामकृष्णेन

142040

संशोधितं

स्वनिर्मितविषमपदविमर्शिन्या टिप्पण्या च मण्डितम्।

तच्च

मुम्बापुरवर्त्तिराजकीयग्रन्थशालाधिकारिणा

प्रकाशितम्।

शकाब्दाः १७९८। खिस्ताब्दाः १८७६.

मूल्यं सार्धं साष्टमांशं च रूपकत्रयम्। (३॥=)

मुम्बईनगर्यां
इन्दुप्रकाशाख्ययन्त्रालये मुद्राक्षरैरङ्कितम् ।

00142040

DEDICATED TO

THE MEMORY OF

E. I. HOWARD, Esq

SECOND DIRECTOR OF PUBLIC INSTRUCTION, BOMBAY,

BUT FOR WHOSE ENLIGHTENED ENCOURAGEMENT AT A TIME WHEN SANSKRIT DID NOT FORM PART OF THE REGULAR COURSE OF INSTRUCTION IMPARTED IN OUR COLLEGES, THE EDITOR WOULD, IN ALL PROBABILITY, NEVER HAVE STUDIED THE SACRED LANGUAGE OF HIS COUNTRY.

PREFACE.

I.

This edition of Bhavabhûti's Mâlatî-Mâdhava is based on the following copies:—

A. The Calcutta edition of 1866 by Kailâsachandra Datta. The text of this differs very little, if at all, from that of the older print brought out at the same place. My object in this edition was to bring together the various forms of the text that prevail in different parts of India. An edition based on a number of Mss. however large, is by no means, satisfactory if the Mss. come from the same place or country. I have, therefore, taken this Calcutta print as a fair representative of the Bengal text and collated it along with the other Mss.

B. A Ms. from the Library of Aṇṇâ S'âstrî Âgâs'e of Ratnâgiri. Unfortunately the last sheet of this containing a few speeches at the end is lost. A Ms. of the Vikramorvas'î from the same Library, which I have lent to my friend Mr. Shankar P. Pandit, appears from the colophon to have been transcribed at Benaras, about sixty years ago. In external appearance, this resembles B. so much, that both were undoubtedly written by the same person and at about the same time. B. therefore, is about sixty years old, and may be taken to be a representative of the Benâres text.

C. From Nâsik, copied for the Government of Bombay under the superintendence of Dr. Bühler and deposited in the Elphinstone College.

D. This is accompanied by the commentary and comes down

to about the middle of Act. VI. It belongs to the same collection as C. and is a recent copy. This also is from Nâsik.

E. This belongs to the Library of the Elphinstone College and is one of a valuable collection which appears to have existed in the Library almost since the foundation of the College. These Mss. appear to have been copies made for some body upon a uniform plan; for all of them are of the folio size. They do not seem to have been used by any S'âstrîs. There is a S'loka at the end of E. which gives the date when the Ms. was copied, in these words:—वसुगगनरसेन्दुसंमितेऽब्दे क्षयाख्ये, *i. e.* in the year Kshaya, 1608 of the S'aka Era, corresponding to 1686 A. C. But this could hardly be the date of the Ms., wherefore the S'loka appears to have been copied from the original of which our E. is a transcript.

G. This was procured by Mr. Gaṇes'a Bhikâji Gunjikar B. A. from a Gujarâti Brâhmaṇ and kindly lent to me. The last sheet containing but a few lines is wanting, so that if it contained a date at all, it is not available. But the Ms. does appear to be very old.

N. This is a Ms. written on Tâla leaves in the Tailanga characters and kindly lent to me by Mr. Narasimmiyengar of Bangalor. It represents the southern text of the play.

For this edition A., C. and N. have been collated throughout, and B. up to the middle of Act X. for the reason given above. N. was received after 168 pages had been printed off. Its readings, therefore, for the first four Acts and 68 lines of the fifth, have been given in an Appendix. D. could be used only up to the middle of Act VI. and after that, E. which is similar to it in many respects was put in its place. I got G. when the seventh Act was being printed off. It has, therefore, been used in the eighth Act at a place where there is a lacuna in E. and in the tenth after B. breaks off. G., however,

was frequently consulted when I had to choose a reading for the text and some of its variations are noticed in the explanatory notes.

All these Mss. are independent of each other, and there is no such resemblance between any two as to entitle them to be classed together as belonging to one family. Still, however, in cases of difference, A. and D. agree with each other oftener than with any of the others, and so do B. and C. Hence A and D. bear a distant relationship to each other which points to a common origin at some remote time, and so do B. and C. I have, in such cases, generally chosen the reading of B. and C. as representing an ancient redaction of the text prevailing in the country between Benares and Nâsik, and given the other in the footnotes. E. bears to A. the same relationship that D. does. Hence, it was chosen to supply the place of D. in the later Acts. N., though it very often stands alone, agrees more with B. and C. than with any of the rest. When B. and C. do not agree, the reading of the majority has been adopted in the text. And this, I believe, is the proper thing to do, when Mss. from different parts of the country, so independent of each other, are collated. These are the general principles observed in this edition, but in some cases they were departed from, when a good reading could not be obtained by strictly adhering to them. The readings of B. C. and of the majority are, in these cases, thrown into the footnotes. I have not considered myself bound to adopt Jagaddhára's readings. Even in his time, separated as it was from that of the poet by about eight hundred years, as will be shown hereafter, the text of the play was unsettled, and not unfrequently he himself gives *variæ lectiones*. His text appears generally, though not invariably, to agree with A. In the last two Acts, however, the agreement is not so great, and often his reading is the same as that of B. or N. He seems to have gone upon a Ms. representing

the redaction prevalent in his own country. If he was a native of Mithilâ, as is not unlikely, since his grand-father lived, according to Dr. Hall, at Videhanagara, that circumstance explains why his text should agree so much with A. which represents Bengal and the adjacent provinces. The fact that he is nearer to the poet than our Mss. by more than three hundred years, does not signify much under the circumstances I have stated. And, I think, a reading as to which even modern Mss. representing the text prevalent in different parts of India agree, is more likely to be the reading of the poet than that given by a single Ms. more than three hundred years old which pretty closely agrees with a recent one containing the prevailing text of a certain province only. Besides, the reading of our commentator cannot be determined with certainty, in a good many cases, since he often gives only a paraphrase and passes over large portions of the prose passages. Where it could be, it was duly considered in framing the text of this edition.

For the commentary of Jagaddhara I had the following Mss. :—

1. From Dr. Bühler's collection for the Government of Bombay. It is complete, but there is hardly a line in it which is not full of blunders.

2. From the Library of the late Dinamaṇis'ankara S'âstrî of Surat, complete.

3. That which accompanies D., incomplete.

4. From Gujarât, incomplete—containing the commentary on the first four Acts only.

All these were procured for me by Dr. Bühler.

5. A fragment, containing the exposition of the first Act from Aṇṇâ S'âstrî Agâs'e's Library at Ratnâgiri.

6. A fragment, containing the commentary on the sixth Act, copied out for me at Sâvantavâḍî.

It will thus be seen that for the seventh and subsequent Acts, I had only Nos. 1 and 2, but as No. 1 was almost useless, Dr.

Bühler sent me another (No. 7) which, though very old, was only a faithful copy of No. 2, and hence not of much use. However, after a careful comparison of Nos. 1 and 2, I was able to make out Jagaddhara's words to my satisfaction.

II.

Bhavabhûti was descended from a family of Brâhmaṇs surnamed Udumbaras residing in Padmapura in the country of the Vidarbhas, the modern Berars. They were followers of the Taittirîya S'âkhâ of the Yajurveda, and belonged to the Kâs'yapa gotra. They were pious Brâhmaṇs, regularly worshipping Agni and sometimes performing the higher sacrifices such as Vâjapeya. Even at present, there are families of Marâṭhî and Tailanga Taittirîyin Brâhmaṇs in and about the country where the Udumbaras lived.* The name of Bhavabhûti's father was Nîlakaṇṭha, of his mother, Jâtûkarṇî, and of his grand-father, Bhaṭṭa Gopâla. He was the fifth in descent from one Mahâkavi who was a great sacrificer. Bhavabhûti was a man of learning. He knew the Vedas, the Upanishads, and the Sânkhya and Yoga systems of philosophy. He has given indications of his acquaintance with the Yoga in Mâlatî-Mâdhava and the Vîracharita,† and in the Uttararâmacharita, has, in two or three places, alluded to the chief doctrines of the Aupanishada or Vedânta system such as we find it elaborated in S'ankarâchârya's works.‡ The name of his guru or teacher was Jnânanidhi,§ which looks like one assumed by persons when they enter into the

* See explanatory notes, Act I. l. 28.

† M. M. Act V.; V. Ch. beginning of Act III.

‡ Act II. शब्दब्रह्मणस्तादृशं विवर्तमितिहासं &c.; Act VI. विद्याकल्पेन &c.

§ See introduction to the Vîracharita and the reading of N. in the introduction to the present play.

fourth or Sannyâsa order and devote themselves to the study and contemplation of the Brahma. He probably initiated our poet into the secrets of the Vedânta.

Bhavabhûti is the author of three dramatic plays, the Vîracharita, Mâlatî-Mâdhava and the Uttararâmacharita. S'ârngadhara, in his Paddhati, attributes a stanza* to him which is found in none of these three. Probably, our poet wrote a fourth work which has yet to be recovered, if it is not hopelessly lost. The Vîracharita seems to have been Bhavabhûti's first attempt, for it does not exhibit that power and felicity of expression and insight into the human heart that the other two display, and is often heavy and uncouth. Mâlatî-Mâdhava must have been his second work, and the Uttararâmacharita, the last. In the benedictory stanza at the end of this, the play is represented as the production of his mature intellect.† And this is confirmed by internal evidence and the traditionary judgment of the Paṇḍits, among whom a verse declaratory of Bhavabhûti's "having in the Uttararâmacharita excelled" Kâlidâsa, has been current.‡ These two poets are frequently compared with each other and regarded as the leading dramatists in the language. The ordinary belief among the Paṇḍits is that they lived at the same time, and a characteristic anecdote is told with regard to them. Bhavabhûti took his Uttararâmacharita, after he had composed it, to Kâlidâsa and asked him to give his judgment on it. Kâlidâsa was at that time engaged in the game of S'âras, and told Bhavabhûti to read out the play for him. Bhavabhûti did so. All the while, Kâlidâsa was deeply engaged in the game, and when Bhavabhûti had finished and asked him what he thought

---

* निरवद्यानि पद्यानि यदि नाट्यस्य का क्षतिः ।
भिक्षुकक्षाविनिक्षिप्तः किमिक्षुर्नीरसो भवेत् ॥ Pad. 6. 2.

† शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम् ॥

‡ उत्तरे रामचरिते भवभूतिर्विशिष्यते ॥

about the work, he said that "it was a very good production, better than his own works, and that the only fault he could discover was a superfluous dot or anusvâra in the last line of one of the S'lokas." The line meant was अविदितगतयामा रात्रिरेवं व्यरंसीत्। Act I. and the superfluous dot, that on एवं, Kâlidâsa thinking that it should be एव, as we find it in our text. Undoubtedly, एव is much better than एवम्; the anecdote, however, can have no historical foundation. But though Kâlidâsa could not have lived long enough to be thus consulted by Bhavabhûti, there can be little doubt that he was our poet's favourite author, and was admired by him. The loves of S'akuntalâ and Dushyanta and of the Apsaras and Purûravas, mentioned by Kâmandakî in the second Act of the present play, may, very reasonably, be understood to be allusions to the Abhijnâna-S'akuntala and Vikramorvas'î. And in the ninth Act, Mâdhava's idea of using a cloud as a messenger to his beloved, and even his manner and mode of addressing it, seem to have been suggested by the Meghadûta.

Bhavabhûti is a poet of great merit. He shows a just appreciation of the awful beauty and grandeur of Nature enthroned in the solitudes of dense forests, cataracts, and lofty mountains. He has an equally strong perception of stern grandeur in human character and is very successful in bringing out deep pathos and tenderness. He is skilful in detecting beauty even in ordinary things or actions and in distinguishing the nicer shades of feeling. He is a master of style and expression, and his cleverness in adapting his words to the sentiment is unsurpassed. The genius of Bhavabhûti was, however, more of a lyric than of a dramatic nature. Notwithstanding the originality of conception involved in the plot of Mâlatî-Mâdhava, the poet does not show such a skill in the arrangement of his incidents and in the *denouement* as is displayed by the author of the Mrichchhakaṭî or even of the Mudrârâkshasa. The incidents subsequent to

the scene in the cemetary look like clumsy appendages and not like parts of a whole. Kapâlakundalâ is represented to have taken away Mâlatî, simply to give an opportunity to the poet to display his power of depicting the feelings of a man in *viraha;* and the incident appears by no means to harmonize with, or to arise naturally out of, the previous story. Neither is the poet very skilful in the portraiture of varied character. In this also he is surpassed by S'ûdraka. Bhavabhûti had not the power of putting himself mentally into various situations, of forgetting one and becoming quite a new man in another. But as the poet of Nature and of human passion and feeling generally, he occupies a very high rank among Sanskrit authors. Kâlidâsa, as Prof. Wilson remarks, has more fancy. He is a greater artist than Bhavabhûti. The former *suggests* or *indicates* the sentiment which the latter *expresses* in forcible language. The characters of the latter, overcome by the force of passion, often weep bitterly, while those of the former simply shed a few tears, if they do so at all. In the language of Sanskrit critics, Kâlidâsa's *rasa* is conveyed or *abhivyakta* by the *lakshya* or *vyangya* sense of words, while Bhavabhûti's is conveyed by the *vâchya* sense. The excellencies and shortcomings of Bhavabhûti's genius are fully seen in the Uttararâmacharita. The incidents in that play are but few. There is very little movement. But the description of the forest scenery of Janasthâna in the second Act, and the portraiture of the griefs of Sitâ and Râma in the third, are unrivalled. Uttararâmacharita is more adapted for the hall than for the stage; it is more a *S'ravya* than a *Dris'ya* kâvya, while the beauties of S'akuntalâ are more perceptible when acted than when read. The merits of the poet are also observable in Mâlati-Mâdhava, but not in such a developed form as in the other play, while to his usual faults, must be added the use of long prose speeches containing bewildering compounds. Such a thing

can never succeed on the stage. Perhaps in this as in several other respects, Bhavabhûti was carried away by the conventionalism which had begun to prevail and the rules laid down by the critics; and the free play of his genius was obstructed. Long compounds constitute the poetic excellence called *ojas* and this *ojas* is according to Daṇḍin the very soul of prose.*

The scene of the drama is laid at Padmâvatî, situated at the confluence of two rivers named the Pârâ and the Sindhu. Of the identification and position of the town and the rivers, I have spoken in another place.†

According to the Râjataraṅgiṇî, Bhavabhûti was patronized by Yas'ovarma, king of Kanoja. This Yas'ovarma was subdued by Lalitâditya,‡ king of Kâs'mîra, who acquired by his conquests a paramount supremacy over a large part of India. The mention of this circumstance enables us to fix the date of Bhavabhûti. Lalitâditya reigned, according to General Cunningham, from 693 A. C. to 729 A. C. The chronicle of Kâs'mîra mentions another poet named Vâkpatirâja who lived at the court of Yas'ovarma. A work in Prâkṛit entitled Gauḍavadha Kâvya by this same Vâkpatirâja has recently been discovered by Dr. Bühler. In it, the exploits of Yas'ovarma and his defeat of a Gauḍa king are narrated. In giving his own history, the poet tells us that "certain excellences still shine in his works like drops of poetic nectar churned from the ocean of Bhavabhûti."§

---

* ओजः समासभूयस्त्वमेतद्गद्यस्य जीवितम् ।

† See explanatory notes Act I. l. 81

‡ कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः ।
जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम् ॥ Râj. IV. 145.

§ Text.—भवभूइजलहिनिग्गयकव्वामयरसकणा इव फुरन्ति ।
जस्स विसेसा अज्जवि वियडेसु कहाणिवेसेसु ॥
७९९, Com.—भवभूतिजलधिनिर्गतकाव्यामृतरसकणा इव स्फुरन्ति यस्य

From this it would appear, that Vâkpatirâja was either a pupil of Bhavabhûti or one of those who derived benefit from his company. If the poem, then, was written in the latter part of Yas'ovarma's reign, Bhavabhûti must have lived in the first part. So that, our poet flourished at the end of the seventh century. And the date thus determined agrees with all that is known of the chronological relations of Bhavabhûti with other writers. In the first place, Bâṇa's omission of his name from the long list given by him at the beginning of his Harshacharita is now intelligible. Bâṇa flourished in the first half of the seventh century. Bhavabhûti is quoted* in Kshîrasvâmin's commentary on the Amara Kosha. Kshîrasvâmin is mentioned in the Râjataranginî as the teacher of Jayâpîḍa,† the grandson of Lalitâditya, who reigned from 751 A. C. to 782 A. C. He is also quoted in the Das'arûpakâvaloka by Dhananjaya, the brother, it is said, of the author of the work on which he comments, who flourished in the early part of the eleventh century. There are extracts from Bhavabhûti's works in the Sarasvatîkaṇṭhâbharaṇa attributed to King Bhoja of Dhâra who reigned in the middle of the eleventh century, and in the Kâvyaprakâs'a, S'ârngadhara's Paddhati and other later works.

विशेषा अद्यापि विकटेषु कथाविशेषेषु? (प्रबन्धेषु) । निबन्धेष्विति क्वचित्पाठः ॥
I am indebted for this information to Dr. Bühler and for the extract to Mr. S. P. Pandit in whose hands the Ms. is at present.

* For this information I am indebted to Mr. S. P. Pandit. The work is not available to me.

† क्षीराभिधाच्छब्दविद्योपाध्यायात्संभृतश्रुतः ।
बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः ॥

III.

Jagaddhara, the author of the commentary which accompanies the text, was, as he himself tells us, the son of Ratnadhara and Damayantî. Ratnadhara was the son of Vidyâdhara, and grandson of Gadâdhara. This last was the son of Râmes'vara who was the son of Deves'a, son of Chaṇḍes'vara. Chaṇḍes'vara appears to have obtained from some king or chief the grant of a village of the name of Suragrâma. All his ancestors, except perhaps his father, were Mîmâṃsakas. He or his father appears to have been a judicial functionary to some chief. His grandfather resided, Dr. Hall states, probably on the authority of Jagaddhara's other works, at Videhanagara in Mithilâ. Our scholiast gives, in some cases, vernacular equivalents for Sanskṛit words, but the reading is often so corrupt and uncertain that it is not possible to find out from these what his own vernacular was.

But none of the facts mentioned by him enables us to determine the period when he lived. All that can be done is to arrive, if possible, from the authors and works quoted or mentioned by him, at a date before which he could not have lived. In his present work, Jagaddhara refers to Amara, the Dharaṇî, the S'âs'vata, the Hârâvalî, the Utpalinî, the Vis'va or Vis'vaprakâs'a,* the S'abdaprakâs'a, the S'abdabheda,† the Anekârtha, the Nânârtha, the Ratnakosha, the Medinî, the Amaramâlâ, the Amaralatâ,‡ the

* What is often called the Vis'va is really the Vis'vaprakâs'a of Mahes'vara. I looked for some of the verses quoted by Jagaddhara from the Vis'va in the two copies of the Vis'vaprakâs'a in Dr. Bühler's collection, and found them in both.

† The S'abdaprakâs'a and the S'abdabheda are one and the same work and identical with the S'abdabhedaprakâs'a which is an Appendix to the Vis'vaprakâs'a. I looked for the passages quoted by Jagaddhara in the copy in Dr. Bühler's collection and found them there.

‡ Amaramâlâ and Amaralatâ appear to have been two names of the same book, or the latter is a mislection.

Dhâtusangraha, the Dhâtupradîpa, the Nyâsa Bharata, Daṇḍin, the Sarasvatîkaṇṭhâbharaṇa, the Meghadûta, Mâgha, and Naishadha.* Of the lexicons quoted by him the date of the Vis'vaprakâs'a is known. It was composed, as the author himself informs us in a S'loka at the end of his work, in S'aka 1033 corresponding to 1111 A. C.† Jagaddhara furnishes us with another clue. At the beginning of the seventh Act, after explaining that the root प्रच्छ् with आ signifies to "take one's leave finally" or to "bid adieu," he tells us that the same root occurs in the Meghadûta‡ and is explained by the commentator in the same way. Five commentaries on this poem, besides that of Mallinâtha, are mentioned in Prof. Aufrecht's Oxford Catalogue,§ none of which however is well known. And since Jagaddhara speaks of one commentator only without giving his name, he must be understood to have been aware of one commentary only, so well known as to render a mention of the author's name superfluous. I, therefore, take it he alludes to Mallinâtha who, in his scholia on the poem, does explain the root in the same way as Jagaddhara. Mallinâtha, therefore, lived before our scholiast. Now Mallinâtha, according to Prof. Aufrecht, flourished after the thirteenth century,|| since he quotes from a work of Bopadeva in one of his commentaries. Bopadeva was a contemporary¶ of Hemâdri who was a counsellor to Mahâdeva$ and Râmadeva, kings of Devagiri,

* Dr. Hall gives some more names from the other works of the scholiast:—the Gîtagovinda, the Uttaratantra, Ratnâvalî, Vala and Vindhyavâsin, and Mattanâga.

† See Prof. Aufrecht's Oxf. Cat. p. 188*b*. I do not, however, find the S'loka in the Mss. in Dr. Bühler's collection.

‡ See p. 235.

§ No. 218.

|| Oxf. Cat. p. 113*a*.

¶ See Prof. Aufrecht's Oxford Cat. p. 37*b*.

$ See the introduction to the Dânakhaṇḍa and Wathen's copperplates in Journal R. A. S. Vol. V. 1839. Also Oxf. Cat. p. 37*b*, where कामराजस्य is probably to be read रामराजस्य.

and consequently flourished at the end of the thirteenth century. Another circumstance which indicates Mallinâtha's priority to Jagaddhara is that while the latter quotes from the Medinî every now and then, the lexicon is never referred to by Mallinâtha.* If the Medinî were composed before Mallinâtha, we might certainly expect quotations from it somewhere in his vast commentaries. Medinîkara, therefore, very probably lived after Mallinâtha and certainly before Jagaddhara.

We should make a further advance in the present inquiry if we could determine the age of this lexicographer so often quoted by our scholiast. In the introduction to his vocabulary, Medinîkara mentions Mâdhava. If this Mâdhava is the same as the great Minister of Bukka and Harihara, kings of Vijayanagara, the Medinî must have been written after the third quarter of the fourteenth century.† In Râyamukuṭa's commentary on the Amarakosha, there are many quotations from this lexicon. Râyamukuṭa wrote his work, as he himself incidentally tells us, in 1353 S'aka and in 4532 Kaliyuga,‡ corresponding to 1431 A. C. Medinîkara, therefore, lived after about 1375 A. C. and before 1431 A. C. But, if the Mâdhava alluded to by him was another person, we must determine his date

* See Oxf. Cat. p. 113 and Appendices to Mr. Paṇḍit's Ed. of Raghuvans'a. Prof. Aufrecht has observed one quotation from the lexicon in the commentary on Mâgha; but it is a later interpolation. (See the Preface to his Ed. of Ujjvaladatta p. xiv. notes).

† See Jour. B. B. R. A. S. Vol. IV. p. 107. The date of Mâdhava's grant is 1313 S'aka *i. e.* 1391 A. C. Compare also Thomas' Ed. of Prinsep, genealogical tables. Here, Harihara is represented as having ceased to reign in 1391 A. C. There is some disagreement between the two authorities. In the charter published in the journal, king Harihara is spoken of as having appointed Narahara to rule over Goa, after Mâdhava's death. The grant, therefore, seems to have been executed after that event, whence the date in Mr. Thomas' tables appears more correct.

‡ इदानीं च शकाब्दाः १३५३ द्वात्रिंशदब्दाधिकपञ्च [शत?] वर्षोत्तरचतुःसहस्रवर्षाणि कलिसंख्यायां भूतानि ४५३२ । Rây. on Am. I., 1, 3, 22.

with reference to that of Mallinâtha instead of Mâdhava, and Râyamukuta, *i. e.* place him between the first quarter of the fourteenth century and 1431, a result which is nearly the same as the above. Jagaddhara, therefore, lived after the fourteenth century, but how long after, we have not the means of determining. Probably some of the other works quoted by our commentator are still more modern than the Medinî. Such, for instance, appears to be a lexicon of the name of Amaramâlâ which is not given by Medinîkara in his what appears to be an exhaustive list of Koshas, nor is it referred to by Mallinâtha. But it is quoted by Ujjvaladatta, and by Bhânujî Dikshita in his Vyâkhyâ-Sudhâ,* and is mentioned in an anonymous list of twenty-six Koshas occurring at the end of a Ms. in Dr. Bühler's collection.† But nothing more definite is known about it.

Jagaddhara's commentary is very valuable. His interpretation of his author is generally correct and proper; but after having given an explanation which alone is plain and sensible, he often attempts several others which are fanciful and far-fetched, probably to show off his learning and acumen. In a few places he is positively wrong. I have considered all these cases in the explanatory notes. His quotations from Bharata

---

* Prof. Aufrecht's Ed. of Ujjv. Preface, p. xvii. and his Oxf. Cat. Nos. 415, 416.

† मेदिन्यमरमाला च त्रिकाण्डो रत्नमालिका ।
रन्तिदेवो भागुरिश्च व्याडिः शब्दार्णवस्तथा ॥
द्विरूपश्च कलिङ्गश्च रभसः पुरुषोत्तमः ।
दुर्गोऽभिधानमाला च संसारावर्तशाश्वतौ ॥
विश्वो वोपालितश्चैव वाचस्पतिहलायुधौ ।
हारावली साहसाङ्को विक्रमादित्य एव च ॥
हेमचन्द्रश्च रुद्रश्चाप्यमरोयं सनातनः
एते कोशाः समाख्याताः संख्या षड्विंशतिः स्मृता ॥

and other authors and the information that he gives on several points are of very great use, especially to the University student.

Besides the present commentary, Jagaddhara wrote two others, one on the Veṇîsaṃhâra and the other on Vâsavadattâ.

Two other sets of scholia on Mâlatî-Mâdhava are noticed in the Catalogues of Mss. recently published. They are very short, one by Râghavabhaṭṭa consisting of only 25 leaves with five lines in a page,* and the other by Nârâyaṇabhaṭṭa, of eight.† They are little known.

---

* Cat. of Sans. Mss. in the N. W. P. part I. p. 618 No. 68.

† Dr. Bühler's Cat. of Mss. in Gujarât.

मालतीमाधवं

नाम

प्रकरणम् ।

सानन्दं नन्दिहस्ताहतमुरजरवाहूतकौमारबर्हि-
त्रासान्नासाग्ररन्ध्रं विशति फणिपतौ भोगसंकोचभाजि ।

चञ्चच्चन्द्रिकचन्द्रचारुकुसुमो माद्यज्जटापल्लवो
दृप्यद्दारुणदन्दशूकमणिमांस्तत्पञ्चशाखालयः ।
स्थाणुर्मे फलदो भवत्वतितरां गौरीमुखेन्दुद्रव-
त्पीयूषद्रवदोहदादिव दधद्देवद्रुमत्वं सदा ॥
नत्वा गुरून्गुणगुरूनवलोक्य टीकां
विश्वादिकोषभरतश्रुतिशब्दविद्याम् ।
छन्दांस्यलंकरणमर्थगतिं विचिन्त्य
श्रीमाञ्जगद्धरकृती वितनोति टीकाम् ॥
श्रीकण्ठकण्ठविलुठत्पटुनाटकेस्मि-
ण्टीका मयाल्पमतिनापि वितन्यते यत् ।
हासाय दुर्जनगणस्य भवेन्न चैत-
दुच्चैः पदं यदभिकाङ्क्षति सर्व एव ॥

१–४. इह तावदष्टपदां नान्दीं विदधान एव कविरप्रत्यूहमीहित सिद्धिमनुरुध्य प्रचण्डचण्डीपतेरकाण्डताण्डवाडम्बरेण लम्बोदरोत्की- र्तनरूपं मङ्गलं प्रकरणादौ निबध्नाति । सानन्दमित्यादि । वैनायक्यो वदन-

गण्डोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणे·

विधुतयश्चिरं वः पान्तु गजाननाननचालनानि युष्मान्बहुकालं रक्षन्त्वित्यर्थ इति श्रोतॄन्सामाजिकान्कविराशास्ते । वदनविधूनने कारणमाह । फणिपतौ वासुकीनाम्नि नासाग्ररन्ध्रं नासिकाग्रविवरं सानन्दं विशति सति । नासात्र विनायकस्यैव । त्रस्तस्य झटित्यग्ररन्ध्रप्राप्त्या जीवनप्रत्याशयानन्द इति भावः । अत एव प्रवेशानन्तरमानन्द इति कथं क्रियाविशेषणमिति दोषानवकाशः । अग्ररन्ध्रस्य शीघ्रं प्राप्यैवानन्दातिशयात् । यथा भीतस्य शीघ्रं वनादिप्राप्तौ हर्षः । यद्वा । सानन्दं यथा तथा पान्त्विति योज्यम् । यद्वा । सानन्दमित्याहतविशेषणम् । सापेक्षत्वेपि गमकत्वात्समासः । क्रियाविशेषणत्वादेव सानन्दमित्यत्र कर्मत्वैकत्वक्लीबत्वानि । इह नासारन्ध्रमिति वक्तव्येग्रग्रहणं त्रस्तस्य झटिति प्राप्त्या हर्षसूचनाय । यद्वा । रन्ध्रप्रवेशेग्रप्रवेशस्यार्थसिद्धस्यापि शब्देन कीर्तनादुक्तिपोष एवायमलंकारः । यदाह दण्डी ।

उक्तिपोषः ।

क्वचिदाक्षेपलब्धस्य साक्षाच्छब्देन कीर्तनात् ॥ इति ।

कीदृशे फणिपतौ । भोगः फणा कायो वा तस्य संकोचोविकाशस्तं भजतीति भोगसंकोचभाक् तस्मिन् । विवरानुसरणे भोगिभोगसंकोच इति जातिनियमः । तदनेन महाकायस्य नासाग्रप्रवेशायोग्यतोक्ता । प्रवेशे हेतुमाह । शूलपाणेः शिवस्य ताण्डवे नृत्ये सति नन्दी गणभेदस्तस्य हस्तेनाहतस्य ताडितस्य मुरजस्य मर्दलस्य रवेण शब्देनाहूतो यः कौमारबर्हीं कार्तिकेयमयूरस्तस्य त्रासाद्भयात् । अत्र नन्दिहस्ताहतत्वेन मुरजस्य गभीरताररवशालिता दर्शिता मयूरस्य भुजङ्गभोजित्वेन त्रासकत्वम् । विधुतयः कीदृश्यः । गण्ड उड्डीनाभिरूर्ध्वं गताभिरालिमालाभिर्भ्रमरपङ्क्तिभिर्मुखरिताः शब्दीकृताः ककुभो दिशो याभिस्ताः । तथा

वैनायक्यश्चिरं वो वदनविधुतयः पान्तु चीत्कारवत्यः ॥

चीत्कारो भीतकरिणां त्रासध्वनिस्तत्सहिताः । विनायकस्य गजाननत्वात् । इह साहित्यमात्रं मत्वर्थः । तथा च भयान्मुखे विधूननचीत्कारौ युगपद्वृत्ताविति भावः । जातिरलंकारः । विधुतेरचेतनत्वेपि देवतानुभावादेव रक्षणकर्तृत्वम् । अत एव त्रस्तस्यापि तत्कर्तृत्वम् । इह गम्भीरमुरजरवश्रुतिकृष्टमयूरभयेन फणिनां विवरानुसरणं जलदकालचिन्हम् । अत एव जलदकालमनुभाव्यैवैतत्प्रकरणवृत्तान्त इति ध्वनितम् । तथा च वक्ष्यति । धारासिक्तवसुन्धरासुरभय इत्यादि । मुरजाघातेन वाद्यमलिमालया दिशां मुखरीकरणेन गीतं वदनविधूननेन नृत्यं सूचयता तौर्यत्रिकमुक्तम् । चीत्कारेण नृत्यतः प्रत्यक्षपाठोपि सूचितः ॥ कुमारः क्रौञ्चदारण इत्यमरः ॥ कुमारस्येदं कौमारम् ॥ तस्येदमित्यण् ॥ मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुगित्यमरः । नासा नाशा तु नासिकेति शब्दभेदः । भोगः सुखे स्त्र्यादिरतावहेश्च फणकाययोरिति विश्वः ॥ उड्डीन इति उत्पूर्वाड्डीङ्धातोः क्तः । ओदितश्चेति चकारान्नत्वम् ॥ प्रडीनोड्डीनसंडीनान्येताः खगगतिक्रिया इत्यमरः । दिशस्तु ककुभः काष्ठा इति च । ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तनमिति च । विनायको विघ्नराजद्वैमातुरगणाधिपा इति च ॥ विनायकस्येदं वैनायक्यम् ॥ तस्येदमित्यण् । टिड्ढाणञिति ङीप् । विधुतिरिति विपूर्वाद्धुञः स्त्रियां क्तिन् ॥ नाटकादौ प्रवृत्तिः प्रेक्षावतां सप्रयोजना । यदाह भरतः ।

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न ताः कलाः ।
नासौ नयो न तत्कर्म नाटके यन्न दृश्यते ॥

नाटके विघ्नविघातायादौ नान्दी कार्या । यदाह भरतः ।

यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके ।
तथाप्यवश्यं कर्तव्या नान्दी विघ्नप्रशान्तये ॥

नान्दीलक्षणं च भरते ।

अपिच । चूडापीडकपालसंकुलगलन्मन्दाकिनीवारयो ५.
विद्युत्प्रायललाटलोचनपुटज्योतिर्विमिश्रत्विषः ।
पान्तु त्वामकठोरकेतकशिखासंदिग्धमुग्धेन्दवो
भूतेशस्य भुजङ्गवल्लिवलयस्रङ्नद्धजूटा जटाः[1] ॥

देवद्विजनृपादीनामाशीर्वचनपूर्विका ।
नान्दी कार्या बुधैर्यत्नान्नमस्कारेण संयुता ॥
गङ्गा नागपतिः सोमः स्वधानन्दो जयाशिषः ।
एभिर्नामपदैः कार्या नान्दी कविभिराङ्किता ॥
प्रशस्तपदविन्यासा चन्द्रसंकीर्तनान्विता ।
आशीर्वादपरा नान्दी योज्येयं मङ्गलान्विता ॥
काचिद्द्वादशपदा नान्दी काचिदष्टपदा स्मृता ।
सूत्रधारः पठेदेनां मध्यमं स्वरमास्थितः ॥
चन्द्रसंकीर्तनं यत्र तदधीनो रसोत्तमः ।
प्रीते चन्द्रमसि स्फीता रसश्रीरिति भाविकिः ॥

•तत्र केचन पदं विभक्त्यन्तमास्थिषत । केचित्त्विदं पद्यस्य भागमूचिरे । तदिह द्वितीयपक्षनिक्षेपेण पद्यद्वयेनाष्टपदा नान्दीति ॥

५—८. बहुविघ्नशङ्कया तन्नाशाय पुनर्मङ्गलमाचरन्नष्टपदां नान्दीं निर्वाहयति । चूडापीडेत्यादि । भूतेशस्य हरस्य जटास्त्वां सभाप्रधानं पान्तु । कीदृश्यः । चूडायां शिखायां य आपीडस्तिर्यङ्नद्धमाला तस्याः कपालैः शुष्कशिरोस्थिपिण्डैः संकुलं व्याप्तमत एव गलन्मन्दाकिनीवारि

---

१ A. adds.

अपिच । पक्ष्मालीपिङ्गलिम्नः कण इव तडितां यस्य कृत्स्नः समूहो
यस्मिन्ब्रह्माण्डमीषद्विघटितमुकुले कालयज्वा जुहाव ।
अर्चिर्निष्टप्तचूडाशशिगलितसुधासारझङ्कारिकोणं
तार्तीयीकं पुरारेस्तदवतु मदनप्लोषणं लोचनं वः ॥

नान्द्यन्ते सूत्रधारः। अलमतिविस्तरेण।

गङ्गाजलं यासु ताः। माला चेह कपालानामेव। यद्वा। येषां कपालानि तेषामन्यैर्जङ्घाजान्वाद्यस्थिभिराभरणार्थं तिर्यङ्माला तत्संबद्धानि कपालानीत्यर्थः। तथा विद्युत्प्रायं विद्युन्निभं यल्ललाटलोचनपुटं ललाटस्थनेत्रसंपुटं तत्तेजसा विमिश्रा मिलिता त्विट् प्रभा यासां ताः। अत्र पुटमध्यस्थस्य समस्तनेत्रभागस्य तेजोमयता पुटपदेनोक्ता। तथा-कठोरया कोमलयासंपूर्णया वा केतकशिखया केतकीकुसुमाग्रेण संदिग्धः संशयितो मुग्धो रम्यो बालो बैन्दुर्यासु ताः। हरशिरसि किं केतकशिखेयमित्यनौचिती। तदयं संशयोऽप्यनौचित्यमूलक एवेति भावः। तथा भुजङ्गाः सर्पा एव वल्ल्यो लतास्ता एव वलयाः मण्डलाकारेण स्थिताः स्रजः पुष्पमालास्ताभिर्नद्धो बद्धो जूटो जूलको निबद्धस्रज उर्ध्वभागो यासु ताः। तदनेन जटाजूटस्यानवरतस्नानकपिशस्यापि भुजङ्गनद्धतया तिरोहितरूपत्वेनातिश्यामत्वेन मेघोदयमत एव सर्पविहरणसूचनं गङ्गाजलगलनेन वर्षणं कपालमालया बलाकावलिं ललाटनेत्रत्विषा विद्युदुद्योतं शिशुशशिना च केतकशिखावत्त्वं दर्शयता मदनमदोद्दीपनमुदिरमेदुरघनसमयसूचनेन शृङ्गाररसशालिताप्यस्य प्रकरणस्य कटाक्षिता। अचेतनाया जटाया रक्षकत्वं देवतानुभावादवधेयम्। वल्लिवलयस्रगित्यत्र रूपकनामालंकारः। यत्र मिथोपेक्षा तत्र अपिचेति प्रयुज्यत इति व्युत्पत्तिः॥

९–११. नान्द्यन्तेति। उक्तलक्षणं नाटकाद्यं पद्यं नान्दी। आशीर्योगादिना नन्दयतीति नन्दः॥ पचाद्यच्॥ नन्द एव नान्दः॥ प्रज्ञादित्वादण्प्रत्ययः। टिड्ढाणञिति ङीप्॥ नान्दी। सूत्रधारलक्षणं च भरते।

नाट्यस्य यदनुष्ठानं तत्सूत्रं स्यात्सबीजकम्।
रङ्गदैवतपूजाकृत्सूत्रधार उदीरितः॥ इति।

पुरतोवलोक्य। अये उदितभूयिष्ठ एष[1] भगवानशेषभुवनद्वीपदीपक[2]स्तपनस्तमुपतिष्ठे[3] ॥

ननु नान्द्यन्ते सूत्रधार इत्यसंगतम्। न हि नान्दीपाठानन्तरं सूत्रधारो रङ्गभूमिं प्रविशति। किं तु प्रविश्य पठति। नवान्येनैव पठनीया। सूत्रधारपठनीयत्वेनैव नान्द्या उक्तत्वात्।

सूत्रधारः पठेन्नान्दीं मध्यमं स्वरमास्थितः। इति वचनात्।

उच्यते। नान्दीं पठित्वा सूत्रधारः प्रविशति [प्रविश्य] पठति वा। नान्द्यन्ते सूत्रधारस्यैव श्रुतत्वेनेयमपि तेनैव पठनीया। प्रथमं सूत्रधारः प्रविशतीति नोक्तम्। मङ्गलार्थं देवतानमस्कारादेरेव विधानात्। यद्वा। नान्दी तावद्रङ्गप्रवेशानन्तरं सूत्रधारेणैव पठनीया। नान्द्यन्ते सूत्रधार इति सूत्रधारसाम्यात्स्थापके प्रयोगः। यदाह भरतः।

नान्दीं प्रयुज्य निष्क्रामेत्सूत्रधारः सहानुगः।
स्थापकः प्रविशेत्पश्चात्सूत्रधारगुणाकृतिः ॥
पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते।
प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः ॥

अत एव केचिन्नान्द्यन्ते स्थापक इत्येवं पठन्ति। ननु प्रस्तावनायाः पूर्वं बहूनि नाट्याङ्गानि सन्ति तानि किमिति नोक्तानि। यदाह भरतः।

रङ्गप्रसादमधुरैः श्लोकैः काव्यार्थसूचकैः।
ऋतुं कंचिदुपादाय भारतीं वृत्तिमाश्रयेत् ॥
भेदैः प्ररोचनायुक्तैर्वीथिप्रहसनामुखैः।
सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् ॥
स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ॥

---

१ एव B. २ दीपः B. C. D. ३ तदुपतिष्ठे C. तदेनमुपतिष्ठे B.

प्रणम्य। कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते
धुर्यां लक्ष्मीमथ मयि भृशं धेहि देव प्रसीद।
यद्यत्पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन्भूयसे मङ्गलाय॥ १५.

अत एवाहालमिति। अयमाशयः। पूर्वोक्तान्यङ्गानि न भवन्ति किन्तु परिषदोभिमुखीकरणानि। सा चेत्स्वयमेव कृतावधाना नवनाटकविलोकनोत्का च तदन्यत्प्रयुज्यमानमपि रसभङ्गाय परं भवतीति कृतं तत्प्रणयनेन। अन्यथा सभाया रसविच्छेदो भवेदिति निष्फलतेति।

अये इति निपातो व्यासङ्गादिनानाकलितस्याकलनेन संभ्रमवाचकः। अकस्मात्सूर्योदयाकलनात्।

ततः श्लोकं पठेदेकं गम्भीरस्वरसंयुतम्।
देवस्तोत्रं पुरस्कृत्य यस्य पूजा प्रवर्तते॥

इति भरतमतमनुमत्य माङ्गलिकतया रङ्गद्वारपाठ्यं श्लोकमुत्थापयति। उदितेति। उदितं भूयिष्ठं बहु यस्य सः। अस्य बहुतरभाग उदितः। किंचिदेवोदयायावशिष्यत इति भावः। अत्र नेक्षेतादित्यमुद्यन्तमिति निषेधादुदितभूयिष्ठ इत्युक्तम्। भगं ज्ञानादिसंपत्तिस्तद्वान्भगवानित्यर्थः। उपतिष्ठे श्लोकेनेति शेषः॥

१२–१५. तदेवाह। कल्याणानामित्यादि। भो विश्वमूर्ते सर्वमय- देव। दीव्यतीति देवो द्युतिमांस्तादृश हे। कल्याणानां महसां माङ्गलिकानां तेजसां त्वं भाजनं पात्रमसि। अतः प्रसीद प्रसन्नो भव। मयि मद्विषये। धुर्यां नृत्यधुरंधरां लक्ष्मीं संपत्तिमपि भृशमतिशयेन धेह्यारोपय। अथ शब्दः समुच्चयार्थः। धेहीति स्थाने देहीति पाठे ददस्वेत्यर्थः। तथा हे जगन्नाथ भुवनपते यद्यत्पापमारब्धविरुद्धं नम्रस्य मेस्ति तत्प्रति-

---

१ त्वं विभासे C. २ पुण्यां B.

नेपथ्याभिमुखमवलोक्य । मारिष सुविहितानि रङ्गमङ्गलानि संनिपतितश्च भगवतः कालप्रियनाथस्य यात्राप्रसङ्गेन नानादिगन्तवास्तव्यो महाजनसमाजः[1] । आदिष्टश्चास्मि विद्वज्जनपरिषदा यथा केनचिदपूर्वप्रकरणेन वयं विनोदयितव्या इति । तत्किमित्युदासते भरताः ॥

१०. प्रविश्य पारिपार्श्विकः[2] । भाव परिषन्निर्दिष्टगुणं प्रबन्धं नाधिगच्छामः[3] ।

जहि नाशय । यद्यदिति वीप्सया कायिकवाचिकमानसिकरूपं पापत्रयमुक्तम् । वीप्सा तु न तच्छब्दे कृता वीप्सितस्यैव तच्छब्देन परामर्शात् । तथैव व्युत्पत्तेः । क्वचिद्यत्पद इव तत्पदेपि वीप्सा । यथा यां यां प्रियां प्रैक्षतेत्यादौ । भद्रमदोषं भद्रमभीष्टम् । वितर देहि । यद्वा भद्रं भद्रमतिशयेनाभीष्टं देहीत्यर्थः । किमर्थम् । मङ्गलायाशंसनीयकर्मार्थम् ॥ तादर्थ्ये चतुर्थी ॥ मङ्गलाय मङ्गलं कर्तुमिति वा । कीदृशाय भूयसे प्रचुराय । तदिह हरिहरादीनपास्य भानोरुपस्थानेन प्रकरणनायकस्य ब्राह्मण्यं सूचितम् । अत एव देहीति ब्राह्मणोचिता प्रार्थना । सर्वक्षुद्रसत्वक्षयहेतोः प्रभावस्यादरेण प्रकरणकथाबीजसूचनमपि । तथाहि । यद्यदिति वीप्सया शार्दूलाघोरघण्टविमर्दसूचनम् । पापप्रतिघातानन्तरं च भद्रं भद्रमिति वीप्सया स्वस्य मालतीलाभेन मकरन्दस्य च मदयन्तिकालाभेनेष्टसिद्धिः सूचिता । भूयोमङ्गलपदेन कपालकुण्डलापकृतमालतीलाभो विद्यालाभादिकं च सूचितम् ॥

१६–१९. नेपथ्यं रङ्गभूमिः ॥ नेपथ्यं रङ्गभूमौ स्यादिति विश्वः । मान्यो भावेति वक्तव्यः किंचिन्न्यूनस्तु मारिष इत्यमरः ॥ मारिष एव मर्षणान्मार्षः । सूत्रधारोक्तनिर्वाहसहिष्णुरित्यर्थः । सुविहितानि भक्तिश्रद्धाकृतानि । रङ्गो नृत्यं तदर्थं मङ्गलानि लोकपालपूजादीनि ॥ रङ्गो नृत्ये रणक्षिताविति

---

१ समूहः B. C.   २ पारिपार्श्वकः B. C. D.   ३ नावगच्छामः B. C.

सूत्र० । मारिष कतमे ते गुणास्तत्र यानुदाहरन्त्यार्यविदग्धमिश्रा भगवन्तो भूमिदेवाश्च ।

विश्वः ॥ सन्निपतितः सर्वत आगत्यैकत्र मिलितः । कालप्रियनाथस्य तद्देशदेवभेदस्य । यात्राप्रसङ्गेनेति नृत्यकालसूचनम् ।

इदं ध्वजमहः श्रीमन्महेन्द्रस्य प्रवर्तते ॥

इत्यभिधानात् । वास्तव्यो वासी महाजनसमाजो विद्वद्गोष्ठी । उदासत उदासीना भवन्ति । भरता नटाः ।

२०—२३. पारिपार्श्विकलक्षणं भरते ।

सूत्रधारस्य पार्श्वे यः प्रवचन्कुरुतेर्थनाम् ।

काव्यार्थसूचनालापं स भवेत्पारिपार्श्विकः ॥ इति ।

भाव मान्यनट । परिषदा प्रेक्षकेण निबद्धो गुणो यत्र स प्रबन्धः प्रकरणम् । प्रेक्षकस्तु ।

यस्तुष्टे तुष्टिमायाति शोके शोकमुपैति च ।

क्रुद्धः क्रुद्धे भये भीतः स नाट्ये प्रेक्षकः स्मृतः ॥

इति भरतोक्तः । पूजावाक्यगर्भं प्रश्नमाह । कतम इति ।

गोत्रं नाम च बध्नीयात्पूजावाक्यं च सर्वतः ॥

इति भरतः । कतमे कियन्त इत्यर्थः । आर्याः सुकुलादिसंपन्नाः । यदाह भरतः ।

कुलं शीलं दया दानं धर्मः सत्यं कृतज्ञता ।

अद्रोह इति येष्वेतत्तानार्यान्संप्रचक्षते ॥

विदग्धाश्चतुःषष्टिकलावेदिनः । मिश्रा वेदान्तवेदिनः । भगवन्तः स्मृतिधराः । यदाह ।

देवाश्च लिङ्गिनश्चैव नाना स्मृतिधराश्च ये ।

भगवानिति ते वाच्याः पुरुषाः स्त्रिय एव च ॥ इति ।

---

१ A. D. om. मारिष २ आर्या विदग्धा मिश्रा A.

नटः । भूम्ना रसानां गहनाः प्रयोगाः सौहार्दहृद्यानि विचेष्टितानि ।
औद्धत्यमायोजितकामसूत्रं चित्राः कथा वाचि विदग्धता च ॥

सूत्र० । स्मृतं तर्हि ।

नटः । भाव किमिव ।

यद्वा । आराद्याता दूरं गता ग्राम्यत्वादिदोषेभ्य इत्यार्याः । विदग्धाः काव्यरसवशमनसः । मिश्राः पूज्याः । पूज्ये मिश्रपदं नित्यं बहुवचनान्तम् ॥ मरीचिमिश्रैर्दक्षेणेति विष्णुपुराणात् ॥ भगवन्तो ज्ञानादिसंपन्नाः । भूमिदेवा ब्राह्मणाः । इह तत्रोद्घातकरूपा प्रस्तावना । यदाह भरतः ।

सुप्रतीतं विस्मृतं वा यत्र कार्यं प्रकाश्यते ।
तदुद्घातकमित्याहुः प्रश्नोत्तरमनोहरम् ॥ इति ।

२४—२७. प्रबन्धे गुणानाह भूम्नेति । यत्र प्रबन्धे रसानां शृङ्गारादीनां भूम्ना प्राचुर्येण गहना गम्भीराः सहृदयहृदयमात्रग्राह्याः प्रयोगाः सन्ति । एतेनास्य रसमयत्वमुक्तम् । यत्र प्रबन्धे विचेष्टितानि मालतीमाधवादेः परस्परव्यापाराः सौहार्देन प्रेम्णा हृद्यानि मनोज्ञानि । यत्रौद्धत्यं नायकनायिकासखीभृत्यादिगुणमाहात्म्यमस्ति । कीदृशम् । आयोजितं विहितं कामसूत्रमनङ्गप्रयोगो यत्र तत् । यद्वा । औद्धत्यं निजोत्कर्षपुरःसरमन्यावज्ञाविष्करणम् । तच्चायोजितस्य समन्तात्कार्याभिमुखीकृतस्य कामस्य मन्मथेच्छायाः सूत्रं सूचकम् । सूत्रं संभोगः पटारम्भकस्तन्तुर्वा । अनेनात्र कामोद्दीपकतयौद्धत्यं गुणाय । स्वाभाविकस्य तस्य भूषणत्वमिति दर्शितम् । यत्र चित्राश्चर्यजनिका कथा कल्पितकथत्वात् । रसमयत्वाच्चाश्चर्यम् । वाचि वचने विदग्धता परिपाको निर्दोषत्वं वक्रता च यत्र । एतेनान्यनाटकादस्याधिकगुणवत्त्वमुक्तम् । तं प्रबन्धं नर्तितुमादिशन्ति । मिश्रा इति शेषः । किमिव किं स्मृतमित्यर्थः ।

---

१ चित्रा A. २ कइव B. C. D.

सूत्र० । अस्ति दक्षिणापथे[1] विदर्भेषु पद्मपुरं[2] नाम नगरम् । तत्र केचित्तैत्तिरीयिणः काश्यपाश्चरणगुरवः पङ्क्तिपावनाः पञ्चाग्नयो धृतव्रताः सोमपीथिन उदुम्बरनामानो[3] ब्रह्मवादिनः प्रतिवसन्ति स्म ।

२८–३१. अधुना

रुणद्धि रोदसी वास्य यावत्कीर्तिरनश्वरी ।

तावत्किलायमध्यास्ते सुकृतं वैबुधं पदम् ॥

इति निजनामादिकथनफलमनुरुध्य तदाचरति । अस्तीत्यादि । दाक्षिणदेशस्य शृङ्गाररसवशवया तद्देशजत्वेन स्वस्य तदुभयरसवर्णनशक्तिरुक्ता । विदर्भेष्वित्यनेन वैदर्भीरीतिपरिचयचातुरी दर्शिता । पद्मनगरं पद्मावती । नाम प्रसिद्धौ । न तु नामपदमभिधानार्थम् । तदा प्रकृत्यादित्वात्तृतीया स्यादित्यवधेयम् । तैत्तिरीयिणस्तैत्तिरीयकनामशाखाविशेषपाठिन इत्यर्थः । काश्यपाः काश्यपगोत्राः । चरणगुरव इति चरणशब्दः शाखाविशेषाध्ययनपरैकतापन्नजनसंघवाची । तत्र समूहे ते गुरवः क्रियां कृत्वा वेदाध्यापयितारः ।

स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति ॥

इति स्मृतेः । यद्वा । चरणैः कलापादिभिर्गुरवो महान्तः । पङ्क्तिपावनाः पङ्क्तौ भोजनादिगोष्ठ्यां पावना अग्रभोजिनः पवित्रा वेत्यर्थः । यद्वा ।

यजुषां पारगो यस्तु साम्नां यश्चापि पारगः ।

अथर्वशिरसोऽध्येता ब्राह्मणः पङ्क्तिपावनः ॥

इति लक्षिताः । पञ्चाग्नयो दक्षिणाग्निगार्हपत्याहवनीयसभ्यावसथ्यरूपाग्निपञ्चकोपासकाः । धृतव्रताश्चान्द्रायणादिव्रतयोगिनः । सोमपीथिनः सोमो लताविशेषो हुतशेषो वा तत्पायिनः । अनेन सोमयागयाजित्व-

---

१ दक्षिणपथे A. २ पद्मनगरं नाम A. ३ उम्बर A. D. ०पीथिनो ब्राह्मणा ब्रह्म० A.

ते श्रोत्रियास्तत्त्वविनिश्चयाय भूरि श्रुतं शाश्वतमाद्रियन्ते ।
इष्टाय पूर्ताय च कर्मणेर्थान्दारानपत्याय तपोर्थमायुः ॥
तदामुष्यायणस्य तत्रभवतः सुगृहीतनाम्नो भट्टगोपालस्य पौत्रः

मुक्तम् । डम्बरनामानो डम्बरमुत्कर्षसूचकं कुलनाम येषां ते । यद्वा । डम्बरं प्रसिद्धं नाम येषां ते ॥ प्रसिद्धौ डम्बरं विदुरिति विश्वः ॥ ब्रह्मवादिनो वेदज्ञा इत्यर्थः ।

३२–३३. त इत्यादि । कथितरूपाः । श्रोत्रियाश्छन्दोऽध्येतारः । जन्मादिसंपन्ना ब्राह्मणा वा । भूरि प्रचुरम् । शाश्वतं सार्वकालिकम् । श्रुतमध्ययनमाद्रियन्ते श्रद्दधति । यद्वा । शाश्वतं नित्यागमं वेदाख्यमाद्रियन्ते । कीदृशम् । भूरि श्रुतं बहुभ्यो बहुधा बहुभिः सहाभ्यस्तम् । किमर्थम् । धर्मस्य कर्तव्याकर्तव्यरूपस्य विनिश्चयाय निर्णयाय । वैदिककर्माणि निर्णीयैव प्रवृत्तेरिति भावः ॥ श्रोत्रियंश्छन्दोधीत इति पाणिनिसूत्रम् ॥

जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।
विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ॥

इति स्मृतिः ॥ शाश्वतमित्यत्र कालाट्ठञं [ठञं] बाधित्वा शाश्वते प्रतिषेध इति भाष्यवचनादण् ॥ तथा तेर्थान्धनान्याद्रियन्ते । इष्टाय कर्मणे यागादिकार्यार्थम् । पूर्ताय कर्मणे खातादिकार्यार्थम् । यागादीनां धनसाध्यतया तेषां तदादरो न तु भोगायेति भावः । दारान्पत्नीराद्रियन्ते । अपत्याय संतत्यर्थं न तु कामायेत्यर्थः । ते आयुर्जीवनमाद्रियन्ते । तपोर्थं तपश्चरणार्थं न तु व्यसनार्थम् । क्लेशबहुलं धर्म्यं कर्म तपः । तदनेन तेषां सर्वगुणवत्त्वं दर्शितम् ॥ भूयिष्ठं भूयश्च भूरि चेत्यमरः । अथ क्रतुकर्मेष्टं पूर्तं खातादिकर्मणि । दाराः पुंभूम्नि च ॥ विनिश्चयायेत्यादौ तादर्थ्ये चतुर्थी ॥

३४–३७. अत्र कुले जात आमुष्यायणः । तत्रभवतः पूज्यस्य

---

१ तत्रामुष्यायणस्य D.

पवित्रकीर्तेर्नीलकण्ठस्यात्मसंभवो भट्टश्रीकण्ठपदलाञ्छनो भवभूतिनामा जातूकर्णीपुत्रः कविर्निसर्गसौहृदेन भरतेषु स्वकृतिमेवंप्रायगुणभूयसीमस्माकमर्पितवान् । यत्र[1] खल्वियं वाचोयुक्तिः ।

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान्प्रति नैष यत्नः ।

सुगृहीतं शोभनोच्चारणं वालिकर्णादिवन्मङ्गल्यं नाम यस्य । भट्टश्चतुःशास्त्राभिज्ञः । पवित्रा पुण्या कीर्तिर्यस्य । तस्यात्मसंभवः पुत्रः । श्रीः सरस्वती कण्ठे यस्य स श्रीकण्ठः । तद्वाचकं पदं लाञ्छनं चिह्नं यस्य सः । नाम्ना श्रीकण्ठः । प्रसिद्ध्या भवभूतिरित्यर्थः ॥ श्रीर्वेशरचनाशोभाभारतीसरलद्रुष्विति मेदिनीकारः ॥ जतूकर्णगोत्रप्रसूता जातूकर्णी तस्याः पुत्रः । निसर्गसौहृदेन साहजिकसौहार्देन ॥ ननु हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्युभयवृद्ध्या सौहार्दमिति स्यात् । उच्यते । हृदित्यादौ प्रतिपदोक्तस्य ग्रहणाद्धृदयस्य हृल्लेखेति हृदादेशस्यादिवृद्धिः । यद्वा । संज्ञापूर्वको विधिरनित्य इति वचनादुभयपदवृद्धेरनित्यत्वम् । यद्वा । सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातस्य सुहृच्छब्दस्यावयवो हृच्छब्दस्तदन्तोत्तरपदवृद्धिर्भवति ॥ एवंप्रायगुणभूयसीं भूम्ना रसानामित्यादिप्रायैर्गुणैरुपचितामर्पितवान्प्रयोगतोऽर्थतश्च संक्रमितवान् । खलु प्रसिद्धौ वाक्यभूषायां वा । वाचोयुक्तिर्वचनरचनम् ॥ वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेष्विति षष्ठ्यलुक् ॥

३८–४१. संप्रति स्वकौशलबलेन सगर्वमाह । ये नामेत्यादि । इह तावत्त्रिविधाः पुरुषाः । केचिदज्ञा एव । केचिदद्वैतमदमग्नमनसः काव्यरसविरसाः । इतरे सहृदयहृदयामोदिकाव्यभव्यरसभररसिकाः । तत्राद्यान्प्रत्याह । ये केचिदज्ञा नोऽस्माकम् । इह प्रबन्धे । अवज्ञामवधीरणम् । प्रथयन्ति ख्यापयन्ति । नाम संभावनायां संभाव्यत इव न तु वास्तवमि-

---

१ तत्र खल्वियं B.

उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा[1]
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥

अपि च । यद्वेदाध्ययनं तथोपनिषदां सांख्यस्य योगस्य च
ज्ञानं तत्कथनेन किं न हि ततः कश्चिद्गुणो नाटके ।

त्यर्थः । ते किमपि किंचिदल्पं जानन्ति । तान्प्रति वाँलक्षीकृत्य मम नैष यत्नः । न हि बधिरे गीयते । यद्वा । किंशब्द आक्षेपे । ते किं जानन्ति किं तु न जानन्तीत्यर्थः । द्वितीयान्प्रत्याह । ये नाम निश्चये वैषयिकसुखविमुखा मुमुक्षव इहावधीरणामाचरन्ति ते किमपि वाङ्म-
[redacted] । ते नमस्यास्तान्प्रति मम नैष यत्नः ।
[redacted] यत इति भावः । अन्यान्प्रत्याह ।
[redacted] जन उत्पत्स्यते जन्माप्स्यत्यस्ति
[redacted] वः । इहाल्पज्ञत्वेन साधर्म्यमनौद्ध-
[redacted] दुर्जनविवर्जनायेत्युभयत्र विवक्षा ।
[redacted] पलब्धस्य वा कथमुपलम्भ इत्युभ-
यथायोग्यतामाह । यतः कालोऽयं निरवधिर्विगतावसानः । विपुला महती च पृथ्वी भूमिः । तथा च तस्येदानीमनुत्पन्नस्य कालान्तर उत्पाद इहानुपलब्धस्य देशान्तर उपलम्भश्च स्यादिति भावः । इह प्रथमार्धे बहुत्वेन प्रयोगो द्वितीयार्धे एकत्वेन प्रयोगश्च न दोषः । भिन्नवाक्यार्थत्वात् । एकवाक्यार्थत्वे तादृक्प्रयोगस्यायोग्यतया दोषत्वात् । तथैव व्युत्पत्तेरित्यवधेयम् । यद्वा । अवज्ञाप्रथमावसरेऽहंकारेणात्मनो गौरवाद्बहुत्वं निजसमतावसरे शान्त्यात्मन्येकत्वम् । यद्वा । जात्यभिप्रायमेकवचनम् ।

४२–४५. अधुना निजगुणगरिमोपदर्शनेन निजग्रन्थे विदग्धादरमाह । यद्वेदेत्यादि । यत्र खल्वियं वाचोयुक्तिरित्यत्राप्यनुषज्यते । अद्वैतप्र-

---

१ समानजन्मा C.

यत्प्रौढत्वमुदारता च वचसां यच्चार्थतो गौरवं
तच्चेदस्ति ततस्तदेव गमकं पाण्डित्यवैदग्ध्ययोः ॥ ४५

तिपादको वेदभाग उपनिषत्तज्ज्ञानम् । योगः पातञ्जलशास्त्रम् । तयोरध्ययनज्ञानयोः कथनेन किम् । अपि तु न किमपीत्यर्थः । यतस्ततो वेदाध्ययनादेर्नाटके कश्चिद्गुणो नास्ति । तेषां नाटकेनुपयोगात् ॥ तत इति ल्यब्लोपे पञ्चमी ॥ तान्प्राप्य नाटके न कश्चिद्गुण इत्यर्थः । वयं सर्वमेव विजानन्तुतया पुनस्तदत्र न निबद्धामीति भावः । तर्ह्यत्र कवेर्वेदादिज्ञानज्ञापनं किमर्थमत आह । यदिति । वचसां यत्प्रौढत्वं वाक्यार्थे पदं पदार्थे वाक्यं तत्कृतिः । यथा न दैवीयं किं तु मानुषीत्यर्थे निमेषवती । चन्द्रवदित्यर्थे नयनसमुत्थं ज्योतिरत्रेरिति । यदाह दण्डी ।

पदार्थे वाक्यवचनं वाक्यार्थे च पदाभिदा ।
प्रौढिर्व्याससमासौ च साभिप्रायत्वमस्य च ॥ इति ।

यच्च वचसामुदारता विकटत्वं यस्मिन्सति पदानि जनो नृत्यन्तीवेति मन्यते । यद्वा । उदारत्वालंकारादिदोषशून्यत्वम् । यद्वा । उदारता गुणभेदः । यदाह दण्डी ।

उत्कर्षवान्गुणः कश्चिदुक्ते यस्मिन्प्रतीयते ।
तदुदाराश्रयं तेन सनाथा काव्यपद्धतिः ॥ इति ।

यच्चार्थतो गौरवमनर्घ्यार्थता । यद्वा । स्वल्पं वचनमर्थसार्थप्रसरसमर्थमित्यर्थः । तद्यदि नाटकेस्ति ततस्तदेव पाण्डित्यवैदग्ध्ययोर्गमकं बोधकम् । पण्डितो वेदाध्ययनादिकुशलस्तस्य भावः पाण्डित्यम् । वैदग्ध्यं रसादियोगिप्रबन्धबन्धनकौशलम् । अनेन ग्रन्थे सर्वगुणवत्त्वमुक्तम् । तत्कर्तृत्वेनात्मनः सर्वपथीनमतिमत्त्वमप्युक्तम् । नाटक इति । ननु नाटक इत्ययुक्तम् । अस्य प्रकरणत्वात् । प्रकरणनाटकयोर्भेदात् । मैवम् ॥ नट नृत्तावित्यस्य घञि स्वार्थे कनि नाटकमिति ॥ तथा च नाटके नाट्य इत्यर्थात् ।

अतो[1] यदस्माकमर्पितं प्रियसुहृदात्रभवता भवभूतिनाम्ना प्रकरणं स्वकृति[2]र्मालतीमाधवं नाम तदेव[3] तत्रभवतः कालप्रियनाथस्य पुरतः प्रयोगेण प्रख्यापयितुमुद्यताः । तत्सर्वे[4] कुशीलवाः संगीत[5]प्रयोगेण मत्समीहितसंपादनाय प्रवर्तन्ताम् ।

नटः । स्मृत्वा । एवं[6] क्रियते युष्मदादेशः किं तु या यस्य युज्यते भूमिका तां खलु तथैव भावेन सर्वे वर्ग्याः पाठिताः । सौगतजरत्परिव्राजि[7]कायास्तु कामन्दक्याः प्रथमां[8] भूमिकां आर्य एवाधीते तदन्तेवासिन्यास्त्वहमवलोकितायाः ।

सूत्र० । ततः किम् ।

५१–५६. भूमिका व्याजप्रवेशः । यदाह भरतः ।

अन्यरूपैर्यदन्यस्य प्रवेशः स तु भूमिका ॥ इति ।

वर्गे भवा वर्ग्याः । नटमेलकस्था इत्यर्थः । सौगतस्य बौद्धस्य जरत्परिव्राजिका वृद्धा भिक्षुकी । एतादृशी दौत्ये प्रशस्ता । यदाह भरतः ।

विधवेक्षणिका दासी भिक्षुकी शिल्पकारिका ।
प्रविश्य चाशु विश्वासं दूतीकार्यं च विन्दति ॥ इति ।

वृद्धत्वं चास्या रूपशून्यत्वसर्वदृश्यत्वप्रगल्भत्वसूचकम् । यदाह ।

लज्जितं नार्थवन्तं वा रूपिणं वा तथातुरम् ।
दूतं वाप्यथ वा दूतीं न तु कुर्यात्कथंचन ॥

अन्तेवासिनी निकटशिष्या । अहं भूमिकामधीय इत्यन्वयः । ततः किमिति । एतावदुक्त्वा किमिति विरतोसीत्यर्थः । प्रकरणलक्षणं भरते ।

---

१ ततो A. २ कृत A. कृतं B. ३ तदेतदेव A. ४ सर्वेकुशी० A. ५ संगीतकः C. D. ६ एथ. B. ७ प्रव्राजिकायाः B. C. D.; A. om. जरत्. ८ प्रथमभूमिकां A. D.

नटः। ततः प्रकरणनायकस्य [1]मालतीवल्लभस्य माधवस्य वर्णिका- ५१
परिग्रहः कथम्।

आत्मशक्त्या कविर्यत्र कथां नायकमेव च।
औत्पत्तिकं प्रकुरुते तद्धि प्रकरणं विदुः॥

इदं च शुद्धम्। यदाह भरतः।

द्विधा प्रकरणं तत्तु शुद्धं संकीर्णमेव च।
कुलस्त्रीरचितं शुद्धं संकीर्णं वेश्यया कृतम्॥

अत्र नाटके यादृशो नियमस्तादृशः। नायकलक्षणं भरते।

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा॥
धृत्युत्साहस्मृतिप्रज्ञाकलामानसमान्वितः।
शूरो दृश्यश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः॥
विनयः शीलसंपत्तिर्मधुरः प्रियदर्शनः।
त्यागः सर्वस्वदानं स्याद्दक्षः क्षिप्रकरो मतः॥
प्रियंवदोनुत्कटवाक्सस्नेहो लोकरञ्जकः।
मितप्रस्तुतवाग्वाग्मी नित्यकर्मरतः शुचिः॥
ख्यातवंशो रूढवंशः षोडशात्त्रिंशको युवा।
वाङ्मनःकर्मभिर्यश्च न चलः स स्थिरो मतः॥
धृतिः सर्वेषु या प्रीतिरुत्साहोग्लानिरेव च।
स्मृतिः कालान्तरज्ञानं प्रज्ञा तीक्ष्णमतिर्मता॥
कलाश्चात्र चतुःषष्टिर्मानश्चित्तसमुन्नतिः।
शूरः संग्रामनिपुणो रूपवान्दृश्य उच्यते॥
अतिप्रतापस्तेजस्वी शास्त्रचक्षुस्त्रयीपरः।
आत्मवत्सर्वभूतानि यः पश्यति स धार्मिकः॥ इति।

ननु मालतीवल्लभत्वं माधवस्य न योग्यं माधवेन वसन्तेन समं

१. B. C. om. माल–स्य.

सूत्र० । मकरन्दकलहंसप्रवेशावसरे तत्सुविहितम् ।

वर्षाकालीनाया मालत्या जातेः संबन्धाभावात् । मैवम् । अपूर्वमेव हि पदार्थसार्थं योगिनीप्रभावात्संपन्नमासाद्य सहृदयहृदयचमत्कारकारिणीं वैदग्धीमेव कविरयमुत्प्रेक्षितवानित्यदोषः । माधव इति नाम्ना शृङ्गारमयत्वोक्ता । वसन्तस्य शृङ्गारमयत्वात् । शृङ्गारमयत्वेन विष्णुदैवतत्वमपि कटाक्षितम् । यदाह भरतः ।

शृङ्गारो विष्णुदैवत इति ।

अत एव श्यामत्वमपि वक्ष्यति कुवलयदलश्यामोपमित्यादिना ।

श्यामो भवेत्तु शृङ्गार इत्यपि भरतः ।

अयममात्यत्वाद्धीरोदात्तो नायकः । यदाह भरतः ।

सेनापतिरमात्यश्च धीरोदात्तौ प्रकीर्तितौ ॥ इति ।

मालती नायिका । तल्लक्षणं भरते ।

स्वान्यसाधारणस्त्रीति तद्गुणा नायिका त्रिधा ।
स्वकीया तत्र वक्तव्या मुग्धा मध्या प्रगल्भिका ॥
शीलार्जवादिसंयुक्ता कुटिला च पतिव्रता ।
लज्जावती चापरुषा निपुणा च प्रियंवदा ॥
साधारणस्त्री गणिका कलाप्रागल्भ्यधौर्त्ययुक् ।
रूपकेषु च रक्तैव कर्तव्या प्रहसं विना ॥
अन्यस्त्री द्विविधा प्रोक्ता कन्यकोढा तथा परा ।
रसे प्रधाने कर्तव्या नान्योढा नाट्यवेदिभिः ॥
कन्यानुरागमिच्छातः कुर्यादङ्गाङ्गिसंश्रयम् ॥ इति ।

अन्यदपि प्रसङ्गादुच्यते । तथा हि ।

नाटके वृत्तयः प्रोक्ताश्चतस्रो नाट्यवेदिभिः ।
भारती कैशिकी चैव सात्वत्यारभटी तथा ॥

---

४. कलहंसमकरन्द B. C. D.

नटः। तेन हि[1] तत्प्रयोगादेवात्रभवतः सामाजिकानुपास्महे।

तत्र शृङ्गारी कामकलावच्छिन्नो व्यापारः कैशिकी।
विशोका सात्वती सत्वशौर्यत्यागार्जवादिभिः।
मायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।
भवेदारभटी नाम नाट्ये तिस्रस्तु वृत्तयः॥
भारती शब्दवृत्तिः स्याद्रसे रौद्रे च युज्यते।
शृङ्गारे कैशिकी वीरे सात्वत्यारभटी पुनः॥
एवमङ्गानि कार्याणि प्रधानस्याविरोधतः।
आदौ विष्कम्भकं कुर्यादङ्कवाक्यार्थयुक्तितः॥
अपेक्षितं परित्यज्य नीरसं वस्तुविस्तरम्।
यदा संदर्शयेच्छेषं कुर्याद्विष्कम्भकं तदा॥
यदा तु सरसं वस्तु मूलादेव प्रवर्तते।
आदावेव तदाङ्कः स्यादामुखाक्षेपसंश्रयः॥
प्रत्यक्षनेतृचरितो विश्वव्यापिपुरःसरः।
अङ्को नाना प्रकारार्थसंविधानरसाश्रयः॥
अनुभावविभावाभ्यां स्थायिना व्यभिचारिभिः।
गृहीतमुक्तैः कर्तव्यमङ्गिनः परिपोषणम्॥
न चातिरसतो वस्तु दूरविच्छिन्नतां नयेत्।
रसं वा न तिरोदध्याद्वस्त्वलंकारलक्षणैः॥
एको रसोऽङ्गी कर्तव्यो वीरः शृङ्गार एव वा॥
अङ्गमन्ये रसाः सर्वे कुर्यान्निर्वहणेऽद्भुतम्।
शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्सोऽद्भुत इत्येवमष्टौ नाट्ये रसाः स्मृताः॥

यद्यपि

१. तर्हि तत्प्रसिद्धप्रयोगादेव A. तर्हि तद्वृद्धप्रयोगादेव D.

सूत्र०। बाढम्। एषोऽस्मि कामन्दकी संवृत्तः।

नटः। अहमप्यवलोकिता। इति परिक्रम्य निष्क्रान्तौ[1]।

प्रस्तावना।

ततः परिवृत्य[2] रक्तपट्टिकानेपथ्ये कामन्दक्यवलोकिते प्रविशतः।

अविकारस्थितिः शान्तः शान्तस्तु नवमो रसः।

इत्यस्ति तथापि स न सर्वसंमतो न वा नाट्यविषयश्चेति न पृथगुक्तः। स्थायिभावाभावात्तस्य नाट्यविषयता न संभवतीति दिक्। नायिका च मालत्युदात्तनिभृता। कुलस्त्रीत्वात्। यदाह भरतः।

उदात्तनिभृता चैव भवेत्तु कुलजाङ्गना॥ इति।

वर्णिका मषी।

५९–६१. बाढं दृढम्। कामन्दकीसंवृत्तः कामन्दकीरूपः। एतेन सूत्रेणैव काव्यार्थसूचनं कार्यमिति मतमनुमत्य कामन्दकीसूचनमपि सूत्रसूचनमेव वृत्तमिति दर्शितम्। यद्वाग्रे मकरन्देन मालतीरूपं कर्तव्यमिति पुंसः स्त्रीत्वापत्त्यात्र सूचितम्। कामन्दको नीतिग्रन्थभेदस्तं वेत्तीति कामन्दकी॥ तदधीत इत्यण्ङीप्च॥ अनया नामव्युत्पत्त्या नीतिवेदिताबोधनेन प्रकृतसिद्धिहेतुतोक्ता। तदन्तेवासिनी अवलोकिता दृष्टिरितिकार्यसिद्धिदृष्टेरपि कार्यसिद्धिहेतुतोक्ता। तदुत्तेजनिकेति। निष्क्रान्तौ सूत्रधारनटाविति शेषः। प्रस्तावनेति निवृत्तेति शेषः। एतल्लक्षणं भरते।

नटी विदूषको वापि पारिपार्श्विक एव वा।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥
आमुखं नाम तस्यैव सैव प्रस्तावना मता॥ इति।

परिवृत्य पुनरागत्य। रक्तपट्टिका लोहितपट्टिका नेपथ्यमलंकारो ययोस्ते।

---

१ निष्क्रान्ताः A. २ प्रविश्य रक्तपटेन कृतनेपथ्या कामन्दक्यवलोकिता च B. ततः प्रविशति रक्तपटनेपथ्या &c. C.

काम०। वत्से अवलोकिते।

अव०। आणवेदु भअवदी। (क)

काम०। अपि नाम तयोः कल्याणिनोर्भूरिवसुदेवरातापत्ययोर्मालतीमाधवयोरभिमतः पाणिग्रहः स्यात्। वामाक्षिस्पन्दनं सूचयित्वा सहर्षम्।

विवृण्वतेव कल्याणमान्तरज्ञेन चक्षुषा।

(क) अज्ञापयतु भगवती।

६५–६६. अधुना कामन्दकी समस्तप्रकरणोपयुक्तमुपक्षेपमाह। अपीत्यादि। यदाह।

काव्यार्थस्य समुत्पत्तिरुपक्षेपः स्मृतो बुधैः।

इह तु मालतीमाधवयोर्विवाहनिर्वाहः काव्यार्थः। अपि नामेति। नाम संभावनायां तेन भवेदपीत्यर्थः। निश्चये वा नाम। तेन निश्चितमेव भवेदित्यर्थः। कल्याणिनोरित्यनेनाशंसनीयकुशलतयानुग्राह्यत्वमुक्तम्। भूरिवसुर्मालतीपिता। महाधनिककन्याया आवश्यकी वराकाङ्क्षेति नामतात्पर्यम्। देवरातो माधवपिता। देववद्राति दत्ते॥ रा दाने कर्तरि क्तः॥ देवरातः। तथा च जनो दातरि विवाह्यत इति महाधनिकवद्वदान्यत्वप्रभुत्वादियोगिनोऽनुरूप एव प्रायः पुत्र इति वरे कन्याकाङ्क्षा सूचनं नामानुनयेन। एवं च योग्ययोर्योग्य एव संबन्ध इति भावः। पाणिग्रहो विवाहः।

६८–६९. विवृण्वतेति। अपिरवधारणे तेन वामकेनैव वामेनैव चक्षुषा दाक्षिण्यमवलम्ब्यते कीदृशेन स्फुरता स्पन्दवतात एव कल्याणं विवृण्वता सूचयता। स्त्रीणां वामाङ्गस्फुरणस्य शुभसूचकत्वात्। आन्तरज्ञेनेव मदीयचित्तवृत्तिज्ञेनेव। इवोत्प्रेक्षायाम्।

१ अभिनीय D.

स्फुरता वामकेनापि दाक्षिण्यमवलम्ब्यते ॥

अव०। महन्तो क्खु भअवदीए[1] एसो चित्तविक्खेवो। अच्चरीअं अच्चरीअं जं दाणिं[2] चीरचीवरपरिच्छदं पिण्डवादमेत्तपाणअत्तं[3] भअवदीं ईदिसे[4] आआसे अमच्चभूरिवसू णिओएदि[5]। तहिं[6] उक्खण्डिदसंसारावग्गहो[7] अप्पा तुह्मेहिं पि[8] णिउज्जीअदि[9]। (क)

काम०। वत्से मा मैवं ब्रूहि।

यन्मां विधेयविषये सभवान्नियुङ्क्ते स्नेहस्य तत्फलमसौ प्रणयस्य सारः।

(क) महान्खलु भगवत्या एष चित्तविक्षेपः। आश्चर्यमाश्चर्यं यदिदानीं चीरचीवरपरिच्छदां पिण्डपातमात्रप्राणयात्रां भगवतीमीदृश आयासेमात्यभूरिवसुर्नियोजयति। तत्रोत्खण्डितसंसारावग्रह[10] आत्मा युष्माभिरपि नियुज्यते।

उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोपि तादृशः ॥

इति दण्डी। अथवापिर्विरोधे वामेनापि प्रतिकूलेनापि दाक्षिण्यमानुकूल्यं अवलम्ब्यत इति विरुद्धमिदम् ॥ वामक इति स्वार्थे कन् ॥

७०–७३. अत्र खलु निश्चये। चित्तविक्षेपोसाद्विषयाभिनिवेशः। चीरेण वस्त्रखण्डेन। चीवरं सौगतपरिव्राजकवासस्तदेव परिच्छदः परिकरो यस्यास्ताम्। पिण्डपातो नाम बौद्धानां भिक्षाभ्रमणेन भोजनं तन्मात्रेण प्राणयात्रा जीवनं यस्यास्ताम्। ईदृशे विवाहकार्ये। इहपुरन्ध्रीणामेवाधिकारो न तु भवादृशीनामिति भावः। उत्खण्डित उन्मूलितः संसाररूपोवग्रहो मोक्षप्रतिबन्धो यत्र सः। यद्वा। उन्मूलितः संसाररूपोपकृष्टो ग्रहो यत्र सः।

७४–७६. मामेति वीप्सात्यन्तनिषेधे। यन्मामित्यादि। सभवान्पूज्यो

---

१ B. om. भअ—एसो. २ B. om. दाणिं. ३ पाणअन्तीं A. पाणजत्तं D ४. ईरिसे C. ५ णिउंजेदि B. ६ B. adds क्खु after तहिं. ७ °गाहेहिं C. ८ A. om. पि. ९ पउं° B. १० तत्र चोत्ख° Com.

प्राणैस्तपोभिरथ वाभिमतं मदीयैः कृत्यं घटेत सुहृदो यदि तत्कृतं स्यात्॥

अयि किं न वेत्सि यदेकत्र नो विद्यापरिग्रहाय नानादिगन्तवासिनां साहचर्यमासीत् । तदैव चास्मत्सौदामिनीसमक्षमनयोर्भूरिवसुदेवरातयोर्वृत्तेयं प्रतिज्ञावश्यमावाभ्यामपत्यसंबन्धः कर्तव्य इति । तदिदानीं विदर्भराजमन्त्रिणा सता देवरातेन माधवं पुत्रमान्वीक्षिकीश्रवणाय कुण्डिनपुरादिमां पद्मावतीं प्रहिण्वता सुविहितम्[1] ।

भूरिवसुर्यन्मां विधेयविषये नियोज्यगोचरे नियुङ्क्ते नियोजयति तत्स्नेहस्य प्रीतेः फलं स ह्यस्माकं प्रेमपात्रमिति भावः । असौ नियोगः प्रणयस्य प्रश्रयस्य सार उत्कर्षो निर्यासो वा । यदि मदीयैः प्राणैरथ वा मदीयैस्तपोभिः सुहृदो मित्रस्याभिमतं वाञ्छितं कृत्यं कार्यं घटेत तदा तत्कार्यं कृतं स्यान्मत्प्राणादिभिरपि भवेदित्यर्थः । यद्वा । सुहृदोऽभिमतमिदं यदि घटेत निष्पद्येत तदा मदीयैः प्राणैस्तपोभिर्वा तत्कृत्यं कृतं स्यादघटने तु सर्वमिदं व्यर्थमित्यर्थः । एतेनावश्यकर्तव्यतोक्ता ॥ प्रणयः प्रेम्णि विश्वासे याञ्चाप्रश्रययोरपीति विश्वः ॥

७७–८१ भूरिवसोः स्वीकारबीजमेवंविधप्रश्नयोपपत्तिं चाह । किं नेत्यादि । न इति बहुवचनेन स्वभूरिवसुदेवरातानामुपादानम् । अस्मदिति । अस्माकं सौदामिन्याश्च प्रत्यक्षमित्यर्थः । अपत्यसंबन्धो विवाहः । सौदामिनीसमक्षमित्यनेन तस्या देवरातबन्धुतया नवमाङ्के माधवप्राणत्राणकारणत्वमस्या नाम च सूचितम् । युक्तं चेदम् ।

नासूचितं विशेत्पात्रम् ।

इति भरतः । एवमन्यत्रापि सूचितस्यैव प्रवेशः । आन्वीक्षिकी न्यायशास्त्रम् । तत्र तर्कच्छलादिनिष्टङ्कनेन तदभ्यासान्माधवस्य चोरिकाविवाहे कौशलमुक्तम् । श्रवणं पाठः । कुण्डिनपुरं विदर्भनृपराजधानी । प्रहिण्वता प्रस्थापयता । सुविहितं शोभनं कृतम् ।

---

१ सुविहितं विहितं B. C. D.

अपत्यसंबन्धविधिप्रतिज्ञा प्रियस्य नीता सुहृदः स्मृतिं च ।
अलोकसामान्यगुणस्तनूजः प्ररोचनार्थं प्रकटीकृतश्च ॥

अव० । तदो किं त्ति मालदिं[1] अमच्चो माहवस्स अप्पणा ण पडिवादेदि जेण चोरिआविवाहे[3] भअवदिं[4] तुवरावेदि । (क)

काम० । तां याचते नरपतेर्नर्मसुहृन्नन्दनो नृपमुखेन ।
तत्साक्षात्प्रतिषेधः कोपाय शिवस्त्वयमुपायः ॥

(क) ततः किमिति मालतीममात्यो माधवस्यात्मना न प्रतिपादयति येन चोरिकाविवाहे भगवतीं त्वरयति ।

८२–८३ अपत्येत्यादि । देवरातेन पुत्रं प्रहिण्वतापत्यसंबन्धविधिप्रतिज्ञा विवाहप्रतिज्ञा प्रियस्य सुहृदः प्रीतिमित्रस्य भूरिवसोः । सुहृदः शोभनचित्तस्य वा । स्मृतिं स्मरणं नीता प्रापिता । अलोकसामान्यगुणो लोकविलक्षणगुणः पुत्रः प्ररोचनार्थं प्रवृत्तिपाटवार्थं स्फुटीकृतश्च । प्ररोचनस्यैव सर्वकार्यसिद्ध्यङ्गत्वात्तत्करणम् ।

८४–८७ अत्रामात्यो भूरिवसुः । माधवस्य कृत इति शेषः । प्रतिपादयति ददाति । चोरिकया विवाहस्य धर्मशास्त्रे निषेधादिति भावः । तामित्यादि । नन्दननामा राज्ञोऽन्तःपुरसचिवो नृपद्वारा तां याचते । तत्र साक्षान्निषेधः कोपाय राज्ञः । अयं तु मद्द्वारा संयोजनात्मक उपायः शिवः परिणामसुरस इत्यर्थः । आर्याच्छन्दः ।

स्यान्नर्मसचिवः सोऽयं कुपितस्त्रीप्रसाधकः ।

नन्दयतीति नन्दनः । एतेनानन्दजनकत्वादन्तःपुरसचिवता युक्तेति नामतात्पर्यम् ।

---

१ C. om. त्ति. २ ०दीं A. D. ३ ०भा० A. ४ ०दीं A. D.; आरोएदि C. ५ मर्मज्ञः B. D.

अव० । अच्चरिअं[1] अच्चरिअं ण हु[2] अमच्चो माहवस्स णामं पि जाणादि त्ति णिरवेक्खदाए लक्खीअदि । (क)

काम० । संवरणं हि तत् ।

विशेषतस्तु बालत्वात्तयोर्विवृतभावयोः ।
तेन माधवमालत्योः कार्यः स्वमतिनिन्हवः ॥

अपिच । अनुरागप्रवादस्तु वत्सयोः सार्वलौकिकः ।
श्रेयोऽप्यस्माकमेवं[3] हि प्रतार्यौ राजनन्दनौ ॥

पश्य । बहिःसर्वाकारप्रगुणरमणीयं व्यवहर-

(क) आश्चर्यमाश्चर्यं न खल्वमात्यो माधवस्य नामापि जानातीति निरपेक्षतया लक्ष्यते ।

९०–९२ संवरणं संगोपनम् । विशेषत इत्यादि । तेन भूरिवसुना तयोर्वत्सयोर्विशेषेण स्वमतिनिह्नवः कार्यो निजज्ञानगोपनं कर्तव्यम् । बालत्वाच्छिशुत्वेन प्रकाशिताभिप्राययोः । यथा तावपि प्रकृतं न जानीतस्तथा कृतं तेनेति भावः । युक्तं चादः ।

नादेशे नाकाले नापरिपक्वेन्द्रिये न गुणहीने ।
कथयति हि कथां स्वगतां न तथास्य कथा भवति वन्ध्या ॥

इति नीतेः ।

९३–९४ अनुरागेत्यादि । तयोरनुरागप्रवादः सर्वलोकविदितः सन्नस्माकं श्रेयानस्तीति वा पाठः । श्रेयो श्रेयोलम्भी । यत एवं सति राजा नन्दनश्चोभौ वञ्चनीयौ तयोरन्योन्यानुरागादेव परिणयो वृत्तो न मया कारित इति वक्तव्यमेवेति भावः ॥ सार्वलौकिक इत्यत्र सर्वलोकाट्ठञ् ॥ अन्योन्यानुरागेण गान्धर्वविवाहोऽपि सूचितः ।

५–९८ बहिरित्यादि । विद्वान्सुबुद्धिरेकः श्रेष्ठो द्वितीयो वा सक-

---

१ अच्चरियं A. २ क्खु A. ३ श्रेयानस्मा० D.

न्पराभ्यूहस्थानान्यपि तनुतराणि[1] स्थगयति ।
जनं विद्वानेकः सकलमभिसन्धाय कपटै-
स्तटस्थः स्वानर्थान्घटयति च मौनं च भजते ॥

अव० । मए वि तुह्मवअणादो तेण तेण वअणोवण्णासेण[2] भूरिवसुमन्दिरासण्णराअमग्गेण माहवो संचारीअदि । (क)

काम० । कथितमेव नो मालतीधात्रेय्या लवङ्गिकया

(क) मयापि युष्मद्वचनात्तेन तेन वचनोपन्यासेन भूरिवसुमन्दिरासन्नराजमार्गेण माधवः संचार्यते ।

लं जनं कपटैरभिसंधाय वञ्चयित्वा स्वानर्थान्स्वप्रयोजनानि संपादयति । मौनमभाषणं भजते च । विधिनिषेधपरं वचो न वदतीत्यर्थः । अत एव तटस्थ उदासीन इवानभिव्यक्तव्यापार इत्यर्थः । कथम् । सर्वाकारेणेङ्गितादिना स्वभावसुन्दरं यथा भवति तथा बहिः प्रकटं व्यवहरन्नतिसूक्ष्माण्यपि पराभ्यूहस्थानानि परस्य तर्कस्थानानि स्थगयति पिदधाति । अपिर्भिन्नक्रमः ॥ अभिसंधिर्वञ्चनार्थ इति धातुसंग्रहः । केवलश्रेष्ठयोरेक इति धरणिः ॥

९९-१०० अत्रोपन्यासो व्याजेन कार्योद्भेदः । राजमार्गेणेत्यनेन सर्वसाधारण्यान्माधवस्यानौद्धत्यमद्वीतीयवेद्यता च सूचिता । संचारणं च तद्दर्शनेन मालत्या अनुरागायेति भावः । अत्र कामन्दक्यावलोकितायामेवमनुक्तत्वात्कथं तव वचनादिति घटत इति न देश्यम् । प्राणैस्तपोभिरित्यादिना तदभिधानात् ।

१०१-१०५ धात्रेय्युपमातृसुता । एतेन बाल्यात्प्रभृति सकलचेष्टावेदित्वं ध्वनितम् । तथा च लवङ्गिका मालतीगतं यत्कथयति तत्प्रमाणमेवेत्येवकारव्यङ्ग्यम् । अनेनास्याः सखीत्वमप्युक्तम् । यदाह भरतः ।

---

१ लघुतराणि A. २ B. om. वअण.

भूयो भूयः सविधनगरीरथ्यया पर्यटन्तं
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था ।

कारुर्दासी च धात्रेयी प्रतिवेश्या च शिल्पिका ।
बाला प्रव्रजिता चेति नायिकानां सखीजनः ॥ इति ।

न इति बहुवचनेनात्मनि लवङ्गिकाहृदयजागरूकबहुमानेन मञ्च-कतानिरासः सूचितः । भूय इत्यादि । मालत्यङ्कैस्ताम्यति खिद्यत इति कथितमेव लवङ्गिकयेत्यन्वयः ॥ अङ्कैरित्यत्राल्पार्थे कन् ॥ अल्प-ता मृदुत्वेन । बहुवचनात्सर्वाङ्गमुक्तम् । तथा च मृदुभिः सर्वाङ्गैरित्यर्थः । कीदृशैः । तं माधवं दृष्ट्वा दृष्ट्वा पुनः पुनरवलोक्य । गाढोत्कण्ठया दृढाका-ङ्क्षया लुलितलुलितैरतिम्लानकान्तिभिः । ललितलुलितैरिति पाठे पूर्वं ललितै रम्यैरधुना लुलितैर्म्लानैरित्यर्थः । कीदृशं सविधनगरीरथ्यया मालतीगृहनिकटराजमार्गेण भूयो भूयः पुनः पुनः पर्यटन्तं गच्छन्तम् । इह राजमार्गोपन्यासेन माधवस्य निःशङ्कः संचारो मालत्याश्च तद्द-र्शनेन परवितर्काभावः सूचितः । गमने पौनःपुन्येन दर्शनं प्रति दा-र्ढ्यमुक्तम् । दर्शने च पौनःपुन्येन तस्या उत्कण्ठातिशय उक्तः । यद्वा । प्रथमवीप्सया दर्शनं दृष्ट्वानुवृत्त्या प्रथमं रम्यवस्तुचमत्कारेण तत उद्भिद्यमानानुरागनवाङ्कुरेण नेत्रप्रीतिर्युज्यते । द्वितीयवीप्सया सहचरी-भिरप्यज्ञाता नयनप्रीतिरुक्ता । नगरीपदेन रथ्याया अनेककौतुकाधार-तोक्ता । तथा चेतस्ततोनेककौतुकदर्शनतरलितत्वेन माधवस्य सम्य-ग्दर्शनसंपादकनिकटार्थकसविधपदनिगर्व उक्तः । क्त्वा प्रत्ययेन चानन्त-रभाविविह्वलताया विषयान्तरसंचारिणापि व्यवधानस्यापादानादत्यन्तानु-रागोद्भेदः सूचितः । कथमन्तःपुरस्था सा ददर्शेत्यत आह । भवनेति । भवनस्य प्रासादादेर्या वलभ्युपरिकुटी तस्यां तुङ्गमुच्चं यद्वातायनं गवाक्षस्तत्रस्था । तुङ्गतया यथाकाङ्क्षदर्शनमुक्तम् । वातायनेत्यनेन वात-स्यायनं गमनं यत्रेति व्युत्पत्त्या घर्मादितापवती गभीरसमीरपरिशील-

साक्षात्कामं नवमिव रतिर्मालती माधवं य-

१०५ द्गाढोत्कण्ठा ललितलुलितैरङ्गकैस्ताम्यतीति ॥

अव०। बाढं जदो ताए वि अत्तणो विणोदणिमित्तं माहवपडिच्छन्दअं अहिलिहिदं तं लवङ्गिआए अज्ज मन्दारिआए हत्थे णिहिदं दाव। (क)

(क) बाढं, यतस्तयाप्यात्मनो विनोदनिमित्तं माधवप्रतिच्छन्दकमभिलिखितं तल्लवङ्गिकयाद्य मन्दारिकाया हस्ते निहितं तावत्।

नार्थं यातीति प्ररोहेण निरर्गलमस्या गमनं तत्रेति सूचितम्। यद्यपि सौधोपरिकुटीं वलभीं विदुरिति भवनपदमत्रगतार्थं तथाप्युक्तिपोषालंकारद्योतनार्थं भवनपदम्। यद्वा भवनरूपा वलभी मालतीवसतिः सौधोपरिकुटीत्यर्थः। एतेनास्या निजगृहाद्वलभीगमनं किमर्थमित्यन्याशङ्कापरिहारो निरर्गलं च तद्दर्शनं भवतीति ध्वनितम्। यथा रतिः कामकान्ता नवं दाहानन्तरमुत्पन्नं साक्षात्प्रत्यक्षं कामं दृष्ट्वाङ्गैस्ताम्यति तथेत्यर्थः। मालती रतिर्माधवश्च काम इति तयोर्बहललोकसंकुलेपि पथि रागसागरोन्योन्यं ववृध इति भावः। यद्वा कामोनङ्गतयाप्रत्यक्षो वृद्धश्च। अत्रोत्प्रेक्षा विशिष्टस्यैव। साक्षात्प्रत्यक्षं नवं काममिवेत्यर्थः। ताम्यतीत्यनेनोद्वेग उक्तः। यदाह भरतः।

चिन्तानिःश्वासखेदेन हृद्दाहाभिनयेन च।
श्लथाङ्गोपाङ्गचेष्टाभिरुद्वेगाभिनयो भवेत्॥ इति।

१०६-१०८ बाढमतितरामनुरक्ता मालतीत्यर्थः। विनोदः क्रीडा हर्षो वा। प्रतिच्छन्दकं प्रतिरूपकम्। तावत्पदेन मन्दारिकाहस्तनिधानस्य प्रकृतकार्योपक्रमः सूचितः। अत एव कामन्दक्या सुविहितमित्युक्तम्।

१ लुलितललित A. २ B. C. om. जदो; जं A. ३ तए A. D. ४ A. om. अत्तणो. ५ A. B. add. उक्कण्ठा before विणोद. ६ आलिहिदं. A.B.C.

काम० । विचिन्त्य । सुविहितं लवङ्गिकया यतो माधवानुचरः कलहंसकस्तां विहारदासीं मन्दारिकां कामयते तदनेन[1] तीर्थेन घटेत[2] तत्प्रतिच्छन्दकमुपोद्घातेन[3] माधवान्तिकमुपेयादित्यभिप्रायः[4] ।

अव० । माहवो वि कोदूहलमुप्पादिअ मए पउत्तमअणमहूसवं मअरंदुज्जाणं[5] अज्ज[6] पभादे अणुप्पेसिदो तत्थ[7] किल मालदी गमिस्सदि तदो अण्णोण्णदंसणं भोदु[8] त्ति । (क)

काम० । साधु[9] वत्से साधु । अनेन मत्प्रियाभियोगेन स्मारयसि मे पूर्वशिष्यां सौदामिनीम् ।

(क) माधवोपि कौतूहलमुत्पाद्य मया प्रवृत्तमदनमहोत्सवं मकरन्दोद्यानमद्य प्रभातेनुप्रेषितस्तत्र किल मालती गमिष्यति ततोन्योन्यदर्शनं भवत्विति ।

१०९–१११ विहारः सौगतप्रव्राजिकानामालयः । तत्र व्यापृता दासी विहारदासी । एतेन प्रकरणबाह्यत्वमुक्तम् । यदाह दण्डी ।

शाकारः कुट्टिनी दासी धर्मशास्त्रबहिष्कृताः ।
विटचेष्टादयो नित्यं बाह्याः प्रकरणे मताः ॥

तीर्थेन द्वारा । उपायेन वा ॥ तीर्थमुपायद्वारमन्त्रिष्विति विश्वः ॥ उपोद्घातेन प्रसङ्गेन । अभिप्रायस्तावदिति वादिन्यास्तवेति शेषः ।

११२–११९ अत्र ॥ कौतुकं तु कुतूहलमित्यमरः ॥ मदनमहोत्सवेन वसन्तकालः सूचितः । तस्य च वैवाहिकत्वम् । यदाह ।

शारत्सङ्ग्रामविषये विवाहे ज्येष्ठमाधवौ । इति ।

किल प्रसिद्धौ । इति हेतौ । अनुप्रेषणे तत्र किलेत्यादेर्हेतुत्वम् । अन्योन्यदर्शनेनोभयानुरागे विवाहनिर्वाहः । प्रिये प्रीतिविषये कार्येभियोग

---

१ इत्यनेन A. D. २ यत्प्रतिच्छंदकं B. ३ A. D. om. घटेत & उपोद्घातेन; B. C. उपोद्घाताय. ४ C. om. माध-प्रायः. ५ मअणुज्जाणं A. C. ६ A. B. C. om. अज्ज. ७ तहिं A. ८ होदु B. ९ वत्से साधु साधु. B.

अव० । भअवदि सा[1] सोदामिणी अहुणा समासादिदअच्चरिअम[2]न्तसिद्धिप्पहावा सिरीपव्वदे[3] कावालिअव्वदं धारेदि । (क)

काम० । कुतः पुनरियं वार्त्ता ।

अव० । अत्थि एत्थ णअरीए[4] महामसाणप्पदेसे करालो[5] णाम चामुण्डा । (ख)

काम० । अस्ति या[6] किल विविधजीवोपहारप्रियेति साहसिकानां प्रवादः ।

अव०[7] । तहिं क्खु सिरीपव्वदादो[8] आअदस्स रत्तिविहारिणो णादिदूरारण्णवासिणो साहअस्स[9] मुण्डधारिणो अघोरघण्टणामधेअस्स[10]

(क) भगवति सा सौदामिन्यधुना समासादिताश्चर्यमन्त्रसिद्धिप्रभावा श्रीपर्वते कापालिकव्रतं धारयति ।

(ख) अस्त्यत्र नगर्यां महाश्मशानप्रदेशे कराला नाम चामुण्डा ।

आसङ्गः । अत्र कपालव्रतं महाव्रतम् । कुत इत्यादिना श्मशानाङ्कसूचनम् ।

१२२–१२३ किल प्रसिद्धौ । विविधा नानारूपा जीवा मानुषादय उपहारा बलयः प्रिया यस्याः सा । अनेन मालत्युपहारः सूचितः । आत्मानिरपेक्षं कर्म साहसं तेन वर्तन्ते ते साहसिकाः । प्रवादः प्रसिद्धिः । इह प्रियेत्यस्यानन्तरमिति पदं देयमन्यथा पूर्वापरानन्वयात् । तथा च प्रियेत्यनेनाकारेण साहसिकानां प्रवाद इत्यर्थः । अत एव वाक्यार्थकर्मादावितेरध्याहारः ।

१२४–१२१ इह खलु प्रसिद्धौ । तस्याश्चामुण्डाया नातिदूरेणात्यासन्ने वस्तुं शीलं यस्य तस्य । एतेन देवकुलस्य लोकसंकुलतया

१ D. adds क्खु after सा. २ A.° रिअ° B. om. सिद्धि. ३ सिरिभ A. ४ णभरे A. C. ५ कराली C. ६ सा B.; C. om. या. ७ तं क्खु B. तत्थ क्खु D. ८ सिरि A. C. D. ९ °ध° B. C. १० °हे° D.

अन्तेवासिणी महाप्पभावा[1] कवालकुण्डला णाम अणुतंज्झं[2] समाअच्छदि तदो इअं पउत्ती। (क)

काम०। सर्वं[3] सौदामिन्यां[4] संभाव्यते।

अव०। अलं दाव एदिणा। भअवादि[5] सो वि सहअरो माहवस्स बालमित्तं[6] मअरन्दो[7] णन्दणस्स बहिणिं[8] मदअन्तिअं जइ समुव्वहदि तं पि माहवस्स दुदीअं[9] पिअं किदं[10] भोदि। (ख)

काम०। नियुक्तैव[11] तत्र मया मत्प्रियसखी[12] बुद्धरक्षिता।

(क) तत्र खलु श्रीपर्वतादागतस्य रात्रिविहारिणो नातिदूरारण्य[13]वासिनः साधकस्य मुण्डधारिणोऽघोरघण्टनामधेयस्यान्तेवासिनी महाप्रभावा कपालकुण्डला नामानुसंध्यं समागच्छति तत इयं प्रवृत्तिः।

(ख) अलं तावदेतेन। भगवति सोऽपि सहचरो माधवस्य बालमित्रं मकरन्दो नन्दनस्य भगिनीं मदयन्तिकां यदि समुद्वहति तदपि माधवस्य द्वितीयं प्रियं कृतं भवति।

किंचिद्विप्रकृष्टं साधकसंस्थानमुक्तम्। साधकस्य योगिनः। मुण्डधारिणः कापालिकस्य। अघोरघण्टेति।

कापालिकास्तु घण्टान्तनामानः समुदाहृताः॥

इति भरतः। अघोरोऽविमृश्यकारीति नामव्युत्पत्तिः। अनुसंध्यं संध्यायाम्। प्रवृत्तिर्वार्त्ता। सर्वमघोरघण्टनाशनमाधवरक्षणादिकम्। अत्रैतेन कापालिकादेः कथनेनालं निष्फलमधुनानुपयोगात्। बालमिति भावप्रधानं तेन बाल्यान्मित्रमित्यर्थः। समुद्वहति विवहति।

१३२–१३८ बुद्धरक्षितेत्यनेन भिक्षुकीत्वं सूचितम्। अत एव

---

१. °हा° B. D. २ °संझं D.; C. adds णअरे before समाअ°. ३ सर्वं हि B. C. तत्सौदा° सर्वं D. ४ °न्याः C. D. ५ एसो A. D. ६ °मित्तो A. D. ७ A. adds णाम. ८ A. adds णाम after पि. ९ °दि° B. C. १० कदं C. D. ११ हि तत्र D. १२ तत्प्रि° A. C. १३ Com. inserts तस्या before नातिदूर°.

अव० । सुविहिदं भअवदीए[1] । (क)

काम० । विचिन्त्य[2] । तदुत्तिष्ठ माधवप्रवृत्तिमुपलभ्य मालतीमेव पश्यावः[3] ।

उभे[4] उत्तिष्ठतः ।

काम० । विचिन्त्य । अत्युदार[5]प्रकृतिर्मालती तन्निपुणं[6] निसृष्टार्थदूतीकल्पः सूत्रयितव्यः[7] । सर्वथा

शरज्ज्योत्स्ना कान्तं कुमुदमिव तं नन्दयतु सा

(क) सुविहितं भगवत्या ।

दौत्ये नियुक्ता ॥ उत्तिष्ठत्यत्रोर्ध्वकर्मत्वान्न तङ् ॥ अत्युदात्ता गभीरा प्रतिपन्नार्थसंवादिनी प्रकृतिर्यस्याः सा तथा । निसृष्टार्थेति । नायिकाया नायकस्य वा मनोरथं ज्ञात्वा स्वमत्या कार्यं साधयति सा निसृष्टार्था दूती तस्याः कल्पो व्यापारः प्रस्तावनीय इत्यर्थः । दूती च त्रिविधा । यदाह ।

निसृष्टार्था मितार्था च तथा शासनहारिका ।

सामर्थ्यात्पादितार्हीना दूती तु त्रिविधा मता ॥ इति ।

१३९–१४३ शरदित्यादि । सा मालती तं माधवं नन्दयतु प्रीणातु । यथा शरच्चन्द्रिका कुमुदं नन्दयति । यथा चन्द्रिकाकुमुदयो नित्यं प्रीतिस्तथा तयोरप्यस्त्विति भावः । कीदृशम् । कान्तं रम्यम् । सुजातं शोभनजन्मानम् । शोभनता च गुणवत्त्वेन । यद्वा । कान्तमन्यस्त्रीभोगचिह्नशून्यम् । यदाह भरतः ।

अन्यस्त्रीभोगसंभूतं चिह्नं यस्य न विद्यते ।

देहे वाप्यधरे वापि स कान्त इति कीर्तितः ॥

सा कीदृशी । कल्याणी निरवद्या । स च युवा कल्याणी विवाहकल्याणयोगी संस्तां प्राप्य कृतकृत्यः कृतार्थो भवतु । युवेत्यनेन कन्यायां

---

१ A. B. add किदं. २ B. om. ३ पश्यामः B. ४ A. D. insert इति before उभे. ५ अत्युदात्त Com. ६ B. om. निपुणं. ७ तन्त्रयितव्यः A. कल्पयितव्यः D.

सुजातं कल्याणि भवतु कृतकृत्यः स च युवा ।
वरीयानन्योन्यप्रगुणगुण[1]निर्माणनिपुणो
विधातुर्व्यापारः फलतु च मनोज्ञश्च भवतु ॥

इति निष्क्रान्ते विष्कम्भकः ।

ततः प्रविशति गृहीतचित्रो[2]पकरणः कलहंसः ।

कल० । कहिं दाणिं तु[3]लिदमअरद्ध[4]अरूआवलेओ[5]विब्भमावखित्त[6]मा-
लदीहिअअमाहप्पं णाह[7]माहवं पेक्खिस्सं । परिक्रम्य । परिस्सन्तोह्मि[8]

मदनमदोद्दीपकतायोगित्वमुक्तम् । एवं सति विधातुः प्रयत्नः सफलो भवतु मनोहरश्च भूपनन्दनाविरोधेन सर्वावर्जकोस्त्वित्यर्थः । कीदृशः अन्योन्यं कामिनोः प्रगुणा अनुरूपा ये गुणास्तेषां निर्माणे कुशलोत एव वरीयाञ्श्रेष्ठः गरीयान्गुरुर्वा । यद्वा । अन्योन्यं प्रगुणा उत्कृष्टा ये गुणास्तेषां निर्माणे कुशलः । निष्क्रान्ते कामन्दक्यवलोकिते । विष्कम्भक इति ।

कुतोपि स्वेच्छया प्राप्तः संबन्धेनोभयोरपि ।
विष्कम्भकः स विज्ञेयो यस्तु काव्यार्थसूचकः ॥
विष्कम्भस्तु द्विधा सोयं शुद्धः संकीर्ण एव च ।
शुद्धो मध्यमपात्रेण संकीर्णो मध्यमाधमैः ॥

इति भरतः ।

१४४–१४८ उपकरणमुपढौकनम् । अत्र तुलितो मकरध्वजस्य कामस्यावलेपो गर्वो येन रूपविभ्रमेण सौन्दर्यविलासेन तेनावक्षिप्तं तिरस्कृतं मालतीहृदयस्य माहात्म्यं गाम्भीर्यं येन तम् ॥ अवलेपः स्मृतो गर्व इति

---

१ निर्माणमविभौ B. २ °चित्रफलकः C. ३ तुलिभ D. ४ °ज° B. ५ C. om. रूभ; आवलेभं B. C. °लेवविं° A. ६ आक्खित्त B. विखत्त C. ७ C. om. णाह. ८ °स्संतह्मि C.

जाव ई[1]मस्सिं उज्जाणे मुहुत्तं[2] वि[3]स्सामिअ मअरन्दणन्दणं[4] णा[5]हमाहवं पेक्खिस्सं । (क)

इति प्रविश्यो[6]पविशति ।

ततः प्रविशति मकरन्दः ॥

मक०। कथितम[7]वलोकितया [8]मदनोद्यानं गतो माधव इति । भवतु तत्रैव[9] गच्छामि । परिक्रम्यावलोक्य च । दिष्ट्या[10]यं[11] वयस्य इत एवाभिवर्त्तते । निरूप्य । अस्य तु

(क) कुत्रेदानीं तुलितमकरध्वजरूपावलेपविभ्रमाक्षिप्तमालतीहृदयमाहात्म्यं नाथमाधवं प्रेक्षिष्ये । परिश्रान्तोस्मि या[12]वदस्मिन्नुद्याने मुहूर्त्तं विश्रम्य मकरन्दनन्दनं नाथमाधवं प्रेक्षिष्ये ।

शाश्वतः॥ मकरन्दस्य नन्दनं हर्षकम् । कलहंसो राजहंसः । स च शरदि विराजमानोपि योगिनीप्रभावाद्वसन्ते मिलित इति नामाभिप्रायः ।

१५२-१५७ दिष्ट्येत्यव्ययं हर्षे । माधवस्य वसन्तस्य मकरन्दः पुष्परसः सहचरो युज्यत एव । इत एवात्रैव । इह शृङ्गारो द्विविधः । यदाह भरतः ।

संभोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः ।

संभोगोपि विप्रलम्भपूर्वक एव स्वदते । यदाह ।

न विना विप्रलम्भेन संभोगः पुष्टिमर्हति ।
कषायिते हि वस्त्रादौ भूयान्रागोभिजायते ॥

स च दशारम्भः । यदाह भरतः ।

अप्राप्तरतिभोगस्य नवस्त्रीरागजन्मनः ।
दश स्थानानि कामस्य काममन्तर्विसर्पतः ॥

---

१ इह A. D. २ मुहुत्तअं B. ३ °स° B. C. ४ °सहअरं A. ५ B. C. om. णाह. ६ परिक्रम्य° B. D. ७ कथितं मेवलो° C. ८ B. C. D. insert. यथा before मदनो०, ९ B. om. एव. १० दृष्ट्वा A. ११ A. om. दिष्ट्या; D. om. अयं. १२ तावत् Com.

गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं
श्वसितमधिकं किं न्वेतत्स्यात्किमन्यदितोथ वा। १५५

अभिलाषोत्र प्रथमे द्वितीये चिन्तनं तथा।
अनुस्मृतिस्तृतीये च चतुर्थे गुणकीर्तनम्॥
उद्वेगः पञ्चमे ज्ञेयो विलापः षष्ठ उच्यते।
उन्मादः सप्तमे प्रोक्तो भवेद्व्याधिस्तथाष्टमे॥
नवमे जडता प्रोक्ता दशमे मरणं भवेत्॥ इति।

तदिहानुस्मृत्यवस्थो माधवो मकरन्देन कथ्यते। गमनमिति। अस्य गमनमलसं मन्दं न तु शरीरे हस्तादेराकुञ्चनप्रसारणात्। अन्तरान्तरा विलम्बस्यात्यन्तासक्तिवशाज्जायमानत्वाच्च। इदमनुस्मृतिचिन्हम्। यदाह।

मुहुर्मुहुर्निःश्वसितैरधोमुखविचिन्तनैः।
अन्विषादन्यकार्याणां कथितानुस्मृतिर्यथा॥

तथा यतो मामपि न पश्यति ततोन्तःकरणं क्वापि लग्नम्। तथा च चिन्तासंततिपरतया ध्यानावधानेन शून्या बाह्यार्थाग्राहिणी दृष्टिरस्य। यदाह।

शून्या दृष्टिः स्मृता चिन्तासंमोहप्रणयादिषु।

शून्यदृष्टिलक्षणमप्याह।

निश्चला समतारा च ध्यानाद्बाह्यमगृण्हती।
तथा समपुटोपेता शून्या दृष्टिरुदाहृता॥

तथा मनस्तापवतो ग्लानिः। सा च क्षीणकपोलतादिनोन्नीयते। अत उक्तं शरीरमसौष्ठवं विकलम्। इष्टजनालाभभावनार्थमाह श्वसितमधिकम्। एतत्किं नु स्यात्। एतदलसगमनत्वादिकं रोगजं कामकृतं वेति वितर्क इत्यर्थः। रोगलिङ्गाभावादनङ्गलिङ्गसङ्गाच्च निश्चयमाह किम-

१ वे॰ A. B. C. D.

भ्रमति भुवने कन्दर्पाज्ञा विकारि च यौवनं
ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम् ॥

ततः प्रविशति यथानिर्दिष्टो माधवः ।

माधवः । स्वगतम् । तामिन्दुसुन्दरमुखीं सुचिरं विभाव्य
चेतः कथं कथमपि व्यपवर्तते मे ।

न्यदिति । अथ वा पक्षान्तरे । इतः कामात्किमन्यन्नान्यदित्यर्थः । किं-शब्दो निषेधे । अत्र पांशुक्रीडनात्प्रभृत्यनुभूतमाधवशरीरे तत्तद्विकारदर्शनात्तर्कविद्याविदो मकरन्दस्य परिच्छेदो युज्यत एवेति । निश्चयलिङ्गमाह । भुवने कन्दर्पाज्ञा भ्रमति सर्वं जनमास्कन्दति । विकर्तुं शीलमस्येति विकारि । पूर्वदशात्यागेन दशान्तरयोगो विकारस्तद्योगि यौवनम् । अयं तु युवेत्यर्थः । अत्र भ्रमतिपदेनानवच्छिन्नक्रियता तद्द्वारा सर्वकालता । भुवनपदेन सर्वदेशता । आज्ञापदेन युक्तिजिज्ञासां विना स्वीकारः । विकारिपदेन माधवाङ्गीकारिता च ध्वनिता । ललिताः सुन्दरा मधुराः परिभाव्यमानास्ते ते प्रसिद्धा भावा रमणीवदनविभ्रमादयो धीरतां धैर्यं क्षिपन्त्यपनयन्ति । तदनेन कामकृतमेतदुन्नीयत इति भावः । प्रकृतिमधुरा इत्यपि पाठः । तत्र प्रकृत्या स्वभावत एव मधुरा मनोहराः ।

१५८–१६२ माधवप्रवेश इह द्विपदिकया । यदाह ।

शोकविभ्रमयुक्ते तु व्याधिचिन्तासमाश्रिते ।
श्रुतवार्तादिवैरूप्ये योज्या द्विपदिका बुधैः । इति ।

स्वगतमिति ।

यत्त्वश्राव्यं न सर्वस्य स्वगतं तदिहोच्यते ॥

इति भरतः । अनुस्मृतिमाह तामित्यादि । तां नायिकामचिरमधुनैव विचिन्त्य कथं मम चेतः ॥ कर्तृ ॥ कथमपि महता कष्टेन व्यपवर्तते व्याव-

---

१. प्रकृतिमधुराः noticed by Com.

लज्जां विजित्य विनयं विनिवार्य धैर्य-
मुन्मथ्य मन्थरविवेकमकाण्ड एव ॥
आश्चर्यम् । यद्विस्मयस्तिमितमस्तमितान्यभाव-
मानन्दमन्दममृतप्लवनादिवाभूत्[1] ।

र्तते नागच्छति वा । तस्यां लग्नं तामेव धावतीत्यर्थः । किं कृत्वा । बालत्वेन कुलीनत्वेन च या लज्जा तामकाण्ड एवाप्रस्ताव एव विजित्य । रभसकाल एव हि लज्जाद्यभावप्रस्ताव इति भावः । विनयं मनोमलक्षालनोपदेशं दूरीकृत्य । महानायकतया साहजिकं धीरत्वमुन्मूल्य । कीदृशम् । मन्थरो मन्दो विवेक इतिकर्तव्यता यत्र तत् । क्रियाविशेषणं वा । कीदृशीम् । इन्दोश्चन्द्रात्सुन्दरं मुखं यस्यास्ताम् ॥ वैयधिकरण्येपि गमकत्वात्समासः ॥ इह तामित्यनुस्मृतिरिन्दुसुन्दरेति गुणकीर्तनं विभाव्येति चक्षुःप्रीतिः कथमपीत्युद्वेगो लज्जां विजित्येत्युन्मादो मन्थरविवेकमिति जडतेत्यनेकावस्थोक्ता ।

१६३–१६६ यदित्यादि । तत्संनिधौ यन्मदीयं हृदयं विस्मयेनाद्भुतरसेन स्तिमितं निश्चलम् । एतेन स्तम्भ उक्तः । अत एवास्तमितो नाशं प्रापितोन्यो भावो विस्मयातिरिक्तो धर्मो यत्र तत् । अनेन जडतोक्ता । यदाह ।

इष्टं वानिष्टं वा सुखदुःखे वा न वेत्ति यो मोहात् ।
तूष्णीकः परवशगः स भवति जडसंज्ञकः पुरुषः ॥

आनन्देन निरन्तरसुखेन मन्दं मन्थरं चाभूत् । अमृतप्लवनादिव सुधासेकादिव । अथ च योगाभ्यासेन कुण्डलिन्याचरणेनामृतसेकादिवेत्यर्थः । तत्रापि परमानन्दसंदोहो भवत्येव । एतेनाद्भुतनायिकादर्शनजातभावभरमन्थरता दर्शिता । तद्धृदयमधुना तद्वियोगेङ्गारचुम्बितमिवाङ्गारावस्पृष्टमिव व्यथमानं पीडायुक्तमास्त इत्याश्चर्यम् । न च प्रियासङ्गे

१ आनन्दसान्द्र° B. D.

तत्संनिधौ तदधुना हृदयं मदीय-
मङ्गारचुम्बितमिव व्यथमानमास्ते ॥

मक० । सखे माधव इत इतः ।

माध० । परिक्रम्य[१] । कथं प्रियवयस्यो मम मकरन्दः ।

मक० । उपसृत्य[२] । सखे माधव[३] ललाटंतपस्तपति तपनस्तदस्मि-[४]न्नुद्याने मुहूर्तमुपविशावः ।

माध० । यदभिरुचितं वयस्याय[५] । इत्युभावुपविशतः ।

कल० । दृष्ट्वा । कथं मअरन्दसहअरो इदं[६] ज्जेव्व बालवउलुज्जाणं[७] अलंकरेदि णाहमाहवो[८] ता[९] दंसेमि से[१०] मअणवेअणाविज्झुरन्तमाल-[११]दीलोअणसुहावहं अत्तणो पडिच्छन्दअं । अहवा मुहुत्तं[१२] विस्साम-सोक्खं दाव अणुभोदु[१३] । (क)

(क) कथं मकरन्दसहचर इदमेव बालवकुलोद्यानमलंकरोति नाथ-माधवस्तद्दर्शयामि मदनवेदनाखिद्यमानमालतीलोचनसुखावहमात्मनो-स्य प्रतिच्छन्दकम् । अथवा मुहूर्तं[१४] विश्रामसौख्यं तावदनुभवतु ।

सुखं तद्वियोगे दुःखमिति दृष्टचरमेव तत्कथमाश्चर्यमिति वाच्यम् । अ-ननुभूतरसस्य तस्य शिशुत्वेन किमिदं यदकाण्ड एव व्यथेति तत्संभवात् ।

१६७–१७५ इत इहागच्छेत्यर्थः ॥ आद्यादित्वात्तसिः ॥ एतेन माधवस्य बाह्यार्थाग्रहान्मित्रादर्शनं सूचितम् । ललाटं तपति ललाटं-तपः ॥ असूर्यललाटयोरिति खश् प्रत्ययः । खित्वान्मुम् ॥ माधवीयम-न्मथोन्मादमपन्होतुकामस्येदं वचनम् ॥ वयस्यायेति रुच्यर्थानां प्रीयमा-ण इति संप्रदानता ॥ अत्र मकरन्देन पुष्परसेन सहचरो माधवो वस-

१ B. adds दृष्ट्वा, २ C. om. उपसृत्य. ३ A. D. om. माधव. ४ घर्मांशुः A. D.; B. adds इयं च ते शरीरावस्था. ५ यथा प्रियवयस्याय रोचते A. ६ इमं B. C. इदो D. ७ B. om. वउल. ८ A. C. om. णाह. ९ C. D. insert किं after ता. १० A. D. have this से after अत्तणो. ११ खिद्दमाण A. D. १२ B. C. om मुहुत्तं and insert माहवो. १३ °होदु B. १४ Com. adds चेह after मुहूर्तं.

मक० । तदस्यैव तावदुच्छ्वासितकुसुमकेसरकषायशीतलामोदवासितोद्यानस्य काञ्चनार[1]पादपस्याधस्तादुपविशावः । तथा कुरुतः ।

मक० । वयस्य माधव । अद्य[2] किल सकलनगराङ्गनाजनप्रवर्तितमहोत्सवाभिराममदनो[3]द्यानयात्राप्रतिनिवृत्त[4]मन्यादृशं भवन्तमवधारयामि । अपि नाम मनागवतीर्णोऽसि रतिरमणबाणगोचरम् ।

माधवः सलज्ज[5]मधोमुखस्तिष्ठति ।

मक० । विहस्य । तत्किमवनतमुग्धमुखपुण्डरीकःस्थितो[6]ऽसि । पठति ।

अन्येषु जन्तुषु रजस्तमसावृतेषु[7]

न्तो बालबकुलमलंकरोतीति ध्वनिरप्युन्मिषति । मुहूर्तं चेत्यत्र सुस्थिते चित्ते वक्तुं युक्तमिति भावः ।

१७६—१७७ उत्फुल्लपुष्पाणां ये केसराः किञ्जल्कास्तैः कषायो लोहितः शीतलश्च य आमोदस्तेन वासितं सुगन्धीकृतमुद्यानं येन तस्य ॥ कषायः सुरभौ लोहितेऽप्यवदिति मेदिनीकारः ॥ कषायादिसंबन्धेन सौरभस्यातिगभीरतोक्ता । आमुद्यतेनेनेत्यामोद इति । कषायादिसंपदे काञ्चनारेत्युक्तम् ।

१७८—१८० प्रवर्तितः कृतः । अभिरामेति यात्रान्वयि । इह मकरन्दवचनेन नर्मरूपा प्रतिमुखसंधिरुक्ता । यदाह ।

शृङ्गारार्थं त्रपाकारि वाक्यं गोष्ठीषु नर्म तत् । इति ।

अपिः समुच्चये । नाम संभावनायाम् । इदं संभाव्यतापीत्यर्थः । मनागल्पम् । रतिरमणः कामः ।

१८२—१८६ मुग्धं किंकर्तव्यताशून्यम् । पुण्डरीकं सितपद्मम् । विरहधूसरत्वेन मुखस्य पुण्डरीकसाम्यम् । तस्य लज्जयाकथनमाशङ्क्याहान्येष्वित्यादि । माधव तवापह्नुतिर्लज्जया कथंचिदपि मा भूत् ।

---

१ काञ्चन A. C. २ अद्यैव तावत् A. D. ३ कामदेव B. C. ४ अभिनिवृत्त A. D. ५ लज्जया A. D. ६ तिष्ठसि A. D. ७ बहिस्तमसा B.

विश्वस्य धातरि समः परमेश्वरे च[1] ।
१८९ सोयं प्रसिद्धविभवः खलु[2] चित्तजन्मा
मा लज्जया तव कथंचिदपह्नुतिर्भूत् ॥

माध० । वयस्य किं न कथयामि श्रूयताम् । गतोहमवलोकिताजनितकौतुकः[3] कामदेवायतनं तत्र चेतस्ततः[4] परिक्रम्यावलोक्य च परिश्रमादुल्लसितमदिरामोदमधुर[6]परिमलाकृष्टसंकलमिलदलिपटलसंकुलाकु-
१९० लितबकुलमुकुलावलीमनोहराभरणरमणीयस्याङ्गनभुवो बालबकुलस्यालवालपरिसरे स्थितः । तस्य च यदृच्छया निरन्तरनिपतितानि

लज्जयापह्नवं मा कुथाः । एवमप्रतीकारः स्यादिति भावः । खलु यतः सोयं चित्तजन्मा कामः प्रख्यातपौरुषः । चित्तोन्माथविषय इति भावः । कीदृशः । विश्वस्य धातरि जगत्स्रष्टरि परमेश्वरे हरेऽन्येषु जन्तुषु मानुषादिषु च रजस्तमोगुणप्रधानेषु समस्तुल्यव्यापारः । यद्वा । अन्येषु मानुषादिषु रजस्तमसावृतेषु च तिर्यग्योनिषु विश्वस्य धातरि ब्रह्मणि परमेश्वरे हरे च सम इति भिन्नमेव योज्यम् । अतो लज्जां त्यक्त्वा कथयेति भावः ।

१८७—१९६ परिश्रमास्थित इत्यन्वयः । परिश्रमास्थितोहं न तु साकाङ्क्षत्वादिति भावः । मदिरामोदवन्मनोहरो यः परिमलः शुभगन्धः ॥ स्याच्छुभगन्धे परिमल इति विश्वः ॥ मिलन्मिलितम् । संकुलेन व्याप्ताकुलिता या बकुलमुकुलावली विकासाभिमुखकालिकाराजिः सैव मनोहरमाभरणं तेन रमणीयस्य । यद्वा । मदिरामोदेन मधुर इति समासः । तेन मदिरामोदस्य बकुलपुष्पोद्गमं प्रति दोहदत्वमाह । अङ्गनभुवोङ्गनस्थस्य । अनेन निकटवर्तिनः सेकादिना मनोज्ञता दर्शिता ।

१ अपि B. २ किल A. ३ कौतूहलः B. ४ B. C. om. च. ५ श्रमादुन्मिन B. ६ मनोहर B. ७ आकृष्टमिलिन्दपटलसंकुल B. ८ B. C. om. बकुल. ९ विकासिनानि B. विकासिनानिरंतराणि C.

कुसुमान्यादाय विदग्धरचनामनोहरां स्रजमभिनिर्मातुमारब्धवानास्मि । अनन्तरं च संचारिणीव देवस्य मकरकेतोर्[1]जगद्विजयवैजयन्तिका निर्गत्य गर्भभवनादुज्ज्वलविदग्धमुग्ध[2]नेपथ्यविरचनाविभावि-
तकुमारीभावा महानुभावप्रकृतिरत्युदारपरिजना कापि तत एवा- १९६
गतवती ।

सा रामणीयकनिधेरधिदेवता वा

इहाङ्गणपदेनुविधायकाभावाण्णत्वश्रुतिरयुक्ता ॥ पृषोदरादित्वाण्णत्वमित्यपि वचोमूलकमेव प्रत्युताङ्गनं प्राङ्गणे जाले कामिन्यामङ्गना मतेति विश्वादिकोषास्तवर्गपञ्चमोपान्तमङ्गनं केवलमिति शब्दप्रकाशाच्च नान्तत्वमेवेत्यवधेयम् । आलवालं खलु इति [अळें इति पालेति-पाठन्त०] ख्यातम् ॥ स्यादालवालमावालमम्भसां यत्र धारणमित्यमरः ॥ विदग्धेति । मालानिर्माणं कामशास्त्रवैदग्ध्यद्योतनाय । उक्तं च मालाग्रथनविकल्पा इत्यादिनेति भावः । अतिसुकुमारतया कामिनोर्मनोहरतया सुगन्धितया सुन्दरतया चान्यपुष्पाणि त्यक्त्वा बकुलपुष्पैर्मालाग्रथनमिह । अत एव दमयन्तीस्वयंवरादावपि बकुलमालासममधूकमालापरिग्रहः । संचारणी गमनशीला मकरकेतोः कामस्य वैजयन्तिका पताका । गर्भभवनान्मध्यावासादुज्ज्वलया निर्मलयाग्राम्यया च शिशुप्रसाधनविरचनयोन्नीतः कुमारीभावः कुमारित्वं यस्याः । कुमारित्वमावगुण्ठनपटाद्यभावात्तदुन्नयनमिति भावः । महानुभावप्रकृतिरतिप्रभावस्वभावा । अत्युदारो महान्दाक्षिणो वा ॥ उदारो महति दाक्षिण इति शाश्वतः ॥ परिजनदाक्षिण्यं सांनिध्यानयनेन ज्ञेयम् । तत एव तत्रैव ।

१९७–२०० तद्गुणकीर्तनमाह सेत्यादि । सा स्त्री रामणीयकस्य मनोहरताया निधेराधारस्याधिदेवताधिष्ठात्री देवता । यद्वा ।

---

१ मकरकेतनस्य B. C. २ B. inserts बाल after मुग्ध.

सौन्दर्यसारसमुदायनिकेतनं वा ।
तस्याः सखे नियतमिन्दुसुधामृणाल-
ज्योत्स्नादि कारणमभून्मदनश्च वेधाः ॥

रामणीयकमेव निधिस्तस्याधिष्ठात्री रक्षिका देवता । सौन्दर्यसारसमुदायस्य कान्तिनिर्यासपूरस्य निकेतनं गृहं वा । निकेतनस्याजहल्लिङ्गतया सामानाधिकरण्यम् । मनोहरत्वं कान्तिमत्त्वं च तत्रैव दृष्टमिति भावः । वा समुच्चये । यद्वा । वा विकल्पे तत्र निर्णेतुं न शक्यत इति विकल्पार्थः । यद्वा । वेवार्थे रामणीयकनिधेर्देवतेवेत्यर्थः ॥ वा स्याद्विकल्पोपमयोरिवार्थेपि समुच्चय इति विश्वः ॥ यद्वा । रामणीयकं रूपादिसंपत्तिस्तन्निधेरधिदेवता । अनेन शोभोक्ता । यदाह ।

रूपयौवनलावण्यैरुपभोगोपबृंहितैः ।
अलंकरणमङ्गानां शोभेति परिकीर्तिता ॥

सौन्दर्येत्यादिना कान्तिरुक्ता । यदाह ।

शोभैव कुसुमास्त्रेण पूरिता कान्तिरुच्यते ।

अतोनयोर्भेदः । अत्यन्तविलक्षणां तामालोक्योत्प्रेक्षते । नियतं नूनं तस्याः कारणं समवायिकारणमिन्दुसुधामृणालज्योत्स्नादिकमभूत् । चन्द्रो मुखस्य सुधाधरस्य मृणालं भुजयोर्ज्योत्स्ना लावण्यादीनामिति भावः । आदिपदेन पद्मौ पादयोः किसलयौ चरणयोरिति ग्राह्यम् । सर्वोपमाद्रव्यघटितेयमिति भावः । एवं मदन एवास्या वेधाः स्रष्टाभूत् । चकारोवधारणे । वेदजडस्य पुराणस्य ब्रह्मणो नात्र निर्माणकौशलमिति भावः । अत्र कामस्य स्रष्टृत्वेनाश्रुतत्वात्कथमिति न देश्यम् । अस्या मोहनीत्वेन मोहनपटुकामजन्यत्वोत्प्रेक्षणात् । अदृष्टचरत्वस्योत्प्रेक्षायामनुकूलत्वात् । असदारोपणस्योत्प्रेक्षात्वात् । नियतपदमुत्प्रेक्षाव्यञ्जकम् । नूनमित्येवमादिभिरिति वचनात् ।

अथ सा प्रणयिनीभिरनु[1]चरीभिरविरलकुसुमसंचयावचयलीलादोहदिनीभिरभ्यर्थ्यमाना तमेव [2]बकुलपादपोद्देशमागत[3]वती। तस्याश्च कस्मिं[4]श्चिदपि महाभागधेयजन्मनि बहुदिवसोपचीयमानामिव मन्मथ[5]व्यथाविकारमुपलक्षित[6]वानस्मि।

यतो[7]ऽस्याः। परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः
कथमपि परिवारप्रार्थनाभिः क्रियासु।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मी-

२०१–२०४ प्रणयिनी स्निग्धा। अनुचरी दासी। संचयः समूहः। अवचयस्त्रोटनम्। दोहदोऽभिलाषः। सहर्षमाह तमेवेति। स्वोद्देशेनाह कस्मिन्नपीति॥ भागधेयं भाग्यमित्यमरः॥ इहानुमानरूपो गर्भसंधिः कस्मिंश्चिदित्यनेनोक्तः। यदाह।

व्याप्येन व्यापकज्ञानमनुमानमुदीरितम्। इति।

२०५–२११ विकारचिह्नमाह परिमृदितेति। यथास्या अङ्गं परिमृदिता मर्दनविषयीकृता या मृणाली बिसलता तद्वन्म्लानम्। क्रियासु ताम्बूलभक्षणादिषु परिजनयाचनाभिरस्याः कथमपि प्रवृत्तिः। इह मृणालीपदेन तनुता म्लान्या निद्राच्छेदः कथमपीत्यादिना विषयनिवृत्तिः कथिता। तनुत्वम्लानत्वमान्द्यैर्ग्लानिरुक्ता। यदाह।

ग्लानौ तनुत्ववैवर्ण्यमन्दतादिनिदर्शनम्।

ननु तनुत्वादिना व्यभिचारिणा कथं कामविकारोन्नयनमत आह। कलयतीति। तस्याः कपोलो हिमांशोः शोभां कलयति। अनेन पाण्डुता दर्शिता। कीदृशः। नूतनदन्तिदन्तखण्डगौरः। छिद्यत इति च्छेदः खण्डः। इहाभिनवपदेन सपुलकत्वं ध्वनितम्। तथा च कपोलपाण्डु-

१ B. om. अनुचरीभिः. २ बालबकुल. A. D. ३ आगता B. ४ कस्मिन्नपि B. C. ५ C. om. व्यथा. ६ उपलब्धवान् A. D. ७ यतः A. B. C.

मभिनवकरिदन्तच्छेदपाण्डुः[1] कपोलः ॥

सा पुनर्मम[2] प्रथमदर्शनात्प्रभृत्यमृतवर्तिरिव[3] चक्षुषोर्निरतिशं[4]यमानन्दमुत्पादयन्त्ययस्कान्तमणिशलाकेव[5] लोहधातुमन्तःकरणमाकृष्टवती[6] । किं बहुना ।

संतापसंततिमहाव्यसनाय तस्या-

त्वसपुलकत्वादिना कामविकारव्यापेन तदुन्नयनमिति भावः । विरहे पाण्डुतापि । यदाह ।

अङ्गस्यासौष्ठवं तापः पाण्डुता कृशता रतिः ।

वर्तिर्नेत्राञ्जनलेखा । अयस्कान्तो लोहाकर्षको मणिः । लोहधातुर्लोहरूपं द्रव्यम् । अन्तःकरणं मनः । ममान्तःकरणमाकृष्टवतीत्यर्थः । किं बहुनेत्यनेन सखेदनिःश्वाससूचनम् ।

२१२–२१५ संतापेत्यादि । ममैतच्चेतस्तस्यां विषय आसक्तं समन्तात्प्रमस्तीत्यर्थः । संतापपरंपरैव महाव्यसनं तदर्थम् ॥ तादर्थ्ये चतुर्थी ॥ संततिपदेन मालतीलाभमन्तरेण यावज्जीवमविच्छेदस्तदलाभे प्राणहानिश्चोक्ता । कीदृशम् । अनपेक्षितनिमित्तम् । एतेन विषयालाभेप्यस्य स्वाभाविकी प्रीतिरुक्ता । यदाह ।

अभ्यासादभिमानाच्च तथा संप्रत्ययादपि ।
विषयेभ्यश्च तत्त्वज्ञा विदुः प्रीतिं चतुर्विधाम् ॥

अनेन निजमुच्छृङ्खलत्वमपि निरस्तम् । अत एवाह प्राय इति । बाहुल्येन भगवती भवितव्यतावश्यंभावि प्राक्तनकर्म जीवानां शुभमशुभं च विदधाति । अत एव सा सर्वंकषा सर्वहरा । तथा च ममावश्यकं दुःखं त्वं तु

---

१ कांत B. दांत C. २ A. om. पुनर्. ३ प्रथमदर्शनक्षणात्प्रभृति A. D. ४ नयनयोः C. ५ अतिशयानन्दं A. D. निरंतरमानंदं C. ६ आक्षिप्तवती सर्वथा B. C.

मासक्तमेतदनपेक्षितहेतु चेतः ।
प्रायः शुभं च विदधात्यशुभं च जन्तोः
सर्वंकषा भगवती भवितव्यतैव ॥ २१९

मक० । वयस्य माधव । स्नेहश्च निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत्[1] । पश्य ।

व्यतिषजति पदार्थानान्तरः[2] कोऽपि हेतु-
र्न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं २२०

यथोचितं कुर्या इति भावः ॥ आसक्तेत्याङ्पूर्वात् षञ्ज् समवाये क्तः सर्वंकषेति खच्प्रत्यये खित्वान्मुम् ॥

२१६–२२१ माधवोक्तप्रीतेरनिमित्तकत्वमुपपादयति । स्नेह इति निमित्तमिह द्वयं बाह्यमाभ्यन्तरं च तदिह बाह्यहेत्वपेक्षः स्नेहोऽस्थिर एव । निमित्तनिवृत्तौ तन्निवृत्तेरावश्यकत्वात् । अत आन्तरनिमित्तापेक्षैव स्नेहस्येति भावः । विप्रतिषिद्धं विरुद्धं बाह्यनिमित्तापेक्षया विरोध इति भावः । स्वोक्ते युक्तिमाह । व्यतिषजतीत्यादि । आन्तरो हेतुः कोऽप्यनिर्वचनीयः पदार्थान्नरनारीप्रभृतीन्व्यतिषजति विशेषतो मेलयति । यतः प्रीतयो बहिरुपाधीन्बाह्यहेतून्सौन्दर्यादीन्न संश्रयन्ते प्रकर्षेणावलम्बन्ते । अत्र कोऽपीत्यनेन जन्मान्तरानुभवजनितसंस्कारताध्वनिः । न खल्वित्यनेन दृष्टश्रुतानुमितसकलैहिकोपाधिनिषेधात्तथावसायः । अत एव विशेषप्रकर्षद्योतकाभ्यामुपसर्गाभ्यामासङ्गस्य जीवितावधित्वमुक्तम् । उक्तं द्रढयति । यतः पतङ्गस्य सूर्यस्योदये पुण्डरीकं विकसति चन्द्र उद्गत उदिते सति चन्द्रकान्तो द्रवति क्षरति च । तथा च तीक्ष्णकरोदये कोमलकमलदलविकासादमृतकरोदये पाषाणदारणाच्च

---

१. प्रसिद्धमेतत् C. २ °नंतरः B. वांतरः D.

द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥

ततस्ततः ।

माध० । ततश्च तत्र ।

सभ्रूविलासमथ सोयमितीरयित्वा

२२५ सप्रत्यभिज्ञमिव मामवलोक्य तस्याः ।

अन्योन्यभावचतुरेण सखीजनेन

मुक्तास्तदा[1] स्मितसुधामधुराः कटाक्षाः ॥

मक० । स्वगतम् । कथं प्रत्यभिज्ञापि नाम ।

सहजसिद्ध एव हेतुः । इह किं बाह्यं कारणं दृश्यते । तद्वत्प्रकृतेपि स्वाभाविक एव स्नेह इति भावः । पुण्डरीकपदमिह पद्ममात्रपरम् । अर्थान्तरन्यासोयम् ।

२२२–२२८ ततस्तत इति कथोपक्रमरीतिः । तत्र स्थाने । सभ्रूविलासमित्यादि । अथ तस्याः सखीजनेन तदा सोयमित्युक्त्वा सप्रत्यभिज्ञामिव पूर्वदृष्टामिव मामवलोक्य सभ्रूविलासं सभ्रूभङ्गं यथा तथा कटाक्षाः क्षिप्ताः । एतेन कटाक्षाणां पूर्वदृष्टप्रत्यभिज्ञाकारार्पणत्वमुक्तम् । कीदृशेन । अन्योन्याशयविज्ञेन । अनेन नायिकाव्युत्पत्त्यतिशय उक्तः । कीदृशाः स्मितमीषद्धसितमेवामृतं तेन मनोज्ञाः ।

ईषत्प्रफुल्लितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः ।
अदृष्टदन्तकुसुमैरुत्तमानां स्मितं मतम् ॥

इति भरतः । स्वस्यादृष्टचरत्वेन संभावनायामिहेवशब्दः । अवलोक्येति । ललिता दृष्टिरियम् । यदाह ।

मधुराकुञ्चितारा च सभ्रूक्षेपा च सस्मिता ।
समन्मथविकारा च दृष्टिः सा ललिता मता ॥

---

१ सदा C.

माध० । अथ ताः सलीलमुत्ता[1]लकरकमल[2]तालिकातरलवलयावलीक[3]मुत्तस्तमत्तकलहंसविभ्रमाभिरामचरणसंचरणझणझणायमानम[4]ञ्जुमञ्जीर[5]रसितानुविद्धमेखलाकलाप[6]कलकिङ्किणीरणत्कारमुखरं प-

---

इह तु हर्षादियमुचिता । यदाह । धृतौ हर्षे च ललिता । भ्रूविलासेत्यनेन मोट्टायितमपि कटाक्षितम् । प्रत्यभिज्ञैकस्य तत्तेदन्तावैशिष्ट्यम् । तस्या एवाकारः सोयमिति । नाम संभावनायाम् । अदृष्टचरत्वेन माधवप्रत्यभिज्ञाया असंभवादिति भावः ।

२२९–२३५ तामेव स्फोटयति । अथेति । अनन्तरं ताः सख्यो हे भर्तृदारिके स्वामिपुत्रि हर्षेण वयं वर्धामहे यतोत्रैव स्थाने कस्यापि कोपि तिष्ठतीत्युक्त्वा मामङ्गुलीखण्डलीलया कथितवत्यः । किं कृत्वा । सलीलं सविलासचेष्टितं यथा तथा प्रतिनिवृत्त्य । स्त्रीणां विलासचेष्टितं ललितेति भरतः । उत्तालमुद्भटम् । विभ्रमो विलासो विशिष्टभ्रमणं वा । मञ्जुर्मनोज्ञः । मञ्जीरो नूपुरः । रसितानुविद्धः शब्दानुगतः । मेखलायाः कलापो गुच्छः । यद्वा । मेखला च कलापश्च तयोः किङ्किणी क्षुद्र घण्टिका ।

मेखला च कलापश्च भवेच्छ्रोणिविभूषणम् ।
एकयष्टिर्भवेत्काञ्ची मेखला त्वष्टयष्टिका ॥
रशना षोडश ज्ञेया कलापः पञ्चविंशतिः ॥

इति भरतः । इदं सर्वं निवर्तनक्रियाविशेषणम् । गतिरियं विकला । यदाह ।

आवेगे चैव हर्षे च कार्ये च त्वरयान्विते ।
एतेषु च गतिं प्राज्ञो विकलां संप्रयोजयेत् ॥ इति ।
राजा भट्टारको देवस्तत्सुता भर्तृदारिका ॥

---

१ उत्तालदत्तकर° B. २ A. inserts ललित after कमल. ३ समुल्लस्त B. C. ४ मञ्जीरमञ्जु A. D. ५ शिञ्जित A. ६ A. D. om. कल.

रिवृत्य[1] भर्तृदारिके दिष्ट्या वर्धामहे[2] यदत्रैव कोपि कस्यापि[3] तिष्ठतीति मामङ्गुलीदलविलासेनाख्यातवत्यः ।

मक॰ । स्वगतम् । हन्त महतः[4] प्रागनुरागस्योद्भेदः ।

कल॰ । आकर्ण्य । कधं[5] सरसरमणीआणुबन्धिणी इत्थीअणकधा[6] । (क)

मक॰ । ततस्ततः[7] ।

माध॰ । अत्रान्तरे किमपि वाग्विभवातिवृत्त-
वैचित्र्यमुल्लसितविभ्रममुत्पलाक्ष्याः[8] ।

(क) कथं सरसरमणीयानुबन्धिनी स्त्रीजनकथा ।

राजपदमीश्वरमात्रपरम् । तेनामात्यकन्यापि भर्तृदारिकेत्युच्यत इत्यवधेयम् । कोपि कस्यापीत्यनेनानुद्घटोद्भावनेन तासां चातुर्यमुक्तम् । अत एव कस्यापीति सामान्यनिर्देशात्क्लीबत्वम् । अन्यथा स्त्रीलिङ्गनिर्देशः स्यात् । कोपीति पुंलिङ्गनिर्देशस्तु स्पष्टार्थः । अन्यथा किमपीति निर्देशे पुष्पादिप्रतिपत्त्या संशयः स्यादिति भावः । अङ्गुलीदलपदेन सविलासाख्यानमुक्तं संगुप्तमाख्यानं वा ध्वनितम् । इदमाख्यानं नर्मवाक्यम् । यदाह ।

सहास्यवचनप्रायं नर्मेच्छन्ति मनीषिणः ॥

हन्त हर्षे । उद्भेदः प्रकाशः । अनुबन्धिनी प्रतीयमाना ।

२३७–२४० अत्रान्तरेत्यादि । सखीनां दर्शनावसर एव पद्माक्ष्याः संबन्धि तन्माम्मर्थं कामजमाचार्यकमुपदेशकमाविरासीत्प्रकटीभूतम् । कीदृशम् । किमप्यनिर्वचनीयमत एव वाग्विभवाद्वचनप्रपञ्चादतिवृत्तमतिशयितं वैचित्र्यं यस्य तत् । उल्लसित उत्थितो विभ्रमो भावभेदो यत्र तत् ।

यच्चित्तवृत्तेरनवस्थितत्वं शृङ्गारजो विभ्रम उच्यतेसौ ।
भेदास्त्रयस्तस्य मदानुबन्धकार्कश्यसंज्ञाः कथिता विदग्धैः ॥

---

१ प्रतिनिवृत्य A. २ वर्धसे B. ३ कस्यापि वल्लभः B. कस्या अपि C. ४ सूचितो महतः B. ५ कथं A. ६ इत्थीआ B. ७ B. om. one ततः ८ आयताक्ष्याः B.

तद्भूरिसात्त्विकविकारमपास्तधैर्य-
माचार्यकं विजयि मान्मथमाविरासीत्॥ २४०

ततश्च। स्तिमितविकसितानामुल्लसद्भ्रूलतानां

इति भरतः। भूरि प्रचुरः सात्त्विकविकारो यत्र तत्। सत्त्वं मानसं[1] किमपि तेन निर्वृत्तः सात्त्विको भावः। यदाह।

सत्त्वोत्कटे मनसि ये प्रभवन्ति भावा-
स्ते सात्त्विका निगदिताः कविभिः पुराणैः।

ते च।

स्वेदः स्तम्भोथ रोमाञ्चः स्वरभङ्गोथ वेपथुः।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः॥ इति।

अपास्तं क्षिप्तं धीरत्वं येन तत्। महाभिजनत्वाद्यनपेक्षत्वादिति भावः। विजयि सर्वत्राप्रतिहतं कुमार्या अपि शिशुत्वाद्विजय इति भावः। उत्पलाक्ष्या इत्यनेन बहुविधे नेत्रविकारे प्रीतिगो हाव इहोक्तः। यदाह।

भ्रूनेत्रादिविकाराद्यः शृङ्गाराकारसूचकः।
स्थायिभावः स्थितो हाव ईर्ष्यातः प्रीतिगोपि च॥

इह श्लोके विलास उक्तः। यदाह।

दयितावलोकनादौ विशेषोङ्गक्रियासु यः।
शृङ्गारचेष्टासहितो विलासः समुदीरितः॥

२४१-२४४ संप्रति हेला हावात्समुत्थितेति भरतानुसारेण हावानन्तरं हेलामाह। स्तिमितेत्यादि।

नारीणां प्रियसंभोगलज्जासाध्वसकौतुकैः।
स्वभावाविष्कृतो वेगो हेलेति परिकीर्तितः॥

---

१ मनासि B.

मसृणमुकुलितानां प्रान्तविस्तारभाजाम्[1] ।
प्रतिनयननिपाते किंचिदाकुञ्चितानां

इति भरतः । श्लोकार्थस्तु तरसा आलोकितानां सहसा दर्शनानां पात्रं योग्योऽहमभूवं वृतोस्मि ।

सहसा दर्शनं यत्स्यात्तदालोकितमुच्यते ॥

इति भरतः । कीदृशानाम् । मदीयरूपनिरूपणाश्चर्येण स्तिमितानि निश्चलानि हर्षेण विकासितानि प्रफुल्लानि च तेषाम् । दृष्टिरियमद्भुता । यदाह ।

समाकुञ्चितपक्ष्माग्रा विस्मयोद्वृत्ततारका ।
सौम्या विकसितान्ता च दृष्टिः स्यादद्भुताभिधा ॥

यद्वा । स्तिमितं मन्दं यथा तथा विकासितानां प्रकाशितानां प्रथमं नायकदर्शनेन शनैः शनैः प्रसारणमिति भावः । अनेनोत्तरोत्तरदर्शनाभिलाषः सूचितः । उल्लसन्ती चपला भ्रूर्लतेव येषु तेषाम् । दीर्घत्वेन भ्रूलतयो रूपकम् । अनेन कान्ता दृष्टिरुक्ता । यदाह ।

हर्षप्रसादजनिता कान्तात्यर्थं समन्मथा ।
सभ्रूक्षेपकटाक्षा च शृङ्गारे दृष्टिरिष्यते ॥

मसृणानि चिक्कणानि लज्जया मुकुलितानि च तेषाम् । दृष्टिरियं मुकुलिता ।

मुग्धा निमीलितान्ता च मुकुला दृष्टिरिष्यते ॥

इति भरतः । यद्वा । सुखभावनया मसृणं मन्दं यथा भवति तथा मुकुलितानाम् । एतेन दर्शनजनितानन्दसंपत्पर्यवसानं सूचितम् । पुनः पुनर्दर्शनाकाङ्क्षया तिर्यगायतत्वेन प्रान्ते निकटे च विस्तारवताम् । शङ्किता दृष्टिरियम् । यदाह ।

किंचिच्चलत्स्थिरा किंचिन्नमिता तिर्यगायता ।

१ भ्राजि C.

विविधमहमभूवं पात्रमालोकितानाम् ॥

तैश्च। अलसवलितमुग्धस्निग्धनिष्पन्दमन्दै- २४५

गूढा चकिततारा च शङ्किता दृष्टिरुच्यते ॥

अनेन कटाक्षपर्यवसानमुक्तम्। प्रतीपदिगायतमन्नेत्रपाते सति लज्जया दर्शनोत्सुकतया च किंचिदाकुञ्चितानां मुद्रितानाम्। आकुञ्चितेयं दृष्टिः। यदाह।

अनाकुञ्चितपक्ष्माग्रा पुटैराकुञ्चितैस्तथा।
संनिकुञ्चिततारा च कुञ्चिता दृष्टिरुच्यते ॥

न च

कुञ्चिता सूचिता नष्टदुष्प्रेक्षाक्षिण्यथासु या ॥

इति भरते नियमादिह कुञ्चितदृष्टिकथनमयुक्तमिति वाच्यम्। लज्जया माधवे दुष्प्रेक्षत्वसंभवात्। पात्रं कीदृशम्। विविधं नानाप्रकारम्। स्तिमितदृष्टिप्रयोगेऽपि मयापि तथैव दृष्टिप्रयोगः कृत इत्यर्थः॥ योग्यभाजनयोः पात्रमित्यमरः॥ अभूवमिति भुवो लुङि सिचि रूपम्॥

२४५–२४८ अलसेत्यादि। पक्ष्मलाक्ष्याः प्रशस्तपक्ष्मयुक्तायास्तैरवलोकितैः कटाक्षतापन्नैर्मम हृदयमपहृतं स्ववशीकृतम्। इह रक्षकबाहुल्येन गमनत्वरया शङ्कया वावलोकितानामेव कटाक्षत्वमुक्तम्। कटाक्षस्तिर्यग्विलोकनात्मकः। कर्णाभ्यर्णसंचारितारकः। सर्वानङ्गरङ्गजनक इति भावः। तथा निश्चलत्वेनापविद्धं मथितम्। मथ्यमानतया द्रवरूपत्वेन पीतम्। अत एवोन्मूलितम्। तदा किमपि मया न ज्ञातमित्यर्थः। अत एवाशरणं रक्षकशून्यं जातम्। ततो यथार्हं कुर्विति भावः। कीदृशैः। लज्जयालसैर्मन्दैः कौतुकेन वलितैश्चालितैः। अथ मुकुलनेन मुग्धै रम्यैः। प्रीत्या स्निग्धैः। रूपदर्शनाद्भुतचिन्ताभ्यां

---

१. चलित B.

राधिकविकसदन्तर्विस्मयस्मेरतारैः ।
हृदयमशरणं मे पक्ष्मलाक्ष्याः कटाक्षैः

निष्पन्दैरनिमेषैः । पुनः कोयं द्रष्टव्य इति विषादान्मन्दैरित्यर्थः । इयं विषादिनी दृष्टिः । यदाह ।

विषादविस्तीर्णपुटा पर्यस्तान्तानिमेषिणी ।
किंचिन्निष्टब्धतारा च नार्या दृष्टिर्विषादिनी ॥

यद्वा । अलसं मन्दं यथा तथा वलितैः । इयं निर्विकारा दृष्टिः । यदाह ।

ललिता कुञ्चिता या च या च धीरावलोकिनी ।
निर्विकारा दृगिष्टा सा साध्व्येवाकारगुप्तिषु ॥

तथा प्रथमदर्शनापेक्षयाधुना विशेषदर्शनादधिकं विकसतान्तर्विस्मयेन स्मेरा मुग्धा तारा येषां तैः । इयं दृष्टिः स्निग्धा । यदाह ।

किंचित्सहासेव सविस्मयेव सभ्रूसमुत्क्षेपकटाक्षयुक्ता ।
स्निग्धा निकामं प्रमदैवनिष्ठा शृङ्गारजा दृष्टिरिह प्रदिष्टा ॥

यद्वा । कटाक्षैर्मम हृदयमपहृतमित्यनेन प्रीतिरुक्ता । अन्यस्यापि चक्षुष्प्रीतिहेतोर्मनोहरत्वं भवत्येव । अपविद्धमित्यनेन चिन्तासङ्ग उक्तः । अपव्यधेरत्यन्तासङ्गवाचित्वादिति भावः । पीतमात्मायत्ततां नीतम् । अनेन संकल्प उक्तः । मानसव्यापारस्यात्मवशत्वादिति भावः । उन्मूलितमित्यनेन विषयनिवृत्तिः सूचिता । अशरणमित्यनेन चित्तापहरणादिनिवारकाभाव उक्तः । नायिकाया निरवद्यरूपता च सूचिता । अलसेत्यनेन निद्रोद्भेदः । वलित इत्यनेन त्रपानाशः । मुग्धत्वेन मधुरता । स्निग्धत्वेन साभिलाषत्वम् । अभिलषनीयस्य स्नेहविषयत्वात् । निष्पन्दतया निकोचवैमुख्यम् । मन्दत्वेन सहर्षत्वम् । अधिकेत्यादिनान्तर्विकासिनी स्मेरतारा चेत्युक्तम् । एवं चालसवलितैरपहृतम् । योपि हि चौरादिः किंचिदपहरति स मन्दं मन्दं वलत इति भावः । मुग्धैः

रपहृतमपविद्धं पीतमुन्मूलितं च ॥

एवमहं तु तस्याः सर्वाकारहृदयंगमायाः संभाव्यमानस्नेहरसेनाभिसंधिना विधेयीकृतोपि पारिप्लवत्वमात्मनोपनिह्नोतुकामः प्राक्प्रस्तुतस्य बकुलदाम्नो यथाकथंचिदवशेषं ग्रथितवानेव । ततो मिलि-

सहजरूपदर्शनातिमोहवद्भिः स्निग्धैर्मद्विषयस्नेहसूचकचेष्टावद्भिरपविद्धं क्षिप्तं पराभूतमिति यावत् ॥ विद्धक्षिप्तेरिताः समा इत्यमरः ॥ अनेन चेतसोनायत्तिर्दर्शिता । ननु चित्तावक्षेपनिवारकं तदनु [तदन्य?]ध्यानादिकं किमिति न कृतमत आह । निष्पन्दैर्विमुखैर्मन्दैर्मदेकविश्रान्तैश्च पीतं तदितरानुसंधानशून्यं कृतम् । तथा च नान्यविषयपरिशीलनकथेति भावः । अधिकेत्यादिनोन्मूलितम् । अनेन मनोनिग्रहाभावो मित्रोपदेशानवसरश्च सूचितः । इह पूर्वश्लोकेन नार्थपौनरुक्त्यम् । आलोकितावस्थाकटाक्षावस्थयोर्भेदात् । नायकस्य रसाक्षिप्तचित्तत्वाद्वा ।

२४९–२५३ तथाविधभावदर्शनेन हृदयंगमत्वम् । संभाव्यते । अपदेपि प्रेम्णोनिष्टाशङ्कित्वादितिभावः । अभिसंधिरभिप्रायः । यथाकथंचिदिति । चेतसस्तदपहृतत्वादितिभावः । वर्षवराः क्लीबास्तत्प्राया-स्तत्प्रधानाः । यद्वा ।

विनीताः सर्वसत्त्वाश्च क्लीबाश्चैव स्वभावतः ।
जात्या न दोषिणश्चैव ते वै वर्षवरा मताः ॥

इति परिभाषिता वर्षवराः । हस्तिनीसमारोहणादिना महावंशजत्वेन मालत्या उत्तमस्त्रीत्वं सूचितम् । यद्वा । हस्तिनीसमारोहणेनात्युच्चयानतया दूरदर्शित्वं सूचितम् । तत्रापि मन्थरगतिसूचनाय हस्तिनीग्रहणम् ।

१ अपिविद्धं B. २ नु. ३ संभाव्यमाण B. ४ विधेयीकृतोपि C. विषयीकृतोपि D. ५ बकुलगुणदाम्नी B. अमुष्य दाम्नो. C.

तवेत्र शस्त्रपाणिवर्षवर[1]प्रायपुरुषपरिवारा[2] गजवधूमारुह्य नगरगामिनं[3] मार्गमिन्दुवदनालंकृतवती ।

तदा[4] च । यान्त्या मुहुर्वलितकन्धरमाननं त-
दावृत्तवृन्तशतपत्त्रनिभं वहन्त्या ।
दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या
गाढं निखात इव मे हृदये कटाक्षः ॥

ततः प्रभृति ।
परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।

हस्तिजातावपि स्त्रिया मन्थरगतिमत्त्वात् । एतदुभयं चिरं माधवावलोकनायेति भावः ।

२५४-२५७ यान्त्येत्यादि । तया पक्ष्मलाक्ष्या यान्त्या मम हृदये गाढं यथा तथा कटाक्षो निखात इव दत्त इव । तदा तदवलोकनं मम हृदये लग्नमिवेत्यर्थः । निखात इत्यनेन कटाक्षस्य दुःसहत्वमुक्तम् । कीदृश्या । तदाननं वहन्त्या । कीदृशम् । मुहुर्वलिता वक्रिता कन्धरा घाटा यत्र तत् । क्षणं क्षणं व्यावर्तमानम् । पश्यन्त्येत्यर्थः । आवृत्तवृन्तमावर्जितनालं यच्छतपत्त्रं पद्मं ततो निरतिशया भा दीप्तिर्यस्य तत् । तन्निभं तत्तुल्यमिति वा । वृन्तादारभ्यावर्तनेन पद्मविवर्तनसिद्धिः । कीदृशः । प्रथममानन्दहेतुतयामृतेन दिग्ध उपचितः पश्चाद्दर्शनानन्दविच्छेदाद्विषेण दिग्धः ।

२५७-२६२ ततः प्रभृति तस्मादारभ्य । परिच्छेदेत्यादि । विकारः कामजो भावोन्तर्जडयति मोहयति तापं च कुरुते व्यथयति । यदा तत्प्राप्तिचिन्ता तदा जडतेतरकार्याप्रतिपत्तिः । यदा च

---

१ ०धर B. C. D. २ परिवृता B. C. ३ नगरमार्गं B. ४ तदा हि B. C.

विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते ॥

अपि च । परिच्छेदव्यक्तिर्भवति न पुरःस्थेऽपि विषये
भवत्यभ्यस्तेऽपि स्मरणमतथाभावविरसम् ।
न संतापच्छेदो हिमसरसि वा चन्द्रमसि वा २६५

तद्व्यतिरेकचिन्त्या तदा ताप इति कालभेदेन जाड्यतापयोर्न विरोधः । तदुभयजनकवस्तुनोभावमाशङ्क्याह । कोपि विशिष्यानिर्वचनीयः परिच्छेदामियत्तामतीतोतिक्रान्तो निर्वक्तुमशक्यश्च । यः पुनरस्मिञ्जन्मन्यनुभवपथं न गतवानत एव परिच्छेत्तुं निर्वक्तुं चाशक्य इति भावः । सांप्रतं तदनुभवेन तद्द्वयं किमिति न क्रियत इत्याशङ्क्याह । विवेकप्रध्वंसात्प्रशस्तज्ञानाभावादुपचितमहामोहेन गहनः संकटः । तदानीं विवेकाभाव इति भावः । अनेन जडता दर्शिता ।

२६३—२६६ परिच्छेदेत्यादि । संनिकृष्टेपि घटादौ परिच्छेदव्यक्तिर्निर्णयाभिव्यक्तिर्न भवति । घटादिकमपि निर्णेतुं न शक्नोमीत्यर्थः । अनेन बाह्येन्द्रियाणां विषयव्यावृत्तिरुक्ता । अभ्यस्तेपि वारं वारमनुभूतेपि स्मरणमतथाभावेन खण्डस्फुटिततया विरसं वैरस्यवत् । एतेन मनसोपटुत्वमुक्तम् । इयमनुस्मृत्यवस्था । विषयनिवृत्त्या संतापः शीतलसेवनादपि नापैतीत्याह । हिमसरसि शीतलसरोवरे चन्द्रमस्यमृतकरकिरणे वा मनःसंतापहानिः । चन्द्रमःपदं लक्षणया स्वकिरणमाह । इयमुद्वेगावस्था यदाह ।

आसने शयने वापि न तिष्ठति न तुष्यति ।
औत्सुक्यं च भवेन्नित्यमुद्वेगस्थान एव च ॥

१ भयथा° C. D.

मनो निष्ठाशून्यं भ्रमति च किमप्यालिखति च ॥

कल० । दिढं क्खु एसो कए वि अवहरिदो[1] । अवि णाम मालेदि-ज्जेव्व[2] सा भवे । (क)

मक० । स्वगतम् । अहो अभिष्वङ्गः[3] । तत्किं निषेधयामि सुहृदम् । अथवा । मा मूमुहत्खलु भवन्तमनन्यजन्मा

मा ते मलीमसविकारघना मतिर्भूत् ।

इत्यादि नन्विह निरर्थकमेव यस्मा-[4]

त्कामश्च जृम्भितगुणो नवयौवनं च ॥

(क) दृढं खल्वेष कयाप्यपहृतः । अपि नाम मालत्येव सा भवेत् ।

निष्ठाशून्यं धैर्यरहितं मनो भ्रमति च स्वल्पत्वात् । किमपि मनोरथमालिखत्यालिङ्गति । अनेनोन्मादावस्थोक्ता ।

२६७–२६९ अपहृतो वशीकृतः । अपिः संभावनायाम् । नाम प्रकाशे । स्वगतमिति ।

यत्तु श्राव्यं न सर्वस्य स्वगतं तदिहोच्यते ॥

इति भरतः । अभिष्वङ्ग आसक्तिरूपो मनःपराभवः ॥ आक्रोशशापाभिभवेष्वभिषङ्गपदं विदुरिति शाश्वतः ॥

२७०–२७४ मा मूमुहदिति । अनन्यजन्मा कामः खल्वत्यर्थं मा मूमुहत् । न चित्तविप्लवसहितमजीजनदेवं च ते मतिर्मलीमसविकारेण कामजेन घना निविडा मा भूदित्यादि निषेधवाक्यमिहानर्थकमेव । ननुपदमनन्वये । यतः कामो जृम्भितो वलयितो गुणो ज्या यस्य सः । जृम्भितगुण उपचितव्यापारो वा कामः । नवयौवनं च जृम्भितगुणम् । प्रकाशितरूपादिकमस्तीत्यर्थः । अतस्तत्पराधीनोयं न निषेद्धुं शक्य इत्यर्थः । प्रकाशमिति ।

१ अवहदो C. २ °दी जेव A. ३ महानभिष्वंग B. ४ यस्मिन् C.

प्रकाशम् । अपि वयस्येन विदिते तदन्वयनामनी ।

माध० । सखे श्रूयताम् । अथ तस्याः करेणुकारोहणसमय एव महतः [1]सखीकदम्बकादन्यतमा वारयोषिद्विलम्ब्य [2]बालबकुलकुसुमावचयक्रमेण नेदीयसी भूत्वा प्रणम्य कुसुमापीडव्याजेन मामेवमुक्तवती । [3]महाभाग सुश्लिष्टगुणतया रमणीय एष वः सुमनसां संनिवेशः कुतूहलिनी च नो भर्तृदारिका [4]वर्तते तस्या अभिनवो विचित्रः कुसुमे-

---

यत्तु सर्वजनश्राव्यं प्रकाशं तदिहेष्यते ॥

इति भरतः । अन्वयो वंशः ।

२७५–२८२ करेणुका हस्तिनी । अन्यतमान्या ॥ स्वार्थे तमप् ॥ यद्वा । एकपर्यायोयमव्युत्पन्न एवान्यतमशब्दः । वारयोषिद्गणिका । तस्या ईदृक्त्वादुपादानमिह । विलम्ब्यैकाकिनी भूत्वा । नेदीयसी निकटस्था च भूत्वा । उभयत्र पुष्पत्रोटनक्रमेणेति योज्यम् । कुसुमापीडव्याजेन पुष्पदामच्छलेन । अभ्यर्थनाभङ्गभयेन च्छलेन मामाहेति भावः । अथ च कुसुमेनापीडयति कुसुमापीडः कामः । तद्व्याजेन मां प्रणम्येत्यर्थः । महाभाग महाभाग्य ॥ भागो भाग्यार्धयोरपीति विश्वः ॥ सुश्लिष्टगुणतया सुलग्नसूत्रत्वेन । संनिवेशो रचनाभेदः । कुतूहलिनी पुष्पदाम्नि कौतुकवती । भर्तृदारिकेत्यनेन कन्यात्वादर्शनौत्सुक्यमुक्तम् । यद्वा । भरतेन कन्याया विस्रम्भपात्रत्वस्वीकारादिह कन्यात्वेन तत्सूचनम् । अभिनवो लोकोत्तरो विचित्रो बहुप्रकारः । कुसुमेषु पुष्पेषु व्यापारो रचनाप्रबन्धः । एतेन माल्यग्रथनकुशलाद्भुतकौशलकुतूहलिनी सेत्युक्तम् । वैदग्ध्यस्य ग्रथनचातुर्यस्य । कृतार्थता कृतप्रयोजनता । विदग्धप्रेयसीयं प्रशंसयेति भावः । फलतु सफलास्तु । विदग्धजनाय दानात् । सरस एवाम्लान एव स्रक्संनिवेशः । महार्घतां बहुमूल्यताम् । पक्षे । वो युष्माकं संनिवेशः संयोगः

---

१ स्त्रीकदंबात् B. C. २ C. om. बाल. ३ महानुभाग C. ४ B. om. वर्तते; तस्यामभि॰ A. D.

षोर्व्यापारस्तद्भवतु कृतार्थता वैदग्ध्यस्य फलतु निर्माण[1]रमणीयता विधातुः[2] समासादयतु सरस एष[3] भर्तृदारिकायाः कण्ठावलम्बनमहार्घ[4]तामिति ।

मक० । अहो वैदग्ध्यम् ।

माध० । तया च मदनुयुक्तया समाख्यातमियममात्यभूरिवसोः प्रसूतिर्मालती नामाहं च प्रसादभूमिर्भर्तृदारिकाया धात्रेयिका लवङ्गिका नामेति ।

कल० । सहर्षम् । किं णाम मालदि[5] त्ति । दिट्ठिआ विलसिदं

परस्परानुरूपादिना रमणीयः क्रीडार्होर्हणीय एव । इह व इति युष्मदो गुरावेकेषामिति गौरवे बहुवचनम् । कुतूहलिनी दूतसमाजे साकाङ्क्षा । अभिनवोभूतपूर्वः । त्वदेकासक्तत्वात् । विचित्रः साधुः । विविधविकारकारित्वेनाश्चर्यजनको वा । कुसुमेषोः कामस्य व्यापारो मोहनम् । वैदग्ध्यस्य सकलकलाभिज्ञतायाः सार्थकत्वम् । विदग्धप्रीतिजनकत्वात् । निर्माणरमणीयता घटनसौन्दर्यम् । फलत्वनुरूपजनसंसर्गात् । नो चेदिदं सर्वं व्यर्थमिति भावः । सरसः शृङ्गारोनुरागो वा । कण्ठावलम्बनमालिङ्गनं महार्घता दुर्लभत्वम् । तदिह श्लिष्टपदेन नायकस्योल्लसितमभिप्रायं च ज्ञात्वा दूतीव्यापारः प्रसरतीति ध्वनितम् ।

२८३–२८६ . वैदग्ध्यं श्लिष्टपदप्रयोगादिति भावः । अनुयुक्तया पृष्टया । प्रसूतिरपत्यम् । प्रसादभूमिर्विश्वासस्थानं तस्याः । तव च प्रसादभूमिरनुकम्पापात्रं मालादानात् ।

२८७–२८९ अत्र विलसितं विजृम्भितम् । अनयोरन्योन्या-

---

१ फलतु च गुणनिर्माणे रमणीयतायाः B.; C. inserts च after फलतु and गुण before निर्माण. २ B. om. विधातुः, A. D. have आसादयतु. ३ एव Com.; °दारिकायां A. ४ °र्घतामिति A. ५ °दी A.

क्खु भअवदा देवेण कुसुमाऊहेण सा[1] जिदं अह्मेहिं[2]। (क)

मक०। अमात्यभूरिवसोरात्मजत्वपर्याप्तिर्बहुमानस्य। अपि च। मालती मालतीति[3] मोदते भगवती कामन्दकी तां च किल राजा नन्दनाय प्रार्थयत इति किंवदन्ती श्रूयते।

माध०। तया चाहमनुरुध्यमानस्तां[4] बकुलमालामात्मनः कण्ठादवतार्य दत्तवान्। असौ पुनरभिनिविष्टया दृशा मालतीमुखावलोकनविहस्ततया विषमविरचितैकभागान्तामेव बहु मन्यमाना महानयं[5] प्रसाद इति प्रतिगृहीतवती[6]। अनन्तरं च यात्राभङ्गप्रचलितस्य महतः पौरजनस्य[7] संकुलेन विघटितायां तस्यामागतोऽस्मि।

मक०। वयस्य मालत्या अपि स्नेहदर्शनात्सुश्लिष्टमेतत्। योऽपि हि कपोलपाण्डुतादिचिह्नसूचितः[8] प्राक्प्रवृद्धस्तस्याः[9] कामाभिष्वङ्गः

(क) किं नाम मालतीति। दिष्ट्या विलसितं खलु भगवता देवेन कुसुमायुधेन तज्जितमस्माभिः।

नुरागादिति भावः। बहुमानस्य गौरवस्यापर्याप्तिरनवधिकत्वम्। अनभियोज्यत्वरक्षणत्वादियोगादिति भावः।

२९२–२९५ अनुरुध्यमानो मुहुर्याच्यमानः। असौ लवङ्गिका। अभिनिविष्टयातियत्ननिवेशितया। विहस्ततया व्याकुलतया। महानयं प्रसाद इति। यतो न वस्तुनि प्रेम किं तु गुणेष्विति भावः।

२९७–३०२ सुश्लिष्टं निश्चितम्। दृष्टपूर्वः पूर्वं दृष्टः। तादृश्यो महाकुलजाः। चक्षूरागानुरागयोरेकविषयत्वं भरतमतम्। अन्यदप्यनुराग-

---

१ B. C. om. सा. २ C. adds इति नृत्यति. ३ C. D. om. one मालती. ४ अभ्यर्थ्यमानः A. C. ५ महाप्रसाद इति तां B.; A. adds व्यावृत्य after इति. ६ A. D. om. प्रति. ७ पौराङ्गनाजनस्य C.; संकुलाकुलेन B. C. ८ B. om. कपोल; A. om. चिह्न. ९ प्राक्प्रवृत्तः B.

सोपि त्वन्निबन्धन इति [1]व्यक्तमेवैतत् । एतत्तु न ज्ञायते क्व दृष्टपूर्व[2]स्तया वयस्य इति । न खलु[3] तादृश्यो महाभागधेयाः कुमार्योऽन्यत्रासक्तचेतसो[4] भूत्वापरत्र[5] चक्षूरागिण्यो भवन्ति । अपि च ।

अन्योन्यसंभिन्नदृशां सखीनां तस्यास्त्वयि प्रागनुरागचिह्नम्[6] ।
कस्यापि कोपीति निवेदितं च धात्रेयिकायाश्चतुरं वचश्च ॥

कल० । उपसृत्य । एदं[7] चित्तम्[8] । (क) इति चित्रफलकं दर्शयति । उभौ पश्यतः ।

मक० । कलहंसक केनैतन्माधवस्य प्रतिच्छन्दकमभिलिखितम्[9] ।

कल० । जेण जेव्व से हिअअं अवहरिदं । (ख)

मक० । अपि मालत्या ।

कल० । अध इं । (ग)

माध० । वयस्य मकरन्द प्रसन्नप्रायस्ते वितर्कः[10] ।

(क) इदं चित्रम् ।
(ख) येनैवास्य हृदयमपहृतम् ।
(ग) अथ किम् ।

चिह्नमाह । अन्योन्येत्यादि । त्वयि तस्याः प्रागनुरागचिह्नं व्यक्तमेवास्ति । कथम् । सखीनामन्योन्यसंगतदृशां कस्यापि कोपीति निवेदनमेकम् । कथमन्यथा सखीजनस्तां वीक्ष्य कटाक्षयति तां कथं वा सखीजनो वदत्येवमिति भावः । अपरं लवङ्गिकाया व्युत्पन्नं वचनम् । कथमन्यथा कुतूहलिनीत्यादि वदतीयमिति भावः ॥ संगते दारिते भिन्न इति विश्वः ॥

२०७–२११ अत्र येन जनेनापहृतं यन्निबन्धनोस्य कामविकार

---

१ अभिव्यक्तम् A.; B. C. om. एव. २ C. om. पूर्व. ३ हि C. ४ मनसो A. D.; C. om. भूत्वा. ५ अन्यत्र A. D. ६ लिङ्गं A. D. ७ चित्तफलअं A. C. ८ चित्तं B. C. ९ प्रतिबिम्बम् A.; माधवप्रतिच्छन्दकम् B. १० तर्कः B.

मक० । कलहंसक कुतोऽयमधिगमः[1] ।

कल० । मए दाव[2] मन्दारिआए हत्थादो ताए वि[3] लवङ्गिआसआसादो । (क)

मक० । अथ किमाह मन्दारिका माधवालेख्यप्रयोजनं मालत्याः ।

कल० । उक्कण्ठाविणोदो त्ति । (ख) २१९

मक० । वयस्य माधव सर्वथा समाश्वसिहि ।

या कौमुदी नयनयोर्भवतः सुजन्मा
तस्या भवानपि मनोरथबन्धबन्धुः ।
तत्संगमं प्रति सखे न हि संशयोऽस्ति
यस्मिन्विधिश्च मदनश्च कृताभियोगौ[4] ॥ २२०

द्रष्टव्यस्वरूपा च भवतो[5] विकारहेतुस्तदत्रैव लिख्यतां मालती ।

(क) मया तावन्मन्दारिकाया हस्तात्तयापि लवङ्गिकासकाशात् ।
(ख) उत्कण्ठाविनोद इति ।

इति भावः । मालत्या लिखितमित्यर्थः । अथ किं स्वीकारे । वितर्क ऊहः । अधिगमः प्राप्तिः ।

२१९-२२२ उत्कण्ठाविनोद इति । माधवानुरक्ता मालती तमननुप्राप्तवती चित्रलिखितालोकनेनापि रमत इति भावः । येत्यादि । हे सखे तत्संगमं प्रति नैव संशयोऽस्ति । भवतो नयनयोर्या कौमुदी ज्योत्स्ना । आनन्दकारित्वात् । तस्या मनोरथबन्धबन्धुरभिलाषनिबन्धनाय प्रियः शोभनजन्मा भवानपि । ननु परस्परानुरागेऽपि विधिकामवैमुख्यान्न सिद्धिरत आह । यस्मिन्संगमे विधिमदनौ कृतप्रयत्नौ चक्षुःप्रीत्या काम एतद्देशानयनाद्विधिः कृताभियोग इत्यर्थः । अभियोगाच्च कन्यालाभः । यदाह ।

१ सत्यं कुतो° B. २ B. C. om. दाव; मंदारिआहत्थादो B. ३ B. om. त्ति. ४ °ओगौ B. ५ तत्रभवतो B.

माध० । यदभिरचितं वयस्याय । तदुपनय चित्रफलकं चित्रव- तिकाश्च । मकरन्द उपनयति ।

माध० । लिखन् । सखे मकरन्द

वारं वारं तिरयति दृशोरुद्गमं बाष्पपूर-
स्तत्संकल्पोपहितजडिम स्तम्भमभ्येति गात्रम् ।

अभियोगाद्दि कन्याया लाभो निश्चित एव च ॥

चित्रेण माधवश्चित्तानुरागमुद्दीपयति । द्रष्टव्येति ॥ वयस्यायेत्यत्र रुच्यर्थानां प्रीयमाण इति संप्रदानता ॥

३२५–३२८ अधुना मनःसङ्गे हर्षात्सात्त्विकभावमाह । वारं वारमित्यादि । अयं मम पाणिर्लेखाविधिषु चित्रनिर्माणेषु नितरामत्यर्थं वर्तत एव न तु लिखति । अत्र किं करोमि । यथातथा लिखामीत्यर्थः । न हरामिति पाठे नैव वर्तत इत्यर्थः । यतो बाष्पपूरस्तदनुध्यानादानन्दाश्रुप्रवाहो वारं वारं दृशोरुद्गमं प्रचारं तिरयति च्छादयति । तस्याः संकल्पेन चिन्तनेनोपहितो जडिमा सर्वकार्याप्रतिपत्तिर्यस्य तद्गात्रं शरीरं स्तम्भं निश्चलत्वमभ्येति ।

हर्षभयरोगविस्मयविषादमददोषसंभवः स्तम्भः ॥

इति भरतः । कीदृशः । सद्यो लिखनोपक्रमकाल एव स्विद्यन्नार्द्रीभवन् । अविरतोत्कम्पेनाधिकचलनेन लोलाङ्गुली यत्र सः । अङ्गुल्या लिखनहेतुतया तच्चापल्याद्दलिखनं सूचितम् । तदिहाश्रुस्तम्भस्वेदकम्पा उक्ताः । रोमाञ्चादिकं च नोक्तम् । तेषां लिखनाप्रतिकूलत्वात् । सर्वमिदं सात्त्विकं हर्षात् । यदाह ।

---

१ यदभिमतं B. २ D. adds कलहंसक after this; C. om. तदु°–°नयति. ३ °वर्तिश्च B. ४ दृशावुद्गतो D.

सद्यः स्विद्यन्नयमविरतोत्कम्पलोलाङ्गुलीकः[1]
पाणिर्लेखाविधिषु नितरां[2] वर्तते किं करोमि ॥

तथापि व्यवसितोस्मि । चिरादालिख्य[3] दर्शयति ।

मक० । विलोक्य । उपपन्नस्तावदत्रभवतोभिष्वङ्गः । सकौतुकम् । कथमचिरेणैव निर्माय लिखितः[4] श्लोकः । वाचयति ।

जगति जयिनस्ते ते भावा नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये ।

क्रोधभयहर्षलज्जादुःखश्रमरोगतापपीडाभ्यः ।
व्यायामसाध्वसादेः स्वेदः स्यात्पीडनेनापि ॥
शीतभयहर्षरोषस्पर्शजरारोगजः कम्पः ॥ इति ।

३३२–३३५ अधुना मालती चित्रं द्रक्ष्यतीति सानुरागोपालम्भं श्लोकं लिखति । जगतीत्यादि । ते ते नवेन्दुकलादयो भावाः पदार्था जयिनो मदजनने सर्वत्राप्रतिहताः स्वभावतो मनोज्ञा अन्ये सन्त्येव ये मनो मदयन्ति । मम पुनर्न मदहेतवः प्रत्युत दाहहेतव एवेति भावः । अत्र जयिन इत्यनेन कालविशेषे देशविशेषे च जयशालिन आनन्दसंदोहदा इत्युक्तम् । भाव्यन्ते भावनामर्हन्ति सुन्दरतयेति भावाः । मालतीभिन्नाः सहृदयहृदयाह्लादकाः । ते त इति वीप्सया चन्द्रादयो देवादयश्च प्रसिद्धा एवेति दर्शितम् । सर्वनाम्ना च ये यत्र चेतःप्रतिष्ठास्ते तत्र गृह्यन्त इति ध्वनितम् । तुशब्देनान्येषां तथात्वं तत्संप्रतिपत्तिद्वारेत्युक्तम् । कस्तर्हि मदहेतुरत आह । मम पुनरियं चित्रलिखिता मालती नयनयोर्ज्योत्स्ना यन्नेत्रगोचरं प्राप्ता स एवैकोत्र जन्मनि महोत्सवः । अत्र किं पुनः संभोगादिकमित्यनुरागः । स एव महोत्सवः । अनुरागो भवतु मा वा भूदित्युपालम्भः । एतेनात्यन्तानुरागो मालत्यां दर्शितः । एकपदेनान्येषामावि-

---

१ अविरलो° C. D. २ न तरां noticed by Com. ३ अभिलिख्य प्रदर्श° A. D. ४ श्लोकोपि लिखितः C.

मम तु यदियं याता लोके विलोचनचन्द्रिका
नयनविषयं जन्मन्येकः स एव महोत्सवः ॥

प्रविश्य सत्वरं मन्दारिका । कलहंसअ पअ[1]णुसारेण उव[2]लद्धोसि । माधवमकरन्दौ विलोक्य[3] सलज्जम् । कधं एदे वि महाणुभावा इह[4] जेव्व । उपसृत्य[5][6] । पणमामि । (क)

उभौ[8] । मन्दारिके इतः[7] आस्यताम् ।

(क) कलहंसक पदानुसारेणोपलब्धोसि । कथमेतावपि महानुभाविहैव । प्रणमामि ।

भावेपि नानन्दकत्वम् । अत एव स एवेत्यनेन तत्पोषः । जन्मनीति सामान्यनिर्देशेन समस्तजन्मनि मालतीतुल्या नास्तीति व्यज्यते । वाचिकोयं रसः । यदाह ।

रसानुरूपैरालापैः श्लोकैर्वाक्यैः पदैस्तथा ।
नानालंकारसंयुक्तैर्वाचिको रस उच्यते ॥ इति ॥

इह प्रकृतिमधुरत्वेपि मालत्या एव मदजननाद्व्यतिरेकालंकारः । प्रियाख्यानात्प्रियोलंकारः । विलोचनचन्द्रिकेति रूपकम् । न चात्र नवेन्दुकला प्रतिपच्चन्द्रकला सा च न मदहेतुरिति वाच्यम् । यतो नूयत इति नवः । प्रशस्तेन्दुरित्यर्थः । यद्वा । नवं नूतनमिन्दुकलादिकं चेति द्वन्द्वः । यद्वा । नवः सागरादुत्थितमात्रः । पूर्ण एवेत्यर्थः ।

२३६–२३७ यत्र पटीक्षेपेण प्रवेशस्तत्र प्रविश्येत्युक्तिः । अनुसारोनुसरणम् । एतेपि ये चित्रफलके लिखिताः । इह गौरवादेकत्वे बहुवचनम् । द्वित्वे वा बहुवचनम् ।

---

१ पाभा॰ B. पदा॰ A. २ C. om. उव. ३ दृष्ट्वा A. ४ इव A. C. ५ उपसृत्य प्रणमति A. ६ मक॰ B. ७ इह A. D. ८ Com. uses the plur.

मन्दा०। उपविश्य। कलहंसअ उवणेहि मे चित्तफलअं। (क)

कल०। गृहीत्वा। गेह्ण एदं[1]। (ख)

मन्दा०। विलोक्य। कलहंसअ केण उणे[2] किंणिमित्तं वा एत्थ मालदी आलिहिदा। (ग)

कल०। जो जेण[3] णिमित्तेण मालदीए। (घ)

मन्दा०। सहर्षम्। दिट्ठिआ दंसिदफलं दाणिं विण्णाणं[4] पआवइणो[5]। (ङ)

मक०। मन्दारिके यदत्र वस्त्वन्येन ते वल्लभः कथयत्यपि[6] तथा तत्

मन्दा०। महाभाअ अध इं। (च)

मक०। क्व पुनर्मालती माधवं प्राग्दृष्टवती।

मन्दा०। लवङ्गिआ भणादि वादाअणगदत्ति। (छ)

(क) कलहंसक उपनय मे चित्रफलकम्।

(ख) गृहाणैतत्[7]।

(ग) कलहंसक केन पुनः किंनिमित्तं वात्र मालत्यालिखिता।

(घ) यो येन निमित्तेन मालत्या।

(ङ) दिष्ट्या दर्शितफलमिदानीं विज्ञानं प्रजापतेः।

(च) महाभाग अथ किम्।

(छ) लवङ्गिका भणति वातायनगतेति।

२४४–२५७ अभिलिखित इति शेषः। तथा च मालत्या विनोदाय माधवो लिखितस्तेनापि सा तदर्थं लिखितेत्यर्थः। अत्र विज्ञानं शिल्पकौशलम्। अनुरूपानुरागादनयोरिति भावः। अवितथं सत्यम्। एव-

---

१ C. om. एदं. B. adds चित्तं. २ B. C. om. उण; कुस्स णि° B.; B. C. om. वा. अहिलिहिदा D. ३ जो ज्जेव जंणिमित्तं A. C.; °ज्जेव्व C. ४ णिउणत्तणं B. ५ °वइणा B. ६ °वस्त्ववितथं तत् D. Com. ७ °णैदं चित्रफलकम्. Com.

मक० । वयस्य नन्वमात्यभवनासन्नरथ्ययैव बहुशः[1] संचरावहे तदुपपन्नमेतत् ।

मन्दा० । अणुमण्णन्तु मं महाणुभाआ[2] जाव एदं भअवदो देवस्स मअणस्स सुचरिदं[3] पिअसहीए लवङ्गिआए णिवेदेमि । (क)

मक० । प्राप्तावसरमेतद्भवत्याः । मन्दारिका चित्रफलकं[4] गृहीत्वा निष्क्रान्ता ।

मक० । वयस्य खरतर[5]किरणोयं भगवान्सहस्रदीधितिरलंकरोति मध्यमह्नस्तदेहि संस्त्यायमेव[6] गच्छावः । इत्युत्थाय[7] परिक्रामतः ।

माध० । एवं हि मन्ये ।

घर्माम्भोविसरविवर्तनैरिदानीं[8]
मुग्धाक्ष्याः परिजनवारसुन्दरीणाम्[9] ।

(क) अनुमन्येतां मां महानुभावौ यावदेतद्भगवतो देवस्य मदनस्य सुचरितं प्रियसख्या लवङ्गिकाया निवेदयामि ।

मेतन्मालत्यैव माधवप्रतिच्छन्दकं लिखितमित्यर्थः । दृष्टवतीत्यर्थः । लवङ्गिकया द्वारा माधवानुरागो मालत्यामस्तित्वत्यर्थः । संस्त्यायो गृहम् ॥ संस्त्यायः संनिवेशे च संघातेपि च दृश्यत इति मेदिनीकारः ॥

३६०—३६२ घर्मेत्यादि । मालत्याः परिजनवारसुन्दरीणां कपोलकुङ्कुमानि प्रातर्विरचितविचित्रपत्रावलीवैदग्ध्यं यत्तदधुना मध्याह्ने जहति त्यजन्ति । कैः । घर्माम्भसो विसरस्य समूहस्य विवर्तनैर्विविधजलकणैः करणैः । अनेन नायिकायाः सुकुमारतया निःसहत्वमुक्तम् । मा-

---

१ B. om. बहुशः. २ महाभाआ B; एअं for एदं A. D.; देव्वस्स D.; देव्वस्स A. ३ B. C. om. सु. ४ चित्रं B.; चित्रभाउं D.; गृहीत्वास्थाय C. ५ B. om. तर. ६ संस्त्यायनं B. ७ B. om. इति. ८ °रीभिः C. ९ Com. uses the plur.

तत्प्रातर्विहितविचित्रपत्त्रलेखा-
वैदग्ध्यं जहति कपोलकुङ्कुमानि[1] ॥

अपि च । उन्मीलन्मुकुल[2]करालकुन्दकोश-
प्रश्च्योतद्घनमकरन्दगन्धबन्धो ।
तामीषत्प्रचलविलोचनां नताङ्गी-
मालिङ्गन्पवन मम स्पृशाङ्गमङ्गम् ॥

लत्याः कन्यात्वेन पत्त्रावल्यभावात्परिजनेत्युक्तम् । माङ्गल्यतया प्रातरेव कुङ्कुमेन पत्त्रावलीलिखनम् । अत एव वसन्तकालस्य शीतत्वात्कुङ्कुमेन भूषाकरणमिति मतमपास्तम् । धारासिक्तवसुंधरासुरभय इत्यभिधानाद्वर्षाकालप्रस्तावात् ॥ समूहनिवहव्यूहसंदोहविसरव्रजा इत्यमरः ॥ इहोन्मादावस्था । अत एवात्र तत्संबद्धा कथा । यदाह ।

तत्संबद्धां कथां युङ्क्ते सर्वावस्थागतामिह । इति ।

३६४–३६७ उन्मीलदिति । हे पवन । उन्मीलन्मुकुलेन विकचकोरकेण करालाद्विषमात्कुन्दगुच्छात्क्षरन्निविडमकरन्दश्च गन्धश्च तयोर्बन्धो । मकरन्दस्य यो गन्धस्तद्बन्धो तत्सहचरेति वा । ईदृशोपि त्वं मे न सुखाय किं तु तापायातस्तां मालतीमीषदालिङ्गन्ममाङ्गमङ्गं प्रत्यङ्गं स्पृश । अमृतमयतदङ्गसङ्गशीतस्त्वं मम तापशान्तये भविष्यसीति भावः। यद्वा । तदीयतापशान्तिर्भवत्वित्यनुरागात्तामालिङ्गन्नित्युक्तम् । तां कीदृशीम् । प्रचलनेत्राम् । विरहे पवनस्य दुःसहत्वेन भयादितस्ततः क्षिप्तनेत्राम् । अत एव नम्रीभवदङ्गां च । इह विषमकुन्दकोशसंचरणेन गतिप्रतिबन्धान्मान्द्यं मकरन्दसङ्गाच्छैत्यं गन्धबन्धुतया सौगन्ध्यं च वायोरुक्तम् । ईषदालिङ्गन्नित्यनेन सुरभिपदेनाभिघातनिःसहत्वं मालत्यामुक्तम् ॥ करालो दन्तुरे तुङ्ग इत्यमरः ॥

---

१ °कुण्डलानि C. २ कलित B.

मक०[1] । अभिहन्ति हन्त कथमेष माधवं
सुकुमारकायमनवग्रहः स्मरः ।
अचिरेण वैकृतविवर्त[2]दारुणः
कलभं कठोर इव कूटपाकलः[3] ॥
तदत्र भगवती कामन्दकी नः शरणम् ।

माध० । स्वगतम् । आश्चर्यम् ।
पश्यामि तामित इतः[4] पुरतश्च पश्चा-

३६८–३७२ माधवस्यानङ्गदुःसहत्वमाह । अभिहन्तीत्यादि । एष स्मरोऽनवग्रहः प्रतिरोधशून्यः कोमलकायं माधवं कथमचिरेणैवाभिहन्ति । हन्तानुकम्पायाम् ॥ हन्त हर्षेऽनुकम्पायामित्यमरः ॥ कीदृशः । विकृतस्य भावो वैकृतं तस्य विवर्तोऽन्यथावस्थानं तेन दारुणो दुःसहः । यथा कलभं करिबालकं मृदुकायं कठोरो दुःसहः कूटपाकलो हस्तिवातज्वरोऽचिरेण हन्ति तथेत्यर्थः । सोऽप्यनवग्रहोऽप्रतिकरणीयो विकृतिविवर्तदारुणश्च भवति ।

गजं वातज्वरो हन्ति तथा वै कूटपाकलः ॥

इति वैद्यके । इदं स्वगतम् । स्वयमनध्यवसायादाह तदत्रेति । अत एव भगवती ज्ञानसंपन्नेह शरणं रक्षिका । द्वितीयाङ्कावतारोऽयम् । यदाह ।

अङ्कावसाने यत्रैव भाविनोऽङ्कस्य सूच्यते ।
वस्तुबीजमुपोद्घातैः सोऽङ्कावतार इष्यते ॥

३७३–३७७ इदानीमुन्मादावस्थोद्भावनाबलात्तन्मयत्वमाह । पश्यामीत्यादि । तामेकामेव विवर्तमानां प्रपञ्चरूपां परितः सर्वत्र पश्यामीत्याश्चर्यम् । विवर्तमानत्वमेवाह । इत इत उभयपार्श्वे । पुरतोऽग्रे । पश्चात्पृष्ठे । अन्तर्मनसि । बहिस्त्वग्भागे । अनेन तदावेशात्सर्वत्र तन्मयत्वमुक्तम् । यदाह ।

---

१ C. inserts स्वगतं. २ विवर्ण B. ३ °पाकलः B. C. ४ इतश्च परश्च B.

दन्तर्बहिः[1] परित एव विवर्तमानाम् । ३७९
उद्बुद्धमुग्धकनकाब्जनिभं वहन्ती-
मासक्ततिर्यगपवर्तित[2]दृष्टि वक्त्रम् ॥

प्रकाशम् । वयस्य मम हि संप्रति
प्रसरति परिमाथी कोऽप्ययं देहदाह-
स्तिरयति करणानां ग्राहकत्वं प्रमोहः[3] । ३८०

यो येन भावेनाविष्टः सुखदेनेतरेण वा ।
स तदाहितसंस्कारः सर्वं पश्यति तन्मयम् ॥

परित इत्यत्र पर्यभिभ्यां चेति तसिः ॥ कीदृशीम् । वक्त्रं वहन्तीम् । उद्बुद्धं विकासितं मुग्धं कान्तं यत्सुवर्णपद्मं ततो निरतिशया भा दीप्तिर्यस्य तत् । तन्निभं तत्तुल्यमिति वा । एतेन गौरीत्वमुक्तम् । आसक्तेन मय्यासक्त्या तिर्यगपवर्तिता दृष्टिर्यस्य तत् । यथा यान्त्या तयाहं दृष्टस्तथैव तां पश्यामीति भावः ।

३७८-३८४ अधुना सर्वाकारेण पीडामाह । प्रसरतीत्यादि । वयस्य पश्य संप्रति मम कोऽप्यनिर्वचनीयस्वरूपो देहदाहः प्रसरति व्याप्नोति । अत एव परिमाथी सर्वतो मथनशीलः । करणानामिन्द्रियाणामर्थग्राहकत्वं मे प्रमोहस्तिरयति पिदधाति । सर्वेन्द्रियसंमोहो ममेत्यर्थः । मम गात्रं शरीरम् ॥ कर्तृ ॥ रणरणकस्य वियोगतरोर्वृद्धिमुपचयं बिभ्रदावर्ति भ्राम्यदास्ते । यद्वा । रणरणः कामस्तस्य विवृद्धिमधिकाधिकदशागामित्वम् ॥ मारो रणरणः कामो विषय इत्युत्पालिनी ॥ तथा मम हृदयम् ॥ कर्तृ ॥ अन्तर्दहति ज्वलतीत्यर्थः । तन्मयत्वं मालतीमयत्वं च धत्ते । ईदृशी मम दशा सद्य एव विपत्तिमादधाति । तदत्र यथावस्थमाचरेति भावः । अत्रावर्तीति व्याधिः । ज्वलतीत्युद्वेगः । तन्मयत्वामि-

---

१ बहिश्च परितश्च B.; एव च वर्ति° C. २ °वर्जित B. ३ प्रमोदः B.

रणरणकविवृद्धिं बिभ्रदावर्तमानं[1]

ज्वलति हृदयमन्तस्तन्मयत्वं च धत्ते ॥

इति निष्क्रान्ताः सर्वे ।

॥ इति[2] बकुलवीथी नाम प्रथमोऽङ्कः ॥

त्युन्मादः । हृदयस्य तु तन्मयत्वधारणेन दुःसहदशायामपि अविनाशा दर्शिता ॥ करणं क्षेत्रगात्रेन्द्रियेष्वपीत्यमरः ॥ निष्क्रान्ता इति । बीजार्थं युक्तं कृत्वा निष्क्रमो भवति । यदाह ।

बीजार्थं युक्तियुक्तं च कृत्वा कार्यं यथारसम् ।
निष्क्रमं तत्र कुर्वीत सर्वेषां रङ्गवर्तिनाम् ॥ इति ।

बकुलवीथीति ।

नानारससमायुक्ता संधिद्वयविभूषिता ।
अर्थप्रकृतिभिः पूर्णा स्यादेकाङ्का तु वीथिका ॥
त्रिभिः पात्रैः प्रयोज्येयमुत्तमाधममध्यमैः ।
कर्तव्या नायिका चात्र शृङ्गारद्वयसंयुता ॥

इति भरतः ॥

प्रासूत यं रत्नधरो गुणाढ्यो गुणाढ्यरूपा दमयन्तिका च ।
जगद्धरं तत्कृतटिप्पणेऽङ्को गतोऽयमाद्यो रसराजराजी ॥

॥ इति प्रथमोऽङ्कः ॥

---

१ बिभ्रदावर्तं गात्रं A. D. and Com. २ B. om. इति–नाम. C. om. इति and has मालतीमाधवे.

॥ द्वितीयोऽङ्कः ॥

ततः प्रविशतश्चेट्यौ ।

प्रथमा । हला[1] संगीदसालापरिसरे अवलोइदादुदीआ तुमं किं मन्तअन्ती आसी[2] । (क)

द्वितीया । सहि तेण किल माहवपिअ[3]वअस्सेण मअरन्देण सअलो ज्जेव्व[4] मअणुज्जाण[5]वुत्तन्तो भअवदीए णिवेदिदो । (ख)

(क) हला संगीतशालापरिसरेऽवलोकिताद्वितीया त्वं किं मन्त्रयन्त्यासीः ।

(ख) सखि तेन किल माधवप्रियवयस्येन मकरन्देन सकल एव मदनोद्यानवृत्तान्तो भगवत्या निवेदितः ।

अधुना बकुलमालामादाय लवङ्गिका गता तां प्रतीक्षमाणा मालती सौधारूढा तन्मार्गं पश्यति मकरन्दश्च कामन्दकी नः शरणमित्युक्त्वा तां प्रति तत्कथनाय गत इति स्थिते चेट्योः प्रवेशः । चेटीभाषा सौरसेनी । यदाह ।

नायिकायां च चेट्यां च सौरसेनी प्रयुज्यते ।

न च नाटकप्रकरणयोरङ्काः कार्याः प्रत्यक्षनायका इति भरतादिह माधवप्रवेशाभावात्कथमङ्कावतार इति देश्यम् । मालत्या नायकत्वेन तत्सत्त्वात् । यदाह ।

गुरुः पुरोहितोमात्यो नायको नायिकापि च ।
सार्थवाह इति प्रोक्ताः षडेते नायका बुधैः ॥ इति ।

१-१२ अत्र हला सखि । परिसरे निकटे । अत्र वृत्तान्तो वार्त्ता । भर्तृदारिका मालती । प्रवृत्तिर्वार्त्ता । विविक्तं विजनम् । इह मकरन्दाज्ज्ञात-

१ सहि D. २ आसि A. ३ पिअ A. ४ जेव्व B. ज्जेव D. ५ °णुज्जाण C. वुत्तन्तो A.

प्रथ० । तदो किं । (क)

द्विती० । तदो भट्टिदारिअं दट्ठुकामाए भअवदीए पउत्तिणिमित्तं[1] अवलोइदा अणुप्पेसिदा । मए वि ताए कधिदं जधा[2] लवङ्गिआदुदीआ विवित्ते भट्टिदारिआ वट्टदि त्ति । (ख)

प्रथ० । हला[3] लवङ्गिआ क्खु केसरकुसुमाइं अवचिणोमि त्ति मअणुज्जाणादो उज्जेव्व[4] णागदा ता किं संपदं संपत्ता (ग)

द्विती० । अध इं । तं[5] क्खु परावट्टन्तीं उज्जेव्व[6] हत्थे गेह्णिअ पडिसिद्धपरिअणा भट्टिदारिआ[7] उअरिअलिन्दअं[8] समारूढा । (घ)

(क) ततः किम् ।

(ख) ततो भर्तृदारिकां द्रष्टुकामया भगवत्या प्रवृत्तिनिमित्तमवलोकितानुप्रेषिता । मयापि तस्यै कथितं लवङ्गिकाद्वितीया विविक्ते भर्तृदारिका वर्तत इति ।

(ग) हला लवङ्गिका खलु केसरकुसुमान्यवचिनोमीति मदनोद्यानादेव नागता[9] तत्किं सांप्रतं संप्राप्ता ।

(घ) अथ किम् । तां खलु परावर्तमानामेव[10] हस्ते गृहीत्वा प्रतिषिद्धपरिजना भर्तृदारिकोपर्यलिन्दकं समारूढा ।

माधवावस्थया कामन्दक्या प्रकृतसिद्ध्येवसरज्ञानार्थं मालतीवार्तां ज्ञातुं प्रहितावलोकितेति भावः । अत्र केसरो बकुलः । अवचिनोमि त्रोटयामि । इति हेतौ । अत्र परापतन्ती सत्वरमागच्छन्ती कृतकार्यत्वेन सत्वरमागमनं भूतधर्मः । उपर्यलिन्दकं बाह्यपट्टशालाया उपरीत्यर्थः ।

---

१ पउ° A. D. २ जहा B. ३ सहि B. ४ ज्जाणादो अण्णगदा B.; जेव्व A. ५ सा C. ६ जेव्व A. D.; ज्जेव C. ७ भट्ट C. D. ८ °न्दए B. ९ नायाता Com. १० परापतन्तीं Com.

प्रथ०। णूणं तस्स महाणुभावस्स[1] संकधाए अत्ताणं विणोदेदि[2]। (क)

द्वितो०। निःश्वस्य। कुदो से आसासो[3]। एदिणा अज्ज सविसेस[4] दंसणेण अदिभूमिं खु ताए अहिणिवेसो गमिस्सदि[5]। अण्णं च[6] णन्दणस्स कारणादो महाराओ[7] भट्टिदारिअं पत्थअन्तो अमच्चेण विण्णत्तो। (ख)

प्रथ०। किं त्ति। (ग)

द्वितो०। पईवदि[8] णिअस्स कण्णआजणस्स महाराओ[9] त्ति। ता

(क) नूनं तस्य महानुभावस्य संकथयात्मानं विनोदयति।

(ख) कुतस्तस्या आश्वासः। एतेनाद्य सविशेषदर्शनेनातिभूमिं खलु तस्या अभिनिवेशो गमिष्यति। अन्यच्च[10] नन्दनस्य कारणान्महाराजो भर्तृदारिकां प्रार्थयमानोमात्येन विज्ञप्तः।

(ग) किमिति।

१५–१९ अत्रातिभूमिमुत्कर्षम्। अभिनिवेश आसक्तिः। कल्यं प्रातः। कल्लीति पाठे कल्लिशब्दो देशी पूर्वदिनवाचकः। अत एव कल्लि पल्लीनिवासिन इति। किं विज्ञप्तमित्यर्थः।

२०–२६ इदमभूताहरणं वाक्यम्। यदाह।

अभूताहरणं तत्स्याद्यद्वाक्यं कपटाश्रयम्॥

वाक्यवञ्चमज्ञात्वाह [तज्जात इत्यादि]। अत्र दुःखदत्वेन शल्यमिव शल्यम्। अजहल्लिङ्गम्। अत्रापिनाम संभावनायाम्। भगवतीत्वं ज्ञाना-

---

१ °अस्स B. D. २ °इ B. ३ आभासो A. ४ B. om. स. ५ B. C. add त्ति. ६ अणंकं च कल्यमेव णन्द° C. ७ °राआ A.; भट्ट° B.; पअच्छन्ती A. पत्थंतो C. अब्भत्थंतो D. ८ जं पहवदि D. ९ °आओ B. महाराणिओ C.; त्तो for ता D. १० Com. om. अन्यच्च and has कल्यमेव; कारणेन Com.

जादो[1] आमरणं क्खु[2] मालदीए हिअअसल्लं माहवाणुराओ त्ति तक्केमि । (क)

प्रथ० । अवि णाम भअवदी किं पि भअवादित्तणं[3] एत्थ दंसइस्सदि । (ख)

द्विती० । अइ असंबद्धमणोरहे एहि[4] । (ग)

इति परिक्रम्य निष्क्रान्ते । प्रवेशकः ।

ततः प्रविशत्युपविष्टा सोत्कण्ठा मालती लवङ्गिका च ।

मालती । हुं[5] सहि तदो तदो । (घ)

(क) प्रभवति[6] निजस्य कन्यकाजनस्य महाराज इति । तज्जात[7] आमरणं खलु मालत्या हृदयशल्यं माधवानुराग इति तर्कयामि ।

(ख) अपि नाम भगवती किमप्यत्र भगवतीत्वं दर्शयिष्यति ।

(ग) अयि असंबद्धमनोरथे एहि ।

(घ) हुं सखि ततस्ततः ।

द्विविभवम् । निष्क्रान्ते चेटयौ । प्रवेशक इति । वक्तव्यस्य च बहुत्वाद्रसभङ्गप्रसङ्गेनान्योक्त्या प्रवेशकः । यदाह ।

यत्तु प्रयोगबाहुल्यादङ्केऽर्थो न समाप्यते ।
बहुवृत्तान्तोऽल्पकथैः सविक्षेपः प्रवेशकैः ॥
अङ्कानामन्तरालेषु संक्षिप्तार्थप्रयोजनैः ।
भृत्यवर्गे कथाबद्धो विज्ञेयोऽयं प्रवेशकः ॥

२८–२९ हुं प्रश्ने । लवङ्गिकाकथितबकुलमालाप्रार्थनापर्यन्तश्रुतवार्त्तया मालत्याग्रिमवार्त्ताकर्णनोत्कया पृच्छ्यत इत्यर्थः । विरहोत्कण्ठितेयम् । यदाह ।

---

१ जादं A.; D. om. २ B. om. क्खु and C. हिअअ; क्खु सअं मालदीए भविस्सदि माह° D. ३ °दीत्तणं A.; D. adds त्ति after °स्सदि. ४ A. D. add गच्छह्म; C. om. एहि. ५ C. om. हुं and one तदो. ६ यत्प्रभ° Com. ७ तनो Com.; Com. om. खलु; हृदये शल्यम् Com.

लवङ्गिका । तदो तेण महाणु[1]भावेण उवणीदा मे इअं[2] बउलमाला । (क) इति मालामर्पयति ।

माल० । गृहीत्वा सहर्षं निर्वर्ण्य । सहि एक्क[3]पासविसमपडिबद्धा क्खु एसा विरअणा । (ख)

लव० । एत्थ दाव अरमणीअत्तणे तुमं ज्जेव्व[4] अवरज्झसि । (ग)

माल० । कं[5]धं विअ । (घ)

लव० । जेण सो मुद्ध[6]दुव्वासामलङ्गो तधा विहत्थीकिदो । (ङ)

(क) ततस्तेन महानुभावेनोपनीता म इयं बकुलमाला ।

(ख) सखि एकपार्श्वविषमप्रतिबद्धा खल्वेषा विरचना ।

(ग) अत्र तावदरमणीयत्वे त्वमेवापराध्यसि ।

(घ) कथमिव ।

(ङ) येन स मु[8]ग्धदूर्वाश्यामलाङ्गस्तथा विहस्तीकृतः ।

अनेककार्यसंयुक्तो यस्या नागच्छति प्रियः ।
तदनागमदुःखार्ता विरहोत्कण्ठिता तु सा ॥

प्रियकथापरत्वे मोट्टायितभावोयम् । यदाह ।

श्रुत्वा कथां प्रियजनस्य सखीमुखेभ्यः
कर्णोदरस्थिवचलत्तनुतर्जनीकम् ।
यत्साङ्गभङ्गमिह जृम्भितमङ्गनानां
मोट्टायितं तदुदितं कविभिः पुराणैः ॥

प्रतिबद्धा घटिता । मालती माधवचेष्टाकर्णनाकाङ्क्षयाजानतीवाह कथमिव । कथं ममापराध इत्यर्थः । अत्र दूर्वेत्यादिना शृङ्गारित्वे तात्पर्यमुक्तम् । तथानिर्वचनीयप्रकारेण । विहस्तो व्याकुलः ।

१ °भाएण A. °हाएण B. २ B. om. इअं; C. has एसा; B. C. om. इति मालाम्. ३ फास A. वास B.; इअं for एसा A. Com. ४ जेव्व B. ज्जेव A. ५ कहं B. ६ B. om. दुव्वा; तधा B. तदा D. ७ Com. adds सहि. ८ Com. om. मुग्ध.

माल० । पिअसहि लवङ्गिए सव्वधा आसासणसीलासि । (क)

लव० । सहि का एत्थ आसासणसीलदा । णं भणामि । सो वि पिअसहीए मन्दमारुदु[1]व्वेल्लन्तफुल्लपुण्डरीअविब्भमेहिं पढमा[2]रद्धबउलावलीविरअणावदेससंजमिदवल[3]मोडिअवित्थरन्तेहिं लोअणेहिं विअम्भमाण[4]विब्भआत्थिमिददीहपेरन्तपरिअत्तणाविलासतण्डविदभूलदाविडम्बिदाणङ्गसारङ्गविब्भमवि[5]अड्ढं अवलोअअन्तो पच्चक्खीकिदो[6] दज्जेव्व । (ख)

(क) प्रियसखि लवङ्गि[7]के सर्वथाश्वासनशीलासि ।

(ख) सखि कात्राश्वासनशीलता । ननु भणामि सोपि प्रियसख्या

३७–४२ अत्र स त्वयापि विलोचनाभ्यां पश्यन्प्रत्यक्षीकृतो दृष्ट एवेत्यन्वयः । अपिर्भिन्नक्रमः । उद्वेल्लत्कम्पमानम् । विभ्रमो विशिष्टा भ्रान्तिः सोयमित्याकारा । सादृश्यं वा विभ्रमः । माधवस्य पुण्डरीकाक्षत्वात् । विरचनापदेशेन घटनव्याजेन यः संयमोन्यादर्शनं तं प्रापिताभ्यां बलामोडचा बलात्कारेण विस्तरं गच्छद्भ्याम् । बलामोडिर्बलात्कारे देशी । यद्यप्यवलोकयन्नित्यनेन लोचनाभ्यामिति प्राप्तं तथापि विशिष्टलोचनप्रतिपादनार्थं तदुक्तम् । विजृम्भमाणो वर्धमानः । स्तिमितः स्निग्धः । दीर्घपर्यन्तमतिदीर्घम् । परिवर्तना पुनःपुनर्गमनं तत्र विलासो विशिष्टदृष्टिव्यापारस्तेन ताण्डवितया नर्तितया भ्रूलतया विडम्बितः समीकृतोनङ्गशारङ्गविभ्रमः कामधनुर्विलासस्ततो विदग्धमिति क्रियाविशेषणम् ।

गमनासनपाणिपादचेष्टा सविशेषं नयनभ्रुवां च कर्म ।
दयितोपगमे यदप्रयत्नात्क्रियते नूनमयं विलास उक्तः ॥

---

१ मारुअपल्लत्थ B. C.; फुु° A. B; रीअब्भमेहिं C. २ °बद्ध A. Com. बउलमालावली C. ३ °मोडि A. D. °मोडिअ C. ४ °माण A.; परिअंतणा B; परियत्तणा C. ५ विब्भमेहिं C.; विभद्ध B. सुविअड्ढं C.; अवलोअन्तो B. C. D.; B. inserts तुए after अव-न्तो. ६ °कदो C.; जेव्व B. ७ Com. om.; Com. adds after °शीलासि, यद्वा । आशंसनशीलासि ।

माल० । लवङ्गिकां परिष्वज्य । अ[1]म्मो पिअसहि किं दाव तस्स महाणुभाव[2]स्स साहाविआ उज्जेव्व मुहुत्तसंणिधाइणो जणस्स विप्पलम्भइ[3]त्तआ विलासा [4]आदु जहा पिअसही संभावेदि । (क) ४९

लव० । विहस्य सासूयमिव । तुमं वि सहावेण उज्जे[5]व्व तस्सिं अवसरे असंगीदअं णच्चाविदासि । (ख)

मन्दमारुतोद्वेल्लद्ध्रफुल्लपुण्डरीकविभ्रमाभ्यां प्रथमारब्धबकुलावलीविरचनाप्रदेशासंयमितबलात्कारविस्तृताभ्यां लोच[6]नाभ्यां विजृम्भमाणविस्मयास्तिमितदीर्घपर्यन्तपरिवर्तनाविलासताण्डवितभ्रूलताविडम्बितानङ्गशारङ्गविभ्रमविदग्धमवलो[7]कयन्प्रत्यक्षीकृत एव ।

(क) अम्मो प्रियसखि किं तावत्तस्य महानुभावस्य स्वाभाविका एव मुहूर्तसांनिधायिनो जनस्य विप्रलम्भयितृका विलासा आहोस्विद्यथा प्रियसखी संभावयति ।

(ख) त्वमपि स्वभावेनैव तस्मिन्नवसरेऽसंगीतकं नर्तितासि ।

इति भरतः । शारङ्गरङ्गत इति प्रयोगाच्छारङ्गेति भिन्नो रेफः ॥ शारङ्गं धनुषि स्मृतमिति शाश्वतः ॥ ततस्त्वदवलोकनविकलता मालारम्यत्वे हेतुरिति तात्पर्यमिह ।

४३–४५ आमिति तदुक्तस्वीकारे । अम्मो इति पाठे अम्मो हर्षे वितर्के वा । विप्रलम्भितो विप्रलम्भं प्रापितः ॥ तारकादित्वादितच् । ततः स्वार्थे कः ॥ आदुशब्दोत्राहोस्विद्वाचकः । शीलस्य बहुकालपरिचेयतया मुहूर्तमात्रसंनिधाने विप्रलम्भचिन्ता । किमिदं नयनविकारादि स्वाभाविकमानुरागिकं वेति ज्ञातुं न शक्यत इति भावः । विप्पलम्भइत्तका इति पाठे विप्रलम्भचिन्तका इति ज्ञेयम् ।

४६–५२ अत्र मन्मथेनेति शेषः । असंगीतकं निभृतनृत्यं यथा-

---

१ आम् C. D. २ °अस्स A. B.; साहाविओ D.; जेव्व B. ३ °इतुआ A. ४ अहवा C. जवा B. ५ B. om. उज्जेव्व; संगीदअं B. D.; णच्चिदासि A. ६ विलोच° Com. ७ Com adds तया after °लोकयन्. ८ °इतुकाः, विप्रलम्भितकाः, विप्रलम्भचिन्तकाः Com.

माल० । सलज्जम्[1] । हुं तदो तदो । (क)

लव० । तदो पडिणिअत्तमाणजत्ताजणसंकुलेण[2] अन्तरिदे तस्सिं[3] मन्दारिआए घरं उवगदह्मि । ताए क्खु चित्तफलअं पभादे[4] हत्थीकिदं आसी । (ख)

माल० । किंणिमित्तं । (ग)

लव० । तं क्खु माहवाणुअरो[5] कलहंसओ णाम कामेदि[6] सा तस्स दंसइस्सदि त्ति । तदो पिअणिवेदिआ[7] मन्दारिआ संवुत्ता । (घ)

माल० । स्वगतम् । णूणं तेणावि कलहंसएण तं पडिछन्दअं अत्तणो पहुस्स[8] दंसिदं भविस्सदि । प्रकाशम् । सहि किं दाणिं दे पिअं[9] । (ङ)

(क) हुं ततस्ततः ।

(ख) ततः प्रतिनिवर्तमानयात्राजनसंकुलेनान्तरिते तस्मिन्मन्दारिकाया गृहमुपगतास्मि । तस्याः खलु चित्रफलकं प्रभाते हस्तीकृतमासीत् ।

(ग) किंनिमित्तम् ।

(घ) तां खलु माधवानुचरः कलहंसको नाम कामयते सा तस्य दर्शयिष्यतीति । ततो प्रियनिवेदिका मन्दारिका संवृत्ता ।

(ङ) नूनं तेनापि कलहंसकेन तत्प्रतिच्छन्दकमात्मनः प्रभोर्दर्शितं भविष्यति । सखि किमिदानीं ते प्रियम् ।

तथा[10] नृत्यं कारितासीत्यर्थः । सासूयं परद्वेषसहितम् । हुमिति प्रणयकोपे । अत्र तस्मिन्माधवे । खलु हेतौ । हस्तीकृतं न्यासीकृतम् । अत्र कामयत इच्छति ।

---

१ सलज्जा विहस्य C.; C. om. one तदो. २ °णिउत्तमाण B. C.; B. om. जत्ता; संकुले B. ३ A. C. D. add जणे after तस्सिं; उग° A.; उग्ग° D. ४ पहादे D.; °कई C. D. आसि A. B. ५ °चरो A. B. ६ तदो before सा B.; सो C.; संदंस° D. ७ A. Com. add मे after this. ८ णाहस्स A. B.; हुविस्स° D.; भविस्सदित्ति C.; भविस्सदित्ति तदो B. ९ पिअं B. १० तया Com.

लव० । एदं क्खु संदाविदस्स संदावआरिणो[1] दुल्लहमणोरहाहिणिवेसदूसहाआसदज्झन्तचित्तस्स क्खणमेत्तणिव्वावअं तुह पडिच्छन्दअं । (क) इति चित्रं[2] दर्शयति ।

माल० । सहर्षं[3] निर्वर्ण्य । अहो दाणिं पि हिअअस्स मे अणासङ्गो[4] जेण एव्वं पि आसासणं विप्पलम्भो त्ति संभावेमि । कधं[5] अक्खराइं पि । (ख) । इति वाचयति ।

जगति[6] जयिनस्ते ते भावा नवेन्दुकलादय इत्यादि पूर्वोक्तं पठित्वा सानन्दम् । महाभाअ सरिसं क्खु दे णिम्माणस्स वअणं[7] महुरदाए लक्खीअदि । दंसणं उण तक्कालमणोहरं परिणामदीहसंदावदारुणं[8]

(क) एतत्खलु संतापितस्य संतापकारिणो[9] दुर्लभमनोरथाभिनिवेशदुःसहायासदह्यमानचित्तस्य क्षणमात्रनिर्वापकं तव प्रतिच्छन्दकम् ।

(ख) अहो इदानीमपि मे हृदयस्यानासङ्गो येनैवमप्याश्वासनं विप्रलम्भ इति संभावयामि । कथमक्षराण्यपि ।

५७–६७ अत्र दुर्लभायां त्वयि मनोरथाभिनिवेशस्तेन यो दुःसहायासस्तेन दह्यमाने चित्ते क्षणमात्रनिर्वापकमिति । अत्रानासङ्गोनाश्वासः । लवङ्गिका स्वयं लिखित्वा माधवलिखितत्वेन बोधयतीति भावः । सदृशमिति । मधुरतया निर्माणस्य सदृशं वचनमित्यर्थः । तवाकृतिर्मधुरा यथा तथा वचोपि मधुरमित्यर्थः । यस्येदृशं वचस्तस्य कथमेवं दर्शनमित्युपालम्भपूर्विका पृच्छा । यदाह ।

यत्र भावनयोपेतमात्मानमथवा परम् ।

---

१ °कारिणी B. दज्झन्त for दड्झन्त C. २ B. C. om. इति; चित्रफलकं C. ३ सहर्षं चिरं निर्वर्ण्य C.; सौत्सुक्यं चित्रं A.; B. om. चि. C. D. have चि. ४ अणासंगो B. D. अनाश्वासः C.; एवं A. C.; एदं D. °सणा B. ५ कहं B.; °इवि D. ६ The whole s'loka in B. C. ७ विरअणामहुरदा । A.; महुर° D. ८ B. adds अवि, C. अ. ९ स्वसंताप° Com.

धण्णाओ क्खु ताओ अम्मकाओ जाओ तुमं ण पेक्खन्ति [2]पेक्खिअ वा अत्तणो हिअअस्स पहवन्ति । इति रोदिति । (क)

लव० । सहि किं एव्वं पि दे णत्थि आसासो । (ख)

माल० । सहि कधं[3] । (ग)

लव० । जस्स कारणादो उक्खण्डिअ[4]बन्धणं विअ कङ्केल्लिपल्लवं

(क) महाभाग सदृशं खलु ते निर्माणस्य वचनं मधुरतया ल-क्ष्यते[5]। दर्शनं पुनस्तत्कालमनोहरं परिणामदीर्घसंतापदारुणम् । धन्याः खलु ताः कन्यका[6] यास्त्वां न प्रेक्षन्ते प्रेक्ष्य वात्मनो हृदयस्य प्रभवन्ति ।

(ख) सखि किमेवमपि ते नास्त्याश्वासः ।

(ग) सखि कथम् ।

(घ) यस्य कारणादुत्खण्डित[7]बन्धनमिव कङ्केल्लिपल्लवं क्लाम्यत्व-

---

पृच्छाक्रियाभिधत्तेर्थं सा पृच्छेत्यभिधीयते ॥

नाट्यधर्मत्वेन परोक्षस्यापि प्रत्यक्षीकरणम् । यदाह ।

परोक्षेपि च वक्तव्यो नार्यो प्रत्यक्षवत्प्रियः ॥

अम्मकाशब्दः स्त्रियां कन्यायां वा देशी ।

७०–७५ अत्रोत्खलितं छिन्नम् । बन्धनं वृन्तशाखासंयोगः । कङ्केल्लिरशोकः । निःसहाक्षमा । परिखिद्यसे परिहीयसे । एतेन कामावस्था तनुलोका । अस्रं नेत्रजलम् । संस्कृतमिति । आसन्नमरणतया प्रकृतिवि-पर्ययद्योतनाय स्त्रियाः संस्कृताश्रयणम् । यद्वा । मरणसमये प्राकृतस्मर-णस्य हीनयोनिजन्मफलकत्वेन बोधनात्तत्काले स्त्रियाः संस्कृताश्रयणम् । यद्वा । वैदग्ध्यद्योतनाय तत् । यदाह ।

---

१ कण्णभाओ A. C; D. om. क्खु ताओ; धण्णा B. २ पेक्खन्ति । अवि णाम अत्तणो A. ३ कहं D. ४ उक्खाडिअ B. ५ Com. om. लक्ष्यते. ६ स्त्रियो Com.; प्रेक्षन्ते । अपिनामात्मनो Com. ७ उत्खलित Com.

किलम्मेऽणोमालिआकुसुमणीसहा परिक्खिव्वसि सो वि जाणाविदो भअवदा मम्महेण संदावस्स दूसहत्तणं त्ति। (ध)

माल०। कुसलं दाणिं तस्स महाणुभावस्स भोदु मम उण दुल्लहो आसासो। सास्रम्। विसेसदो अज्ज पिअसहि (क)

संस्कृतमाश्रित्य।

मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं
प्रमाथी निर्धूमो ज्वलति विधुतः पावक इव।

मालिकाकुसुमनिःसहा परिखिद्यसे सोऽपि ज्ञापितो भगवता मन्मथेन संतापस्य दुःसहत्वमिति।

(क) कुशलमिदानीं तस्य महानुभावस्य भवतु मम पुनर्दुर्लभ आश्वासः। विशेषतोद्य प्रियसखि

संस्कृतभाषावाचः प्रायो नाटचे खलु स्त्रियाः श्लाघ्याः।
क्वचिदपि विदग्धतायाः प्रबोधनार्थं प्रशस्यन्ते॥

७६—७९ मनोराग इत्यादि। प्रियसखि मामद्य त्रातुं न तातः प्रभवति न वा माता न वा त्वम्। कुतः। मनोराग आभिरविरतं प्रमाथी क्षोभकारी यथा तीव्रं विषं तथा विसर्पति व्याप्नोति। यथा धातुत्वगादिषु विषं व्याप्नोति तथाङ्गानि म उद्वेग इत्यर्थः। यद्वा। सविशेषदर्शनाच्चित्तानुराग इच्छाभेदस्तीव्रं यथा तथा मनो विसर्पति व्याप्नोति दाहकारित्वाद्विषमिव। तथा विधुतः संधुक्षितोऽग्निर्यथा ज्वलति विधूननान्निर्धूमं यथा तथा स एव रागो ज्वलति ज्वालामालाकुलीभवति। इत इतः सर्वत्र प्रत्यङ्गं हिनस्ति पीडयति गरीयाञ्ज्वर इव। तं त्यक्त्वा ममाधिस्त्वया समाधातुं

---

१ किलिस्सन्त A. किलिन C. किळणंत D. २ °खिज्जीअसि D. परिळक्खीअसि C. ३ B. om.; B. C. om. त्ति. ४ णीं A.; °गस्स B. °भस्स C. होदु B. सुदुक्क° D. आभासो A. आहासो C. आसासो सए विसे° B. ५ निर्धूमं A.

हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित[1] इतो
न मां त्रातुं तातः प्रभवति न चाम्बा न भवती ॥

लव० । एव्वं ज्जेव्व पच्चक्खसोक्खदाइणो परोक्खदुक्खदूसहा[2] सज्जणसमाअमा होन्ति । अवि अ । जस्स वादाअणन्तरमुहुत्त[3]-दंसणेण सविसेससमिद्धहुदवहाअन्तपुण्णमा[4]चन्दोदआ णिक्करुण-कामव्वाव्वारसंसइदजीविदा[5] दे सरीरावत्था तस्स ज्जेव्व संपत्ति[6]सविसे-सदंसणा भाविअ अज्ज संतप्पसि त्ति किं एत्थ भणिदव्वं । ता पिअ-सहि[7] सलाहणिज्जं दुल्लहमणोरहफलं जीअलोअस्स गुरुआ[8]णुराअ-सरिसं महाणुभाअवल्लहसमाअमो त्ति एत्तिअं जाणिमो । (क)

(क) एवमेव प्रत्यक्षसौख्यदायिनः परोक्षदुःखदुःसहाः[9] सज्जनस-मागमा भवन्ति । अपि च । यस्य वातायनान्तरमुहूर्तदर्शनेन सविशेषस-

न शक्यत इति भावः । यद्वा तातस्त्रातुं न शक्नोति नन्दननिरासेन माधवाय मददानात् । अम्बापि न तथा । तथानुवर्तमानस्य तातस्यानि-षेधात् । लवङ्गिकायाश्च तयोः समशीर्षिकया गणनं स्वाच्छन्द्येन स्वम-तप्रकाशनाय ।

८१—८६ अत्र भणितव्यं युज्यत एवेत्यर्थः । यस्याव्यक्तं दर्शनं चन्द्रस्याग्नित्वं जीवितसंशयं च कुरुते तस्य व्यक्तं दर्शनं त्वदुपन्यस्तप्रकारं तापं कुरुत इति किमत्र चित्रम् । चन्द्रेऽग्नित्वेन ज्ञानान्निदाघच्छेद उक्तः । सुकुमारायामस्यामतिपीडाकारित्वेन निष्करुणत्वम् । व्यापारो दशावस्थः ।

१ बलीयान् C. २ पच्चक्खं and परोक्खं B.; दुःसहाभासकारिणो सज्ज° A.; सामागमा C. ३ मुहुत्तमेत्तदंस° A. C.; हुअवहा° D. हुदवहाअमाण C. ४ पुण्णओंदो° C.; अदिणिक्करु° D.; वावार B. C. D. ५ °दा दीसइ दे B. ६ संपत्तं C.; A. om. भविअ. ७ °सहि A. ८ गरुआ° C. D. सारिसमहा° A. D. महाभाअ B. C. समागमो A. C. D. ९ दुःसहायासकारिणः Com.

माल० । सहि दइदं[1]मालदीजीविदे साहसोवण्णासिणि अवेहि । सास्रम्[2] । अहवा अहं ज्जेव्व वारं वारं पैलोअअन्ती[3] दुक्खव्ववत्था[4]-विदधीरत्तणावट्ठम्भेण अत्तणो[5] हिअएण दूरविड्ड[6]ज्जम्भमाणदुव्विणअ-लहुएण एत्थ अवरज्झामि तधा वि पिअसहि (क)

मृद्धहुतवहाप्यमानपूर्णिमाचन्द्रोदया निष्करुणकामव्यापारसंशायितजीवि-ता ते शरीरावस्था तस्यैव संप्राप्तसविशेषदर्शना भूत्वा[7] संतप्यसीति किमत्र भणितव्यम् । तत्प्रियसखि श्लाघनीयं दुर्लभमनोरथफलं जीव-लोकस्य गुरुकानुरागसदृशं[8] महानुभाववल्लभसमागम इत्येतावज्जानीमः ।

(क) सखि दयितमालतीजीविते साहसोपन्यासिनि अपेहि । अथवा अहमेव वारं वारं प्रलोकयन्ती दुःखव्यवस्थापितधीरत्वावष्टम्भे-नात्मनो हृदयेन दूरविजृम्भमाणदुर्विनयलघुकेनात्रापराध्यामि तथापि प्रियसखि ।

किमत्र कर्तव्यमित्यत आह । तदिति । तथा च गुरुतरानुरागस्यैतत्फलं यत्सखीद्वारा वल्लभसमागमः कारयितव्य इति भावः ।

८७—९० अत्र दयितं प्रियम् । महाकुलकलङ्कशङ्कया साहसम् । अत एव रोदनम् । तथा च त्वमपेह्यपगच्छ । प्रियभाषिणीं त्वां किमधि-क्षिपामि यदहमेवात्र वाच्येत्याह । अथवेति । अत्र क्षणं क्षणमालोकनाकु-लत्वाद्दुःखव्यवस्थापितं यद्धीरत्वं तस्यावष्टम्भोऽविद्यमानमेवैतदारोपस्तेने-त्यर्थः । लघ्वी लघुतां गता । अहमत्रापराध्यामीति येन तवैतादृशसाह-सोपन्यास इति भावः । तथापि प्रियसखि ।

१ दइअ B. २ C. om. सास्रं. ३ जेव्व B. अवलोअंती B. ४ दुक्खावत्थाविद B. ५ मे C. ६ दूरविअलिदलज्जेण दुव्विणअलहुइ D. दूरविअलिदलज्जं तलज्जावणेण दुव्वि-णअलहुएण C.; दूरविअलइज्जन्तदुव्विणअलहुइ A.; तहा B. तह D. ७ Com. om. भूत्वा. ८ °शसह° Com.

भूयः संस्कृतमाश्रित्य ।

ज्वलतु गगने रात्रौ रात्रावखण्डकलः शशी
दहतु मदनः किं वा मृत्योः परेण विधास्यति ।
मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया
९५ कुलममलिनं न त्वेवायं जनो न च जीवितम् ॥

लव० । स्वगतम् । एत्थ दाणिं को उवाओ । (क)

(क) अत्रेदानीं क उपायः ।

९२–९५ अधुना साहसाकरणं हृदि निधाय सनिर्वेदमाह । ज्वलत्वित्यादि । प्रतिरात्रं पूर्णश्चन्द्रो ज्वलतु तापयतु । तथापि न साहसं करोमीति भावः । गगन इत्यनेनाप्राप्यत्वादनुपागमनीयतोक्ता । तर्हि कामस्त्वां पीडयिष्यतीत्यत आह । मदनो दहतु मृत्योर्मरणात्परं स किं करिष्यति । मरणे सति दुःखस्यापि त्यागादिष्टमेव तदिति भावः । परेणेति ॥ प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया ॥ इदं नायिकायाः सत्त्वजधैर्यम् । यदाह ।

चापलेनानुपहतं चित्तं धैर्यमुदीरितम् ॥

ननु दुःखहानाय माधवानुसरणमेव वरमत आह । मम पुनस्तातः पिता दयित इष्टः । कीदृशः । श्लाघ्यः सर्वश्लाघाविषयः । अमलवंशा मातेष्टा । निर्मलं कुलं चेष्टम् । अयं हृदिस्थो जनो माधवो नैवेष्टः । साहसक्रिययेति शेषः । तर्हि कथं जीवनमत आह । न च जीवितमिष्टम् । अत्र जीवितद्वेषादुद्वेगावस्था । यदाह ।

प्रद्वेषः प्राणितव्ये यः स उद्वेगः स्मृतो बुधैः ॥

९६–१०२ उद्वेगनाशोपायं चिन्तयन्ती लवङ्गिकाह । अत्रेदानीं क उपायः । प्रतीहारी । एषा भगवती कामन्दकी । मालतीजीवनोपाय इति भावः । प्रतीहारीत्यनेन संबन्धघटनं सूचितम् । यदाह ।

१ दाणीं A. D.

अथ नेपथ्यार्द्धप्रविष्टा प्रतीहारी । एसा भअवदी कामन्दई. । (क)

उभे । किं भअवदी । (ख)

प्रती० । भट्टिदारिअं[1] दट्ठुकामा आअदा । (ग)

उभे । तदो किं विलम्बीअदि । (घ)

प्रतीहारी निष्क्रान्ता ।

मालती चित्रं[2] प्रच्छादयति ।

लव० । स्वगतम् । सुसमीहिदं[3] क्खु जादं । (ङ)

ततः प्रविशति कामन्दक्यवलोकिता च ।

काम० । साधु सखे भूरिवसो साधु । प्रभवति निजस्यै[4] कन्यकाजन-

(क) एषा भगवती कामन्दकी ।

(ख) किं भगवती ।

(ग) भर्तृदारिकां द्रष्टुकामागता ।

(घ) ततः किं विलम्ब्यते ।

(ङ) सुसमीहितं खलु जातम् ।

संधिविग्रहसंबन्धनानाचारसमन्वितम् ।
निवेदयन्ति याः कार्यं प्रतीहार्यस्तु ता मताः ॥

प्रतीहारीत्यत्र बहुलवचनान्मनुष्येपि दीर्घः ॥ उभयोर्वाक्ये । किमर्थमागतेत्यर्थः । अत एवाग्रिमवाक्ये तद्व्यापारकथनम् । सुसमीहितं खलु जातम् । इदानीं यत्कामन्दक्यागमनमिति भावः ।

१०६—११० उभयेति । इहलोकाविरुद्धं साक्षादप्रतिषेधेन राजकोपाजननात् । परलोकाविरोधस्त्वात्मीयस्य कुमारीजनस्य प्रभुर्न परस्ये-

---

१ भग० कामं० before भट्ट D.; भट्ट B. C. D.; दट्ठुं B. C.; आअदा B. २ चित्रफलकमाच्छादयति A. ३ सुसमाहिदं C. ४ कन्या० A. निजकन्यकाजनस्य B. C.

स्य महाराज इत्युभयलोकाविरुद्धं वचनमुपन्यस्तम्। अपि च। अद्य मन्मथोद्यानवृत्तान्तेन भगवतो विधेरनुकूलतामवगच्छामि[1]। बकुलावलीचित्रफलकव्यतिकरसंविधानं[2] कौतुकमद्भुतं प्रमोदमुल्लासयति। इतरेतरानुरागो[3] हि दारकर्मणि पराध्यं मङ्गलं गीतश्चायमर्थोऽङ्गिरसा यस्यां मनश्चक्षुषोरनुबन्धस्तस्यामृद्धिरिति[4]।

अव०। एसा मालदी। (क)

काम०। [5]निर्वर्ण्य।

निकामं क्षामाङ्गी सरसकदलीगर्भसुभगा
कलाशेषा मूर्तिः शशिन इव नेत्रोत्सवकरी।
अवस्थामापन्ना मदनदहनोद्दाहविधुरा[6]
मियं नः कल्याणी रमयति मनः कम्पयति च॥

(क) एषा मालती।

ति साधारणोक्त्यासत्यानुदीरणादित्यर्थः। व्यतिकरो मिलनं तद्रूपं संविधानम्। दारकर्मणि परिणये। पराध्यं श्रेष्ठम्। अनुबन्धो रतिः। ऋद्धिरुपचयः।

११३–११६ निकाममित्यादि। इयं कल्याण्यस्माकं मनो रमयति। कुतः। अत्यर्थं क्षीणाङ्गी। सरस आर्द्रोऽपर्युषित इति यावत्। कदल्या गर्भो मज्जा तद्वद्रम्या क्षीणत्वपाण्डुत्वाभ्याम्। इह गर्भपदेनातिपाण्डुत्वं कोमलत्वं चोक्तम्। कलाशेषा शशिनो मूर्तिरिव द्वितीयाचन्द्रलेखेव। अत एव प्रस्तुतकार्यसंपादकत्वेन रमयति। उद्दाहेनोत्कटदाहेन विधुरां दशामापन्ना सती मनः कम्पयति। अतिपीडनादनिष्टाशङ्कित्वादिति भावः। इह तनुताख्या कामदशा सूचिता।

१ विधेरभ्यनु° D. अभ्यवगच्छामि C. २ संविधानकं किमप्यद्भुतं B. °तुकमप्यद्भु° C. ३ °तरगुणानुरागिणोर्हि B; परार्धं. A. ४ वाङ्मनश्चक्षुषोः A. ५ दृष्ट्वा निर्वर्ण्य B. ६ दहनोद्दामविधुरा B. C.

अपि च । परिपाण्डुपांसुलकपोलमाननं
दधती मनोहरतरत्वमागता ।
रमणीयजन्मनि जने परिभ्रम-
च्छ्लितो विधिर्विजयते हि मान्मथः ॥ १२०

अथवा । नियतमनया संकल्पनिर्मितः प्रियसमागमोऽनुभूयते ।

११७–१२१ परीत्यादि । पांसुलं रूक्षम् । पाण्डुरूक्षकपोलवदनापीयं रम्या । यतो मनोज्ञजन्मनि जने वलन्कामस्य विकारो यादृशस्तादृश ईप्सितः सन्विजयी भवति । संकल्पो मनोव्यापारः । नीवीत्यादि । जघनवस्त्रबन्धनं नीवी । तस्या बन्धस्य ग्रन्थेरुच्छ्वसनं शिथिलता । वासःश्लथतानुरागादपि । यदाह ।

स्वेदोरुवेपथुस्तम्भाः श्लथता जघनच्छदे ।
आविर्भवति नारीणामनुरागवशात्मनाम् ॥

अधरस्पन्दनमधरकम्पनम् । एतत्तु स्फुरितचुम्बने । यदाह ।

रदने विशान्तमोष्ठं ग्रहीतुं या समिच्छति ।
निजोष्ठः कम्पते यच्च स्फुरितं चुम्बनं मतम् ॥

दोर्विषादो बाह्वोर्निःसहत्वम् । आलिङ्गनसौख्यात् । स्वेद आयासात् । मसृणं कोमलम् । मधुरं ललितम् । संकल्पलब्धस्य दुरालोकत्वादाकेकरम् । शृङ्गारास्त्रिग्धम् । सुखभावनया मुग्धम् । चक्षुः । संकल्पमात्रलब्धतया प्रियेसूयायोगाज्जिह्मा दृष्टिः । जिह्मा दृष्टिरसूयायाम् । यदाह ।

ललिताकुञ्चितपुटा शनैस्तिर्यग्विसर्पिणी ।
निगूढागूढतारा च जिह्मा दृष्टिरुदाहृता ॥

लब्धे सति धृतिहर्षाभ्यां ललितम् । तल्लक्षणं चूक्तमेव ।

आकेकरा घनालोके विच्छेदे प्रोषितेषु च ।

तथाह्यस्याः

नीवीबन्धोच्छ्वसनमधरस्पन्दनं दोर्विषादः
स्वेदश्चक्षुर्मसृणमधुराकेकर[1]स्निग्धमुग्धम् ।
१२५ गात्रस्तम्भः स्तनमुकुलयोरु[2]त्प्रबन्धः प्रकम्पो
गण्डाभोगे पुलकपटलं मूर्छना चेतना च ॥

इत्युपसर्पति ।

लवङ्गिका मालतीं चा[3]लयति । उभे उत्तिष्ठतः ।

माल० । भअवदि वन्दामि । (क)

(क) भगवति वन्दे ।

आकुञ्चितपुटापाङ्गसंगतार्धनिमेषिणी ॥
मुहुर्व्यावृत्ततारा च दृष्टिराकेकरा मता ॥

दोर्दोषा भुजा भुज इति शब्दभेदः । गात्रस्तम्भः शरीरनिश्चलता । अतिहर्षात् । यदाह ।

अतिहर्षभयरोषरागेभ्यः स्तम्भसंभवः ॥

मुकुलाकारत्वात्स्तनावेव मुकुलौ । तयोरुत्प्रबन्धो विच्छेदरहितः कम्पः । प्रियस्य गाढालिङ्गनात् । गण्डाभोगे गण्डमण्डले पुलकपटलं रोमाञ्चसंघः । प्रियचुम्बनसंकल्पात् । आत्यन्तिकत्वार्थं पटलग्रहणम् । मूर्छना मोहः । निरतिशयानन्दयोगात् । यदाह ।

स्रस्तता वपुषि मीलनं दृशोर्मूर्छना च रतिलाभलक्षणम् ॥

रतिविलाससंकल्पेनान्तरा चेतना च ।

१२९–१३८ बौद्धानां प्रव्रजितं प्रति वन्दामीति नातिसंप्रदायः । यद्वा । वन्दामि वन्द इति सामान्यत एव । मालतीचित्तवि-

१ स्निग्धतारं A. २ मुकुलयोरुत्तबंधः C. ३ चालयित्वा A. B. C.; after था–त्था A. adds मालदि इदा ।

काम०। महाभागे समीहित[1]फलभाजनं भूयाः।

लव०। [2]सुविहिदं आसणं एत्थ उवविसदु भअवदी। (क) सर्वा उपविशन्ति।

माल०। कुसलं भअव[3]दीए। (ख)

काम०। निःश्वस्य। कुशलमिव।

लव०। स्वगतम्। पत्थावणा क्खु एसा कवडणाडअस्स। प्रकाशम्। [4]गुरुअवाहत्थम्भमन्थरिदकण्ठपडिलग्गणी[5]सासं अण्णारिसं ज्जेव्व भअवदीए वअणं। ता किं दाणिं[6] उव्वेअकारणं भविस्सदि। (ग)

काम०। नन्वयमेव चीरचीवरविरुद्धः परिचयः।

लव०। क[7]धं विअ। (घ)

काम०। अयि[8] किं न जानासि। १

(क) [9]सुविहितमासनमत्रोपविशतु भगवती।

(ख) कुशलं भगवत्याः।

(ग) प्रस्तावना खल्वेषा कपटनाटकस्य। गुरुकबाष्पस्तम्भमन्थरितकण्ठप्रतिलग्ननिःश्वासमन्यादृशमेव भगवत्या वचनम्। तत्किमिदानीमुद्वेगकारणं भविष्यति।

(घ) कथमिव।

नोदाय स्वस्य च तद्विषयावष्टम्भदर्शनायाह। भाजनमिति। कपटमेव नाटकम्। अत्र बाष्पं नेत्रजलम्। स्तम्भः प्रतिबन्धः। मन्थरितो मन्दीकृतः। तादृशकण्ठे प्रतिलग्नो निःश्वासो यत्र तत्। परिचयो मालत्यभिष्वङ्गः। उद्वेगकारणमिति शेषः।

१ अभिमतफलभाजनं A. समीहितफलस्य D. २ एदं आसणं A. ३ D. om. भ–ए. ४ गरुअ B. ५ निस्सासं B. C. ६ दाणीं A. D.; हुविस्सदि B. ७ कहं D. ८ A. D. insert त्वमपि after अयि; A. न वेत्सि for किं न &c. ९ दत्तमासनम् Com.

इदमिह मदनस्य जैत्रमस्त्रं सहजविलासनिबन्धनं शरीरम् ।
अनुचितवरसंप्रयोगशोच्यं विफलगुणातिशयं भविष्यतीति ॥

मालती वैचित्र्यं[1] नाटयति ।

लव० । अत्थि एदं णरेन्दवअणाणुरोहिणा अमच्चेण णन्दणस्स पडिवण्णा[2] मालदित्ति सअलो जणो अमच्चं जुगुच्छेदि (क)

माल० स्वगतम्[3] । कधं उवहारीकिदह्मि राइणा तादेण । (ख)

काम० । आश्चर्यम् ।

(क) अस्त्येतन्नरेन्द्रवचनानुरोधिनामात्येन नन्दनस्य प्रतिपन्ना मालतीति सकलो जनोमात्यं जुगुप्सते ।

(ख) कथमुपहारीकृतास्मि राज्ञा तातेन ।

१४१–१४६ इदमित्यादि । मालत्या इदं शरीरं विफलगुणातिशयं भविष्यतीति त्वं किं न वेत्सि । अनुचितजामातृसंबन्धशोचनावहम् । यतः । इह जगति यत्कामस्य जैत्रं जयनशीलमस्त्रं सहजविलासस्य निबन्धनं कारणं च । एतेनैव सहजविलासा जायन्त इत्यर्थः ॥ वरो जामातरि श्रेष्ठ इति विश्वः ॥ वैचित्र्यं विमनस्कत्वम् । नाटयति करोति । पितृनिन्दैव पूर्वश्लोकार्थ इति द्योतयति लवङ्गिका । [अस्त्येतदिति] । अत्र जुगुप्सते निन्दति । अत्रानुपहरणीयाप्युपहारीकृतेत्यनेन स्वर्थेन पितुर्गुणानभिज्ञत्वं सूचितम् । उपहारश्च मरणशरणश्छागादिः क्रियत इति मरणतुल्यतास्य दर्शिता । इह पश्चात्तापनामा नाट्यालंकारः । यदाह ।

अनुतापातिरेकस्तु पश्चात्ताप उदाहृतः ॥ इति ।

१४८–१५१ बालत्वात्स्नेहाच्च तातस्य गुणानभिज्ञत्वं मालती न जानातीत्याशयेनाह गुणेत्यादि । इदं कार्यं गुणनिरपेक्षममात्येन कथमा-

---

१ वैचित्र्यं C. २ °पुण्णा B. C.; D. adds एव after सअलो; B. om. अमच्चं. ३ B. om. स्वगतम् ; कहं D.

गुणापेक्षाशून्यं कथमिदमुपक्रान्तमथ वा
कुतोपत्यस्नेहः कुटिलनयनिष्णातमनसाम्।
इदं त्वैदंपर्यं यदुत नृपतेर्नर्मसचिवः
सुतादानान्मित्रं भवतु स[1] हि नो नन्दन इति॥

माल०। स्व[2]गतम्। राआराहणं क्खु तादस्स गुरु[3]अं ण उण मालदी। (क)

लव०। एवं[4] जधा भअवदीए आणत्तं। अण्णधा तस्सिं वरे दुद्दंसणे अदिक्कन्तजोव्व[5]णे किं त्ति ण[6] विआरिदं अमच्चेण। (ख)

(क) राजाराधनं खलु तातस्य गुरुकं न पुनर्मालती।

(ख) एवं यथा भगवत्याज्ञप्तम्। अन्यथा तस्मिन्वरे दुर्दर्शनेतिक्रान्तयौवने[7] किमिति न विचारितममात्येन।

रब्धम्। रूपादिमति पुरजने सति तद्रहितनन्दनाय मालतीदानं कथमुपक्रान्तमिति भावः। अत एवाश्चर्यम्। अथवा पक्षान्तरे। कुटिलनये परवञ्चननीतौ कुशलचित्तानां कुतोपत्यस्नेहः। नैवेत्यर्थः। स्नेहस्य निरुपाख्युपकारेच्छारूपस्य नृपानुरञ्जनादावुपाधावभावादित्यर्थः। इदं यदुपक्रान्तं तदैदंपर्यमिदंपरम्। एतदभिप्रायकमिति यावत्॥ चतुर्वर्णादित्वादिदंपरशब्दे ष्यञ्॥ उत निश्चये वितर्के वा। यन्नृपतेर्नर्मसचिवो नन्दनः कन्यादानादस्माकं मित्रमनपकारी भवत्वित्येवमुपक्रान्तम्॥ निष्णात इत्यत्र निनदीभ्यां स्नातेः कौशल इति षत्वम्॥ उत निश्चयवितर्कयोरिति धरणिः॥ कामोपचरणं नर्म। यदाह।

उपचारः स्त्रीपुंसयोर्मनोजन्मानिबन्धनः।
स एवात्र परिज्ञेयो नर्मसंज्ञः प्रयोक्तृभिः॥

इति भरतः।

१५५–१६४ इतीति दुर्दर्शनादिकम्। अत्र जीवितमपि निष्क-

1 स हि मे नन्दन A. भवतु सचिवान्नंदन इति C. 2 B. om. 3 बहुमदं B. C. D. 4 एवं A. B; जहा B. C. 5 °जोव्वणो त्ति B. 6 किं ण A.; °रिअं A. विभाविदं D. 7 °यौवने इति Com.

माल० । स्वगतम् । हा हदम्हि समुत्थिदाणत्थवज्जपडणा[१] मन्द-भाइणी[२] । (क)

लव० । ता भअवदि पसीद[३] परित्ताहि इमादो जीविदमरणादो[४] पिअसहिं तत्तावि एसा दुहिदा उजेव्व[५] । (ख)

काम० । अयि[६] सरले किमत्र मया भगवत्या शक्यम् । प्रभवति प्रायः[७] कुमारीणां जनयिता दैवं च । यत्तु किल कौशिकी शकुन्तला दुष्यन्त[८]मप्सराः पुरूरवसं चकम इत्याख्यानविद आचक्षते वासव-

(क) हा हतास्मि समुत्थितानर्थवज्रपतना मन्दभागिनी ।

(ख) तद्भगवति प्रसीद परित्रायस्वास्माज्जीवितमरणात्प्रियसखीं तवाप्येषा दुहितैव ।

लत्वदुःखबहुलत्वाभ्यां मरणकल्पं जीवितमरणम् । उक्तप्रबन्धेन मालतीनैराश्यं विधायाह । अयीति ॥ भगवत्येति कृत्यानां कर्तरि वेति तृतीया न तु षष्ठी । अशक्यमित्यकारप्रश्लेषसंभवात् ॥ गान्धर्वविवाहे कन्यावरौ प्रभवत इति प्रायःपदतात्पर्यम् । जनयितेति । न राजेति भावः । माधवविवाहे भूरिवसुरेव सानुग्रहः । अत एव सरल इत्युक्तम् । किल प्रसिद्धौ । कौशिकी कुशिकवंशजा । चकमे कामयते स्म । आख्यानं पुरावृत्तम् । इहाख्याननामा नाट्यालंकारः । यदाह ।

आख्यानं तु तदुद्दिष्टं यत्पुरावृत्तकीर्तनम् ॥ इति ।

निदर्शननामा नाट्यालंकारोपि । यदाह ।

१ समुट्ठिदा° D. °दणत्थ B. समुत्थि° A.; पदणा A. वडणा C. वेदना B. २ B. adds अहं. ३ पसीददु भअवदी A. ४ जीवण A.; पिअसहीं A. B. ५ उजेव B. ६ अयि सरले C. D.; D. om. मया. ७ D. om. ८ उर्व-शीत्वाप्स° D.

दत्त्वा च संजयाय राज्ञे पित्रा [1]दत्तमात्मानमुदयनाय प्रायच्छदित्यादि तदपि सा[2]हसाभासमित्यनुपदेष्टव्य एवायमर्थः। सर्वथा

राज्ञः प्रियाय सुहृदे सचिवाय कार्या[3]-
द्दत्त्वात्मजां भवतु निर्वृतिमानमात्यः।
दुर्दर्शनेन घटतामियमप्यनेन
धूमग्रहेण विमला शशिनः कलेव ॥

माल०। सास्रं स्वगतम्। हा ताद तुमं पि मम[4] णाम एव्वं त्ति सव्वधा जिदं भोअतिह्णाए[5]। (क)

अव०। चिराइदं भअवदीए। णं भणामि अ[6]स्सत्थसरीरो महाभाओ माहवो त्ति। (ख)

(क) हा तात त्वमपि मम नामैवमिति सर्वथा जितं भोगतृष्णया।

(ख) चिरायितं भगवत्या। ननु भणाम्यस्वस्थशरीरो महाभागो माधव इति।

कथनादन्यचेष्टानां साभ्यसि[ध्दि]र्निदर्शनम् ॥ इति।
कल्पपदेनोपदेष्टव्यत्वसूचनम्।

१६९–१७८ अधुना साहसेपि प्रवृत्त्यर्थं मालत्यनुशयाय पितुर्वैरस्य च दोषमाह। राज्ञ इति। कार्यादाराधनादेर्न त्वदृष्टार्थमित्यर्थः। अनेन सचिवेन। वार्धक्यात्कौरूप्याच्च दुर्दर्शनेन। धूमग्रहेण राहुणोत्पातधूमग्रहेण वा। पीडाकारित्वाद्दुर्दर्शनेन। ग्रहणं ग्रहः। मालती जातानुशयाह। [हा तातेति]। एवं निस्पृह इत्यर्थः। भोगेति।

---

१ प्रदत्त C. दत्तामुदय° D. २ साहसिकमित्यनुपदेष्टव्यकलां A. °त्यादिसाहसकलामित्यनुपदेष्टव्यमेतत् D. ३ सचिवाय भार्यां C. ४ B. om. मम. ५ तिह्णाए C. ६ असुन्थ A.; D. adds क्खु after सरीरो; महाभाभमाह° B. D.

काम० । इदं[1] गम्यते । वत्से अनुजानीहि माम्[2] ।

लव० । जनान्तिकम् । सहि मालदि संपदं भअवदीसआसादो[3]

१७८ तस्स महाणुभावस्स[4] उग्गमं जाणीमो । (क)

माल० । अपवार्य[5] । सहि अत्थि मे कोदूहलं । (ख)

लव० । प्रकाशम् । को[6] एसो माहवो णाम जस्स भअवदी सिणेहगुरुअं[7] अत्ताणं धारेदि । (ग)

(क) सखि मालति सांप्रतं भगवतीसकाशात्तस्य महानुभावस्योद्गमं जानीमः ।

(ख) सखि अस्ति मे कौतूहलम् ।

(ग) क एष माधवो नाम यस्य भगवती स्नेहगुरुकमात्मानं धारयति ।

स्वभोगाय त्वमेवं करोषीत्यर्थः । अत्र चिरायितं बहुकालमागतम् । इतीति । अतः शीघ्रं गम्यतामिति भावः । जनान्तिकमिति ।

उक्तस्याश्रवणं कार्यात्पार्श्वस्थैः[8] स्याज्जनान्तिकम् ॥

इति भरतः । लवङ्गिका मालतीं साकाङ्क्षयति [सखि मालतीत्यादि] । उद्गममुत्पत्तिम् । अस्ति मे कुतूहलम् । तत्पृच्छेत्यर्थः । अत्र [लव० वा०] यस्य कृत इति शेषः ।

---

१ A. om. इदं. २ मां गमनाय C. D. ३ भअवदीए सआसादो A. D. ४ °आस्स A. C.; महाभाअस्स D. ५ A. D. om. अपवार्य; B. adds तहेव before सहि. ६ A. adds भअवदि before को. ७ गरुअं B. C. D.; अत्ताणअं C. D. ८ °वस्याः Com. ९ Com. follows A.

काम० । अप्रास्ताविकी[1] महत्येषा कथा ।

लव० । तथावि[2] आचक्खदु भअवदी । पसादं करेदु । (क)

काम० । श्रूयताम् । अस्ति विदर्भाधिपस्य[3] नरपतेरमात्यः समग्रधुर्यपु-[4]रुषप्रकाण्डचक्रचूडामणिर्देवरातो नाम यमशेषभुवनमहनीयपुण्यमहिमानमात्मनः[5] सतीर्थ्यं पितेव ते जानाति योसौ यादृशश्चेति[6] । अपि च ।

व्यतिकरितदिगन्ताः श्वेतमानैर्यशोभिः
सुकृतविलसितानां स्थानमूर्जस्वलानाम् ।

(क) तथाप्याचक्ष्वां[7] भगवती । प्रसादं करोतु ।

१७९–१८३ सकृत्रिमावहित्थमाह । अप्रास्ताविकीति । अयमाशयः । माधवगुणस्तुतावुपाधिमाशङ्क्य मालत्या अनादरे मम तटस्थता न घटेत । अतः सानुबन्धं पृच्छत्विति सानुबन्धमियमप्याहेति । समग्रः संपूर्णः । धुरि कार्यभारे साधुर्धुर्यो मन्त्री । प्रकाण्डं प्रशस्तम् । चूडामणिरिव चूडामणिः श्लाघ्यः । सर्वमन्त्रिप्रधानमित्यर्थः । महनीयं पूज्यम् । पुण्यं प्रशस्तम् । यद्वा । महनीयौ पुण्यमहिमानौ यस्य तम् । सतीर्थ्य एकगुरुः । समानं तीर्थमुपाध्यायो यस्य । तीर्थे य इति [समानतीर्थे वासीति?] यत्प्रत्ययः ।

१८४–१८८ व्यतिकरितेत्यादि । इह जगति कथमपि शापादिना तादृशाः स्वर्गिणः संभवन्ति । कीदृशाः । शोभिर्व्याप्तदिक्स्वरूपाः ।

१ अप्रस्ताविकी A. C. D ; D. adds एव afer महती. २ तहवि D. तथावि B.; चक्खदु B.; A. B. insert मे after this and B. after पसादं also. ३ विदर्भाधिपतेरमा° A. D. ४ समस्तगुरुयप्रकंड B. समग्रगुरुयप्रकांड C. समस्तधुर्यगुरुय D. ५ B. om. आत्मनः सतीर्थ्यं. B. adds तादृशश्च; D. om. योसौ. ७ कथयतु Com.

अकलितमहिमानः केतनं मङ्गलानां
कथमपि भुवनेऽस्मिंस्तादृशाः संभवन्ति ॥

माल०[1] । सहि तं क्खु भअवदीगहिदणामहेअं सव्वदा तादो सुमरेदि । (क)

लव० सहि समं किल[2] विज्जाहिगमो किदो त्ति तक्कालवेदी[3] जणो मन्तेदि । (ख)

काम० । तत उदयगिरेरिवैक एव स्फुरितगुणद्युतिसुन्दरः कलावान् ।

(क) सखि तं खलु भगवतीगृहीतनामधेयं सर्वदा तातः स्मरति ।
(ख) सखि समं किल विद्याधिगमः कृत इति तत्कालवेदी जनो मन्त्रयते ।[4]

श्चेतमानैरिति वर्तमाननिर्देशेन तेषामभिनवयशोयोगित्वमुक्तम् । बलवतां पुण्यविपाकानां त एव स्थानम् । त एव महासुकृतिन इत्यर्थः । यद्वा । पुण्यविलासानां बलवतां च त एव स्थानम् । तथा च पुण्यवन्तो बलवन्तश्च त एवेत्यर्थः । अत एवाधिकमहत्त्वाः । मङ्गलानामर्थसिद्धानां केतनं निवासः ॥ केतनं तु ध्वजे कार्ये निमन्त्रणनिवासयोरिति विश्वः ॥

१८९–१९२ अत्र नामाग्रहणं श्वशुरत्वेनाङ्गीकारात् । गुरोर्नाम न गृह्णीयादिति स्मृतेः । तं देवरातम् । अत्र समं तुल्यं यथा तथा पाठः कृतो देवरातभूरिवसुभ्याम् । मन्त्रयन्ते कर्णाकर्णिकया वदन्ति ।

१९३–१९४ प्रकृतसिद्ध्यर्थं पितृगुणानुक्त्वा नायकगुणानाह तत इत्यादि । ततो देवरातादेक एव बालश्चन्द्र उदियाय । एको बालो जात इत्यर्थः । यद्वा । बालश्चन्द्र इव बालचन्द्रः । एकापत्यतया स्नेहाधिक्यसूचनार्थमेकग्रहणम् । धरार्धमेकाधिपत्यकथनाय वा । कीदृशः । स्फुरिता

---

१ भगवति after माल० D.; गहिअ B. धेअं A. C. D. २ B. om. किल, क्खु A.; विज्जाधि° B. विज्जधिगमो C.; कदोत्ति A. C. D. ३ तक्कालवेदिणी मन्तअन्ति D. तक्कालवेदिनो मन्तन्ति A. ४ Com. follows D.

इह जगति महोत्सवस्य हेतुर्नयनवतामुदियाय बालचन्द्रः ।
लव० । जनान्तिकम् । सहि अवि णाम माहवो भवे । (क)
काम० । असौ विद्याधारः शिशुरपि विनिर्गत्य भवना- १९९
दिहायातः संप्रत्यविकलशरच्चन्द्रमधुरः ।

(क) सखि अपि नाम माधवो भवेत् ।

व्यक्तीकृता गुणानां शीलादीनां या द्युतिरौज्ज्वल्यं तया सुन्दरः । यद्वा । स्फुरितगुणद्युतिश्चासौ सुन्दरश्चेति । कलावाँश्चतुःषाष्टिकलायुक्तः ।

नागरके वर्णयेद्वृत्तिं कलावत्त्वं च रम्यताम् ॥

इति भरतः । नयनवतां क्षुण्मतां महोत्सवस्य कारणम् । नेत्रप्री- जनकत्वात् । यथोदयगिरेरेको बालचन्द्रोभिनवशश्युदेति सोपि स्फु- रितगुणोन्मीलन्नैर्मल्यादिका या द्युतिः प्रभा तया सुन्दरः कान्तः कलावान्नेत्रानन्दहेतुश्च भवति ।

१९६–२०० बालत्वादितस्तदनागमनमाशङ्क्याह । असा- त्यादि । असौ शिशुरपि बालोपि संप्रतीहागतः । अस्तीति शेषः कीदृशः । विद्याधारः । त्रयीतदङ्गविद्यावित् । बालः पञ्चदशवर्षवयस्कः । बालो वाप्यूनषोडश इति वचनात् । भवनाद्विनिर्गत्य बहिर्भूय । अनेन पथिकत्वमपास्तम् । यौवनमाह । अविकलः पूर्णो यः शारदशशी तस्मान्मनोज्ञस्तद्वद्वा मनोज्ञः । यद्दृष्टिविषये पुरं नारीणां कटाक्षैः संजात- नीलनलिनगवाक्षमिव भवति ॥ कुवलयितमित्यत्र तारकादित्वादितच् ॥ कीदृशैः । उन्मादतरलैः कामावेशचपलैः । यदायं रथ्यया याति तदो- न्मादान्विता युवत्यो वातायनैरेनं पश्यन्ति । तत्तु तन्नयनैः संजातकु- वलयमिव लक्ष्यत इत्याशयः । अनेन विद्यावत्त्वनूतनत्वरम्यत्वादिकमुक्त-

१ B. adds सो after माहवो. २ विद्याशामिः D.

यदालोकस्थाने भवति पुरमुन्मादतरलैः
कटाक्षैर्नारीणां कुवलयितवातायनमिव ॥

अत्र बालसुहृदा मकरन्देन सह विद्यामान्वीक्षिकीमधिगच्छति । स एव[1] माधवो नाम ।

माल० । सानन्दं जनान्तिकम् । सहि[2] सुदं तुए । (क)

लव० । [3]सहि कुदो वा महोदहिं वज्जिअ पारिजादस्स उग्गमो त्ति । (ख)

नेपथ्ये शङ्खध्वनिः ।

काम० । अहो [4]कालातिपातः । संप्रति हि ।

क्षिपन्निद्रामुद्रां मदनकलहच्छेदसुलभा-
मवाप्तोत्कण्ठानां विहगमिथुनानां प्रथमतः ।

(क) सखि श्रुतं त्वया ।

(ख) सखि कुतो वा महोदधिं वर्जयित्वा पारिजातस्योद्गम इति ।

। विद्यामित्यनेन विद्यावशेनायात इत्यनौद्धत्यं संबन्धार्थदेवरातप्रस्थापनगोपनं च कृतम् ।

२०२–२०४ सखि श्रुतं त्वया । एतेनाभिलाषं दर्शयति । लवङ्गिकैतद्दृढयति । [कुतो वेति] । अनेन महाकुलीनत्वं न तु कामन्दक्याः कल्पनेति दर्शितम् ।

२०६–२१० कालातिपातः कालक्षेपः । क्षिपन्नित्यादि । संप्रति गगनेयं संध्याशङ्खध्वनिः संध्याकालसूचकः शङ्खशब्दो विचरति श्रूयते । किं कुर्वन्विहगमिथुनानां चक्रद्वन्द्वानां प्रत्यासन्नविरहात्सोत्कण्ठानाम् ।

१ स एव A. C.; A. adds इति after नाम. २ D. adds लवंगिए after this; तुमए A. ३ B. inserts तह ज्जेव before सहि; °दहिं C. उज्झिअ B; पारिआअस्स A. C; आअमो त्ति B, आगमो त्ति C. ४ वेलातिपातः D. ५ Com. om. सखि.

दधानः सौधानामलघुषु निकुञ्जेषु घनता-
मसौ संध्याशङ्खध्वनिरनिभृतः[1] खे विचरति ॥

तदुत्तिष्ठामः । इत्युत्तिष्ठन्ति[2] ।

मालo । अपवार्य । कधं[3] उवहारीकिदह्मि राइणो तादेण राआ-राहणं क्खु तादस्स गुरुअं[4] ण उण मालदी । सास्रम् । हा ताद तुमं पि णाम मम[5] एव्वं त्ति सव्वधा जिदं भोअतिह्णाए । सानन्दम् । कधं[6] महाकुलप्पभवो वि सो महाभाओ । सुभणिदं[7] पिअसहीए कुदो

निद्रैव मुद्रा । संभाषणप्रतिरोधात् । तां प्रथमतः क्षिपन्हरन् । कीदृशीम् । मदनकलहः सुरतं तस्य च्छेदोवसानं तेन सुलभाम् । यद्वा ॥ मदनकलहश्छिद्यतेनेनेति घञ् । पुंसि संज्ञायामिति वा घः ॥ मदनकलहच्छेदो रतं ततः सुलभाम् । सुरतश्रमजनितामित्यर्थः । संप्रति धवलगृहाणां महत्सु गह्वरप्रदेशेषु प्रतिध्वनितो घनतां दधानः । अत एवानिभृतः प्रौढः सन्विचरति । यद्वा । प्रथमतः खे विचरति तदनु दिवाकेलिकलहच्छेदात्सौधसमीपतरुनिवासकलविङ्कमिथुनानां निद्रामुद्रां क्षिपन्विचरति । ते हि प्रबलशङ्खध्वनिनिबोधिताः कलकलं कुर्वन्तीति भावः ।

२१२–२२० अपवार्य निभृतम् ।

निगूढभावसंयुक्तमपवारितकं भवेत् ॥

इति भरतः । अधुना मनःप्रविष्टसाहसवाञ्छया ब्रूते [कथं महाकुलेत्यादि] । [लव० वा०] संजननेनेति पाठे संजननं सोपानमेव । तटस्थतया घटितकत्वेन साधुत्वम् । निसृष्टार्थेति ।

१ अनिभृतः A. २ उत्तिष्ठति B.; C. om. इत्यु-न्ति. ३ सास्रं सहि कहं D.; कदह्मि A. D.; D. om. तादेण. ४ गरुभं B. D.; D. om. सास्रम्. ५ B. om. मम and त्ति. ६ B. C. om. कधं; प्पहवो D.; हि सो D.; B. C. om. वि सो; महाणुभाओ A. महाभागो B. ७ सुदु D.

वा महोदहिं वज्जिअ पारिजादस्स उग्गमो त्ति[1] । अवि णाम तं पुणो वि पेक्खिस्सं । (क)

लव० । अवलोइदे इदो[2] इदो एदिणा सोवाणेण ओदरह्म । (ख)

काम० । अपवार्य । साधु संप्रति मया तटस्थयैव मालतीं प्रति निसृष्टार्थदूतीवृत्तस्य[3] लघूकृतो भारः । तथा हि ।

वरेन्यस्मिन्द्वेषः पितरि विचिकित्सा च जनिता
पुरावृत्तोद्गारैरपि[4] च कथिता कार्यपदवी ।

(क) कथमुपहारीकृतास्मि[5] राज्ञस्तातेन राजाराधनं खलु तातस्य गुरुकं न पुनर्मालती । हा तात त्वमपि नाम मय्येवमिति सर्वथा जितं भोगतृष्णया । कथं महाकुलप्रभवोपि[6] स महाभागः । सुभणितं प्रियसख्या कुतो वा[7] महोदधिं वर्जयित्वा पारिजातस्योद्गम इति । अपि नाम तं पुनरपि प्रेक्षिष्ये ।

(ख) अवलोकिते इत इत एतेन सोपानेनावतरावः ।

स्त्रीपुंसयोराशयमादधाना स्वयं च कार्यं प्रतिपादयन्ती ।
सृष्टार्थिका सा परदारयोगे दूती नियोज्या बहुधा सुधीभिः ॥

इतिभरतः । मालतीं प्रतीत्यनेन मदयन्तिकां प्रति विद्यत एवेति भावः ।

२२१–२२६ प्रकृते निष्पन्नं स्वव्यापारमाह । वरे इत्यादि । अन्यस्मिन्वरे नन्दने द्वेषः कारितः । पितरि निन्दा जनिता । पुरावृत्तोद्गारैः शकुन्तलादीनां पितृनिरपेक्षात्मदानकथनैः कार्यपरिपाटी कथिता । माहात्म्यं महत्वं तस्य स्तुतं यत्कुलाद्यच्च गुणात्तदापि । इति हेतोः । अनन्तरं वत्सस्य परिचयः समागमो विधातुः कर्तव्यः । एतेनाङ्कावतारोपि

---

१ Readings as before. २ इदो एहि A.; इदो इदो एहि C. ३ दूतीकृत्यस्य A. दूतीकल्पस्य C.; लघुकृतो D. ४ वृत्तोद्गारैरपि C. ५ सखि कथं Com. ६ प्यसौ Com. ७ Com. om. वा.

स्तुतं तन्माहात्म्यं यदभिजनतो यच्च गुणतः
प्रसङ्गाद्वृत्तस्येत्यथ विधिविधेयः परिचयः ॥

इति [1]परिक्रम्य निष्क्रान्ताः सर्वे । २२५

॥ [2]धवलगृहो नाम द्वितीयोऽङ्कः ॥

सूचितः । प्रसङ्गाद्व्याजादन्यापदेशादिति सर्वत्र योज्यम् । धवलगृह इति धवलगृहोपलक्षित इत्यर्थः ॥

असूत यं रत्नधरोऽनवद्योऽनवद्यरूपा दमयन्तिका च ।
जगद्धरं तत्कृतटिप्पणेऽङ्कोऽगमाद्द्वितीयो रसराशिवासः ॥

॥ इति द्वितीयोऽङ्कः ॥

---

1 A. D. om. परिक्रम्य; सर्वे: D. 2 इति मालतीमाधवे A. मालतीमाधवे धवलगृहनाम C.

॥ तृतीयोऽङ्कः ॥

ततः प्रविशति बुद्धरक्षिता ।

बुद्ध० । परिक्रम्याकाशे । अवलोइदे अवि[1] जाणासि कहिं भअवदित्ति । (क)

प्रविश्य । अवलोकिता । उपसृत्य[2] । बुद्धरक्खिदे किं पमुद्धासि । को त्तिअ[3] कालो भअवदीए पिण्डवादवेलं वज्जिअ[4] मालदिं अणुवट्टमाणाए । (ख)

बुद्ध० । हुं तुमं उण कहिं पत्थिदासि । (ग)

(क) अवलोकिते अपि जानासि क भगवतीति ।

(ख) बुद्धरक्षिते किं प्रमुग्धासि । कोप्यकालो [क इव कालो] भगवत्याः पिण्डपातवेलां वर्जयित्वा मालतीमनुवर्त्तमानायाः ।

(ग) हुं त्वं पुनः कुत्र प्रस्थितासि ।

परिचयस्यान्योन्यदर्शनालापादिरूपसमागमात्मकतया तदारम्भस्य प्रतिज्ञातत्वेन तन्निर्वाहिकाया मदयन्तिकायाः सूचनाय तत्संबन्धाद्बुद्धरक्षिताप्रवेशः । यद्वा । नियुक्तैव मया बुद्धरक्षितेत्यनेन प्रथमाङ्के द्वितीये च मालतीं प्रति लघूकृतो भार इत्यनेन सूचितो बुद्धरक्षितायाः प्रवेशः ।

३–६ अत्र प्रमुग्धा प्रस्मृता । पिण्डपातः सौगतान्नम् । कोप्यकालो निषिद्धकालः । तथा च सदैव मालतीसमीपे भगवती वर्तत इत्यर्थः । हुमनुमतौ स्मरणे वा ।

---

१ B. om. अवि; °दी त्ति A. B. २ A. om. उपसृत्य; पमु° A. ३ को त्ति आलो A.; पिण्डपादवेलं D. ४ वज्जिअ B.; °दीं A. C. D.; °वत्तमाणाए A. C.

अव० । अहं क्खु भअवदीए माहवसआसं अणुप्पेसिदा[1]। संदिट्ठं अ[2] तस्स जधा संकरघर[3]संबद्धं कुसुमाअरं णाम उज्जाणं गदुअ कुड्जअणिउञ्ज[4]परेन्तरत्तासोअगहणे चिट्ठ[5] त्ति । गदो अ तत्थ माहवो । (क)

बुद्० । [6] किं त्ति तहिं माहवो अणुप्पेसिदो । (ख)

अव० । अज्ज कसणचउद्दसि[7]त्ति भअवदीए समं मालदी संकरघरं[8] गमिस्सादि तदो एवं[9] किल सोहग्गं वड्ढदि[10] त्ति देवदाराहणणिमित्तं[11] सहत्थकुसुमावचअं उद्दिसिअ लवङ्गिआदुदीअं[12] मालदिं

(क) अहं खलु भगवत्या माधवसकाशमनुप्रेषिता । संदिष्टं च [13]तस्य यथा शंकरगृहसंबद्धं कुसुमाकरं नामोद्यानं गत्वा कुब्जकनिकुञ्जपर्यन्तरक्ताशोकगहने तिष्ठेति । गतश्च तत्र माधवः ।

(ख) किमिति तत्र माधवोऽनुप्रेषितः ।

९–१९ अत्र कुब्जकं कूआ [कंआ कहूयआ पाठान्त०] इति ख्यातस्तरुविटपः । कुब्जकव्याप्तरक्ताशोकवनस्य दुःसंचारत्वाद्विजनत्वं सूचितम् । पर्यन्तो मध्यम् ॥ काननं गहनं वनमित्यमरः ॥ अत्र किलालोके सौभाग्यवृद्धिप्रयोजनस्य व्याजत्वात् । एवमिति । स्वःस्वमोटितपुष्पैर्देवताः पूजयेत्यर्थः । आनेष्यतीति । मालती-

१ पुणो पेसिदा B. अणुपे° D. २ B. om. अ; D. has च; D. adds भअवदीए after च; B. D. om. तस्स; B. om. जधा. ३ °हर for °घर D. ४ कुज्जणिउञ्ज A. C. कुब्जणिउंज B. ५ तिट्ठसु त्ति D. चिट्ठदु A. ६ D. adds भअवदीए before किं; तत्थ for तहिं B. D.; °णुपे° B. ७ °सी त्ति A. C.; A. adds तत्थ after this; जणणीए B. ८ B. om. संकरं; गमिस्सादि त्ति C. D. ९ B. C. om. एवं. १० वड्ढदि B. वड्ढेदि C.; राधण D. ११ °चअं B. C. १२ दुदिअं B. C. दुदिआ A.; °लदीं A. C. D. १३ तथा Com.

भअवदी[1] उज्जाणं कुसुमाअरुज्जाणं आणइस्सदि[2] तदो अण्णोण्णदंसणं भोदु[3] त्ति। तुमं उण कहिं पत्थिदा। (क)

बुद्ध०। अहं[4] क्खु संकरघरं उज्जाणं पत्थिदाए पिअसहीए मदअन्तिआए आमन्तिदा। तदो भअवदीए पाअवन्दणं[5] कदुअ ताहिं ज्जेव्व[6] गच्छामि। (ख)

अव०। तुमं क्खु भअवदीए जस्सिं पओअणे णिउत्ता तत्थ को वुत्तन्तो। (ग)

(क) अद्य कृष्णचतुर्दशीति तत्र भगवत्या समं मालती शंकरगृहं गमिष्यति[7] तत एवं किल सौभाग्यं वर्धत इति देवताराधननिमित्तं स्वहस्तकुसुमावचयमुद्दिश्य लवङ्गिकाद्वितीयां मालतीं भगवत्येव[8] कुसुमाकरोद्यानमानेष्यति ततोन्योन्यदर्शनं भवत्विति। त्वं पुनः क प्रस्थिता।

(ख) अहं खलु शंकरगृहमेव प्रस्थितया प्रियसख्या मदयन्तिकयामन्त्रिता। ततो भगवत्याः पादवन्दनं कृत्वा तत्रैव गच्छामि।

(ग) त्वं खलु भगवत्या यस्मिन्प्रयोजने नियुक्ता तत्र को वृत्तान्तः।

माधवयोरतर्कितदर्शनेन विजने तयोरनुरागो वर्धतामिति भगवत्या आशय इति भावः। अत्रामन्त्रिताहूता। गच्छामि मदयन्तिकास्थानमिति शेषः।

२०—२६ [अव० वा०] मकरन्दमदयन्तिकापरिणये किं वृत्तमिति भावः। अत्र विस्रम्भो विश्वासः। ईदृशस्तादृश इति मकरन्दगुण-

---

१ B. om.; D. om. ज्जेव्व; जेव्व A. B. २ D. adds त्ति after this. ३ होदु B. ४ C. om. अहं; ज्जेव B. जेव्व A. D.; the three varieties of writing ज्जेव्व occur throughout, they will not be noticed hereafter. ५ B. C. om. पाअ, पाद A. ६ B. om. ज्जेव्व. ७ Com. adds इति. ८ Com. om. एव.

बुद्ध०। मए क्खु[1] भअवदीए समादेसेण तासु तासु वीसम्भक[2]-धासु[3] ईरिसो तारिसो त्ति मअरन्दस्स उअरि पिअसहीए मद[4]अन्ति-आए दूरं[5] आरोविदो परोक्खाणुराओ[6]। एसो अ[7] से मणोरहो अवि णाम तं पेक्खामि[8] त्ति। (क)

(क) मया खलु भगवत्याः समादेशेन तासु तासु विस्रम्भकथास्वी-दृशस्तादृश इति मकरन्दस्योपरि प्रियसख्या मदयन्तिकाया दूरमारो-पितः परोक्षानुरागः। एष च तस्या मनोरथोपि नाम तं प्रेक्ष इति।

प्रकाशनमित्यर्थः। तस्या मदयन्तिकायाः। तं मकरन्दम्। [साध्विति] त्वया भगवतीभारो लघूकृत इति भावः।

२०–२५ तथेत्यादि। तथा तेन प्रकारेण बिनयनम्रानुद्धताकार-तया नम्रा मालती कतिपयदिनैरुपापाच्छकुन्तलादिकथया मया सख्या-मिव विश्वासबुद्धिप्रवर्तनेन सेव्यतां शालीनत्वादिपरिहारं नीता। अत्रापि-शब्द एवार्थे। यद्वा। अविनयनम्रापीत्यकारप्रश्लेषः॥ कतिपयाहोभिरि-त्यत्राह्नो जातिपरतया न समासान्तविधिः॥ सखीचिह्नं दर्शयति। व्रजतीत्यादि। संप्रति यतोस्माकं विरहे दौर्मनस्यं गच्छति नः संनिधौ प्रसन्ना भवति। विजने रमते मया सहेति शेषः। प्रीत्या दायं सो-ल्लुण्ठनमुत्तरं ददाति। यद्वा। दायं कर्पूरादिदेयं ददाति। गमनसमये मामनुवर्ततेनुगच्छति। ततः कण्ठे लग्ना सती पुनःपुनर्निरुध्य मां शपथैः प्रणम्य तत्क्षणमेव प्रत्यावृत्तिं पुनरागमनं याचते च। सख्योप्येवं

---

१ वि D. २ विस्सम्भ A. D. ३ कहासु B.; D. adds तस्स after त्ति. ४ B om. मद-ए. ५ हिअअं D. ६ B. C. adds त्ति. ७ B. D. om. अ; C. has ज्जेव for अ. ८ पेक्खिस्सं A. ९ Com. om.

अव० । सोहु बुद्धरक्खिदे साहु[1] । (क)

बुद्ध० । एहि गच्छह्म । (ख)

इति परिक्रम्य[2] निष्क्रान्ते । प्रवेशकः ।

ततः प्रविशति[3] कामन्दकी ।

काम० । तथा विनयनम्राऽपि मया मालत्युपायतः ।
नीता कतिपयाहेन[4] सखीविस्रम्भसेव्यताम् ॥

संप्रति । व्रजति विरहे वैचित्यं नः प्रसीदति संनिधौ
रहसि रमते[5] प्रीत्या दायं ददात्यनुवर्तते ।
गमनसमये कण्ठे लग्ना निरुध्य[6] निरुध्य मां
सपदि शपथैः प्रत्यावृत्तिं प्रणम्य च याचते ॥

इदं च तत्र साधीयः प्रत्याशा[7]निबन्धनम् ।
शाकुन्तलादीनितिहासवादान्प्रस्तावितानन्यपरैर्वचोभिः ।

(क) साधु बुद्धरक्षिते साधु ।
(ख) एहि गच्छावः ।

कुर्वन्ति । अतः सखीत्वं गता सा मे मनोगतं करिष्यतीति भावः ॥ दैये-दाने च दायः स्याद्दायः सोल्लुण्ठभाषण इति मेदिनीकारः ॥

३६–४० साधीयः साधु । निवन्धनं कारणम् । शाकुन्तलादीनित्यादि । इयं शाकुन्तलादीनितिहासवादान्पुरावृत्तान्यन्यपरैर्वचोभिरन्यकथाप्रसङ्गेन प्रस्तावयति । शकुन्तलादिभिः पितृनिरपेक्षमेवात्मा दत्त इति भगवति किं सत्यमिति मां पृच्छतीति भावः । अत्रान्यपदेनाखेटकाश्रमवर्णनशुश्रूषादेः साक्षादुद्देश्यत्वं साहसकरणं चाशयस्थमिति सूचितम् ।

१ साहु in both places, A. D. २ D. om. परिक्रम्य. ३ प्रविश्य कामन्दकी A. D. ४ कतिपयाहोभिः A. D. Com. ५ वदति C. ६ निरुध्य च मां बलात् D. ७ प्रीत्याशानिबंधनं B. सम्प्रत्याशा० A.

श्रुत्वा मदुत्सङ्गनिवेशिताङ्गी चिराय चिन्तास्तिमितत्वमेति ॥

तदर्थं[1] माधवसमक्षमुत्तरमुपक्रमिष्ये ।

नेपथ्याभिमुखम्[2] । वत्से इत इतः ।

ततः[3] प्रविशति मालती लवङ्गिका च ।

माल० । स्वगतम्[4] । कधं उवहारीकिदह्मि इत्यादि पूर्वोक्तं पठति[5] ।

लव० । सहि एसो[6] क्खु महुरमहुरसोल्लोल्लमञ्जरीकवलण[7]केलिकलकोइलउल[8]कोलाहलाकुलिदसहआरसिहरुड्डीणचडुलचञ्चरीअणिअरअअअवहलिद[9]दलकरालचम्पआहिवासमणोहरो मरालमंसलजहिं[10]-

---

एवमिति श्रुत्वा चेतोधृतनायकानुस्मरणान्मदीयक्रोडे निवेशितशरीरा भवति । ततः किमेवं करोमीति चिन्तास्तिमितत्वं निश्चलत्वं चिरकालमेति । चिन्तेत्युपलक्षणं निःश्वासादिनापि लक्षिता भवतीत्यर्थः । यद्वा । मदिति पञ्चमी । मत्सकाशाच्छ्रुत्वैवं करोतीत्यर्थः । समक्षं प्रत्यक्षम् । उत्तरमनन्तरकृत्यम् । इत आगच्छेति शेषः ।

४२-४९ अत्रैष खलु कुसुमाकरोद्यानमारुतस्त्वां परिष्वजतीति संबन्धः । कीदृशः । अतिमधुरमधुरसेनात्यार्द्राया मञ्जर्याः कवलने भक्षणे केलिः क्रीडा तया कलमव्यक्तध्वानं यत्कोकिलकुलं तस्य कोलाहलेनाकुलितादतिसुरभिचूतशिखरादुड्डीनश्चटुलो मनोज्ञो यो भ्रमरसमूहस्तस्य संपर्केण विकसितपुटस्यात एव करालस्य दन्तुरस्य चम्पकस्याधि-

---

१ तदथ माधव C.; उपक्रमिष्यति B. उपक्रमिष्यामि C. D. २ नेपथ्याभिमुखमवलोक्य D.; वत्से वत्स इतः C. ३ D. om. ततः ४ B. D. om. स्वगतम्.; कदह्मि A. C. D. ५ The whole speech in B. C. ६ B. C. add पेक्ख after सहि. ७ कवल C. D. ८ B. C. D. om. उल.; कुलिभ B.; चडुल A. C. ९ लइअराकुलिद B. D.; दर for दल C.; चंपआधि° D. चंपकाहि° B. १० जघण D.

णपरिणाहुव्वहणमन्थरोरुभरविसंठु[1]लक्खलिदचलणसंचारमसिणगम-णो[2]वणीदसेअसीअरसुहाबिन्दुइ[3]ज्जन्तमुद्धमुहचन्दचन्दणाअमाणसी-[4]अलफंसो तुमं परिस्सअदि कुसुमाअरुज्जाणमारुदो ता पवि-सह्म । (क) इति परिक्रम्य प्रविशतः ।

(क) सखि एष खलु मधुरमधुरसार्द्रार्द्रमञ्जरीकवलनकेलिकलकोकिलकुलकोलाहलाकुलितसहकारशिखरोड्डीनचटुलचञ्चरीकनिकरव्यतिकरोद्दलितदलकरालचम्पकाधिवासमनोहरो मरालमांसलजघनपरिणाहोद्वहनमन्थरोरुभरविसंष्ठुलस्खलितचरणसंचारमसृणगमनोपनीतस्वेदशीकरसुधाबिन्दूयमानमुग्धमुखचन्द्रचन्दनायमानशीतलस्पर्शस्त्वां परिष्वजति कुसुमाकरोद्यानमारुतस्तत्प्रविशाव[6]ः ।

वासेन गन्धेन मनोहरः । एतेन शैत्यसौगन्ध्ये दर्शिते । सहकारमञ्जरीणां कोकिलाकुलत्वं भ्रमरस्य तत्त्यागे हेतुः । मरालो हस्ती हंसो वा तस्य मांसलजघनपरिणाहोद्वहनेन मन्थरावलसौ यावूरू । त्वदीयाविति भावः । तयोर्गौरवेण विसंष्ठुलं विषमं यथा तथा स्खलितस्य चरणस्य संचारेण मसृणं मन्दं यद्गमनं तेनोपनीतेन स्वेदशीकरेणामृतबिन्दुसदृशे मुग्धमुखचन्द्रे । अर्थात्तव । चन्दनायमानः शीतलस्पर्शो यस्य सः । अनेन मान्द्यं शैत्यमपि ध्वनितम् ॥ सहकारोतिसौरभ इत्यमरः । चञ्चरीकोलिगीतपोरिति धरणिः । करालो दन्तुर इत्यमरः । मरालो हंसगजयोर्मरालो विस्तृते शुभ इति विश्वः ॥ तेन मरालस्य विस्तृतस्य शुभस्येति वा योज्यम् ॥ मसृणं चिक्कणं सममित्यमरः ॥

१ विसंटुल C. D.; खलिद A. D.; चरण C. २ गमणोवणीद B. D. °णोपरणीद C.; सेद for सेअ B.; सुधा C. D. ३ बिंदुज्जन्त D. बिंदुज्जल C.; मुहअन्द° B. C. D. ४ सीदल B. C.; फरसो A. फंसो D. ५ C. inserts एहि after ता. ६ प्रविशाव: Com.

ततः प्रविशति माधवः ।

माध० । सहर्षम् । हन्त परागता भगवती । इयं हि मम
आविर्भवन्ती प्रथमं प्रियायाः सोच्छ्वासमन्तःकरणं करोति ।
संतापदग्धस्य शिखण्डियूनो वृष्टेः पुरस्तादचिरप्रभेव ॥

दृष्ट्वा । अये लवङ्गिकाद्वितीया मालत्यपि ।

आश्चर्यमुत्पलदृशो वदनामलेन्दु- ५५
सांनिध्यतो मम मुहुर्[1]जडिमानमेत्य ।

५१–५३ हन्त हर्षे । परागतायाता । आविरित्यादि । इयं भगवती प्रियायाः पुरस्तादाविर्भवन्ती प्रथमं मम चित्तं सविकासं करोति । कीदृशस्य । संतापदग्धस्य कामाग्निदग्धस्य । यथा विद्युद्वृष्टेः पुरस्तादाविर्भवन्ती मयूरतरुणस्य चित्तं सोच्छ्वासं करोति निदाघतप्तस्य । युवग्रहणमुन्मादहेतुद्योतनाय ॥ प्रियाया इत्यत्र षष्ठ्यतसर्थप्रत्ययेनेति षष्ठी ॥ अत एव प्रियायाः प्रथममिति न योजना । प्रथमपदयोगे षष्ठ्यभावात् । अनेन प्रियाप्यागमिष्यतीति सूचितम् ।

५४–५८ मालतीत्यत्रापिशब्दो गौरवे । निपातानामनेकार्थत्वात् । आश्चर्यमित्यादि । अस्याः पद्माक्ष्या मुखनिर्मलचन्द्रसंनिधौ वारं वारं जडिमानं सर्वकार्याप्रतिपत्तिरूपं प्राप्य जाड्येन जडिम्ना करणेन मम मनसा विकारः स्वरूपान्यथाभावः संधार्यते । कीदृशः । द्रवमय इव द्रवमयः । हृदयद्रवीकरणात्स्वेदादिमत्त्वाच्च । अन्यस्याः समागमाद्द्रवमयो विकारोऽस्यास्तु सांनिध्यादेवेति कर्मातिशयदर्शनादाश्चर्यम् । यदाह भरतः ।

कर्मातिशयनिर्वृत्तो भवेद्विस्मयसंभवः ।
सिद्धिस्थानेष्वसौ साध्यः प्रहर्षपुलकादिभिः ॥

---

१ मम पुनर् B.

[1]जाड्येन चन्द्रमणिनेव महीधरस्य
संधार्यते [2]द्रवमयो मनसा विकारः ॥

संप्रति रमणीयतरा मालती ।

उज्ज्वलयति मनोभवाग्निं मदयति हृदयं कृतार्थयति चक्षुः ।

यथामलेन्दुसंनिधौ जडिमानं शैत्यमासाद्य शैत्येनैव चन्द्रकान्तेन शैलस्य द्रवमयो विकारः द्रवत्वं संधार्यते । अत्र महीधरसादृश्येन माधवस्य धीरत्वादिगुणावष्टम्भसंभार उक्तः । जात्येनेति पाठे जात्येन जातिमता । उत्कृष्टेनेति यावत् । चन्द्रकान्तेनेत्यस्य परं विशेषणं द्रष्टव्यम् । यद्वा मनोविशेषणमपि । जात्येनाभिजनवतापि । अत्रापिरध्याहार्यः । अत एवाश्चर्यम् ।

५९–६१ संप्रतीति । पुरा कामवेगस्याङ्कुरावस्थया रमणीया । अधुना तु तस्य पल्लवितत्वेन रमणीयतरा । इदमेव स्फोटयति । ज्वलयतीत्यादि । संप्रति मालत्यङ्गैः कामाग्निमुद्दीपयति । चित्तं सोन्मादं करोति । नेत्रं कृतप्रयोजनं विधत्ते । ममेति शेषः । कीदृशैः । परिमृदितचम्पकमालावद्विलासैर्ललितैश्च । अलसैर्मन्दैर्लज्जया निभृतत्वेनेति भावः ।

यानस्थानासनादीनां नेत्रवक्त्रादिकर्मणाम् ।
उपयातविशेषो यः स विलासो मतो बुधैः ॥

इति भरतः ।

हस्तपादाङ्गविन्यासभ्रूनेत्रोष्ठप्रयोजितम् ।
सुकुमारविधानेन ललितं तन्निगद्यते ॥

इति भरतः । यद्वा । परिमृदितचम्पकमालाविलासानि म्लानानि । ललितानीतस्ततः क्षिप्तानि । अलसानि मन्दानि । ततस्त्रिपदकर्मधारयः ॥

---

१ जात्येन B. C. D. २ द्रुवमयो C.; मनसो A.

परिमृदितच[1]म्पकावलिविलासलुलितालसैरङ्गैः ॥

माल० । सहि इमस्सिं कु[2]ज्जअणिउञ्जे कुसुमाइं अवचिणुह्म (क)

माध० । प्रथ[3]मप्रियावचनसंश्रवस्फुरत्पुलकेन संप्रति मया विडम्ब्य[4]ते ।

घनराजिनूतनपयःसमु[5]क्षणक्षणबद्धकुड्मलकदम्बडम्बरः ॥

लव० । सहि[6] एवं करेह्म । (ख) पुष्पावचयं नाटयतः ।

माध० । अपरिमेयाश्चर्यमाचार्यकं भगवत्याः ।

माल० । इदो वि अण्णस्सिं[7] अवचिणुह्म । (ग)

(क) सखि अस्मिन्कुब्जकनिकुञ्जे कुसुमान्यवचिनुवः ।

(ख) सखि एवं कुर्वः ।

(ग) इतो[8]ऽप्यन्यस्मिन्नवचिनुवः ।

ललधातुश्चाञ्चल्यार्थेऽपि । धातोरनेकार्थत्वात् ॥ लुलितालसैरिति पाठे लुलितानीतस्ततः क्षिप्तानीत्यर्थः ।

६३–६६ प्रथमेत्यादि । संप्रति मया मेघमालानवजलसेचनेन क्षणबद्धकलिकनीपस्य डम्बरः साम्यं प्रपञ्चो वावलम्ब्यते । कीदृशेन । प्रथमप्रियावचनसंश्रवणाद्युत्करोमाञ्चेन । संस्तवेति पाठे संस्तवः परिचयः । तदनेन दृष्टान्तेन सर्वाङ्गीणं पुलकं तस्य च स्थैर्यमुक्तम् ॥ घनजीमूतमुदिरेत्यमरः ॥ अपरिमेयेत्यादि । पुष्पत्रोटनकाले मालतीस्तनमुकुलादिदर्शनादानन्दसंदोहेन माधवस्य संतोषप्रकाश इति भावः ।

---

१ चंपकाळो C.; ललित for लुलित D. २ कुज्ज° A. B. कुब्ज° C.; णिउंजए B.; अवचिणह्म B. C. ३ प्रथमं B.; संस्तव for संश्रव noticed by Com. ४ °वलम्ब्यते D. ५ पयःसमुच्छ्वसत्क्षण° B. C. पयःसमक्षणप्रतिबद्ध D. ६ B. C. om. सहि; C. D. add इति after करेह्म. ७ अस्सिं D. ८ एतस्मिन् Com. ९ सखि इतोऽपरास्मिन् Com.

काम० । मालतीं परिष्वज्य । अयि विरम निःसहासि जाता । तथाहि[1] ।

७० स्खलयति वचनं ते संश्रयत्यङ्गमङ्गं[2]
जनयति मुखचन्द्रोद्भासिनः स्वेदबिन्दून् ।
मुकुलयति च नेत्रे सर्वथा सुभ्रु खेद-
स्त्वयि विलसति तुल्यं वल्लभालोकनेन ॥

मालती लज्जते ।

६८–७० अज्ञातमाधवसंनिधानां मालतीं श्रमोपन्यासव्याजेन कामन्दकी श्लिष्टनर्मवचनमाह । अयीत्यादि । निःसहा परिश्रान्तासि त्वमतो विरम त्यज खेदमिति शेषः । यद्वा । विरम पुष्पावचयात् । उपविशेति भावः । पक्षे निःसहा कामातुरा त्वं जातासि ततो विशेषेण रमस्व ॥ आशंसायां लोट् ॥ स्खलयतीत्यादि । हे सुभ्रु शोभनभ्रूयुते वल्लभालोकनेन समं यथा तथा त्वयि खेदो विलसति स्वव्यापारं कुरुते । यथा वल्लभालोकनं तथा खेद इति भावः । पक्षे वल्लभेनावलोकनं खेदश्च । अत एव सर्वथेति तुल्यत्वम् । तदेवाह । खेदो वचनं तव स्खलयति । प्रत्यङ्गं संश्रयत्याश्रयति । स्रंसयतीति पाठे शिथिलयति । आस्यशशिनो निःसरत्स्वेदकणाञ्जनयति । नयनद्वयं मुकुलयति च ।

रतान्ते च श्रमे चैव सुखसंभोगभावने ।
गन्धे स्पर्शे च हर्षे च मुकुला दृष्टिरिष्यते ॥

इति भरतः । वल्लभालोकनेप्येवं भवति । इह वल्लभालोकनं त्वयि वर्तत इति भावः ।

---

१ D. om. तथाहि. २ स्रंसयति noticed by Com.

लव० । सोहणं[1] भअवदीए आणत्तं । (क) ७८

माध० । हृदयंगमः परिहासः ।

काम० । तदास्यतां किंचिदो[2]ख्येयमाख्यातुकामास्मि ।

सर्वा उपविशन्ति ।

काम० । मालत्याश्चिबुकमुन्नमय्य । शृणु विचित्रमिदं सुभगे ।

माल० । अवहिदह्मि । (ख)

काम० । अस्ति तावदेकदा प्रसङ्गतः[3] कथित एव मया माधवाभि- ८०
धानः कुमारो[4] वत्समिव मामकीनस्य मनसो द्वितीयं निबन्धनम् ।

लव० । सुमरामो । (ग)

काम० । स खलु मन्मथोद्यानयात्रादिवसात्[5]प्रभृति दुर्मनायमानः
परवानिव शरीरोपतापेन[6] । ८१

(क) शोभनं भगवत्याज्ञप्तम् ।

(ख) अवहितास्मि ।

(ग) स्मरामः ।

७८–८१ [आज्ञप्तमित्यत्र] विरम्यतामित्याशयः । चिबुकमधरतलावयवमुन्नमय्योत्तोल्य । सुभग इत्यनेन माधवचित्ताकर्षणेन त्वमेव सौभाग्यवतीति ध्वनितम् । कुमार इत्यनेन विस्मय उक्तः । निबन्धनमालम्बनम् । परवानस्वतन्त्रः । यदित्यादि । शरीरोपतापेनायं परवानिव । यदास्माच्चन्द्रे प्रणयिनि जने वानन्दं प्रीतिं न भजते न लभते । तत्तथार्थे । तथातिधैर्ययुक्तोऽप्ययं दुःसहमन्तस्तापं प्रकाशयति । फलिनीश्यामशरी-

---

१ सोभ° D. २ किंचिदाख्यातुकामास्मि B. ३ प्रसंगात् B.; B. D. om. मया. ४ D. om. कुमारो. माधवाभिधानः कुमारो नाम B. माधवाभिधानकु° A. ५ B. om. दिवसात्. ६ B. adds तथाहि.

यदिन्दावानन्दं प्रणयिनि जने वा न भजते
व्यनकत्यन्तस्तापं तदयमतिधीरोपि विषमम् ।
प्रियङ्गुश्यामाङ्गप्रकृतिरपि चापाण्डुमधुरं
वपुः क्षामं क्षामं वहति [१]रमणीयश्च भवति ॥

लव० । [२]ऐवं पि तस्सिं अवसरे भअवदिं तुवराअन्तीए अवलोइदाए उदीरिदं [३]आसी अस्सत्थसरीरो माहवो त्ति । (क)

काम० । यावदशृणवं [४]मालत्येवास्य मन्मथोन्मादहेतुरिति । ममापि स एव निश्चयः ।

(क) एवमपि तस्मिन्नवसरे भगवतीं त्वरयन्त्यावलोकितयोदीरितमासीदस्वस्थशरीरो माधव इति ।

रस्वभावोऽप्यापाण्डुमधुरमीषत्पाण्डुमनोहरमतिक्षीणं वपुर्वहति च यथा यथा तथा तथा रम्यश्च भवति । अपिर्विस्मये । चकारः समुच्चये । अपिचेति समस्त एव समुच्चये वा । तदिह रागावस्थायां यथोचितं विधेहीत्याशयः॥ प्रियङ्गुः फलिनीत्यमरः ॥

९२–९५ यावदवधारणे मालत्येव हेतुरित्येवाशृणवमित्यर्थः । अशृणवमश्रौषम् । अनुभवमित्यादि । अयं वदनेन्दुरस्य महात्मनो निश्चितमेवानुभवमुपागमदुपागतः । यत्कारणादस्य स्तिमितस्य स्थिरस्य मनो विचलितम् । तदेवं ममापि स एव निश्चयः । किंभूतम् । उत्कण्ठाचपलम् । यथा स्तिमितस्य निश्चलस्य महात्मनोगाधस्य समुद्रस्य चन्द्रा-

---

१ वहति च मनोज्ञश्च B. २ एवं पि C.; एदस्सिं अवस० B.; दिं B. C.; तुवरन्तीए B.; ०रिदं B. C.; आसि A. C. D. ३ C. D. insert अत्थ after आसी. ४ तावन्मालत्येव B. C.; मन्मथोन्मादे हेतुरिति C. D.

अनुभवं वदनेन्दुरुचा गमन्नियतमेव यदस्य महात्मनः ।
क्षुभितमुत्कलिकातरलं मनः पय इव स्तिमितस्य महोदधेः ॥ ९८

माध० । अहो उपन्यासशुद्धिः । अहो महत्त्वारोपणे यत्नः । अथवा

शास्त्रेषु निष्ठा सहजश्च बोधः प्रागल्भ्यमभ्यस्तगुणा च वाणी ।
कालावबोधः प्रतिभानवत्त्वमेते गुणाः कामदुघाः क्रियासु ॥

काम० । अतस्तेन जीविताद्दुद्विजमानेन दुष्करमपि न किंचिन्न क्रियते । असौ हि १००

नुभवात्कल्लोलचपलं जलं क्षुभ्यति ॥ कथितोत्कलिकोत्कण्ठाहेलासलिलवीचिष्विति मेदिनीकारः ॥

९६–९८ शुद्धिरक्लिष्टता । दूतीगुणानाह । शास्त्रेष्वित्यादि । निष्ठेदमित्थमेवेति निर्णयः । तत्र सहजो बोधो नैसर्गिकं ज्ञानम् । ज्ञाने सति प्रागल्भ्यं वावदूकता । अभ्यस्ता गुणाः श्लेषादयो यत्र तादृशी वाणी । यद्वा । अभ्यस्तमभ्यासस्तदनुगुणा वाणी च । कालावबोधः समयज्ञानम् । प्रतिभानमनुरूपं तात्कालिकस्मरणं तद्योगित्वम् । एते गुणाः सर्वकर्मसु प्रकरणाद्दूतीकृत्येषु वा कामदुहोऽभिलषितप्रदाः । तत्र शास्त्रनिष्ठया पटुत्वं प्रागल्भ्येन धाष्टर्यं प्रतिभानवत्त्वेनेङ्गितज्ञत्वं दूतीगुण उक्तम् । यदाह ।

पटुता धृष्टता चेतोङ्गितज्ञत्वं प्रतारणम् ।
देशकालज्ञता चैव दूतीकृत्ये गुणा मताः ॥

कामदुह इत्यत्र सत्स्वित्यादिना क्विप् ॥

९९–१०४ जीविताद्दुद्विजमानेनेति प्रद्वेषः प्राणितव्येष्विति भरतानुसरणम् । न क्रियत इति पाठे नः शिरश्चालने । दुष्करमेवाह । धत्त इत्यादि । तेन दुष्करं क्रियते । यस्मादयं नवाम्रे कलिकायुक्ते ध्वनत्कोकिले

---

१ °मेव A. D. २ उपन्यासबुद्धिः C. ३ अहो महत्यारोपणे बुद्धिः B. ४ कालानुरोधः A. B. कामदुहः Com. ५ मनः B. ६ °मपि न किंचित्क्रियते A. °मपि किंचित् न क्रियते B. °मपि न किंचन D.

धत्ते चक्षुर्मुकुलिनि रणत्कोकिले बालचूते
मार्गे गात्रं क्षिपति बकुलामोदगर्भस्य वायोः ।
दाहप्रेम्णा सरसबिसिनीपत्रमात्रान्तराय-
स्ताम्यन्मूर्त्तिः श्रयति बहुशो मृत्यवे चन्द्रपादान् ॥

१०५ माध० । अन्य एवाक्षुण्णः कथाप्रकारो भगवत्याः ।

माल० । स्वगतम् । अदिदुक्करं करेदि । (क)

(क) अतिदुष्करं करोति ।

मृत्यवे मरणाय नेत्रं धत्ते । बकुलगन्धबन्धोर्वातस्य वर्त्मनि शरीरं क्षिपति स्थापयति । अत्र मार्गपदेनानागतेन वायुना येन पथा समागन्तव्यं तत्सूचितम् । बकुलामोदपदेन स्वकार्यक्षमता । गर्भपदेन बाह्यान्तरभावः नाहृतोक्ता । दावप्रेम्णा वनवह्निप्रीत्या चन्द्रकिरणान्वारं वारं श्रयति । एतेन चन्द्ररश्मीनां दाहकत्वमुक्तम् । अत्र प्रेमपदेन नायिकानुरागस्य च विरोधिविमर्शशून्यत्वं तृतीयया चाङ्गसङ्गहेतुत्वं च ध्वनितम् । कीदृशः । सरसपद्मिनीपत्रमात्रान्तरितो ग्लायमानकायः । सर्वत्र मृत्यव इति योज्यम् । तथा च मरणाय कृतोद्यम इति भावः । यद्वा । अन्तरायो मरणे विघ्नः । तत्र पद्मिनीपत्रहेतुत्वम् । तदिह चन्द्रपादादीनां कामोद्दीपकतयानर्थहेतुत्वेन विप्रलम्भस्योत्कर्षः सूचितः । किं च मनोविकार इन्द्रियजन्य इत्यनेनेन्द्रियाणां शान्तिः कृता । नवचूतदर्शनेन नेत्रस्य । चूतैरानन्दत्वमुकुलितत्वाभ्यामतिदुःखदत्वम् । कोकिलरवाकर्णनेन श्रोत्रस्य । बकुलगन्धसंबन्धेन घ्राणस्य । वायुचन्द्रकरयोः स्पर्शेन त्वच इति ।

१०५–१०८ अक्षुण्णोऽन्यानानुभूतः कथाप्रकारः कथनक्रमः । [अतिदुष्करं करोति] बालचूतदर्शनादेरतिपीडाकरत्वेन मालत्यापि ज्ञानादेवमुक्तमिति भावः । अन्यत्रेत्यादिना त्वय्येव प्रथममनुरक्तोऽयमिति दार्शि-

१ दावप्रेम्णा Com.

काम० । तदेवं प्रकृत्या सुकुमारः कुमारः[1] कदाचिदप्यनयत्नापरिक्लिष्टपूर्वस्तपस्वी येतो[2]ऽधुना शक्यमनेन मरणमप्यनुभवितुम् ।

माल० । जनान्तिकम् । सहि अत्तणो कारणादो तस्स सव्वलोअालंकारभूदस्स किं पि आसङ्क[3]न्तीए भअवदीए भीदा[4]विदह्मि । ता किं दाणिं[5] एत्थ पडिवज्जिस्सं । (क)

माध० । दिष्ट्यानुकम्पितोऽस्मि भगवत्या[6] ।

लव० । भअवदी एव्वंवादिणीं[7]त्ति आचक्खीअदि । अह्माणं पि भ[8]ट्टिदारिआ भवणासण्णर[9]च्छामुहमुहुत्तमण्डणस्स तस्स दंसणे बहुसो

(क) सखि आत्मनः कारणात्तस्य सर्वलोकालंकारभूतस्य किमप्याशङ्कमानया भगवत्या भीतायितास्मि । तत्किमिदानीमत्र प्रतिपत्स्ये ।

तम् । तपस्व्यनुकम्प्यः ॥ तपस्वी तापसे चानुकम्प्ये चेति विश्वः ॥ अनेन वैदेशिकोऽपि वराक इति मयैतदुच्यते न तु कारणादित्युक्तम् । शक्यमिति । तया च त्वमनुरागिणी भवेत्यर्थः ।

१०९–११२ अत्रात्मनो मम । किमपीत्यमङ्गलतयावचनीयं मरणमित्यर्थः ॥ भीतायितेत्यत्राचारे क्यङ् ॥ किमिति । तज्जीवनाय ममापि तत्रानुराग इति वक्तुमुचितमपि कुमारीत्वेनानुक्तमतस्त्वं वदेति भावः । कामन्दकीं प्रति जनान्तिकमिदम् । माधवश्च गुप्तः । स श्रुत्वाह दिष्ट्येत्यादि ।

११३–१२० अत्र एवंवादिनीत्यत्र कामावस्था गुरुजने लज्जया वक्तुमनर्हापि मालतीनिमित्तमाधवावस्थाश्रवणात्सापि तन्निमित्ता कथ्यत इति भावः । अस्माकं भर्तृदारिका परिजनं दुनोतीत्यन्वयः । आश्लिष्टं स्पृष्ट-

१ B. D. om. कुमारः; B. om. अपि. २ B. om. यतः and अपि. ३ णिवेदन्तीए D.; B. om. भअवदीए. ४ भीसिदा अह्मि B. भीसिदह्मि D. ५ °णीं D.; B. om. एत्थ. ६ B. om. भगवत्या. ७ °णी त्ति A. D.; भाअक्खी for आचक्खीदा A. ८ वि A. C. D.; भट्ट B. C. D. ९ रच्छा B.; D. om. मुह; मुहमुहुत्तमण्ड° C.

अणुभूददंसणा[1] भविअ रविकिरणासिलिट्ठ[2]मुद्धकमलिणीकन्दसुन्दरावअवसोहाविभा[3]विदाणुव्वेअणाधिअदररमणीआ वि परिअणं[4] दुम्मेइ । णाभिणन्ददि केलिकलाओ[5] केवलं कमला[6]अन्तकन्तहत्थपल्हत्थगण्डमण्डला[7] दिअसं गमेदि । अवि अ । विअसिआरविन्दमअरन्दणीसन्[8]दसुन्दरेण दरदालिदकुन्दमाअन्दमहुविन्दुसंदोहवाहिणा भवणु[9]ज्जाणपेरन्तमारुदेण उत्तम्मदि[10] । (क)

(क) भगवत्येवंवादिनीत्याख्यायते । अस्माकमपि भर्तृदारिका भवनासन्नरथ्यामुखमुहूर्तमण्डनस्य तस्यैव महाभागस्य दर्शनं भूत्वा रविकिरणाश्लिष्टमुग्धकमलिनीकन्दसुन्दरावयवशोभाविभावितानुद्वेदनाधिकतररमणीयापि परिजनं दुनोति । नाभिनन्दति केलिकलाः केवलं कमलायमानकान्तहस्तपर्यस्तगण्डमण्डला दिवसं [illegible] । विकसितारविन्दमकरन्दनिःस्यन्दसुन्दरेण दरदलितकुन्दमाकन्दमधुबिन्दुसंदोहवाहिना भवनोद्यानपर्यन्तमारुतेनोत्ताम्यति ।

म् । मुग्धो बालः । कन्दं बिसम् । बालकमलिनीमूलं मृदुतरं [illegible] म्लानं च भवति । तदनेन दृष्टान्तेन निःसहत्वतनुत्वे [illegible] । तद्दशायामपि सौन्दर्यद्योतनाय सुन्दरपदम् । अधिकतररमणीयापि अत्यनेन कामालिङ्गितकायस्य कान्तिप्रकर्ष उक्तः । अत [illegible] अतिकान्तस्य सुखजनकत्वनैयत्येन दुःखजनकत्वे विभावनालङ्कारः । नाभीत्यादि । अत्र यत इत्यध्याहार्यम् । केलिः क्रीडा । [illegible] ।

१ संदसणा C. २ लिट्ठ for सिलिट्ठ B. D.° णाविलिट्ठ C. ३ विहाविदा° C. ४ परिजणं B. D.; दूमेदि B: दूनेदि C. दूसेदि D. ५ कलालीलाओ for केलिकलाओ B. C. ६ कमलाअमाण A. किमिअमाअन्त B.; B. om. कन्त; हत्थल्लवपल्हत्थ D. ७ मण्डउल C.; दिआसाइं A. ८ णिस्स° A. C.; दलिअ A. ९ भवणुज्जाण A. भवणउज्जाण C. १० उत्तमादि B. C.

जं[1] च तस्सि जत्तादिअहे णिअमहूसवाब्भुदि[2]अदंसणपडिवं[3]णरूवस्स भअवदो कामस्स विअ[4] कामकाणणालंकारआ[5]रिणो तस्स विविहविब्भमा[6]हिरामं अणुरूआणुराआणुवन्धमह[7]घोक्किदजोव्वणारम्भं अण्णोण्णदिट्ठिविणिवादसञ्जणावसरजू[8]रविदचित्ततुवरन्तकोदूहलं समुल्लसिदसद्धसत्थम्भमन्थरावअवपडिलग्गसेअपुलअउक्कम्पसुन्दरं आणन्दिदसहीअणं पिअसहीए परप्परावलोअणसुहं समासादिदं तदो पहुदि सविसेसदूसहाआसविअम्भमा[9]णुद्दामदेहदाहदारुण

यद्वा। केलीनां कलांशमात्रम्। कथं तर्हि दिनानि गमयतीत्याह। केवलमित्यादि। कमलायमानं प्रसारितम्। इदं भरतानुमतम्। यदाह।

अप्राप्ते च प्रिये कार्यः स्त्रीभिर्गण्डान्वितः करः॥

पर्यस्तं क्षिप्तम्। निःस्यन्दः क्षरणम्॥ ईषदर्थे दराव्ययमित्यमरः॥ दलितं विकसितम्। माकन्दश्चूतः। पुष्पपरमत्र॥ माकन्दः सहकारेस्त्रीति मेदिनी॥ एतेन वायोस्त्रैगुण्यमुक्तम्।

१२१–१२९ यच्च प्रियसख्या यात्रादिने तस्य दर्शनसुखं समासादितं तत आरभ्य सा कमलिनीव प्रम्लायतीत्यन्वयः। प्रतिपन्नरूपस्य कृतदेहपरिग्रहस्य। कामस्यानङ्गत्वात्पुरातनत्वाच्च। महोत्सवदर्शनार्थमिदमुक्तमिति भावः। अद्भुतप्रतिपन्नरूपस्येत्याहिताग्न्यादिः। विविधविलासैरभिरामम्। यद्वा। विविधभ्रमणमभिरामोऽभिरतिर्यत्र तत्। वञ्चनादर्शनाभावः। त्वरमाणं शीघ्रमुपजायमानम्। कथं पश्यामीति कुतुकं तयोश्चित्ते भवदित्याशयः। आनन्दितसखीजनं कामसंपत्त्येति भावः। विजृम्भमाणो

१ अण्णं च B. जंच C. २ °ब्भुदअ° A. B. °दब्भु°. D. °वभूदे C. ३ पडिअण्ण A.; रूपस्स B. हिअअस्स for रूवस्स D. ४ णिअ for काम B. C. ५ °कारिणो B. ६ °भिरामं A. B. D.; °रूणा° B.; C. om. अणुराअ. ७ महद्धो C. D.; उज्जोव्वणा° C. ८ खिज्जंत B. D. ९ कोदूहल[illegible]मुल्लसिदसज्झस B. १० विअम्भमाणुद्दा° C.; °माणु° A.; D. om. दाह.

दसापरिणामं[1] अणुभवन्ती मुहुत्तमेत्तसंपत्तपुण्णचन्दोदआ[2] विअ बालकमलिणी[3] पम्मलाअदि ।(क)

(क) यच्च तस्मिन्यात्रादिवसे निजमहोत्सवाभ्युदयदर्शनप्रतिपन्नरूपस्य[4] भगवतः कामस्येव कामकाननालंकारकारिणस्तस्य त्रिविधविभ्रमाभिराममनुरूपानुरागानुबन्धमहार्घीकृतयौवनारम्भमन्योन्यदृष्टिविनिपातनञ्जनावसरखिद्यमानचित्तत्वरमाणकौतूहलं समुल्लसितसाध्वसस्तम्भमन्थरावयवप्रतिलग्नस्वेदपुलकोत्कम्पसुन्दरमानन्दितसखीजनं प्रियसख्या प्रथमप्रावलोकनसुखं समासादितं ततः प्रभृति सविशेषदुःसहायासविजृम्भमाणोद्दामदेहदाहदारुणं दशापरिणाममनुभवन्ती मुहूर्तमात्रसंप्राप्तपूर्णचन्द्रोदयेव[5] बालकमलिनी प्रम्लायति ।

वर्धमानः । उद्दामो महान् । दारुणो भयंकरः । मरणशङ्कयेति भावः । दशा । कामावस्था । यथा क्षणमात्रप्राप्तचन्द्रोदया कमलिनी म्लायति तथेयमपि प्राप्तपूर्णचन्द्रोदया म्लायति । चन्द्रकरमपि सोढुमक्षमेति भावः । यद्वा । यथा प्राप्तचन्द्रोदया पद्मिनी म्लायति तथा प्राप्तदर्शनसुखेयं म्लायतीत्यर्थः । ननु चन्द्रेण विरोधात्पद्मिन्या म्लानिर्युक्ता । अस्यास्तु माधवानुरागात्तद्दर्शने कथं म्लानिरिति । नैवम् । यथा शीतस्पर्शेन चन्द्रः क्षणं पद्मिनीं सुखयति तथा माधवो मालतीमिति विवक्षितत्वात् । यद्वा । मुहूर्तपदेनेह प्रथमचन्द्रोदय उक्तः । एवं चाभिनवोदितं चन्द्रं रक्ततया सूर्यमिव दृष्ट्वा भ्रान्त्या मुहूर्तं पद्मिनी विष्टभ्य प्रम्लायति तथेयमपीत्यर्थः ।

---

१ °णामं A. २ पुण C. D.; °दोदआ B.; A. has विअ after कमलिणी. ३ °लिणिव्व D.; C. D. insert इअं before पम्मला°; पम्माअदि B. पम्मलाअदि C. पम्मळअदि A. ४ Com. i. e. the Chhâyâ in the Com. agrees with the text but Jagaddhara's reading appears to be °महोत्सवदर्शनाहुतप्रतिपत्ररूपस्य. ५ इव after कमलिनी Com.

तहवि[1] अ मुहुत्तमेत्तहिअ[2]अविणिहिदणिम्माअन्तवल्लहसमा[3]अमा णिब्भरसलिलासारसिच्चमाणेव्व मेइणी सीदलाअदि त्ति जाणामि । जेण पप्फु[4]रन्तकन्तदसणच्छदुच्छ[5]लन्तदन्तमुत्तिआवलिकन्तिसविसेससोहिदं णिरन्तरुल्लसिदपुलअपह्मल[6]कन्तकवोलघोलन्तसंतदाणन्दबाहत्थवअं ईसिविअसि[7]अणिप्फन्दमन्दतारुत्ताणमसिणम[8]उलाअन्तणेत्तणी-

---

१३०–१३७ तथापि चेत्यत्रापि चेति भिन्नक्रमः । तथा शीतलायत इत्यपि जानामि चेति संबन्धः । निर्मायं मायारहितं सत्यमित्यर्थः । समागमेति भावनाबलादिति भावः । मेदिनी ग्रीष्मावसानकालीनेत्यर्थः । समागममेव द्रढयति । येनेति । येन हृदिस्थकान्तसंगमेनैवं सा भवति तेन विदग्धसहचरीचित्तसंशायितकौमारभावा भवति । वैदग्ध्ययुक्ततया सहचरीसंघेनैवं संशय्यते यन्मत्परोक्षेपि प्रियसंगतेयम् । कथमन्यथैतादृक्संस्थानमस्या इति भावः । दशनच्छदमधरम् । छलन्प्रकाशमानः । अधरस्फुरणं भावनार्पितप्रियतमचुम्बनात् । मुक्तिका मौक्तिकं मुक्तेति शब्दभेदः । निरन्तरेति । संकल्पकृतवल्लभसमागमोद्भूतसात्त्विकभावेनेत्याशयः । घूर्णमानं लसमानम् । यद्यपि रोमाञ्चः सर्वाङ्गीण एव भवति तथापि रागातिशयद्योतनाय कपोलपुलक एव वर्ण्यते कविसंप्रदायेनेत्यवधेयम् । मन्दतारं किंचिच्चलतारकम् । उत्तानमूर्ध्वविस्तृतम् । भावनोपनीतप्रिये लज्जादिदृक्षाभ्यामीषद्विकासितत्वम् । निष्पन्दता मौग्ध्यात् । मन्दतारता नखदशनक्षतभावनया प्रियं प्रति सासूयत्वात् । उत्तानत्वं मुखदिदृक्षया । मसृणत्वं स्नेहभावनया । मुकुलत्वं रतावसानभावनया । यदाह ।

---

१ तहवि B. तहवि अ C. २ D. om. हि.; णिभ for णिम्माअन्त A. ३ °गमा A. समागमारंभा C. ४ पप्फुरिद A. C. D. ५ °च्छलइन्त B.; मोत्ति° D. ६ A. D. om. कन्त; कपोल B.; सददा° for संतदा A.; संददा D. ७ °सिद A.; णीसन्द for णिप्फन्द B. णिस्सन्द A. ८ णभण B.

१३५ लुप्पलं अविरलुब्भिण्णसेअजलबिन्दुसुन्दरललाटपट्ट[1]णवचन्दलेहाम-णोहरं मुद्धमुहपुण्डरीअं उव्वहन्ती विअ[2]ड्ढसहअरीचित्त[3]संसइदकुमारी-भावा भोदि । (क)

(क) तथापि च मुहूर्तमात्रहृदयविनिहितनिर्भा[4]माणवल्लभसमागमा निर्भरसलिलासारसिच्यमानेव मेदिनी शीतलायत इति जानामि । य-न प्रस्फुरत्कान्तदशनच्छदोच्छलद्दन्तमौ[5]क्तिकावलिकान्तिसविशेषशोभितं निरन्तरोल्लसितपुलकपक्ष्मलकान्तकपोलघूर्णमानसंततानन्दवाष्पस्तबक-मीषाद्विकसितनिष्पन्दमन्दतारोत्तानमसृणमुकुलायमाननेत्रनीलोत्पलमविर-लोद्भिन्नस्वेदजलबिन्दुसुन्दरललाटपट्टनवचन्द्रलेखामनोहरं मुग्धमुखपु-ण्डरीकमुद्वहन्ती विदग्धसहचरीचित्तसंशायितकु[6]मारीभावा भवति ।

निश्चलत्वं तदा यातो मुकुलत्वं च लोचने ॥

उद्भिन्नमुद्भूतम् । स्वेदेति । रतिश्रमादयं स्वेदः । तदनेन प्रबन्धेन तृप्तिरुक्ता । यदाह ।

रोमाञ्चो वेपथुः स्वेदो लुलिते च विलोचने ।

मज्जन्त्या इव देहेषु आश्लिष्टतृप्तिलक्षणम् ॥

तदिह यदीयं वल्लभसमागमं न जानाति तदा कथमधरस्पन्दादि-मती स्यात् । कुमारस्य भावः कौमारं शैशवं तस्य भावोभिप्रायः कटा-क्षविक्षेपादिः संशायितो यस्याः सा ।

१३८–१४१ भिशाचेष्टामाह । किं चेति । निकुरम्बः समूहः । चुम्बितेन चुम्बनेन प्रवृत्तानिःस्यन्दः संजातक्षरणः । छटा च्छट [छल पा०] इति यस्याः प्रसिद्धिः । दन्तुरितं विषमीकृतम् । संवाह-

---

१ पट्ट A. वंदेदुलेहा B. निडिलवंदेदु C. २ विभड B. ३ B. om. चित्त; संस-इअ D.; कोमार A. D. कौमारी B. ४ निर्भागवल्लभ° one Ms. Com. ५ मौक्तिकपङ्क्ति Com. ६ कौमारभावा Com.

किं अ । उद्दामसिसिर[1]ससिमऊहणिउरम्बचुम्बिदपउत्तणीसन्दच-न्दमणिहारधारिणी पउ[3]रकप्पूरसविसेससिसिरचन्दणरसच्छडासारणि-अरदन्तुरिदबालकदली[4]वत्तसंवाहणादि[5]वावारतुवरन्तसहअरीसत्थविर-इदोव[6]णीदकमलिणीदलजलद्दासअणीए उण्णिद्दा[7] रअणिं गमेदि । (क)

कधं वि[8] वम्महद्धणिद्दासुहा सेअ[9]पईअरिदपादपल्लवुव्वत्तं[10]तविण्डालत्त-

(क) किं च । उद्दामशिशिरशशिमयूख[11]निकुरम्बचुम्बितप्रवृत्तनिः-ष्यन्दचन्द्रमणिहारधारिणी प्रचुरकर्पूर[12]सविशेषशिशिरचन्दनरसच्छटा-सा[13]रनिकरदन्तुरितबालकदलीपत्त्रसंवाहनादिव्यापारत्वरमाणसहचरीसा-र्थविरचितोपनीत[14]कमलिनीदलजलार्द्रशयनीय उन्निद्रा रजनीं गमयति ।

नमर्पणम् । विरचितोपनीतं विरचनेनाङ्गदत्तम् । आसिमन्दे पूरः समूहः पूरणं वा । सविशेषमर्पणेन शीतलकर्पूरसंस्पर्शादतिशीतलत्व-सुकम् । कदलीपत्त्रस्य बालत्वेन शैत्यसौकुमार्ये उक्ते । कमलिनीदलमेव जलार्द्रार्द्रवस्त्रं तच्छय्यायाम् ॥ आर्द्रवस्त्रं जलार्द्रं स्यादिति हारावली ॥ औन्निद्र्येणोन्निद्रतया । आत्मनः सखीनां चेति शेषः । एतेन निद्राच्छे-दोद्वेगावुक्तौ ।

१४२–१४९. निद्रैव सुखं निद्रासुखम् । उद्वेगादिदुःखमयजाग-रविपर्ययरूपत्वादिदम् । निद्रायां चिन्तावशात् । यदाह ।

दौर्बल्यालस्यचि[न्ता]द्यैर्निद्रा स्यात्कथयापि चेति ।

१ च B. D. २ A. C. om. सिसिर; कर for मऊह B; णिउरम्ब A. D. ३ A. om. पउर; A. D. insert पूर after कप्पूर; D. has रसविसेस. ४ वण्ण B. ५ वावारं A. B. C.; तुवरन्त् C. ६ °दुत्त° D. ७ D. adds जेव after उण्णिद्दा; रअणीओ A. C. D. ८ कधं वि B. कधं वि अ C. ९ पप्फु° A. पण्हुद D.; पाल for पाद D. १० वुव्वत्तं B. C. ११ कर Com. १२ Some Mss. Com. have कर्पूरपूर. १३ Some Mss. Com. have शीकर for निकर and one, for आसार. १४ Com. add सह before कम°. १५ औन्निद्र्येण Com.

अरसा थरथराअन्तपीवरोरुमूल[1]विसंवदिदणीवीबन्धणा उक्खु[2]भन्तहिअअन्तरुत्तरंगणीसा[3]सत्तसाविसमुच्छ[4]सन्तपह्मलपओहरोवरि[5]णिहिदवेवन्तभुअलदावेढ[6]बन्धणा झत्ति पडिवोधवेलाविसज्जिदु[7]द्दिवणादिट्ठिविणिवादविण्णादसुण्णसअणिज्जसंजादमोहमीलन्तलोअणा ससंभमसहीअणप[8]अत्तपडिवणणमुच्छाविच्छेअसमअसंगलिददीहणीसाससेसजीविदा किंकाद[10]व्वमूढदाए पढमप्पत्थिदाणिअजीविदावसाणं दुव्वारदेव्व[11]विलसिदोवालम्भमेत्तव्वावारं अह्मारिसं जणं करेदि। (क)

(क) कथमप्युपलब्धनिद्रासुखा [illegible] स्वेदप्रसृतपादपल्लवोद्भ्रान्तपिण्डालक्तकरसा [illegible] [12]लवि संवदितनीवीबन्धनोत्क्षु[13]भ्यमानहृद[illegible] लपयोधरोपरिनिहितवेपमानभुयान्तरोत्त[illegible] विसर्जितोद्विग्नदृष्टिविनिपातादिजलतावे[illegible] ससंभ्रमसखीजनप्रयत्नप्रतिपज्ञातश्[illegible] धजीविता किंकर्तव्यमूढतया न्नमूच्छ[illegible] वैविलसितोपालम्भमात्रव्यापारमप्रथम[illegible]

स्माद[illegible] प्रसृतश्चरणपल्लवेनोद्भ्रान्तः पिण्डीभूवल्लभसमागमसंवा[illegible] ताल[?]क्तकरसो यस्याः सा। अलक्तकच्छलेना[illegible]नुरागमिवोद्गमतीति भावः। अतिघनत्वार्थं पिण्डपदम्। थरथरायमा[illegible] कम्पमानम्। पीवरं महत्।

१ A. adds वस after मूल; संवदि[illegible] D. विसंकुलिद C.; णीवि A. B. D. २ उक्खडन्त A. ३ °हत्तुंगणीसास D.; A. C. D. om. वस. ४ विसमसुछसन्त C. विसमसमुच्छसन्त D. [illegible]वसमसमूससन्त A. ५ °वरि B. णिहित A. B. C. वेभन्त D. ६ वेढ A.; वेठ्ठण D.; पाडि° B. °वोह D. ७ °दुव्विग्ग A. °दुद्दिविण्ण B. ८ वाव[illegible] A. C.; विणिवादिद D. ९ पउत्त A.; पडिवण C. D.; मुक्का for मुच्छा C. १० °कादव्वदामूढदाए A. D.; पत्थिद A. C. D. ११ दुव्विलसिद C.; °वालंभ D.; वावारं all Mss. १२ Some Mss. Com. have वस after मूल. १३ उत्खण्डमान and उत्खल्यमान Com.

ता पेक्खदु भअवदी इमेसु दाव [1]लावण्णभूइट्ठणिम्माणपरिवेल्लवेसु[2] अङ्गेसु दारुण[3]विअम्भिदस्स किअच्चिरं कुसलावसाणदा मम्महस्स भविस्सदि कधं [4]अ इमाइं रमणकेलिकलहकोवो[5]वराअपल्लविअकेरलीकवोलकोमलुव्वे[6]ल्लन्तविमलचन्दचन्दिआ[7]उद्दामदालिदतिमिरावरणाइं [8]विहावरीमुहाइं[9]। इमे अ उल्लसिददुद्धसि[10]न्धुपूरधवलुज्जलजोण्हाजलप्पवालोले-

---

वशं संसक्तम्। विसंवदितं स्खलितम्। प्रियस्योर्वाक्रमणभावन[illegible] प्रकम्पः। तदाकर्षणभावनया नीवीस्खलनम्। उत्खण्डयम[illegible]ठलत्। उत्तरंगो यातायातवान्। विषमं यथा तथोच्छ्वसन्। पक्ष्मलः [illegible]ञ्चः। वेष्टनं वेष्टः। इह हृदयोत्खण्डनादिकं प्रियसंभोगव्यायाम[illegible]वनया। उपरिवर्तिप्रियस्य भुजलताबन्धनमालिङ्गनभावनया। प्रियप्राप्त्या प्रबुद्धा। प्रबोधश्च स्पर्शादिना भवति। मोहेति। शून्यशय्यादिदर्शनान्मूर्छितेत्यर्थः। ससंभ्रमः सादरः सवेगो वा। संगलितो निःसृतः। अनेन युगपन्नासापुटनिःसरणमाह। मूर्छाविच्छेदे तथैव श्वासप्रवृत्तेः। जीवितेति। मोहे सखीजनसेकादिना मूर्छापगमे दीर्घनिःश्वासेन जीवतीत्यवधार्यत इत्यर्थः। किंकर्तव्येति। जीविता सती किं करोमीति न वेत्तीत्यर्थः। प्रथमेति। वयमेव प्रथमं म्रियामह इत्यर्थः।

१५०–१५७ स्वयमनध्यवसायालब्धकाङ्क्षा कामन्दकीं पृच्छति तस्माद्विक्षतां भगवतीति। पेलवं कोमलम्। दारुणत्वं देहदाहादिकारित्वात्। इमानि विभावरीमुखानि प्रियसख्याः कथमेवं भविष्यन्तीत्यन्वयः। उपरागो लौहित्यम्। पल्लवितः पल्लवाकारीकृतः। केरली केरलदेशस्त्री। तस्या

---

१ जावण A. C. D. २ B. om. परि; पेल° for वेल. B. D. ३ विजिम्भि° B.; °चिरस्स B. कियच्चिरं तस्स C. केच्चिरं A.; कुसलावसादणा B. ४ च B. वा D. ५ °दराअ D. ६ °लुव्वेल° B. ७ C. om. उद्दाम. ८ विभा° A. D. ९ D. adds गमेदि after मुहाइं; D. om. इमे अ. १० D. om. सिन्धु, C. has राशि for सिन्धु.

देंग[1]अणङ्कणा परिमलिदपाडॅ[2]लाअउलणिम्महणबहलपरिमलुग्गारसं[3]वलणमसिणमंसला[4]अन्तमलअमारुदुद्धूमाविददॅ[5]हदिहामुहा वसन्तरअणीपरिणाहा[6] अणत्थकारिणो भविस्सन्ति पिअसहीए त्ति । (क)

काम० । लवङ्गिके

यदि तद्विषयोनुरागबन्धः

(क) [illegible]प्रेक्षतां भगवत्येषु[7] तावल्लावण्यभूयिष्ठनिर्माणधारिपेलवेष्वङ्गेषु दारुण[illegible]तस्य कियच्चिरं कुशलावसानता मन्मथस्य भविष्यति कथं चै[illegible] रमणकेलिकलहकोपोपरागपल्लवितकेरलीकपोलकोमलोद्वेल्लद्विगल[illegible]चन्द्रिकोद्दामदलिततिमिरावरणानि विभावरीमुखानि । इमे चोल्लसितदुग्धसिन्धुपूरधवलोज्ज्वलज्योत्स्नाजलप्रक्षालितगगनाङ्गनाः परिमलितपाटलावकुलनिर्मथनबहलपरिमलोद्गारसंवलनमसृणमांसलायमानमलयमारुतोद्धूमायितदशदिङ्मुखा वसन्तरजनीपरिणाहा अनर्थकारिणो भविष्यन्ति प्रियसख्या इति ।

अतिगौरत्वेन लौहित्यार्थं ग्रहणम् । उद्वेल्लन्पतन् । उद्दामदलितमतिदारितम् । इह रुष्टकेरलीकपोलसाम्येनोदितचन्द्रेण तिमिरावरणनाशे रात्रेः रूपकमः कथितस्ततश्चन्द्रस्य दुःसहता माल्त्या ध्वनिता । परिमलितं कृतम् । निर्मन्थनं मर्दनम् । उद्गार उद्गमः । संवलनं मिश्रीभावः । मसृणं मन्दम् । मांसलः पुष्टः । धूमायितं धूमेनेवाकुलीकृतम् । परिणाह आभोगः ।

१५९–१६३ एवं श्रुत्वा कामन्दकी तदर्थेवाह । यदीत्यादि । यदि तद्विषयोनुरागस्तदा गुणज्ञतायाः प्रत्यक्षमेतद्विशिष्टं फलम् । तदा[illegible]

१ °लिअ A.; °णाङ्गणा A. णहंगणा B. २ पाटल A. प[illegible] मउल D.; ३ संदलण C. ४ °अमाण D. ५ दसदिसा A. D[illegible] ७ एतेषु Com. ८ Com. om. परि.

स्फुटमेतद्धि फलं गुणज्ञतायाः ।
इति नन्दितमप्यवस्थयास्या
हृदयं दारुणया विदीर्यते मे ॥

माध० । स्थान एव हृदयोद्वेगो भगवत्याः ।

काम० । अहो प्रमादः ।

प्रकृतिललितमेतत्सौकुमार्यैकसारं
वपुरयमपि सत्यं दारुणः पञ्चबाणः ।
चलितमलयवातोद्धूतचूतप्रसूनः
कथमयमपि कालश्चारुचन्द्रावतंसः ॥

लव० । अण्णं च जाणिदं भोदु भअवदीए । एदं माहवपडिच्छन्दअसणाहं चित्तफलअं । मालत्याः स्तनांशुकमपनीय दर्शयति । एसा वि तस्स उज्जेव सहत्थविरइदेत्ति कण्ठावलम्बिदा बउलमाला जीविएण पिअसहीए त्ति । (क)

(क) अन्यच्च ज्ञातं भवतु भगवत्या । एतन्माधवप्रतिच्छन्दकसनाथं चित्रफलकम् । एषापि तस्यैव स्वहस्तविरचितेति कण्ठावलम्बिता बकुलमाला जीवेन[12] प्रियसख्या इति ।

सैव गुणं जानातीत्यर्थः । एतद्धीति पाठ एतद्गुणज्ञतायाः फलमेवेत्यर्थः । हिरवधारणे । इति नन्दितमानन्दं प्रापितमपि मे हृदयमस्या अवस्थया विदार्यते । एतदवस्थतया मरणमप्यस्याः संभाव्यत इति भावः । स्थाने युक्तम् । स्थानेशब्दोऽत्र योग्यवाची । हृल्लासो हृदयशोषः ।

१६४–१७२ प्रकृतीत्यादि । अस्या वपुरिदं स्वभावसुन्दरं सौकुमार्यमेवैकः सारः स्थिरांशो यत्र तत् । एतत्सत्यं निश्चितम् । अयमेव

१ °द्धिफलं D. २ वेदार्यते A. Com. ३ हृल्लासो A. Com.; भवत्याः B. C. ४ लुलित D.; सौकुमार्यस्य सारं C. ५ वलित C. ६ प्रसूतिः C. ७ भ for च C. ८ B. C. add च. ९ °छन्दस° A. १० विरइभत्ति B. C. ११ जीअणं B. १२ जीवितं Com.

माध० । सस्पृहम् ।

जितमिह[1] भुवने त्वया यदस्याः
सखि बकुलावलि वल्लभासि जाता ।
परिणतबिसकाण्डपाण्डुमुग्ध-
स्तनपरिणाहवि[2]लासवैजयन्ती ॥

नेपथ्ये कलकलः । सर्वे आकर्णयन्ति ।

पुनर्नेपथ्ये । रे रे संकरघराधि[3]वासिणो जण[4]वदा एसो क्खु जोव्वणा-रम्भग[5]व्वसंभरिददुव्विसहामरिसरो[6]सवइअरबलामोडिअविहडिदुग्घा-

---

कामच्चरितानुभावात्कामोप्ययं निर्दयः । अदोपि सत्यम् । पञ्चबाण इत्यने-नैकबाणापेक्षया दुःसहत्वमुक्तम् । अयमपि कालश्चलन्मलयानिलकम्पित-चूतपुष्पश्चारुचन्द्रभूषणश्च । कथमिति शिरश्चालने । हिमादेरपगमा-च्चारुचन्द्रत्वम् । तदीदृशेनर्थहेतौ कथमियं जीविष्यतीत्यहो प्रमादः । अत्र [ल० वा०] नाथपदेनचित्रगतस्यापि माधवस्य मालतीनाथत्वं ध्वनितम् । विरचितेति हेतोः । जीवितफलकत्वाज्जीवितम् । कार्यकारणयोरभेदात् ।

१७३–१७८ स्तनांशुकापनयनेन व्यक्तस्तनदर्शनात्सस्पृहम् । जितमित्यादि । सखि बकुलमाळे त्वयेह भुवने जितम् । यतः प्रौढमृणा-लदण्डपाण्डुरमनोहरस्तनविस्तारविलासपताकेवास्या माल्त्या वल्लभा जातासि । मालतीवल्लभत्वात्सखीत्युक्तम् । हृदयधारणेन वल्लभेत्युक्तम् । तथा च माल्त्यालिङ्गनं तव संपन्नं न ममेति भावः । कलकलः कोलाहलः ।

१७९–१९३ अत्रैष व्याघ्रः कुद्दयमविलासं कुरुते । सर्वं भक्षयती-त्यर्थः । मठाच्छात्रादिगृहान्निर्गत्य । कीदृशः । यौवनारम्भेण प्रवृद्धो यो

---

१ जितमिव A. २ विशाल B. ३ °हिवा° B. ४ जणा एसो C. D.; सो क्खु A. ५ D. om. गव्व. ६ C. om. रोस; बलामोडि A. B.

डिदलोहपञ्जरणिबद्ध[1]सिङ्खलाणिरोहपडिभङ्गसंको[2]लिदणिअलीलाविला[3]सुव्वेल्लन्तबहलुत्तुङ्गलङ्गूलविअडवे[4]जअन्तिआडम्ब[5]रुड्डामसरीरसंणिवेसो म[6]ढादो अवक्कमिअ तक्[7]खणसतिह्लकवलिदाणेअदेहिदेहावअवमज्झणि[8]द्दुरट्ठिखण्डटंकारकडकडाअन्तकर[9]वत्तकठिणदाढाकरालमुहकन्दरो पअण्डवज्जणि[10]ग्घादारुणचवेडामोडणपाडि[11]दाणेअणरतुरंगजङ्गलुग्गारभरिदगलगुहागब्भगम्भीरघ[12]ग्घरोरालिगल्लूरणसद्दसंरम्भपडिरवाभोअभी[13]सिदणट्ठाविट्ठाविदासेसजणणिवहो कठोरणहरकप्प[14]रक्कमणाणिद्दअदा[15]रिदजन्तुगत्तावअवप्पउत्तरत्तकद्दामिअगई[16]वहो दुट्ठस-

---

दुःसहावक्षान्तिक्रोधौ तयोर्मिलनेन यो बलात्कारस्तेन विघटितं त्यक्तबन्धीकृतमुद्घाटितं मोटितं च यल्लोहपञ्जरं तत्र प्रतिबद्धशृङ्खलानिरोधप्रतिभङ्गो विपरीतभङ्गस्तेन संकलिता मिलिता या निजलीला तद्विलासपर्यन्त उद्वेल्लत्कम्पमानोत एवोच्छलन्नूर्ध्वं गच्छन्यो बहलतुङ्गलाङ्गूलः स्थूलोच्छ्रितलाङ्गूलस्तस्य विस्तीर्णवैजयन्तिकासदृशप्रपञ्चेनोड्डामर उत्कटकठोरक्रियः शरीरसंनिवेशो यस्य सः। परगुणासहिष्णुतामर्षः। रोषः क्रोध एव। यद्वा। स्थिरः क्रोध एवामर्षः। यदाह।

---

१ पाडिभट्ठ A. २ संघाळिद B. C. संकुळिद D. ३ विळासपेरंतोव्वेळ्लंतोच्छलत्तुंग D. बहलतुंगलंगड B. ४ वैज° A. B. C. ५ विडंबडंबरुड्डाम C. खडलंबिदसरुड्डामर D. ६ मठादो B. मढादो D. ७ तक्खणतिल्लककवाळिआ° D. °णसत्तक्क° C. ८ °रअत्थि A. °रट्ठि C. °रात्थि D.; D. has खंडण for खण्ड. ९ °अंतदंतकरवत्त B. करपत्त D. १० °ग्घाअ A. ११ पाडिदाणेक B. पाडिदासेअ C. कवलिदाणेअ D.; तुरअगजमंसज° B. १२ B. om. घग्घर; गब्भूर C.; D. om. संदब्भ; संरंभ for संदब्भ B. १३ भीसिद A.; for णट्ठविट्ठाविद A. has णट्ठविट्ठाविद, C. तुणविट्ठाविद, D. णट्ठविट्ठाद. १४ कप्पकोरीरंकणिहअ C. १५ °क्कमणिहअदाळिद D.; A. om. अवअव. D. om. अवअवपउत्त; पउत्त B. C. १६ गहगहो D. साद्दूलो A.

हूलो कुविअ[1]कअन्तलीलाइदं करेदि । ता रक्खध जधासत्ति[2] पिअसहीए मदअन्तिआए जीविदं त्ति । प्रविश्य बुद्धरक्षिता सत्रासम् । परित्ताअध[3] परित्ताअध । एसा णो पिअसही अमच्चणन्दणस्स बहिणिआ मदअन्तिआ एदिणा दुट्ठसद्दूलेण विणिहदविद्दाविदासेसप[4]रिअणा अभिभवीअदि[5] । (क)

(क) रे रे शंकरगृहाधिवासिनो जानपदाः एष खलु यौवनारम्भ[6]गर्वसंभृतदुर्विषहामर्षरोषव्यतिकरबलात्कारविघटितोद्घाटितलोहपञ्जरानिबद्धशृङ्खलानिरोधप्रतिभङ्गसंकलितानिजलीलाविलासो[7]द्वेल्लदुद्दहलोत्तुङ्गलाङ्गूलविकटवैजयन्तिकाडम्बरोद्दामशरीरसंनिवेशो मठादपक्रम्य तत्क्षणसतृष्णकवलितानेकदेहिदेहावयवमध्यानिष्ठुरघाट्यिखण्डटंकारकटकटायमानकरपत्त्रकठिनदंष्ट्राकरालमुखकन्दरः प्रचण्डवज्रनिर्घातदारुणचपेटामोटनपातितानेकनरतुरंगजाङ्गलोद्गारभरितगलगुहागर्भगम्भीरघर्घरोराह्लिगल्लपूरणशब्दसंदर्भप्रातिरवाभोगभीषितनष्टविद्रावितशेषजननिवहः कठोरनखरकर्पराक्रमणनिर्दयदारितजन्तुगात्रावयवप्रवृत्तरक्तकर्दमितगातिपथो दुष्टशार्दूलः कुपितकृतान्तलीलायितं करोति । तद्रक्षत यथाशक्ति प्रियसख्या मदयन्तिकाया जीवितमिति । परित्रायध्वं परित्रायध्वम् । एषा नः प्रियसख्यमात्यनन्दनस्य भगिनी मदयन्तिकैतेन दुष्टशार्दूलेन विनिहतविद्रावितशेषपरिजनाभिभूयते ।

क्रोधः कृतापराधेषु स्थिरोमर्ष इति स्थितः ।
प्रतिकूलेषु तैक्ष्णस्य प्रबोधः क्रोध उच्यते ॥

यद्वा । अमर्षोक्षान्तिः । तत्क्षणं सतृष्णं कवलिता येनेकप्राणिशरीरावयवा-

---

१ D. om. कुविअ; किदंतfor कअन्त B. २ जधासत्तीए C. जहासत्तीए D. जधासत्तीए अप्पजीविदं त्ति A. ३ A. om. one परित्ताअध. ४ विणिहदपरिअणा C. विणिहदविद्दाविदपरिअणा B. °विद्दाविअसेस° A. ५ अहिहवीअदि A. अभिभूअदि D. अभिहवीअदि C. ६ Com. om. गर्व. ७ विलासपर्यन्तोद्वेल्लदुच्छलद्दह° Com. ८ °कावल्लभिनडम्बरोड्डामर Com. ९ कवलित Com. १० निष्पादित Com.

मालo। लवङ्गिए अहो पमादो। (क)

माधo। [1]ससंभ्रममुत्थाय। बुद्धरक्षिते क्वासौ। १९५

मालo। [3]माधवं दृष्ट्वा सहर्षसाध्वसमात्मगतम्। अम्महे एसो वि इहत्थो ज्जेव्व। (ख)

(क) लवङ्गिके अहो प्रमादः।

(ख) अम्महे एषोपीहस्थ एव।

स्तेषां मध्ये कठोराणि यान्यस्थीनि तेषां खण्डे खण्डने यष्टंकारो ध्वनिभेदस्तेन कटकटायमानाः करपत्रवत्काठिना या दंष्ट्रास्ताभिः करालो भीषणो मुखकन्दर आस्यकुहरं यस्य सः। टंकारेण दुर्भेदत्वमुक्तम्। दुर्भेद्यप्रवृत्तौ दन्तानां कटकटाशब्दकरणं स्वभावः। विस्तीर्णत्वात्कन्दर इव कन्दरः। प्रचण्डवज्रप्रहारदारुणो यश्चपेटः पाणितलप्रहारस्तेन यदामोटनं चूर्णनं तेन कवलिता आस्वादिता येनेकनरास्तुरंगाश्च तेषां जाङ्गलं मांसं तस्योद्गारेण प्रपूरणेन भरितो यो गलगुहागर्भस्तत्र गम्भीरो घर्घरो दीर्घमधुरो य उरल्लिर्गलगर्जितं तेन यो गह्वपूरणशब्दस्तस्य संदर्भेण समूहेन प्रतिरवाभोगः प्रतिशब्दविस्तारस्तेन भीषितो भयं नीतो नष्टो विद्राणो निष्ठापितो निष्ठापर्यन्तं लम्भितोशेषजननिवहो येन सः। कठोरनखकर्पराक्रमणेन निर्दयं दारितं यज्जन्तुशरीरं ततः प्रवृत्तरक्तेन संजातरुधिरेण कर्दमीकृतो गतिपथो गमनवाटो येन सः। कर्पर इव कर्परः। निम्नत्वात्॥ उरल्लिर्गलगर्जितमिति रत्नकोशः॥

१९५—२०३ मदयन्तिकापरिरक्षणत्वरयाह क्वासाविति। अम्महे सभयहर्षे आश्चर्ये वा। एषोपीहस्थ एव। अत्रापिर्विस्मये। यस्यावस्था भगवत्योक्ता यन्निमित्ता वा ममेयमवस्था स एष इति भावः। स्वच्छन्दप्रियालोकनतुष्टस्य माधवस्योक्तिः। हन्तेत्यादि। अयं श्लोको गद्यादिः। हन्त हर्षे।

१ पo all Mss. २ B. om. ससं—य; क्वासौ क्वासौ C. D. ३ A. om. माधवं; B. om. वि. अत्थ for इहत्थो A.;

माध० । स्वगतम्[1] । हन्त पुण्यवानस्मि यदहमतर्कितोपनतदर्शनोल्लासितलोचनयानया[2]

अविरलमिव दाम्ना पौण्डरीकेण नद्धः ।
स्नपित इव च दुग्धस्रोतसा निर्भरेण[3] ।
कवलित इव कृत्स्नश्चक्षुषा स्फारितेन
प्रसभममृतमेघेनेव[4] सान्द्रेण सिक्तः ॥

अचिन्तितोपस्थिततदर्शनानन्दितलोचनयानया चक्षुषा पौण्डरीकेणेव दाम्ना स्रजाविरलं घनं यथा तथाहं नद्धो बद्धः । आवृत इति यावत् । कान्तालोकनेन सात्त्विकभावाविर्भावात्स्वीयस्तम्भं ज्ञात्वा नद्ध इत्युत्प्रेक्षितम् । अत्राविरलपदेन पौनःपुन्यं पुण्डरीकपदेन श्वेतभागविभावनं च ध्वनितम् । दुग्धस्रोतसा दुग्धाम्भःप्रवाहेण निर्भरेण निरतिशयेन संसक्तेन वा स्नपित इवाप्लुत इवाहम् । तथाविधावलोकनजातरोमाञ्चतया स्नपितत्वेनोत्प्रेक्षितम् । अत्र निर्भरपदेन परिचयपर्यवसानतोक्ता । एवं च द्वाभ्यां नेत्रनैर्मल्यमुक्तम् । कृत्स्नो निःशेषोऽहं स्फारितेन विस्तारितेन चक्षुषा कवलित इव पीत इव । स्फारितत्वेन कवलनयोग्यतोक्ता । कवलने बाह्यसंवेदनाभावात्प्रणय उत्प्रेक्षितः । सान्द्रेण निबिडेन सुधामयजलधरेण प्रसभं बलात्सिक्त इवाहम् । आनन्दातिशयशालितयामृतसिक्तत्वेनोत्प्रेक्षा । तदिह माधवस्य परमनिर्वृतिसौख्यमुक्तम् । तत्र च प्रथमपदेन तारकातरलता । द्वितीयेन गोलकचाञ्चल्यम् । तृतीयेन पुटविस्तारो विलासश्च । चतुर्थेन चैतन्यसंपत्तौ पुण्यवत्तोपपादनम् । तत्रापि मेघपदेन संतापशान्तिः । अमृतपदेन स्तम्भसंभावना । प्रसभपदेन तत्संगतिरेव विपत्प्रतीकार इति सूचितम् । सेचनपदेन तस्मिन्दरालोकनेसंपूर्णता । सान्द्रपदेन

---

१ B. om. स्वगतम्. २ दर्शनोल्लसितयानया B. ३ स्रोतसा B. निर्झरेण C. स्रोतसां निर्झरेण D. ४ वर्षेण A. D.

बुद्ध० । महाभाअ उज्जाणबाहिरत्थीमुहे । (क)

माधवः साटोपं परिक्रामति । २०९

काम० । वत्स अप्रमत्तो[2] भूत्वा विक्रमस्व ।

माल० । जनान्तिकम् । लवङ्गिए हद्धी हद्धी संसओ क्खु[3] जादो । (ख)

सर्वास्त्वरितं परिक्रामन्ति ।

माध० । अग्रे दृष्ट्वा सबीभत्सम् । अहह । २१०

संसक्तत्रुटितविवर्तितान्त्रजाल-[4]
व्याकीर्णस्फुरदपवृत्तरुण्डखण्डः[5] ।
कीलालव्यतिकरगुल्फदघ्नपङ्कः
प्राचण्ड्यं वहति नखायुधस्य मार्गः ॥

(क) महाभाग उद्यानबाह्यरथ्यामुखे ।

(ख) लवङ्गिके हा धिक् हा धिक् संशयः खलु जातः ।

तत्कालिकसकलक्लेशविलयः सूचितः । स्रोतसां निर्झरेणेति पाठे निर्झरेण प्रवाहेणेत्यर्थः ।

२०४–२१४ [बु० वा०]क्वासाविति प्रश्नस्योत्तरमिदम् । साटोपं सावेगम् । अप्रमत्तं सावधानम् । क्रियाविशेषणमिदम् । रुधिरादिकं वीक्ष्य सबीभत्सं सघृणम् । अहह विस्मये खेदे घृणायां च । संसक्तेत्यादि । नखायुधस्य व्याघ्रस्य मार्गः प्राचण्ड्यं रौद्रत्वं वहति । कीदृशः । संसक्तः संलग्नस्त्रुटितश्छिन्नो विवर्तितः खण्डखण्डीकृतोऽन्त्रजालमन्त्रसमूहस्तेन व्याकीर्णं व्याप्तं सद्यो हतत्वात्स्फुरत्किंचिच्चलदपवृत्तमधोमुखं रुण्डखण्डं कबन्धरूपं शकलं यत्र सः । उरुबुक्केति पाठ उरु महद्बुक्कमग्रमांसम् । कीला-

---

१ D. om. बाहि. २ अप्रमत्तं Com. ३ B. om. क्खु. ४ निर्वर्तित C. D. ५ तुंडखंडः B.

अहो प्रमादः ।

वयं बत विदूरतः क्रमगता[1] पशोः कन्यका

सर्वाः । हा मदअन्तिए । (क)

कामन्दकीमाधवौ । सहर्षाकूतम् ।

कथं तदभिपातितादधिगतायुधः पूरुषात् ।

कुतोपि मकरन्द एत्य सहसैव मध्ये स्थितः

इतराः । साहु[2] महाभाअ साहु । (ख)

कामन्दकीमाधवौ । सभयम् । दृढं च पशुना हतः

इतराः । अच्चाहिदं अच्चाहिदं । (ग)

कामन्दकीमाधवौ । सहर्षम् । प्रमथितश्च दंष्ट्रायुधः ॥

(क) हा मदयन्तिके ।

(ख) साधु महाभाग साधु ।

(ग) अत्याहितमत्याहितम् ।

लव्यतिकरेण रक्तसंघेन गुल्फदघ्नो गुल्फपरिमाणः पङ्कः कर्दमो यत्र । अत एव बीभत्सयोगित्वम् ॥ कवन्धे रुण्डमस्त्रियामित्यमरः । कीलालं रुधिरे तोय इति मेदिनीकारः ॥ प्रमाणे दघ्नच् ॥ पङ्कः पापे च कर्दम इति विश्वः ॥

२१६–२२४ वयमित्यादिना दंष्ट्रायुधपर्यन्तेन पृथ्वीच्छन्दसा श्लोकः स वाचनिकः । वयं तस्य व्याघ्रस्यातिदूरतः । पशोः क्रमगताक्रमणं प्राप्ता । कन्यका मदयन्तिका । कथं मकरन्दः कुतोपि स्थानादेत्यागत्य शीघ्रं मध्ये व्याघ्रमदयन्तिकयोः स्थितः । तेन व्याघ्रेणावपातितादृहीतात्पुरुषादृहीतखड्गः सन् । अत आकाङ्क्षितलाभः । अत एव सहर्षाकूतमित्युक्तम् ॥ पुरुषाः पूरुषा अपीत्यमरः ॥ पूरुषशब्दश्छन्दस्येव युज्यत इत्यदे-

---

१ °गता: पशोः कन्यकाः B. २ B. om. this साहु.

इतराः । सानन्दम् । दिट्ठिआ पडिहदं दुज्जादं । (क) [illegible]

काम० । साकूतम् । कथं व्यालनखरप्रहारनिःसृ[illegible] क्षितितलनिषिक्त[2]खड्गलतावष्टम्भनिश्चलैः[3] संभ्रान्तमदय[illegible] तस्ताम्यतीव वत्सो मे[5] मकरन्दः ।

इतराः । हद्धी हद्धी गाढप्पहारदाए [illegible] भौँओ[6] । (ख)

माध० । कथं प्रमुग्ध एव । कामन्दकीं प्रति [illegible] त्रायस्व ।

(क) दिष्ट्या प्रतिहतं दुर्जातम् ।

(ख) हा धिक् हा धिक् गाढप्रहारत[illegible]

ह्यम् । पूर्वपूरुषतपांसि जयन्तीत्यादिनैषध[illegible]गात् । मकरन्दः परशुना दृढं निहतो दृढ[illegible] वा । [illegible]दर्शनेन सभयम् । अत्याहितं महाभयम् ॥ अ[illegible] ॥ व्याघ्र-भयत्राणोपकारितया व्यवस्थितम[illegible] दंष्ट्रायुधो व्याघ्रः । प्रमथितो निहतः । अमु[illegible]

२२५–२३३ दुष्टसुपक[illegible] च व्याल इति शाश्वतः ॥ स [illegible]ड्गलतावष्टम्भेन निश्चलः । इह मकरन्दक[illegible]उक्तः । यदाह ।

---

१ रक्तप्रवाहः A. २ नि[illegible] ३ °ष्टंभनिषण्णः B. ४ °वलंबितं C. ५ B. [illegible] ६ महाणुभाओ B. ७ मां त्रायस्व B. ८ Com[illegible] नः संवृत्तम्. ९ Com. adds मकरन्दः.

काम० । [1]वत्स अतिकातरोसि तदेहि तावत्पश्यामः ।

इति परि[2]क्रम्य निष्क्रान्ताः सर्वे ।

[3]इति मालतीमाधवे शार्दूलविद्रावणो नाम तृतीयोऽङ्कः ।

रुजा प्रोक्ता प्रहारव्यथेति । अवष्टम्भनमवष्टम्भः । संभ्रान्ता विमुग्धा ।

...ो मोहं गतः । पश्याम इति दर्शनात्समाश्वास इति भावः ।

... प्रासूत यं रत्नधरोतिमान्योतिमान्यरूपा दमयन्तिकापि ।

...गद्वरं तत्कृतटिप्पणेऽङ्कोगमत्तृतीयो रसराजिरम्यः ॥

॥ इति तृतीयोऽङ्कः ॥

...n. वत्स; पश्याव: A. D. २ B. om. परिक्रम्य. ३ B. om.

॥ चतुर्थोऽङ्कः ॥

ततः प्रविशतो मदयन्तिकालवङ्गिकाभ्यामवलम्बितौ[1] प्रमुग्धौ माधवमकरन्दौ संभ्रान्ता कामन्दकी मालती बुद्धरक्षिता च ।

मद० । पसीद भअवदि परित्ताहि[2] परित्ताहि मदअन्तिआणिमित्त[3]संसइदजीविदं विवण्ण[4]जणाणुकम्पिणं महाभाअं । (क)

इतराः । हद्धी हद्धी किं दाणिं अह्मेहिं एत्थ[5] पेक्खिदव्वं (ख)

काम० । उभौ कमण्डलूदकेन सिक्त्वा[6] । ननु भवत्यः पटाञ्चलेन वत्सौ[7] वीजयन्तु । मालत्यादयस्तथा कुर्वन्ति ।

मक० । समाश्वस्यावलोक्य च । वयस्य कातरोऽसि[8] किमेतत् । ननु स्वस्थ एवास्मि ।

मद० । सहर्षम् । अम्महे पडिबुद्धं[9] दाणिं मअरन्दपुण्णचन्देण[10] । (ग)

माल० । माधवस्य ललाटे हस्तं दत्वा । सहि[11] लवङ्गिए दिट्ठिआ

(क) प्रसीद भगव[illegible]रित्रायस्व परित्रायस्व[12] मदयन्तिकानिमित्तसंशयितजीवितं विपन्न[13][illegible]नुकम्पिनं महाभागम् ।

(ख) हा धिक् हा [illegible] किमिदानीमस्माभिरिह प्रेक्षितव्यम् ।

(ग) अम्महे प्रतिबुद्धमिदानीं मकरन्दपूर्णचन्द्रेण ।

२–१० संभ्रान्ता व्याकुला । अनापन्नमापन्नतम् । अम्महे हर्षे आश्चर्ये वा ।

---

१ अन्विती B.; B. om. प्रमुग्धौ. २ B. om. one परित्ताहि. ३ णिमित्तं C. D. ४ आवण्ण A. ५ B. D. om. एत्थ. ६ अभिषिच्य B. ७ C. om. वत्सौ. ८ कातरोऽस्मि B. ९ पडिवण्णं C. १० °पुण्णिमाचन्देण A. ११ D. om. सहि लवङ्गिए. १२ Com. follows B. १३ आपन्न Com.

षड्डुसि । णं भणामि पडिबुद्धो ज्जेव्व दे पिअवअस्सो पडिवण्णचे-[1] अणो महाभाओ मअरन्दो त्ति[2] । (क)

माध० । आश्वस्य । वयस्य साहसिक[3] एह्येहि । इत्यालिङ्गति[4] ।

काम० । उभौ शिरस्याघ्राय । दिष्ट्या जीवितवत्सास्मि ।

इतराः । पिअं पिअं णो संवुत्तं । (ख) सर्वा हर्षं नाटयन्ति ।

बुद्ध० । जनान्तिकम् । हला[5] मदअन्तिए एसो ज्जेव्व सो । (ग)

मद० । जाणिदं[6] ज्जेव्व मए जहा एस माहवो अअं पि सो जणो त्ति (घ)

बुद्ध० अवि[7] सच्चवादिणी अहं । (ङ)

मद० । ण क्खु[8] अण्णारिसेसु तुम्हारिसीओ पक्खवादिणीओ[9]

(क) सखि लवङ्गिके[10] दिष्ट्या वर्धसे । ननु भणामि प्रतिबुद्ध एव ते प्रियवयस्यः प्रतिपन्नचेतनो महाभागो मकरन्द इति ।

(ख) प्रियं प्रियं नः संवृत्तम् ।

(ग) सखि मदयन्तिके एष एव सः ।

(घ) ज्ञातं मया यथैष[11] माधवोऽयमपि स[...] इति ।

(ङ) अपि सत्यवादिन्यहम् ।

१२–२२ वर्धस इत्यनेन वर्धापनं याच[...]क्तिप्रकारः । शिरस्याघ्राणमायुर्वर्धनायेति वृद्धाः । हलेति सखीसंबोधनम् । मकरन्दनामाग्रहणेन

१ वेअणो B. C. २ महाभाअमअर° B.; C. om. मअरंदो त्ति. ३ साहसिक B. ४ आलिंगनः B. ५ सहि A. ६ A. adds तदेव and C. तथैव before जाणिदं; A. om. ज्जेव्व. B. has ज्जेव्व मए अअं माहवो एस सिओ जणो त्ति; एस महाभाओ माह° D. एसो A. ७ अइ B. C. D.; °वाइणी B. ८ हु B. C.; अम्हारिसेसु. D. ९ °वाइणीओ B. १० Com. follows D. ११ Com. follows. D.

होन्ति। माधवमवलोक्य। सहि मालदीए वि रमणिज्जो[1] इमस्सिं महाणुहावे[2] अणुराअप्पवादो। (क)

पुनर्मकरन्दमेव सस्पृहमवलोकयति।

काम०। स्वगतम्। रमणीयोर्जितं हि मदयन्तिकामकरन्दयोर्दैवादद्य[3] दर्शनम्। प्रकाशम्। वत्स मकरन्द कथं पुनरायुष्मानस्मिन्नवसरे मदयन्तिकाजीवितत्राणहेतुर्भगवता[4] दैवेन संनिधापितः।

मक०। अद्याहमन्तर्नगर एव कांचिद्वार्त्तामुपश्रुत्य माधवस्य चित्तोद्वेगमाधिकमाशङ्क्[5]मानस्त्वरितमवलोकितानिवेदितकुसुमाकरोद्यानवृत्तान्तः परापतन्नेव शार्दूलावस्कन्दगोचरगतामेताम[6]भिजातकन्यकामभ्युपपन्नवानस्मि। मालतीमाधवौ विमृशतः।

(क) न खल्वन्यादृशेषु युष्मादृश्यः पक्षपातिन्यो भवन्ति। सखि मालत्या अपि रमणीयोऽस्मिन्महानुभावेऽनुरागप्रवादः।

स्वामित्वमभिप्रैति। संभावनायामपिशब्दः। न हि पक्षपातिन्यस्त्वादृश्यो मन्दं भद्रं वदन्तीति भावः।

२९–३१ अक्लेशोपनतत्वेन रमणीयम्। शार्दूलनाशेनोपकारपूर्वकमुत्पन्नत्वादूर्जितं सातिशयम्।

आयुष्मानिति वृद्धेन वाच्यो बालः शुभाशयः॥

इति भरतः। उद्यानवृत्तान्तो मालतीप्रत्यक्षमुत्तरोपक्रमः। परापतन्नागच्छन्। अवस्कन्दोऽतिक्रमः। गोचरमित्यजहल्लिङ्गतयान्वयः। अभिजाता कुलीना। तथा चाभिजात्येन मदुपकारं ज्ञास्यतीति भावः। आभिजात्येन ज्ञानं च तथाविधाकारादिना॥ कन्यकेत्यत्रानुकम्पायां कन्॥ अभ्युपपत्तिः प्राप्तिः। विमृशतः। परस्परक्लेशकारिण्या शङ्कयेति भावः।

१ रमणीओ B.; D. adds एव्व after रमणिज्जो. २ °भावे C. महाभाए B.; पवादो B. ३ D. om. अद्य. ४ प्राणत्राण B.; हेतो: A. D. ५ B. om. अधिक. ६ गोचरतामेता° B. D. ७ Com. follows D.

काम० । स्वगतम् । वृत्तेन खलु मालतीप्रदानेन भवितव्यम् । प्रकाशम् । वत्स माधव दिष्ट्या सुहृद्वृद्ध्या वर्धितोसि मालत्या[१] तदयमवसरः प्रीतिदाये[२]स्य ।

माध० । भग[३]वति इयं हि

य[४]द्व्यालव्रणितसुहृत्प्रमो[५]हमुग्धं
सौजन्याद्विहितवती गतव्यथं माम् ।
तत्कामं प्र[६]भवति पूर्णपात्रवृत्त्या
स्वीकर्तुं मम हृदयं च जीवितं च ॥

लव० । पडिच्छिं[७]दो क्खु णो पिअसहीए अअं पसादो । (क)

(क) प्रतीष्टः खलु नः प्रियसख्या अयं प्रसादः ।

३४–३९ प्रीतिदायस्य वर्धापकदानस्य । यदित्यादि । व्याघ्रखण्डितसुहृत्प्रमोहेन संतप्तं मां सौजन्येन विगतक्लेशां कृतवती ततोऽयं मम हृदयं जीवितं च पूर्णपात्रवृत्त्या वर्धापकेन स्वीकर्तुमियं प्रभवति । त्वं च प्रभवसीत्यर्थः । तदायत्ते मे हृदयजीविते इति भावः । यद्वा । चौरिकाविवाहसंपादनेन हृदयहारिता नोचेज्जीवितहारितेत्यर्थः ॥ वर्धापकं यदानन्दादलंकारादिकं पुनः । आकृष्य गृह्यते पूर्णपात्रं पूर्णानकं च तत् ॥ इति हारावली । पूर्णपात्रं वर्धापकेऽपि चेति मेदिनीकारोऽपि ॥

४१–४९ गुरुकरमणीयं श्रोत्रसुखदम् । मकरन्देन कांचिद्वार्तामुपश्रुत्येति यदुक्तमेतच्छङ्कमानः पृच्छति । वयस्येति । ज्यायाञ्ज्येष्ठः ।

---

१ मालत्याः A.; यद् for तद् D. २ °दानस्य C. ३ माध° । ऐहोहि B. ४ व्याघ्र for व्याल D. ५ प्रमोद for प्रमोह C. ६ भगवति for प्रभवति B. ७ पडिच्छिदो B.; णं or णो B.

मद०। स्वगतम्[1]। जाणादि महाभाअधेओ[2] जणो अवसरे गुरुअरमणिज्जं[3] मन्तिदुं। (क)

माल०। स्वगतम्। किं णाम मअरन्देण उव्वेअकारणं[4] सुदं भविस्सदि। (ख)

माध०। वयस्य का पुनर्ममाधिकोद्वेगहेतुर्वार्त्ता[5]।

प्रविश्य पुरुषः। वत्से मदयन्तिके भ्राता ते ज्यायानमात्यनन्दनः[6] समादिशति। अद्य परमेश्वरेणास्मद्भवनमागत्य[7] भूरिवसोरुपरि[8] इदं विश्वासमस्मासु च प्रसादमाविष्कुर्वता[9] स्वयमेव प्रतिपादिता मालती तदेहि संभावयामः[10] प्रमोदमिति।

मक०। वयस्य सेयं वार्त्ता। मालतीमाधवौ वैवर्ण्यं[11] नाटयतः।

मद०। मालतीं सहर्षमालिङ्ग्य। सहि मालदि तुमं क्खु एक्केण[12]-

(क) जानाति महाभागधेयो जनोऽवसरे[13] गुरुकरमणीयं मन्त्रयितुम्।

(ख) किं नाम मकरन्देनोद्वेगकारणं श्रुतं भविष्यति।

परमेश्वरो राजा। विश्वासमभेदम्। संभावयामः कारयामः। उत्सवपूर्वको हर्षः प्रमोदः।

५३–५७ मद्भ्रातृवधूर्भविष्यसीति भावः। नोशब्दोऽस्माकमित्यर्थे निषेधे च तुल्यरूप इति निषेधोऽप्यत्र स्फुरति। अत एव सोत्कण्ठमाह। भ्रातुरित्यादि। उभयत्रोत्तरमाह। [युष्माकमिति]। भरिआ इति पाठे भृताः पूर्णा इत्यर्थः। [ल० वा०] अयमभिसंधिः। यूयं राज्ञः प्रणयिनो वयं सेवकाः। अतो युष्मत्संबन्धेन वयं पूर्णमनोरथा इति वचनमात्रम्। वस्तु-

१ B. om. स्वगतम. २ °हेअजणो D.; A. C. D. om. गुरुअ. ३ °णि-ज्जं B. C. D. ४ °आरणं A. C. ५ अधिकोद्वेगवार्त्ता B. ६ B. om. ज्यायान्. ७ भुवनं C.; एत्य for आगत्य D. ८ D. om. पर. ९ परं प्रसादं B. १० °यामः C. ११ वैच्वित्यं A. १२ एक B. १३ Com. om. अवसर.

अरणि[1]वासेण सहपंसुकीलणादो पहुदि[2] मे पिअसही आसी बहिणिआ अ संपदं उण घ[3]रस्स मण्डणं जादासि (क)

काम०। वत्से मदयन्तिके दिष्ट्या वर्धसे भ्रातुर्मालतीलाभेन।

मद०। [4]तुह्माणं आसिसां पहावेण। सहि लवङ्गिए [5]फलिदा णो मणोरहा तुह्माणं लाहेण (ख)

लव०। साहि [6]किं अह्माणं पि अत्थि मन्तिदव्वं। (ग)

मद०। स[7]हि बुद्धरक्खिदे दाणिं विवाहमहूसवं संभावेह्म। (घ)

(क) सखि मालति त्वं खल्वेकनगरनिवासेन सहपांशुक्रीडनात्प्रभृति मे प्रियसख्यासीर्भगिनिका च सांप्रतं पुनर्गृहस्य मण्डनं जातासि।

(ख) [8]युष्माकमाशीःप्रभावेण। सखि लवङ्गिके फलिता नो मनोरथा युष्माकं लाभेन।

(ग) सखि किमस्माकमप्यस्ति[10] मन्त्रयितव्यम्।

(घ) सखि बुद्धरक्षिते इदानीं वि[11]वाहमहोत्सवं संभावयावः।

तस्तु त्वत्संबन्ध एवास्माकं न भवितेति। माधवविवाहस्यावश्यकत्वात्। यद्वा। यदेतत्त्वया मन्त्रितमस्माकं मनोरथाः पूर्णा युष्माकं लाभेनेति वयमेव तद्वदामः। तेन त्वं मकरन्देन परिणेतव्येति मनोरथा अस्माकमेव पूर्णा भविष्यन्तीति गूढमुक्तम्। व्यक्तं तु युष्माकं राजमित्राणां लाभेन राजसेवका वयमेव पूर्णमनोरथा इति भावः। यद्वा। एतत्कामन्दक्याख्यं मन्त्रिरूपं द्रव्यमस्माकमप्यत्र विषये वर्तते तेन प्रतिहतमेतत्।

---

१ वासेण B.; सुह for सह B. २ B. om. पहुदि मे.; आसि A. ३ A. D. add णो after उण. ४ A. has भअवदि before तुह्माणं; आसिसी पसादेण B. ५ D. adds भाविणो before फलिदा; Com. notices भरिआ for फलिदा. ६ D. om. किं, किंचि C.; C. om. पि. ७ A. C. om. सहि and have सहि for it, D. has both.; B. adds मंगल before महूसवं. ८ युष्मा Com. ९ Com. follows A.; आशीःप्रसादेन Com. १० एतत् for अस्ति Com. ११ Com. om. विवाह.

बुद्ध० । सहि एहि[1] गच्छह्म । (क) इत्युत्तिष्ठतः ।

लव० । जनान्तिकम्[2] । भअवादि जहा एदे हिअअभरिदुव्वित्त[3]विह्मआणन्दसुन्दरं[4] अन्दोलाअन्तधीरत्तणमणोहरा[5] पल्हत्थन्ति मदअन्तिआमअरन्दाणं [6]दलिदकन्दोट्ठदामसरिच्छा कडक्खविक्खेवा तँहा[7] तक्केमि मणोरहणिव्वुत्तसंबन्धा एदे त्ति । (ख)

काम० । विहस्य । नन्विमौ विलोकनेन मानसं मुहुर्मुहुर्मोहन[8]मनुभवतः ।

(क) सखि एहि गच्छावः ।

(ख) भगवति यथैते हृदयभरितोद्वृत्तविस्मयानन्दसुन्दरमान्दोलायमा[10]नधीरत्वमनोहराः पर्यस्यन्ति[11] मदयन्तिकामकरन्दयोर्दलितनीलोत्पलदामसदृक्षाः कटाक्षविक्षेपा[12]स्तथा तर्कयामि मनोरथनिर्वृत्तसंबन्धावेताविति ।

६०–६२ अत्र भरमितो भरितः ॥ शकन्ध्वादित्वात्पररूपम् ॥ यद्वा । भरणं भरः संजातोस्य ॥ तारकादित्वादितच् । व्यवस्थितविभाषया वेट्प्राप्तेः ॥ अत एव वासवदत्तादौ भारितेति प्रयोगः । हृदये भरितौ पूर्णावुद्वृत्तावमान्तौ विस्मयानन्दौ ताभ्यां सुन्दराः । व्याघ्रनिपाताद्धृदयनिहितो विस्मयः । इष्टदर्शनादानन्दः । आन्दोलितं परित्यक्तं यद्धीरत्वं तेन मनोहराः । दलितं विकासितम् । कन्दोट्ठं नीलोत्पलम् । सदृक्षास्तुल्याः । कान्ता दृष्टिरियम् ।

६४–७१ मोहनं सुरतम् । अत एव कामशास्त्रम् ।

---

१ A. C. om. एहि. २ B. om.; जधा for जहा A. ३ उव्वंत B. उव्वरत्त C. ४ सुन्दरा आन्दोलिद A. दोलाभंत C. सुंदरा आंदोलाभंत D. ५ °त्तणासणोरहा B. °त्तणगेरंतमणोरहा C. ६ A. adds दर before दलिद; णिलुप्पल for कंदोट्ठ A. B.; B. adds सुंदर before णिलुप्पल; दिट्ठि for कडक्ख B. ७ तहं A. D. ८ णिव्वत्त C. ९ प्रमोदं for मोहनं A. C. १० Com. follows A. ११ परिवर्तन्ते. १२ Com. inserts आकेकराः before तथा; Com. has दृष्टि for कटाक्ष.

तथा हि । ईषत्तिर्यग्वलनं[1] विषमं कूणित[2]प्रान्तमेत-
त्प्रेमोद्भेदस्तिमितलुलितं किंचिदाकुञ्चि[3]तभ्रु ।

मोहनं नारभेत्तावद्यावन्नोत्कण्ठिता प्रिया ॥ इति ।
ईषदित्यादि । एतदनयोर्दृष्टं दर्शनं व्यक्तं शंसति यदेतौ मानसं मोहन-
मनुभवत इत्यन्वयः । दृष्टं कीदृशम् । ईषन्मनाक्तिर्यग्वलितेन विषमं
मन्दम् । अनेन संकल्पसंगतानङ्गस्य पराभ्यूहशङ्कितेयं दृगित्युक्तम् ।
यदाह । शङ्कायां शङ्किता ज्ञेयेति । कुञ्चितप्रान्तमाकुञ्चितापाङ्गम् ।
मदयन्तिकाया जडत्वान्मकरन्दस्यान्यदर्शनसासूयत्वाज्जिह्मा दृष्टिः ।
यदाह ।

जिह्मा दृष्टिरसूयायां जडतालस्ययोस्तथा ॥ इति ।

दृष्टिद्वयेन सुरतप्रागवस्थोक्ता । प्रेम्ण उद्भेदादतिपरिपाकात्स्तिमितं स्थिरं
लुलितमर्धमुकुलितं च । अर्धमुकुलितेयं दृक् । यदाह ।

अङ्गादिष्वर्धमुकुला गन्धस्पर्शसुखादिषु ।
अर्धव्याकोषपक्ष्माग्रग्रस्तार्धमुकुलैः पुटैः ॥
स्मृतार्धमुकुला दृष्टिः किंचिन्मीलिततारका ॥

अनेन रताभोग उक्तः । नखदशनक्षतादिशङ्कया मानं सूचयति । किं-
चिदाकुञ्चिते अनमिते भ्रुवौ यत्र तत् । एकस्या एव भ्रुव उत्क्षेपणं
कुञ्चनमिह । यदाह ।

एकस्या एव उत्क्षेपो भ्रुवः कुञ्चनमुच्यते ॥

कोपे चास्य प्रयोगः । यदाह ।

कोपे वितर्के हेलायां लीलादौ सहजे तथा ।
दर्शने ग्रहणे चैव भ्रुवमेकां समुत्क्षिपेत् ॥

मानस्याल्पत्वसूचनार्थमाङ्प्रयोगः । रतावसानमाह । हृदये हर्षानुभवेन

१ भ्रलितविषमं A. D. २ कुञ्चितप्रान्त A. B. ३ किंचिदावेल्लितभ्रु A.

अन्तर्मोदानुभवमसृणं[1] स्तम्भनिष्कम्पपक्ष्म
व्यक्तं शंसत्यचिरमनयोर्दृष्टमाकेकराक्षम् ॥

पुरुषः । वत्से[2] इत इतः ।

मद० । सहि बुद्धरक्खिदे अवि[3] पुणो वि दीसइ एस जीविदप्प[4]-दाई पुण्डरीअलोअणो । (क)

बुद्ध० । जइ देव्वमणुऊ[5]लं भविस्सदि त्ति । (ख) पुरुषेण सह[6] निष्क्रान्ते ।

माध० । अपवार्य ।

(क) सखि बुद्धरक्षिते अपि[7] पुनरपि द्रक्ष्यत एव जीवितप्रदायी पुण्डरीकलोचनः ।

(ख) यदि दैवमनुकूलं भविष्यति ।

मसृणं स्निग्धं मन्दं वा । रतान्ते लज्जामाह । स्तम्भं लज्जान्विततया परितोषपुष्टत्वात् । कथं पुनः संभोगो भावीति चिन्तया निष्कम्पम् । शून्यतया निष्कम्पं वा । तादृशं पक्ष्म यत्र । तद्विच्छेदमाह । आकेकरमक्षि यत्र तत् । आकेकरा त्वरालोके विच्छेदे प्रोषितेषु चेत्याद्युक्तम् । तदिहाकेकरलक्षण आकुञ्चितेत्यादि प्रथमपदेनोक्तम् । द्वितीयेन मुहुर्व्यावृत्ततारेत्युक्तम् । तृतीयेन हर्षितार्धेत्याद्युक्तम् । अपिनाम संभावनायाम् । अव्ययसमुदायत्वात् ।

७६–७९ करुणावस्थामाह । चिरादित्यादि । चिरशङ्कित आशातन्तुर्मालतीप्राप्त्याशारूपहृदयावलम्बनं संप्रति भिद्यताम् । बिसिनीसूत्रवद्विदुरो भेदनस्वभावो यतः ॥ भिदेः कर्मकर्तरीति कुरच् ॥ संभूय त्रुटितत्वेन मृणालतन्तुसाम्यम् । नैराश्यान्मरणमाह । आधिर्मनोव्यथा तद्रूपो व्याधिरनवच्छिन्नोऽत एव महान्व्याप्नोतु । इह महत्वानिरवधित्वाभ्यां मरणमाह । आशाच्छेदानन्तरं च मरणमुचितमेव । यदाह ।

---

१ मसृणस्तम्भ C. २ A. om. वत्से. ३ A. D. add णाम after अवि; A. C. D. add दाव after वि. ४ प्पदो A. C. D. ५ °कूलं A. C. ६ A. C. D. om. सह. ७ Com. follows A. D.

चिरादाशातन्तुस्त्रुटतु बिसिनीसूत्रभिदुरो
महानाधिर्व्याधि[1]र्निरवधिरिदानीं प्रसरतु ।
प्रतिष्ठामव्याजं व्रजतु मयि पारिप्लवधुरा
विधिः स्वास्थ्यं धत्तां भवतु कृतकृत्यश्च मदनः ॥

८० अथ वा । समानप्रेमाणं जनमसुलभं प्रार्थितवतो
विधौ वामारम्भे मम समुचितैषा परिणतिः ।
तथाप्यस्मिन्दानश्रवणसमयेऽस्याः प्रविगल-
त्प्रभं प्रातश्चन्द्रद्युति वदनमन्तर्दहति माम् ॥

सर्वैः कृतैः प्रतीकारैर्यदा नास्ति समागमः ।
कामाग्निना समाप्तस्य जायते मरणं ततः ॥

स्त्रीहेतुमरणादधीरत्वमाशङ्क्यानुशोचरमाह । पारिप्लवधुरा चपलकला मालती सत्यं स्थितिं मयि बध्नातु । अभीष्टलाभेन विधिर्निराकुलो भवतु । मरणादधिकं किं कर्तव्यमस्येत्यर्थः । एतदुपालम्भगर्भं वच उद्वेगात् । यदाह ।

हृद्दाहचिन्तानिःश्वासग्लानिखेदप्रजागरैः ।
रोदनैर्मन्दभणितैर्दैवोपालम्भनेन च ॥ इति ।

८०–८३. समानेत्यादि । वामारम्भे प्रतिकूले विधौ ममैषा परिणतिः पूर्वोक्ता युक्तैव । कीदृशस्य । तुल्यप्रीतिं दुष्प्रापं जनं याचितवतः । वामे हि विधौ सुलभमपि न लभ्यते किं पुनरसुलभमिति भावः । दृष्टकारणस्यानुपलम्भाद्विधेर्वामत्वम् । असुलभत्वं परतन्त्रत्वात् । यद्यपि युक्तेऽर्थे खेदो नास्ति तथाप्यस्या मालत्यास्तादृशं मुखं मामन्तर्दहति । अस्मिन्दानश्रवणसमये एतन्मुखं वीक्ष्य मनस्तापो मे भवतीति भावः । अत एव नन्दनाय मालती दातव्येति श्रुत्वा खेदात्कान्तिशून्यत्वम् । अत एव प्रातश्चन्द्रकान्ति कापि विगतकान्ति भवति । अथ च प्रातश्चन्द्रोपमया रागध्वनेर्विधिं प्रति मालतीकोपोऽपि सूचितः ।

---

१ आधिर्व्याधिः B. C.

काम० । स्वगतम् । एवमतिदुर्मनायमानः पीडयति मां वत्सो माधवो वत्सा मालती च दुष्करं निराशा प्राणिति । प्रकाशम् । पृच्छामि तावदायुष्मन्तम् । अपि भवानमंस्त यथा भूरिवसुरेव[1] मालतीमस्मभ्यं दास्यति ।

माध० । सलज्जम् । न हि न हि ।

काम० । न[2] तर्हि प्रागवस्थायाः परिहीयसे ।

मक० । [3]भगवति अदत्तपूर्वेत्याशङ्क्यते ।

काम० । जानामि[4] तां खलु वार्त्ताम् । इदं तु प्रसिद्धमेव यथा नन्दनाय मालतीं प्रार्थयमानं भूरिवसुर्नृपतिमुक्तवान्[5]प्रभवति[6] निजस्य कन्यकाजनस्य महाराज इति ।

मक० । अस्त्येतत् ।

काम० । अद्य च[7] स्वयं राज्ञैव दत्ता मालतीति पुरुषेणावेदितम् । तद्वत्स वाक्प्रतिष्ठा[8]निबन्धनानि देहिनां व्यवहारतन्त्राणि वाचि पुण्यापुण्यहेतवो व्यवस्थिताः सर्वं च वचनानामायत्तम् । सा च भूरिवसोर्वागनृता[9]स्मिन्नेव न खलु महाराजस्य मालती निजा[10] कन्यका कन्यादाने[11] च नृपतयः प्रमाणमिति नैवंविधो धर्माचारसमय-

---

८५–९९ दुष्करं यथा तथा प्राणिति जीवति । अमंस्त मन्यते स्म । प्रागवस्था मालतीप्राप्तिलक्षणा । तदा तस्याज्ञानमिति भावः दत्तपूर्वा पूर्वं दत्ता ॥ सुप्सुपेति समासः ॥ इदं च तापहेतुः । वागिति वाचि

---

१ B. om. एव; अस्मभ्यं न दास्यति C.; दास्यतीति B. २ A. om. न. ३ B. om. भगवति; दत्तपूर्व° A. C. D.; आशंकते B. ४ जानासि A. D. जानासि न तां खलु C. ५ नृपतिमेवमुक्तवान् C. ६ यथा प्रभवति निजकन्यकाजनस्य B. C. ७ C. om. च; अद्यैव A. ८ हृदि प्रतिष्ठा A. ९ अनृतैव B. १० निजकन्यका C. ११ प्रदाने A.; कन्यकादाने B.

स्तस्मा[1]दविमर्शितव्यमेतत् । कथं च वत्स मामनवधानां मन्यसे । पश्य ।

मा वा सपत्नेष्वपि नाम तद्भू-
त्पापं यदस्यां त्वयि वा विशङ्क्यम् ।
तत्सर्वथा संगमनाय यत्नः
प्राणव्ययेनापि मया विधेयः ॥

मक० । सुष्ठु युज्यमानमादिश्यते युष्मा[2]भिः ।

अपि च । दया वा स्नेहो वा भगवति निजेऽस्मिञ्शिशुजने
भवत्याः संसाराद्विरतमपि चि[3]त्तं द्रवयति ।

सर्वं प्रतिष्ठितमिति भावः । अनृताभिकासत्या । धर्माचारसमयो धा-र्मिकासिद्धान्तः ॥ समयाः शपथाचारकालसिद्धान्तसंविद इति विश्वः ॥

१०१–१०४ निजावधानमाह । मा वेति । अस्यां मालत्यां त्वयि च यत्पापं विवाहानिर्वाहे मरणरूपं शङ्कनीयं विप्रयोगजन्यदुःखादि वा तच्छत्रुष्वपि नाम प्राकाश्ये मा वा भून्मैव भविष्यति । वाशब्द एवार्थे । स्वकर्तव्यमाह । तदिति । तस्माद्युवयोः संबन्धाय सर्वप्रकारेण जीवत्यागेनापि मया प्रयत्नः कार्यः । यदि बुद्धिकौशलेन न सिद्धिस्तदा प्राणव्ययेनापि साध्यमित्यपेः स्वरसः । मरणादेरमङ्गलतया पापपदेनोपन्यासः । शत्रुष्वपि मा भूदिति लोकोक्तिच्छायालंकारः ।

१०६–११० दयेत्यादि । हे भगवति अस्मिञ्शिशुजने बालजने माधवे मालत्यां च दया करुणा स्नेहो ममता च संसाराद्विरक्तमपि भगवत्याश्चित्तं द्रवयत्यार्द्रीकरोति । भवत्या इति दयावान्वयि चित्तान्वयि च । काकाक्षिगोलकवत् । वाशब्दौ चार्थे । अत एव चित्तद्रवणात् । प्रतग्रहणपूर्वकसर्वैषणानिवृत्तिः प्रव्रज्या । तस्यां सुलभोपद्रवभावी समयाचारो-

---

१ तस्माद्विमर्शितव्यमेतत् A.; °दमर्शि° C.; तद्विमर्शितव्यं D. २ भवतीभिः B.
३ चेतो B.

अतश्च प्रव्रज्यासुलभसमयाचारविमुखः
प्रसक्तस्ते यत्नः प्रभवति पुनर्दैवमपरम् ॥

नेपथ्ये । भअवदि कामन्दइ एसा भट्टिणी विण्णवेदि जधा मालदिं[2] घेऊण तुरिदं आअच्छदु त्ति । (क)

काम० । वत्से उत्तिष्ठ[3] । सर्वे उत्तिष्ठन्ति ।

मालतीमाधवौ सकरुणानुरागमन्योन्यमवलोकयतः[4] ।

माध० । स्वगतम् । कष्टमेतावती लोकयात्रा मालत्या सह माधवस्य । अहो नु खलु भोः ।

(क) भगवति कामन्दकि एषा भट्टिनी विज्ञापयति यथा मालतीं गृहीत्वा त्वरितमागच्छत्विति ।

नुष्ठानविशेषो ध्यानादिविषयस्तत्र विमुखो निरुद्धो यत्नस्ते प्रसक्तोविच्छिन्नः सन्प्रभवति । च एवार्थे । कार्यासिद्धिरदृष्टविलम्बात् । तत्र न भवत्या दोष इत्याह । अपरं पुनर्दैवं प्रभवति । ईश्वरस्त्रीषु राज्ञीपदोपचारेण भट्टिनीत्युक्तम् । भरतोप्याह ।

राजस्त्रियस्तु संभाष्याः सर्वाः परिजनेन तु ।
भट्टिनी स्वामिनीत्येवं नाट्ये प्राहुर्विचक्षणाः ।

११४–११७ लोकयात्रा दर्शनादिकम् । अहो नु खलु भो इत्यव्ययसमुदायो निर्वेदे सुहृदित्यादि । एकत्रैव रसो रतिर्यस्यास्ताम् । यद्वा । एक एव रसः शृङ्गारो यस्यां ताम् । निरन्तरां वानुकूलतामानुकूल्यं प्रथमं प्रकाश्य सुखप्रदो विधिः पुनर्मनसो रुजं पीडां प्रविश्लिष्टयविशायितां करोति । कीदृशः । अकाण्डादकस्माद्विवर्तनेनान्यथाभावेन विरुद्ध-

१ प्रव्रज्यासमयसुलभाचार A. C. २ ०दीं A. D. ०दी B. C. घेत्तूण B. ०आगच्छत्ति D. ३ वच्छे उट्ठेहि B.; B. om. सर्वे-न्ति. ४ ०आलोकयतः B.

सुहृदिव प्रकटय्य[1] सुखप्रदः प्रथममेकरसामनुकूलताम् ।
पुनरकाण्डविवर्त्तनदारुणो प्रविशिनष्टि[2] विधिर्मनसो रुजम् ॥

माल० । स्वगतम् । महाभाअ लोअणाणन्द[3] एत्तिअं दिट्ठोसि । (क)

लव० । हद्धी हद्धी सरीरसंसअं दजेव्व णो पिअसही आरोविदा[4] अमच्चेण । (ख)

माल० । स्वगतम्[5] । परिणदं मे दाणिं जीविदतिह्णाए फलं । णिव्वुदं[6] णिक्करुणदाए तादस्स वि कावालिअत्तणं । पडिट्ठिदो[7] दुट्ठदेवस्स दारुणसमारम्भसरिसो परिणामो । कं एत्थ[8] उवालहामि मन्दभाइणी कं वा असरणा[9] सरणं पडिवज्जामि । (ग)

(क) महाभाग लोचनानन्द[10] एतावद्दृष्टोसि ।

(ख) हा धिक् हा धिक् शरीरसंशयमेव नःप्रियसख्यारोपितामात्येन ।

(ग) परिणतमिदानीं मे जीविततृष्णायाः फलम् । निर्व्यूढं च निष्करुणतया तातस्यापि[11] कापालिकत्वम् । प्रतिष्ठितो दुष्टदैवस्य दारुणसमारम्भसदृशः परिणामः । कमिहोपालभे मन्दभागिनी कं वाशरणा शरणं प्रतिपद्ये ।

वर्तनेन वा दारुणो दुःखदायी । सुहृदिव । यथा मित्रमानुकूल्यमुपाच सुखप्रदं सदकाण्ड एव विरुद्धाचरणान्मनःपीडां करोति तथेत्यर्थः ।

११८–१२२ [माल० वा०] पुनर्दर्शनं न भविष्यतीति भावः । अत एवै-तावादित्यनेन करुणा । नयनानन्देत्यनेनानुरागः । अत्र पुरा विरहदशायां

---

१ प्रकटोप्यसुखप्रदः A. २ विभिरहो विशिनष्टि मनोरुजं A. C. D. ३ लोअणाणं-दअ B. ४ आरोइदा ५ A. om. स्वगतम्; A. om. मे; A. inserts तावं after फलं. ६ च D. ७ परिसीलिदो B. परिलेविदो C. ८ B. D. om. एत्थ. ९ B. om. असरणा. १० °नन्दक एतावदेव Com. ११ Com. om. अपि and has तातस्य after °कत्वं.

लव० । सहि इदो इदो । (क) इति कामन्दक्या सह निष्क्रान्ते[1] ।

माध० । स्वमतम् । नूनमाश्वासनमात्रमेतन्[2]माधवस्य सहज-स्नेहकातरा[3] करोति भगवती । सोद्वेगम् । हन्त संशयितजन्म-साफल्यः[5] संवृत्तोस्मि । तत्किमिदानीं कर्त्तव्यम् । विचिन्त्य । न खलु महामांसविक्रयादन्यमुपायं[6] पश्यामि । प्रकाशम् । वयस्य मकरन्द अपि भवानुत्कण्ठते मदयन्तिकायाः ।

मक० । अथ किम् ।

तन्मे मनः क्षिपति यत्सरसप्रहार-[7]
मालोक्य मामगणितस्खलदुत्तरीया ।

(क) सखि इत इतः ।

माधवप्रतिच्छन्दकादिदर्शनाद्धारितस्य जीवितस्य पर्यवसानं वृत्तमिति परिणतपदस्यार्थः । कापालिकत्वं नृशंसता । अघोरघण्टस्य सूचनमप्येतत् ।

१२७–१३० जन्मसाफल्यं मालतीप्राप्त्या । महामांसेति भाव्य-ङ्कसूचनम् । वीरहस्तान्मांसं गृहीत्वा वीरायाभिमतवरदानमिति श्मशान-सिद्धयोगिनीमतम् । यद्वा । उभयथा मरणमुपस्थितम् । महामांसविक्रये मालतीलाभोपि शङ्कित इति तत्करणम् । मांसविक्रयस्य मकरन्दसंनि-धावशक्यत्वान्मकरन्दं मदयन्तिकां प्रत्युत्कण्ठयति । वयस्येति । मदयन्तिकायाः कृत इति शेषः । यद्वा ॥ अधीगर्थेति कर्मणि षष्ठी ॥

१३१–१३५ अथकिं स्वीकारे । तन्म इत्यादि । तन्मम चित्तं हरति यदेतादृशैरङ्गैर्मामालिङ्गितवती । सरसः सरक्तः प्रहारो यत्र तादृशं मामवलोक्य । अत एव त्वरयागणितं स्खलत्भ्रश्यदुत्तरीयं

---

१ इति निष्क्रामन्ति A. D. २ A. D. insert एव before एतत्. ३ का-तरां and भगवतीं C. ४ A. D. add सर्वथा after हन्त. ५ जन्मसाफल्यं C.; B. om. तत्–°र्तव्यं. ६ अन्यदुपायान्तरं A. C. D. ७ यत्सरसप्रहार C.

त्रस्तैकहायनकुरङ्गविलोलदृष्टि-
१३९ राश्लिष्टवत्यमृतसंवलितैरिवाङ्गैः[1] ॥

माध० । सुलभैव[2] बुद्धरक्षिताप्रिय[3]सखी भवतः ।

अपि च । प्रमथ्य क्रव्यादं मरणसमये रक्षितवतः
परिष्वङ्गं लब्ध्वा तव कथमिवान्यत्र रमताम् ।
तथा च व्यापारः कमलनयनाया[4] नयनयो-
१४० स्त्वयि व्यक्तस्नेहस्तिमित[5]रमणीयश्चिरमभूत् ॥

स्तनावरणवासो यस्याः सा । एतेन निरन्तरस्तनस्पर्शः सूचितः । अत एवानन्दसंदोहदायित्वादमृतसिक्तैरिव । भयवत्त्वेन त्रस्तैकवर्षीयहरिणस्येव चञ्चला दृष्टिर्यस्याः सा ॥ वर्षोब्दो हायनोस्त्रीस्यादित्यमरः ॥

१३६–१४० त्रासेन त्वदालिङ्गनं न तु स्नेहादिति शङ्कापनोदाय दूतीसुलभतयानु रागमेवाह । सुलभेति । प्रमथ्येत्यादि । सा तवालिङ्गनं प्राप्यान्यत्र कथं रमताम् । अपि तु नैव । इवशब्दोनवक्लृप्तौ । कुलीनैकमालिङ्ग्य नान्यत्र रमत इति भावः । कीदृशस्य । क्रव्यमाममांसमत्तीति क्रव्याद्व्याघ्रः । तं विनाश्य मरणकाले तां रक्षितवतः । एतेन कृतोपकारितोक्ता । अतोपि नान्यत्र रमते । पद्माक्ष्याश्चक्षुषोस्तथा तेन प्रकारेण त्वयि व्यापारश्च व्यक्तः स्नेहास्तिमितो मन्दोत एव रमणीयश्चिरमभूत् । रागेण त्वया साभिलाषमालोकितोसीति भावः । एतेनानुराग उक्तः । यदाहानुरागप्रकरणे ।

तुष्यत्यस्य कथाभिस्तु सस्नेहं च निरीक्षते ॥
क्रव्यमामिषमुद्दासमिति हारावली ॥

---

१ संवलितैरपाङ्गैः B. २ दुर्लभा न D. ३ B. om. प्रिय. ४ कमलवदनाया C. ५ स्तिमितरमणीयः B.

मकं०[1]। तदुत्तिष्ठ पारासिन्धुसंभेदमवगाह्य नगरीमेव प्रविशावः।
उत्थाय परिक्रम्य[2]।

माध०। अयमसौ महानद्योः संभेदः[3]। य एषः

जलनिबिडितवस्त्रव्यक्तनिम्नोन्नताभिः
परिमततटभूमिः स्नानमात्रोत्थिताभिः। १४५
रुचिरकनककुम्भश्रीमदाभोगतुङ्ग-

१४१–१४५ पारा च सिन्धुश्च ते नद्यौ तयोः संभेदः संगमः। अवगाह्य विलोड्य। स्नात्वेति यावत्। क्लमशान्तिहेतुतया महाप्रासादा- नहेतुतया च स्नानम्। व्यतिकरः संगमः। जलेत्यादि। वधूभिर्नारीभिः सेविततटदेशः। कीदृशीभिः। जलेन निबिडितमङ्गलग्नं यद्वासस्तेन व्यक्तौ निम्नोन्नतौ जघनादिस्तनाद्यौ यासाम्। अत एव स्नानमात्रो- त्थिताभिः। मात्रपदेन स्नानार्द्रवस्त्रापरित्यागः सूचितः। अत एव चाल्हादहेतुतया स्नानमपि। तौ दृष्ट्वा तासां लज्जामाह। मनोज्ञस्वर्ण- घटशोभावानाभोगः परिपूर्णता ययोरुच्चकुचयोस्तयोर्विनिहितौ दत्तौ हस्तावेव स्वस्तिकौ याभिस्ताभिः। हस्ताभ्यां स्वस्तिकोन्योन्यवामद- क्षिणविन्यासः। यदाह।

मणिबन्धनविन्यस्तावरालौ स्त्रीप्रयोजितौ।
उत्तानौ वामपार्श्वस्थौ स्वस्तिकः परिकीर्तितः॥

अरालश्चैवम्।

आद्या धनुर्लताकारा कुञ्चितोङ्गुष्ठकस्तथा।

---

१ D. om. मक०. २ परिक्रामतः A. D. ३ व्यतिकर Com.

स्तनविनिहितहस्तस्वस्तिकाभिर्वधूभिः ॥

इति निष्क्रान्ताः सर्वे ।

शार्दूलविभ्रमो[1] नाम चतुर्थोऽङ्कः ।

शेषा भिन्नोर्ध्ववलिता अरालेङ्गुलयः करे ॥

कनकेत्यादिना तासां गौरीत्वमुक्तम् । मङ्गलकलशानामिवैषां दर्शनेनेष्टसिद्धिरपि सूचिता ।

असूत यं रत्नधरो द्विजेशो द्विजेशकन्या दमयन्तिकापि ।
जगद्धरं तत्कृतटिप्पणेङ्कोऽगमच्चतुर्थो रसराशियासः ॥

॥ इति चतुर्थोऽङ्कः ॥

---

१ °संक्रमो C.; A. om. शा–म and has समाप्तः after अङ्कः. मालतीमाधवप्रकरणे चतुर्थोऽङ्कः संपूर्णः D.

॥ पञ्चमोऽङ्कः ॥

ततः प्रविशत्याकाशयानेन भीषणोज्ज्वलवेशा कपालकुण्डला।

कपा०। षडधिकदशनाडीचक्रमध्यस्थितात्मा
हृदि विनिहितरूपः सिद्धिदस्तद्विदां यः।

संप्रति प्रमथ्य क्रव्यादमित्यनेनाघोरघण्टकपालकुण्डलाप्रवेशे सूचिते महामांसविक्रयप्रतिज्ञया च माधवस्य श्मशानप्रवेशे सत्यङ्कावतारः।

१—८ आकाशयानेन प्रवेशो योगसिद्धिसूचनाय। भीषणा भयंकरी। उज्ज्वलवेशा विशुद्धशरीरा। एतदपि योगिनीत्वादेव। षडधिकेत्यादि। स शक्तिनाथः शिवो जयति जययुक्तो भवति॥ कालसामान्ये भवत्विति वक्तव्ये भाष्यकारवचनात्कालत्रितयेपि वा लट्॥ श्मशाननाथस्य जयेन श्मशानसाधनसिद्धिः सूचिता। कीदृशः। अविचलितैः निःस्पन्दीभूतम्। विषयान्तरव्यावृत्तमिति यावत्। मनो येषां तैः साधकैर्मृग्यमाणोन्विष्यमाणः। अनेन ध्यानानुष्ठानमुक्तम्। यदाह।

रूपवर्णप्रमाणाढ्यं परिकल्प्य सुबुद्धिना।
तथा ध्यायेत देवेशं यथा चित्तं स्थिरं भवेत्॥

चित्तस्थैर्यं तु निर्विषयतयैव। यदाह।

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धस्य विषयासङ्गि मुक्तेर्निर्विषयं मनः॥

तथा च निराकारोप्ययं सहसैव न साक्षात्कारविषयो [illegible]तीति न योग्यानुपलम्भमात्रेण निरस्य इत्यपि कटाक्षितम्। शक्ति[illegible] रीकौमारिवैष्णवीवाराहीमाहेन्[illegible]चामुण्डाचण्डिकाख्या[illegible] नद्धो वेष्टितो भैरवमूर्तित्वात्। यद्वा। [illegible]

---

१ भीषणोज्ज्वला A. [illegible]

अविचलितमनोभिः साधकैर्मृग्यमाणः

९ स जयति परिणद्धः शक्तिभिः शक्तिनाथः ॥

परिणद्ध उपचितः । अत एव शक्तीनामणिमादीनां नाथः प्रभुः । अत एव जयति सर्वोत्कृष्टो वर्तते । कीदृशः । षट्सु कर्णनाभिहृत्कण्ठतालुभ्रूमध्यवर्तिषु शिवशक्तिसंघट्टस्थानेषु नाडीसंघट्टेषु हृष्टा [हृदा?] वधिष्ठितप्राणविशेषचलनयोगाच्चक्रेष्विव मध्येधिकं प्रधानं यद्दशनाडीचक्रमिडापिङ्गलासुषुम्णागान्धारीहस्तिजिह्वापूषारुणालम्बुषाकुहूशङ्खिन्याख्या दश नाड्यो हृद्गतैकोत्तरशतसंख्यासु तिर्यगूर्ध्वाधोगतनाडीषु प्रधानतमास्तासां चक्रं तस्य मध्ये पद्ममध्यवर्तिसूक्ष्माकाशदेशे प्राणाद्याधारे स्थित आत्मा कूटस्थो नित्यो यस्य स तथा । तत्र प्रमाणम् ।

आशिरःश्रवणं देहं यद्यपि व्याप्य तिष्ठति ।
तथाप्यस्य परं स्थानं हृत्पङ्कजसमुद्गकम् ॥ इति ।

स्थितिरपि तस्य तत्र परमात्मतत्त्वाविर्भाव एव । यद्वा । षड्भिरधिका दशनाड्यः षोडशसंख्यास्तासां चक्रं तत्र मध्ये स्थितश्चासावात्मा चात्मस्वरूपः । तदुक्तम् । सर्वं शिवमयं मतमिति । यद्वा । षडधिकं यद्दशनाडीचक्रम् । मतभेदेनैते पक्षाः । हृदि हृत्पद्मे विनिहितरूपो ध्यानमूर्तिः संन्यस्तद्विदां शिवसाक्षात्कारवतां सिद्धिदोणिमाद्यैश्वर्यप्रदः । अत्र मानम् ।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
सकलं चिन्तयेत्तस्मात्सिद्ध्यर्थं सततं शिवम् ॥
ध्य न तत्परं गच्छेत्सर्वैश्वर्यगुणाष्टकम् ।
लघिमाणुत्वं प्राकाम्यं वशितेशिता ॥
वसायित्वं शम्भोरैश्वर्य धा ॥

सर्वेण । यदाह ।

॥ इति ।

इयमहमिदानीं

> नित्यं न्यस्तषडङ्गचक्रनिहितं हृत्पद्ममध्योदितं
> पश्यन्ती शिवरूपिणं लयवशादात्मानमभ्यागता।

यद्वा। तद्विदां ताः सिद्धीरुपायदेशकालप्रमाणेतिकर्तव्यताभिर्ये विदन्ति तेषां सिद्धिदोभिलषितसिद्धिद इत्यर्थः।

६–१० आत्मनि योगसिद्धिमाह। नित्यमित्यादि। इयमहमिदानीमभ्यागताभीष्टस्थानाभिमुखमागता श्रीपर्वतादित्याक्षेपात्। कीदृशी। शिवस्वरूपमात्मानं पश्यन्ती। लयवशाच्चित्तैकाग्रतया। अनेन सर्वेषां तत्प्रकाशोपास्तः। कीदृशम्। नित्यमविनाशिनम्। न्यस्तानि देहे मन्त्रन्यासेनार्पितानि यानि षडङ्गानि हृदयशिरःशिखानेत्रकवचास्त्राणि तेषां चक्रे समूहे निहितमारोपितं मन्त्रन्यासेन। यदाह।

> षडङ्गमेतत्कथितं सर्वसिद्धिप्रदायकम्।
> न्यसेद्वै भक्तियुक्तात्मा साध[illegible] ज्ञानचिन्तकः॥
> त्रिकालमेककालं वा शरीरे विन्यसेद्बुधः॥

अनेनाङ्गावरणमुक्तम्। नित्यन्यस्तेति पाठे नित्यं प्रत्यहं न्यस्तानीत्यर्थः। हृत्पद्ममध्ये हृत्कमलकर्णिकायां ध्यानाभ्यासात्सूर्यवदुदितम्। यदाह।

> पद्मसंकाशसंस्थानं हृदयं तत्र दृश्यते।
> सूक्ष्मो हि पुरुषो ज्ञेयः परमात्मा हृदि स्थितः॥
> अभ्यासात्पश्यते स[illegible]त्मानमात्मना॥

नाडीनां पूर्वोक्तानामि[illegible]दीनामुदयक्रमेण वायुपूरणपरिपाट्या जगतः शरीरस्य [illegible]य पञ्चामृतानां पृथिव्यप्तेजोवाय्वाकाशानां योगर्द्धि[illegible]कर्ष[illegible]स्मादवाप्तोलब्ध उत्पतनेनाकाशयानेन

---

१ नित्यन्[illegible]d by Com.; षडंघ्रिचक्र B.

नाडीनामुदयक्रमेण जगतः पञ्चामृताकर्षणा-
दप्राप्तोत्पतनश्रमा विघटयन्त्यग्रे नभो[1]ऽम्भोमुचः ॥

अपि च । उल्लोलस्खलितकपालकण्ठमाला-
संघट्टक्वणितकरालकिङ्किणीकः ।

श्रमो यया सा । यद्वा । अमृतमिवामृतं देहस्थितिहेतुत्वात् । तत्पुनर्बिन्दुस्थानात्कुण्डलिनीस्रावणेन स्रवद्रसविशेषो रसनाधःस्थितरन्ध्रस्रवद्रसविशेषो वा । स हि व्यापकत्वेन पञ्चशब्दवाच्यः । तदाकर्षणात् । यद्वा । जगतः शरीरस्य पञ्च यान्यमृतानि शिवशक्त्यात्मकानि रूपरसगन्धस्पर्शशब्दलक्षणानि नित्यानि स्थूलमहाभूतमात्रापरिपोषकानि । योगिनीनां तेषामुपयोगात् । तदाकर्षणेन सामर्थ्यादिकं योगिनीनामिति भावः । न च लयवशत्वेन निष्क्रियतयोत्पतनं न संभवतीति वाच्यम् । लयस्यान्यत्रापि सामर्थ्यात् । यदाह ।

मनोऽप्यन्यत्र निक्षिप्तं चक्षुरन्[illegible] पातितम् ।
तथापि योगिनां योगो ह्यवि[illegible]च्छिन्नः प्रकीर्तितः ॥ इति ।

उत्पतनादिमाहात्म्यादेवाग्रे भुवः पुरोवर्तिनो मेघान्विघटयन्ती द्विधा कुर्वन्ती । अग्रे नभ इति पाठे । आकाशमेघानग्रे विघटयन्तीत्यर्थः । न च नभःपदवैयर्थ्यम् । वनपर्वतादावपि मेघसद्भावेन तद्विघटन आकाशगामित्वोत्कर्षाप्रतिपादनात् । यद्वा । अग्रेनभो नभसि मेघान्विघटयन्ती ॥ अग्रेशब्दो विभक्तिप्रतिरूपको निपातः । तस्य विभक्त्यर्थेऽव्ययीभावः ॥ अनेन श्लोकद्वयेन शान्तो रस उक्तः । [illegible] भरतोऽपि शान्तस्तु नवमो रस इत्याह । स च विषयवैरस्यादुपजाय[illegible]ह ।

शान्तो विषयवैरस्याद्रसः संजाय[illegible]ति ।

११–१४ कपालकुण्डलायाः पूर्वो[illegible]ष[illegible]नुपपादयति

[1] अग्रेभुवो noticed by Com.

पर्याप्तं मयि रमणीयडामरत्वं
संधत्ते गगनतलप्रयाणवेगः ॥

तथा हि। विष्वग्वृत्तिर्जटानां प्रचलति निबिडग्रन्थिनद्धोपि भारः १५
संस्कारक्काणदीर्घं पटु रटति कृतावृत्तिखट्वाङ्गघण्टा।

उल्लोलेति। गगनतलगमनवेगो मयि सकलं रमणीयडामरत्वं रमणीयत्वं मनोहरत्वं डामरत्वं भीषणत्वमुद्भटत्वं वा केलिसंरम्भनिर्भरत्वं वा संधत्ते समर्थं कुरुते ॥ डामरोड्डामरौ भीमे केलिसंरम्भनिर्भरे इति रत्नकोशः ॥ वेगबलादुल्लोलेन यातायातेन स्खलिता या कपालानां कण्ठवर्तिनी माला तस्याः संघट्टक्कणितेनान्योन्यकपालसंघृष्टिध्वनिना कराला मूका क्षुद्रघण्टिका यत्र सः। कपालमालोच्चध्वनिना तद्ध्वनेरश्रवणान्मूकत्वमिव मूकत्वम्। यद्वा। तथाविधक्कणितेन कराला दन्तुरा। विषमेति यावत्। किङ्किणी यत्र सः। कुलयोगिनीनां किङ्किण्यादिध्वनिना सानन्दत्वम्। यदाह।

समुद्रघोषसंभारकिङ्किणीघण्टिकास्वनैः।
सदानन्दो भवेद्योगी न निद्रा न क्षुधा तृषा ॥ इति।

१५–१८ तदेवाह। विष्वगिति। जटानां भारः समूहो निबिडं दृढं यथा तथा ग्रन्थिबद्धोपि विष्वग्वृत्तिः सर्वतोव्यापी सन्प्रचलति। गगनगमनवेगादित्यर्थात् ॥ विष्वक्शब्दो नानार्थः सुषमादिषु पठ्यते तेन षत्वम् ॥ कृतावृत्तिः कृतगतागता कृतमण्डलभ्रमणा खट्वाङ्गसहिता घण्टा संस्कारेण संतानेन यः क्काणो ध्वननं तेन दीर्घं पटु रमणीयं च यथा तथा रटति शब्दायते। एतेन डामरत्वमुक्तम्। खट्वाङ्गं वाद्यभेदः। वायुरूर्ध्वं पताका धूनोति कम्पयति ॥ धूञ् कम्पने। दीर्घान्तः स्वरतीत्यादिसूत्रे न्यासकारेणोक्तः॥ कीदृशः। विवृतानि यानि निर्मांसतया शवशिरांसि तेषां श्रेणयः पङ्क्तयस्तासां यानि कुञ्जानि गहनाः प्रदेशास्तेषु गुञ्जन्ध्वनन्। अत एवोत्तालु उद्भटध्वानः क्षुद्रघण्टिकानामजस्ररणत्कारहेतुश्च।

ऊर्ध्वं धूनोति वायुर्विवृतशवशिरःश्रेणिकुञ्जेषु गुञ्ज-
ञ्चुच्चालः किङ्किणीनामनवरतरणत्कारहेतुः पताकाः ॥

परिक्रम्यावलोक्य च । गन्धमाघ्राय । इदं तावत्पुराणनिम्बतैलाक्त[1]परिभृज्यमानरसोनगन्धिभिश्चिताधूमैः पुरस्ताद्विभावितस्य महतः श्मशानवाटस्य नेदीयः करालायतनं यत्र[2] पर्यवसितमन्त्रसाधनस्यास्मद्गुरोरघोरघण्टस्याज्ञया सविशेषमद्य पूजासंभारो मया संनिधापनी[3]यः । कथितं च मे गुरुणा वत्से कपालकुण्डले अद्य मया[4] भगवत्याः

अनेन रमणीयत्वमुक्तम् ॥ निक्काणो निक्कणः क्वाणः क्वणः क्वणनमित्यपीत्यमरः ॥ यद्वा । पटुरटनेन रमणीयत्वं पताकाकम्पनेन डामरत्वमत्रोक्तम् ।

१९–२६ पुराणेत्यादिना चिताधूमानां स्वभावाख्यानम् । अक्तं म्रक्षितम् । परिभर्जनं वन्हिमध्यानिक्षेपपाकः । अम्लरसेनैकेनोनं पञ्चरसं रसोनम् ॥ लसून इति ख्यातम् । वट्यते वेष्ट्यतेनेनेति वाटः ॥ हलश्चेति घञ् ॥ पन्था वाटः पथो माय इति भागुरिः ॥ नेदीयो निकटम् । पर्यवसितं समाप्तं विनष्टं च । मन्त्रसाधनं पुरश्चरणजपादि । संभारः समूहः । उपयाचितं मनोषितार्थं स्वीकृतम् । यद्दीयते तु देवेभ्यो मनोराज्यस्य सिद्धये । उपयाचितकं तत्तु दोहदं संप्रचक्षत इति हारावली ॥ स्त्रीरत्नमिति ॥ जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षत इति विश्वः । विदितमुपलब्धम् । विचितमिति पाठेन्विष्टम् । गम्भीरेत्यादि ।

विकाराः सहजा यस्य हर्षक्रोधभयादिषु ।
भावेषु नोपलभ्यन्ते तद्गाम्भीर्यमुदाहृतम् ॥ इति ।
अभ्यासात्करणानां तु श्लिष्टत्वमुपजायते ।
महत्स्वपि विकारेषु तन्माधुर्यमुदाहृतम् ॥

---

१ B. om. अक्त; C. inserts रस after रसोन. २ C. D. insert च after यत्र. B. om. मन्त्र. ३ संभावनीयः B. ४ A. om. मया.

करालायाः प्रागुपयाचितं स्त्रीरत्नमुपहर्तव्यम् । तदत्रैव नगरे विदितं[1] मास्त इति तद्विचिनोमि । सकौतुकम[2]ग्रेऽवलोक्य । तत्कोऽयमलिगम्भीरमधुराकृतिरुत्तम्भितकुटिल[3]कुन्तलः कृपाणपाणिः श्मशानवाटमवतरति । य एषः

कुवलयदलश्यामोऽप्यङ्गं दधत्परि[4]पाण्डुरं
ललितचरणन्यासः[5] श्रीमान्मृगाङ्कनिभाननः ।
हरति विनयं वामो यस्य प्रकाशितसाहसः[6]

इति भावः । उत्तम्भितो जूटाकारेण बद्धः कुटिलो वक्रः कुन्तलः केशो यस्य सः । एतेन रौद्ररसवत्तोक्ता ।

२८–३४ कुवलयेत्यादि । य एष स्वभावान्नीलनलिनपत्रवच्छ्यामोऽपि विप्रलम्भात्सर्वतः पाण्डुरमङ्गं दधत् । ललितो रमणीयो विकटो भीषणो [illegible] देहन्यासो यस्य सः । ललितत्वं स्वभावात् । विकटत्वं रौद्रात् । यद्वा [illegible]णादिचालनम् । श्रीमानतिरम्यः । मृगाङ्कान्निरतिशय[illegible]स्य । अत एव हेयत्वार्थं मृगाङ्कपदेनोपन्यासः [illegible] हरत्यपनयति । अत्र हेतुमाह । प्रविगलदसृक[illegible]दिभिः । ललज्ज्वलं नरजाङ्गलं महामांसं यत्र सः । न[illegible] विनीतो रक्तं महामांसं च धारयति । अत्र पूर्वार्धेन ललितत्वमुत्तरार्धेन विकटत्वमुक्तम् । अत एव व्यक्तसाहसः । महामांसधारित्वेन वीरबीभत्सरसावुक्तौ । यदाह ।

उत्साहाध्यवसायाद्विस्मयहर्षाच्च मोहाच्च ।
विविधाद्गन्धविशेषाद्वीररसो नाम संभवति ॥
अनभिमतदर्शनेन च गन्धरसस्पर्शशब्ददोषैश्च ।

---

१ विचितमा° noticed by Com. २ B. om. अग्रे. ३ B. om. कुटिल. ४ परिधूसर A. C. D. ५ ललितविकटन्यासः Com. °चरणन्यास B. ६ °साहसं D.

प्रविगलदसृक्पङ्कः पाणिर्लल[1]न्नरजाङ्गलः ॥

निरूप्य । अये स एष कामन्दकीसुहृत्पुत्रो महामांसस्य पणयिता[2] माधवः । तत्किमनेन । भवतु समीहितं संपादयामि । विगलितप्रायश्च पश्चिमसंध्यासमयः । तथा हि । संप्रति

व्योम्नस्तापिच्छगुच्छावलिभिरिव तमोवल्लरीभिर्व्रियन्ते
पर्यन्ताः प्रान्तवृत्त्या पयसि वसुमती नूतने मज्जतीव ।
वात्यासंवेग[3]विष्वग्विततवलयितस्फीतधूम्याप्रकाशं
प्रारम्भेऽपि त्रियामा तरुणयति निजं नीलिमानं वनेषु ॥

परिक्रम्य निष्क्रान्ता । विष्कम्भकः ।

ततः प्रविशति यथानिर्दिष्टो[4] माधवः ।

उत्तेजनैश्च बहुभिर्विस्रुतरसः समुद्भवति ॥

दधादित्यत्र नाभ्यस्ताच्छतुरिति नुमो निषेधः ॥ [illegible] र्जनस्थाने त्रि-लिङ्ग्यां पिशितेस्त्रियामिति मेदिनीकारः [illegible] । विग-लितप्रायो भ्रष्टप्रायः ।

३५–३८ व्योम्न इत्यादि । [illegible] तलताभिर्व्रि-यन्ते । तमालपुष्पस्तबकपङ्क्तिभिरिव । एवं [illegible] तभागेन नूत-ने जले मज्जतीव । उत्प्रेक्षेयम् । त्रियामा रात्रिः । प्रारम्भे प्रदोषमात्रेऽपि नीलत्वं निजं वनेषु तरुणयति । कीदृशम् । वातानां समूहो वात्या तस्याः संवेगेन निवर्तनेन विष्वक्चतुर्दिशं वितता विस्तारिता वलयिता वलया-कारा स्फीता गभीरा या धूम्या धूमसमूहो नीहारो वा तत्सदृशम् । एवं चान्धकारोपगमाद्गतप्राया संध्येत्यर्थः ॥ धूम्या धूमसमूहेऽपि नीहारेऽपि निगद्यत इति धरणिः ॥

---

१ गलज्जरजाङ्गलः B. २ पणयिता A. C. ३ वात्यासंगेन. B. ४ B. om. य–ष्टो.

माध० । साशंसम् ।

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दा[1]शंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः[2] ॥ ४५

किं च । अतिमुक्तमद्रु[3]थितकेसरावली
सततातिवासमुभगार्पित[4]स्तनम् ।

४१–४५ साशंसं संप्रार्थनम् । प्रेमेत्यादि । मुग्धदृशो मालत्या-स्तास्ता अनुभूताश्चेष्टाः संभोगे चुम्बनादयो मयि पुनर्भूयासुः ।

चेष्टावि[illegible]भोगे चुम्बनालिङ्गनादयः ॥

इति कण्ठाभरणम् [illegible] । प्रथमं प्रेम्णा संभोगप्रीत्यार्द्रा इव तापशा-न्तिहेतुरोमाञ्चादि[illegible]ततो विश्वासमुपेत्य चित्तप्रसादस्पृशः । ततः परिचयात्सुखा[illegible]दुद्भटरागोद्रेकाः । निसर्गमधुराः सहजम-नोज्ञाः । यास्वाशंसोप[illegible]तास्वपि क्षणान्निरतिशयसुखघनो लयो लीनता भवति तासु चेष्टासु मनो लीयत इत्यर्थः । कीदृशः । अन्तःकरणस्य मनसो बाह्येन्द्रियव्यापारावरोधनशीलः । मालतीमयत्वेन तन्मनो बाह्यविषये न व्याप्रियत इत्यर्थः । अत एवानेकशङ्कातङ्कसंकुलेपि तत्र स्थाने माधव-स्य न साध्वसादिकमपीति भावः । यद्वा । तास्ताश्चेष्टा बकुलवीथ्यादिषु यास्तया कृतास्तास्ता मयि भवेयुः । तासामेव दुर्लभत्वादाशंसनीयता ।

४६–४८ प्रथमप्रीतिहेतुत्वादालिङ्गनमाशास्ते । अतिमुक्तेत्यादि । प्रियया सह तदङ्कपरिवृत्तिमप्यहमाप्नुयाम् । तत्तस्या अङ्के क्रोडे सर्वतो-भावेन वर्तनम् । हृदयालिङ्गनमित्यर्थः । अपिर्भिन्नक्रमः । यद्वा । तदङ्के

१ °दाशंका D. २ सान्द्रोदयः A. C. D. ३ भतिमुक्त C. °मुद्ग्रथित B. C. ४ सुभगार्पित C.

अपि कर्णजाहविनिवेशिताननः
प्रियया तदङ्क[1]परिवर्तमाप्नुयाम् ॥

अथ वा । दूरे तावदेतत् । इदमेव प्रार्थये ।

संभूयेव सुखानि चेतसि परं भूमानमातन्वते
यत्रालोकपथावतारिणि रतिं प्रस्तौति नेत्रोत्सवः ।

परिवर्तनमूर्ध्वाधःक्रमेण पुरुषायितमाप्नुयाम् । कीदृशः । प्रियया कर्णजाहे कर्णमूले विनिवेशितमाननं यत्र । ममापि सः । प्रथमपक्षे कर्णमूलेर्पितमाननं येन सः ॥ तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचाविति मूले जाहच्प्रत्ययः ॥ अतिक्रान्ता मुक्ता यया सातिमुक्ता । मुक्ताहारमपास्य तदर्पणादतिक्रमः । यद्वा । अतिमुक्तातिविरला माल[illegible]नन्यासङ्गात् । एतादृशी या मङ्कथिता केसरावली तस्याः सन[illegible]सिन सुभगः सुरभिरर्पितस्तनो यत्रेति क्रियाविशेषणम् । अ[illegible]ठो न मनोहरः । अवियुक्तत्वादेव सतताधिवासस्य लब्धत्वात्स[illegible]म व्यर्थत्वात् ।

५०–५४ संभूयेत्यादि । तस्यास्तन्मुखं [illegible]पि पश्येयमित्येतदेव प्रार्थये ॥ अङ्कप्राप्तेर्दुर्लभत्वादिति भावः । कीदृशम् । कामस्य मङ्गलार्थं गृहम् । तत्र कामो हृष्टो वसतीत्यर्थः । यद्वा । कामस्य मङ्गलघटितं हिरण्यघटितं गृहम् ॥ कल्याणं मङ्गलं विद्यात्काञ्चनं च तदक्षममिति विश्वः ॥ यद्वा । अनङ्गस्य मङ्गलानामुपचयहेतूनां सौकुमार्यादीनां गृहम् । अत एवोत्प्रेक्षते । बालचन्द्रकलोदयात्सारैर्गृहीतैरुत्पादितमिति । अत्रोदयादिति भावेन द्रव्याभिधानान्नवेन्दुकलाया अवचिताः सारास्तैरुत्पादितमित्यर्थः । सकलजनानन्दिनवेन्दुकलातोप्यधिकमनोहरामिति भावः । यद्वा ॥ ल्यब्लोपे पञ्चमी ॥ तेन बालेन्दुकलोदयं प्राप्यावचितैरित्यर्थः । यद्वा । बालेन्दुकलोदयात्प्रातिपच्चन्द्रकलोदयादारभ्यावाचितैः पूर्णिमापर्य-

---

१ तदङ्गपरिवृत्तमा° A.

यद्वालेन्दुकलोच्चयादपचितैः सारैरिवोत्पादितं
तत्पश्येयमनङ्गमङ्गलगृहं भूयोपि तस्या मुखम् ॥

यत्सत्यमधुना तत्संदर्शनेनातिस्वल्पोपि न विशेषः । मम हि संप्रति सातिशयप्रत्यक्षोपलम्भसंभावितात्मजन्मनः संस्कारस्यानवरतप्रबोधात्प्रतायमानस्तद्विसदृशप्रत्ययान्तरैरतिरस्कृतप्रवाहः प्रिय-

---

न्तमित्यर्थात् । आरभ्येत्यस्य लाभः पञ्चमीत एव । तया च पूर्णेन्दुना मुखसाम्यं लभ्यते । कश्चित्कलोच्चयादिति पाठः । तत्रोच्चयात्समूहादित्यर्थः । यत्र मुखे संमुखीभूते सुखानि ॥ कर्तॄणि ॥ मिलित्वेव परं भूमानं बाहुल्यं विस्तारयन्ति चिरो । अनेनान्तःप्रीतिरुक्ता । इवशब्द उत्प्रेक्षायाम् । एवपाठे विस्मय एवशब्दः । बहिःप्रीतिमाह । नेत्रोत्सवोलब्धला-भाभिमानोनुरागं प्रस्तौति स्तवति । रतेर्द्रवमयीत्वात् । समाधिरलंकारः ।

५५–५९ मानसमौत्सुक्यातिशयमाह । मम हीति । मामकीनः प्रियास्मरणरूपज्ञानोत्पत्तेः संतान[illegible]ातसमूहः स्मृतिरूप एव मम चैतन्यमात्मतत्त्वं तन्मयमिव [illegible]ति मालतीमयं करोतीत्यर्थः । कीदृशः । प्रतायमानो दीर्घी[illegible]हेतुः । संस्कारस्य भावनाया अतिशयितप्रबोधादुद्रेकात् । कीदृश[illegible]संस्कारस्य । सातिशयात्सादरात्स्फुटाकाराद्वा बकुलवीथ्यां पूर्वकाल[illegible]नुभवाल्लब्धजन्मनः । प्रतायमानत्वमेवोपपादयति । तद्विसदृशैर्मालतीविलक्षणविषयैर्ज्ञानान्तरैरतिरस्कृतप्रवृत्तिः । तथा चान्तरा विषयान्तरास्फुरणान्न प्रवाहतिरस्कार इति भावः । नन्वात्मतत्त्वस्य पुष्करपलाशवन्निर्लेपतया कथं मालतीमयत्वमत आह । अन्तरिति । अन्तःपदमिह बुद्धितत्त्वपरम् । तथा च बुद्धितत्त्वस्य या प्रवृत्तिः सहजसिद्धो व्यापारः सा यत आत्मतत्त्वे भेदाग्रहात्प्रतिभासते तस्मात् ।

---

१ कलोदयात् Com. सारैरिवासादितं C. २ B. om. अधुना. ३ B. om. अति. ४ प्रबोधनात् C. प्रबोधा° D.; प्रतीयमानः A. C. ५ प्रतापतिरैः B. ६ प्रभावः B.

तमात्मस्मृतिप्रत्ययोत्पत्तिसंतानस्तन्मयामिव करोत्यन्तर्वृत्तिसारूप्यतश्चै-
तन्यम्। तथा हि।

लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च
प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेव च।

सांख्यदर्शने बुद्धेर्भोक्तृत्वात्। यद्वा। अन्तर्वृत्तिरिति भावप्रधानम्। तथा चान्तर्वृत्तित्वमन्तरवस्थानरूपं सादृश्यमात्मबुद्ध्योस्तस्मात्।

६०—६२ श्लोकमेव दर्शयति। लीनेवेत्यादि। सा प्रियास्माकं चेतसि लग्ना संबद्धा। संबद्धत्वे यथासंभवं प्रकारानाह। लीनेव निह्नुतेव। यत्र यस्य संबद्धस्य न प्रत्यक्षोपलम्भस्तत्र तल्लीनमित्युच्यते। यथा पयसि लीनं लवणम्। सर्वत्रात्र लग्नत्वस्य प्रकारभेदेनोपमाभेदाः पूर्वपूर्वापरितोषाद्वा। तथाहि। लीनत्वस्याप्रतिभासात्स्पष्टप्रतिभासार्थमाह। प्रतिबिम्बितेव। यत्र[illegible]भिहतं चक्षुः परिवृत्य द्रव्यान्तरं गृह्णाति तत्तत्र प्रतिबिम्बितमित्युच्यते। यथा स्फटिके रक्तपुष्पम्। प्रतिच्छायाया वस्त्वन्तरसंसर्गाधीनत्वे[illegible]त्वात्स्वाभाविकत्वोपवर्णनायाह। लिखितेव। यत्प्रशिथिलावयव[illegible] द्रव्येण घनद्रव्योपरि संस्थानविशेषवन्निर्मीयते तत्तत्र लि[illegible]मित्युच्यते। यथा पत्रे लिपिः। लिखनस्य जलाद्युपनिपातविनाशितया[illegible] चिरस्थायित्वप्रदर्शनार्थमाह। उत्कीर्णरूपेव। यदत्र निबिडद्रव्ये तादृशेन किंचिदवयवविभागः क्रियते तत्तत्रोत्कीर्णम्। यथा टङ्कादिना शिलादि। अस्याप्येकभागवृत्तितया सर्ववृत्तित्वार्थमाह। प्रत्युप्तेव। प्रत्युप्तमर्धरोपितम्। यदाप द्रव्यान्तरसंसर्गि तत्तत्र प्रत्युप्तम्। यथाङ्गुलीयके मण्यादि। अस्यापि शक्योद्धारत्वान्निबिडसंबन्धायाह। वज्रलेपघटितेव। यदत्र किंचिद्घनद्रव्याभिघातजन्यकर्मजन्यसंयोगविभागानाश्रयस्तत्तत्र वज्रलेपघटित-

---

१ अन्यन्नवृत्ति D.

संसक्ताकुलकेलयः किलकिलाकोलाहलैः संमदा-
द्[1]उत्तालाः कटपूतनाप्रभृतयः सांराविणं कुर्वते ॥ ७०

भवतु[2] तावदाघोषयामि तावत् । उच्चैः । भो भोः श्मशाननिकेतनाः कटपूतनाः ।

अशस्त्रपूतं निर्व्याजं[3] पुरुषाङ्गोपकल्पितम् ।

शवाः पूतनाः श्मशानवासिनो राक्षसास्तत्प्रभृतयोन्येपि तत्रत्याः शृगालादयः किलकिलाकोलाहलैः किलकिलारूपारावैः सांराविणं परस्पराह्वानं कुर्वते संमदाद्धर्षात् । उत्ताला उद्भटाश्चञ्चला वा । तालादुद्गता उत्तालाः ॥ सुप्सुपेति समासः ॥ तेनान्योन्यहस्ततालवन्त इति वा । संसक्ता मिलिता आकुलास्त्वरायुक्ताः केलयः क्रीडा येषां ते । यद्वा । संसक्तत्वेनाकुला केलिर्येषां ते । संसक्त इति भावप्रधानम् । यद्वा । संसक्ता कुलेन स्वयूथेन केलिर्येषां ते ॥ त्रिपदबहुव्रीहावुत्तरपदत्वाभावान्न पुंवद्भावः ॥ सान्द्रे स्निग्धे च मेदुर इत्यमरः ॥ किलकिलेत्यव्यक्तशब्दः । अविभावितविशेषः शब्दसमूहः कोलाहलः ॥ संपूर्वाद्रौतेरभिविधौ भाव इनुण् । तदन्तात्स्वार्थेण् । आदिवृद्धिः ॥ शवानां शब्दकरणं वेतालाधिष्ठानात् । रौद्ररस इह । तल्लक्षणं तु भरते ।

इति रौद्रो रसो दृष्टो रौद्रैरेवाङ्गचेष्टितैः ।
शस्त्रप्रहारभूयिष्ठभयकम्पक्रियात्मकः ॥ इति ।

७१–७३. भो भो इत्यभिमुखीकरणरूपे संबोधने । निकेतनं गृहम् । अशस्त्रपूतं संमुखपतितस्य स्वर्गिणो मांसं शस्त्रपूतमतस्तेषामग्राह्यम् । इदमिति न तादृशमिदम् । यद्वा । अशस्त्रपूतं शस्त्रेणाच्छिन्नम् । धातूनामनेकार्थत्वात् । शस्त्रहतमांसस्य रणे सुलभतया तेषामस्पृहात इदमतादृशमिति भावः । अव्याजं निष्कपटम् । यद्वा ।

---

१ उत्ताना: B.; सांचारिणं C. २ तदिदं for भवतु N.; N. om. तावत्. A. N. om. उच्चैः; A. B. C. om. one भोः. ३ पूतमव्याजं A. D. N.

विक्रीयते महामांसं गृह्यतां गृह्यतामिदम् ॥[1]

पुनर्नेपथ्ये[2] कलकलः ।

माध० । कथमाघोषणानन्तरमेव[3] सर्वतः समुच्चलदुत्तालवेताल-मुक्ततुमुलाव्यक्तकलकलाकुलः प्रचलित इवाविर्भवद्भूत[4]संकटः श्मशानवाटः । आश्चर्यम् ।

कर्णाभ्यर्णविदीर्णसृक्कविकटव्यादानदीप्ताग्निभि-

इष्टसिद्धिं पणीकृत्य साहसाद्यदुपार्जितम् ।
अशस्त्रपूतं निर्व्याजमेतन्मांसं विदुर्बुधाः ॥

इति परिभाषितमेव ।

स्त्रियश्चतुष्पदे श्रेष्ठाः पुरुषा द्विपदे तथा ॥

इति वचनात्प्राशस्त्यार्थमाह । पुरुषस्याङ्गादानीयोपकल्पितम् । विक्रीयत इष्टसिद्धिमूल्येनेत्यर्थात् । विक्रयस्य मूल्यसापेक्षत्वात् । यद्वा । विक्रीयते दीयते । धातोरनेकार्थत्वात् ।

७६–८२. उच्चैर्घुष्टं तु घोषणेत्यमरः ॥ वेतालः श्मशानदेवता-किंकरः ॥ तुमुलं रणसंकुल इत्यमरः ॥ तेषामन्योन्यस्पर्धया रवे संकुलत्वम् । अविभावितार्थत्वेनाव्यक्तत्वम् । प्रचलित उच्चावचः । संकटो व्याप्तः । कर्णेत्यादि । उल्का ज्वाला मुखे येषां ते उल्कामुखाः शृगालभेदाः । तेषां मुखैर्नभ आकीर्यते व्याप्यते । यद्वा । उल्कामुखा एव ग्रामप्रसिद्धा एव रणवासिनो जन्तुभेदाः । कीदृशैः । कर्णसमीपविदीर्णसृक्कभ्यां विकटं करालं यद्व्यादानमास्यविकाशस्तेन दीप्तोग्निर्येषु । ऊर्ध्वं स्थितदंष्ट्राणां कोटिभिरग्रैर्विसंकटैः संकुलैर्विकरालैर्वा । सर्वतो धावद्भिः । विद्युत्पुञ्जतुल्यानि केशनयनभ्रूश्मश्रुजालानि यत्र तैः । पिङ्गलत्वात्केशा-

---

१ °तामिति C. °तामिदमिति N. २ N. om. पुनः. ३ आभाषणानंतर B. आघोषणानंतर C., N. om. एव; चरत् for चलत् N.; वेतालकुलमुक्त B.; N. om. वेतालमुक्त. ४ भूरिभूत° B.

दंष्ट्राकोटिविसंकटैरित इतो धावद्भिराकीर्यते ।　　८०
विद्युत्पुञ्जनिकाशकेशनयनभ्रूश्मश्रुजालैर्नभो
लक्ष्यालक्ष्यविशुष्कदीर्घवपुषामुल्कामुखानां मुखैः ॥
अपि च । एतत्पूतनचक्रमक्रमकृतग्रासार्धमुक्तैर्वृका-
नुत्पुष्णत्परितो नृमांसविघसैराघर्घरं क्रन्दतः ।

दीनां विद्युत्तुल्यता । अत एवोल्कामुखः शृगालान्यो जन्तुभेद इति पक्षः साधीयान् । उल्काप्रकाशाल्लक्ष्याण्यन्यदालक्ष्याणि विशुष्काणि दुर्बलानि दीर्घाणि वपूंषि येषां तेषाम् । एतेन दुर्बलत्वमुक्तम् ॥ प्रान्तावोष्ठस्य सृक्कणी इत्यमरः ॥ केशेत्यादौ पूर्वनिपातविधेरनित्यत्वाद्भ्रूशब्दमपहाय केशशब्दस्य पूर्वनिपातः । लक्ष्यशब्दो ण्यति यकारवान् । कर्मणि घञि तद्रहित इत्यवधेयम् ॥ अद्भुतर[?]यम् ।

८३–८६. अपि चेति । अपिर्जुगुप्सायाम् । चः समुच्चये । गर्हामाह । एतदित्यादि । एतत्पूतनचक्रं श्मशानप्रेतसमूह आलोक्यते । किं कुर्वत् । अत्याकुलतयाक्रमेण युगपत्कृतो यो ग्रासस्ततोऽर्धं भूमौ पतितमर्धं चर्वणेन मुख एव स्थितम् । तत्र भूमिपतितैरर्धमुक्तैर्मनुष्यमांसविघसैरुच्छिष्टैः सर्वत्र वृकान्कोकानारण्यकुक्कुरादीनुत्पुष्णत्पुष्टान्कुर्वत् । अक्रमत्वं प्रतिपक्षशङ्कया । अभिलाषातिशयाद्वा । कीदृशान् । अहमहमिकया मांसग्रहणादीषद्घर्घरमव्यक्तशब्दं यथा स्यादेवं रुदतः । एतत्तु कुक्कुरेषु स्फुटमेव । कीदृशं पूतनचक्रम् । खर्जूरद्रुमदघ्ना तत्प्रमाणा जङ्घा यस्य तत् । एतेन जङ्घानां ग्रन्थियोगित्वकर्कशत्वनीरसत्वलोमशत्वानि दर्शितानि । असिता श्यामा या त्वक्चर्म तया नद्धाः सर्वतो विस्तीर्णा याः स्नायवो नहरु इति ख्यातास्ताभिर्ग्रन्थिषु संधिभागेषु घनानि दृढान्यस्थ्नां पञ्जराणि येषां तादृशा जरन्तो जीर्णाः कङ्काला मांसादिशून्यास्थिभा-

---

१ लक्ष्यालक्ष्य C. २ N. om. अपि च. ३ आघर्घरं N.

८९ खर्जूरद्रुमदघ्नजङ्घमसितत्वङ्नद्धविष्वक्तत-
स्नायुग्रन्थिघनास्थिपञ्जरजरत्कङ्कालमालोक्यते ॥

समन्तादवलोक्य विहस्य[1] च। अहो प्रकारः पिशाचानाम्। एते हि

ततपृथु[2]रसनोग्रमास्यगर्तं दधति विदार्य विवर्ण[3]दीर्घदेहाः।
लल[4]दजगरघोरकोटराणां द्युतिमिव दग्धपुराणरोहिणानाम् ॥

गा यस्य तत्। वृकपदं शृगालाद्युपलक्षणपरम्॥ कोक ईहामृगो वृक इत्यमरः॥ यद्वा। शालावृकाः कपिक्रोष्टुश्वान इति नानार्थेमरदर्शनादेतस्यैवैकदेशो वृकशब्दः। तेन भीमभीमसेनादिवदस्यापि तावदर्थप्रतिपादकतेत्यवधेयम्। यद्वा। वृको घोघ इति ख्यातः॥ विघसो भोजनशेषेपीत्यमरः। स्याच्छरीरास्थ्नि कङ्काल इत्यमरः॥

८७–८९. विहस्येति। अतिसात्त्विकेपि मयि भीषणत्वममी पूतनाः कुर्वन्तीत्यसंबद्धक्रियया हासः। यदाह।

असंबद्धैस्तु हासः स्याद्वाग्नेपथ्यक्रियादिभिः॥ इति।

प्रकारो वैलक्षण्यम्। ततेत्यादि। एते पूर्वोक्तादन्ये पिशाचा विस्तृतदीर्घजिह्वाभीषणमुखविवरं विदार्य व्यादाय दग्धपुराणरोहिणानामिव द्युतिं दधति धारयन्ति। दग्धत्वेन श्यामत्वं पुराणत्वेन जीर्णत्वं दर्शितम्। रोहिणो रोहण इति ख्यातस्तरुः। घोघरात्ति इति ख्यातो वा। रोहितोपि स एव। अत एव रोहितः प्लीहनाशक इत्यमरोपि। रोहणानामिति पाठे रोहन्तीति रोहणास्तरवस्तेषामित्यर्थः। ललता चलताजगरेण सर्पेण भीषणच्छिद्राणाम्॥ निष्कुहः कोटरं वा नेत्यमरः॥ तदिह कोटरेणास्यमजगरेण रसना रोहिणेन पिशाच उपमीयन्ते। भयानको रसः। यदाह।

1 B. om. विहस्य; C. N. om. च; ततः for एते हि N. 2 N. om. तत and has पृथुतररस°. 3 विशुष्क N. 4 चलत् B. गलत् N.; इह for इत B. C.

परिक्रम्य[1]। हन्त बीभत्समेवाग्रे वर्त्तते। ९०

[2]उत्कृत्योत्कृत्य कृत्तिं प्रथममथपृथूच्छोफभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डा[3]द्यवयवसुलभान्युग्रपूतीनि जग्ध्वा।

विकृतरवसत्त्वदर्शनसंत्रासारण्यशून्यगृहगमनात्।
गुरुनृपयोरपराधात्कृतश्च भयानको ज्ञेयः।

९०—९४. बीभत्सं घृणाकरम्। निर्भिद्येत्यादि। अयं प्रेतरङ्कः प्रेतरूपो रङ्कः क्षुधाभिशुष्यच्छरीरोऽव्यग्रमनाकुलं यथा तथा क्रव्यं मांसमत्ति खादति। किं कृत्वा। प्रथममादौ कृत्तिं चर्म निर्भिद्य निर्भिन्नीकृत्य पश्चादुत्कृत्य छित्त्वा। उत्कृत्येति पाठे चर्मकोषाकर्षणमुत्कर्तनं तत्पुनः पुनः कृत्वेत्यर्थः। अथानन्तरं पृथुना महतोच्छोफेन भूयांसि बहूनि मांसानि जग्ध्वा भक्षयित्वा। कीदृशानि। अंसयोः स्कन्धयोः स्फिचोः कटिमांसपिण्डयोः पृष्ठे कायपश्चाद्भागे पिण्डयोर्जङ्घापाश्चात्यभागयोरादिपदात्कक्षामूलाद्यवयवेषु सुलभानि। उच्छूनत्वात्तेषाम्। उग्रपूतीन्युत्कटगन्धानि। पृथूत्सेधेति पाठे पृथुनोत्सेधेन कायेन बहुतां गतानीत्यर्थः। यद्वा। उत्सेधेनोन्नत्या भूयांसीत्यर्थः॥ उत्सेधः काय उन्नतिरित्यमरः॥ कीदृशो रङ्कः। आर्त्तस्वरावान्। पर्यस्तमितस्ततः क्षिप्तं नेत्रं येन सः। एतदुभयं रङ्केषु प्रसिद्धमेव। अन्तःपर्यस्तनेत्र इति पाठेऽन्तर्मध्ये स्थितनेत्रः। रङ्कत्वेन कोटराक्षत्वादित्यर्थः। आत्तस्नाय्वन्त्रनेत्र इति पाठ आत्तानि गृहीतानि स्नाय्वन्त्रनेत्राणि येन सः। अत एवान्त्राद्युत्पाटनाय प्रकटितदन्तः। दौर्बल्यप्रकर्षणात्प्रकटितदशनत्वम्। अङ्कस्थात्क्रोडीकृतात्करङ्कात्कपालाद्दाक्रव्येत्याक्षेपात्। अन्यथापादानानुपपत्तिः। कीदृशं क्रव्यम्। अस्थिषु यत्संतिष्ठति तत्। स्थपुटगतमपि निम्नोन्नतविषमस्थानगतमपीत्यर्थः। अत एव रङ्कः॥ स्त्रियौ स्फिचौ कटिप्रोथावित्यमरः।

---

१ N. adds भगलीक्य च; अतिबीभ° & भयती N. २ निर्भिद्योत्कृत्य Com.; पृथूच्छोथ A. पृथूत्सेध N. ३ पीठ N.

आत्तस्नाय्वन्त्र[1]नेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-

दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥

९८ अपि च । निष्टापस्विद्य[2]दस्थ्नः क्वथनपरिणमन्मेदसः प्रेतकाया-

न्कृष्ट्वा[3] संसक्तधूमानपि कुणपभुजो भूयसीभ्यश्चिताभ्यः ।

पिण्डः खण्डेङ्गभेदेस्यादिति मेदिनीकारः । करङ्को मस्तकेपि स्यादिति धरणिः ॥ अयं बीभत्सो रसः ।

९८–९८. निष्टापेत्यादि । एतेपि कुणपभुजः शवभक्षकाः पिशाचा बह्वीभ्यश्चिताभ्यः प्रेतकायानाकृष्य तेषामेव जङ्घानलकं जङ्घाप्रधानमास्थि निष्कृष्य विगतमांसावरणं कृत्वा मज्जधाराः पिबन्ति । मज्जास्थिमध्यस्थितस्नेहः । कीदृशीः । आराद्दूरत एवोदयिनीर्लम्बमानाः । द्रवमयत्वात् । यद्वा । आरात्समीपे पिबन्तीति योजना ॥ आराद्दूरसमीपयोरिति विश्वः । चिताभूयस्त्वेनातिभीषणतोक्ता । कीदृशान् । निष्टापेनेषत्तापेन स्विद्यन्त्यसृञ्जि येषाम् । पद्दन् इत्यादिसूत्रेणासृक्शब्दस्यासन्नादेशेऽल्लोपे रूपम् ॥ अस्थ्न इति पाठो न युक्तः ॥ तृतीयादावस्थ्यादिनानङ्विधानात् । यद्वा । प्रेतकायादिति पञ्चम्यन्तः पाठः । अतोस्थ्न इति पञ्चम्यामनङि रूपम् । चिताभ्य इति ल्यब्लोपे पञ्चमी । निसस्तपतावित्यनभ्यावृत्तौ षत्वम् ॥ क्वथनेन पाकक्रमेणाङ्गेषु परिणमज्जीर्यन्मेदो येषां तान्संसृष्टधूमानपि । कीदृशं जङ्घानलकम् । उत्पक्वमुच्छूनं कृत्वा पक्वमत एव स्रंसनशीलं मांसं यस्मात् । यद्वा । उत्पक्वेनोद्गतपाकेन स्रंसि मांसं यस्मात् ॥ उत्पक्व इति भावे क्तः । प्रचलन्तः शिथिलीभवन्त उभयतो जानूरुपर्वणो गुल्फाच्च ये संधयोस्थ्नां परस्परमिलनस्थानानि तैर्निर्मुक्तम् । प्रचलमिति पाठ उभयतः पार्श्वाभ्यां प्रचलम् । अत एव संधिपरिमुक्तमित्यर्थः ॥ कुणपः शवमस्त्रि-

---

१ आर्तः पर्यस्तनेत्रः A. D.; अन्तःपर्य° noticed by Com.; गहनः for दशनः C. २ °द्यदस्त्रः A. D.; परिगलन् for परिणमन् N. ३ घृष्ट्वा B.

उत्पक्वस्रंसिमांसं प्रचलदुभयतः संधिनिर्मुक्तभारा-
देते निष्कुष्य जङ्घानलकमुदयिनीर्मज्जधाराः पिबन्ति ॥

विहस्य । अहो प्रादोषिकः प्रमोदः पिशाचाङ्गनानाम् ।
तथा हि । अन्त्रैः कल्पितमङ्गलप्रतिसराः स्त्रीहस्तरक्तोत्पल-
व्यक्तोत्तंसभृतः पिनह्य सहसा हृत्पुण्डरीकस्रजः ।

यामित्यमरः ॥ नलकं नरहड इति ख्यातम् । सरी इति ख्यातं वा ।
बीभत्स एवात्र रसः ।

९९–१०२. अहो इति बीभत्सशृङ्गारदर्शनेनाश्चर्यम् । प्रादोषिको रात्रिप्रारम्भजः । शृङ्गारबीभत्सयोः परस्परविरोधेपि संस्थानसाम्यात्संभेदाभास इह । प्रसाधनाच्चात्र शृङ्गारः । यदाह ।

ऋतुमाल्यालंकारैः प्रियजनगान्धर्वकाव्यसेवाभिः ।
उपवनगमनविहारैः शृङ्गाररसोपि संभवति ॥

अत एवायं श्लोकः कण्ठाभरणेपि रससंकराभास उदाहृत इति । अन्त्रैरित्यादि । एताः पिशाचस्त्रियः कान्तैः संभूय मिलित्वा कपालचषकैरस्थिस्नेहसुरा मज्जमद्यानि पिबन्ति । कीदृश्यः । अन्त्रै रचितो मङ्गलार्थं प्रतिसरो हस्तसूत्रमूर्णामयं याभिस्ताः । अवैधव्यचिह्नं मङ्गलप्रतिसरो भवति । यद्वा । प्रतिसरः कङ्कणम् । तदप्यवैधव्यचिह्नतया मङ्गलम् ॥ कङ्कणे करसूत्रे च भवेत्प्रतिसरोस्त्रियामिति मेदिनीकारः ॥ स्त्रीहस्त एव रक्तपद्मं तेन व्यक्तमुत्तंसं कर्णभूषणं बिभ्रति याः । सहसा शीघ्रं हृत्पद्ममालाः पिनह्य परिधाय । हृत्पद्मस्य श्वेततया पुण्डरीकपदेनोपन्यासः । यदाह ।

द्वादशाङ्गुलसंपूर्णे श्वेते हृदयपङ्कजे ॥ इति ।

मालाया मनोहरतयान्या मा गृह्णात्विति परिधाने शीघ्रता । अत

१ प्रचलमुभ० noticed by Com. २ निष्कृष्य N. ३ पिशाचानां C. N. ४ C. N. om. तथा हि. ५ शिरसो C. शिरसा D. शिरसां हृत्पुण्डरीकैः स्रजः B.

एताः शोणितपङ्ककुङ्कुमजुषः संभूय कान्तैः पिब-
न्त्यस्थि[1]स्नेहसुराः कपालचषकैः प्रीताः पिशाचाङ्गनाः ॥

परिक्रम्य पुनरशे[2]स्त्रेति पठित्वा। कथं द्रागतिप्रशान्तभीषणभीषिकाप्रका[3]रैर्झटित्यपक्रान्तं पिशाचैः। अहो निःसत्त्वता पिशाचानाम्। परिक्रम्य दृष्ट्वा सनिर्वेदम्। विचितश्चै[4]ष समन्ताच्छ्मशानवाटः। तथा हि[5] सरिदियं पुरत एव।

गुञ्जत्कुञ्जकुटीरकौशिकघटाघूत्कारसंवलि[6]त-
क्रन्दत्फेरवचण्डडात्कृ[7]तिभृतप्राग्भारभीमैस्तटैः।

एव प्रीताः। रक्तकर्दमकुङ्कुमवत्यः। अत्र पिबन्त्यस्थीत्यादौ यतिभङ्गशङ्का न कार्या। संधिकृतपदविच्छेदे तस्यादोषत्वात्। रेवां द्रक्ष्यस्युपलविषमामित्यादौ तथा दर्शनात्॥ चषकं पानपात्रं स्यादिति हारावली॥ इह बीभत्समिश्रः शृङ्गाररसः।

१०५–११२. झटिति शीघ्रम्। विभीषिका परभयदायिनी रौद्ररूपता। तस्याः प्रकारा भेदाः। अपक्रान्तं प्रपलाय्य गतम्। निःसत्त्वा इत्यनेनात्मप्रौढिर्दर्शिता। महामांसविक्रयादपि नेष्टलाभ इति निर्वेदः। विचितो व्याप्तः। तमोव्याप्तत्वेन कथं विचितत्वज्ञानमित्यत आहेयमिति। गुञ्जदित्यादि। इयं सरित्पुरत एवास्ति। पारेश्मशानं श्मशानस्य परदेशे॥ पारे मध्ये षष्ठ्या वेति समासः॥ कुञ्ज एव कुटीरोऽल्पा कुटी तत्र या कौशिकघटा पेचकसमूहः। गुञ्जन्तीनां कुञ्जकुटीरकौशिकघटानां घूत्काररूपं संवल्गितं ध्वनितम्। क्रन्दच्छृगालानां डात्कृतिर्झात्कारः शब्द-

---

१ °न्त्यस्मिन्स्नेह B. २ °रशास्त्रपूर्तेति B. °रशास्त्रानसिति N.; नाम for द्राक् N. द्रागतिप्रशा° B.; अतिभीषणविभीषिका C. N. ३ विकारैः N.; निःसत्त्वाः सर्वे for निःसत्त्वता N.; N om. पिशाचानाम् and परिक्रम्य दृष्ट्वा ४ चैव सर्वतः श्मशा° N. ५ N. om. हि. ६ चलूका° A.; संवलित for संवलित N. ७ डात्कृत C.

अन्तःशीर्णकरङ्ककर्कर[1]तरस्संरोधिकूलंकष- ११०
स्रोतोनिर्गमघोरघर्घररवा पारेश्मशानं सरित् ॥

नेपथ्ये । हा ताद णिक्करुण एसो दाणिं[2] दे णरिन्दचित्ताराह-णोव[3]अरणं जणो विवज्जइ । (क)

(क) हा तात निष्करुण एष इदानीं ते नरेन्द्रचित्ताराधनोपकरणं जनो विपद्यते ।

विशेषः । अनयोर्द्वन्द्वः । ताभ्यां भृतः पूरितो यः प्राग्भारोग्रतटं तेन भीषणैस्तटैर्लक्षिता ॥ लक्षणे तृतीया ॥ अन्तरभ्यन्तरे शीर्णास्त्रुटिता ये करङ्काः कपालानि तेषां कर्करो भग्नावयवः काकर इति प्रसिद्धो वा कर्करो यत्र । अत एव तरतां संतरणशीलानां संरोध्यवरोधकः कूलंकषः कूलविदारको यः स्रोतोनिर्गमस्तेन घोरो घर्घरोव्यक्तरूपो रवः शब्दो यत्र सा । तरः संरोधीति पाठे तरसा वेगेन संरोधि गमननिरोधि । कर्करेण दृढेन तरसा संरोधीत्यर्थः ॥ अल्पा कुटी कुटीरः स्यादित्यमरः ॥ घटाशब्दः समूहमात्रवचनोपि करिघटादौ त्वात्यन्तिकस्तस्य प्रयोग इत्यवधेयम् । घूत्कारश्चात्कृती अनुकरणशब्दौ । फचित्फात्कृतीति पाठः । तत्रापि फात्कृतिरनुकरणशब्द एव ॥ फेरुफेरवजम्बुका इत्यमरः । तटः प्रारभार इत्यपीत्यमरः । कर्करो भग्नभागेपि दृढेपि खण्डितेपि चेति धरणिः ॥ तदिह करङ्ककर्करसंकुलनदीप्रवाहस्तीरं पातयति घर्घररवं च कुरुत इति स्फुटमेव ।

११२–११८. हा तात इत्यत्र हायोगेपि न द्वितीया । हाशब्दस्य शोकवाचिन उपग्रहात् । तस्य च संबोधने प्रथमाप्रयोगात् । तदन्यार्थस्य योगे द्वितीयेति न्यासः । अङ्कमुखे स्त्रीरत्नापहारस्य सूचि-

१ कर्करं for कर्कर N.; तरःसंरोधि D. फलःसरोध A. C. २ णीं D.
३ वअरणो A. °वअरणसाहणं D. वि जणो वावज्जइ B. विपज्जइ N.

माध० । साकूतमाकर्ण्य ।

११९ नादस्तावद्विकलकुररीकूजितस्निग्धतार-
श्चित्ताकर्षी परिचित इव श्रोत्रसंवादमेति ।
अन्तर्भिन्नं भ्रमति हृदयं विह्वलत्यङ्गमङ्गं
देहोत्कम्पः स्खलयति गतिं कः प्रकारः किमेतत् ॥
करालायतनाच्चायमुच्चरन्करुणो ध्वनिः ।

तत्कान्ते ... भणनमिदम् । नाद इत्यादि । अयं तावन्नादः श्रोत्रयोः संवादं पूर्वोपलम्भाकारतामेति । कीदृशः । विकला त्रस्ता या कुररी हापूतीति प्रसिद्धा पक्षिवधूस्तस्याः कूजितवत्स्निग्धः स्नेहलस्तार उच्चश्च । त्रासान्मालत्यास्तारो नादः । अत एव चित्ताकर्षी प्रियत्वाच्चित्तानुकर्षकः । परिचित इव पूर्वमुपलब्ध इव । अत एव श्रोत्रसंवादितास्य । परिचयश्च शंकरगृहे वृत्तः । यदि श्रोत्रसंवादमेति कथं तर्हि विकार इत्यत आह । अन्तर्भिन्नं द्विधाभूतं संशयाक्रान्तं हृदयं भ्रमति दोलायते । उभयत आकर्षात् । अत्र मालतीगमनासंभवात्संवादस्य च स्फुटत्वात् । यद्वा । अन्तर्भिन्नं विद्धमसंभवेनेत्यर्थात् । तथा बन्धुगतानिष्टशङ्काकलङ्कादङ्गमङ्गं विह्वलति । करादीनि कम्पन्त इत्यर्थः । तस्याः कथमिहावस्थानमिति भयाद्देहस्तम्भः । यदाह ।

हर्षव्याधित्रासरोषाद्यैः स्तम्भः संभवति ।

चिन्तास्तिमितत्वाद्गतिश्च स्खलति । कथमकस्मादेव ममेदं वृत्तमिति विमर्शमाह । कोयं प्रकारः किंनिमित्तं स्नेहमाविष्करोति । किमेतत् । सैवेयं किमन्यद्वा तत्तुल्यमित्यर्थः । संमुग्धमिति पाठे कर्णपीडां करोतीत्यर्थः । नादश्रुत्या मोहात् ।

११९–१२३. करालेत्यादि । अयमुत्थितकरुणरसो ध्वनिः कथं वा

१ संमुग्धमे° noticed by Com. २ गात्रस्तंभः N. देहस्तम्भः A. D. स्खलति च गतिः A. D. ३ करुणध्वनिः A. D. N.

विभाव्यते ननु स्थानमनिष्टानां तदीदृशाम् ॥

भवतु पश्यामि । इति परिक्रामति ।

ततः प्रविशतो देवौ[2]र्चनव्यग्रौ कपालकुण्डलाघोरघण्टौ कृतवध्यचिह्ना मालती च ।

माल० । हा ताद णिक्करुण एसो दाणिं[3] दे णरेन्दचित्ताराहणोवअरणं जणो विवज्जइ । हा अम्ब सिणेह[4]मअहिअए हदासि देव्वदुव्विलसिदेण । हा मालदीमअजीविदे[5] मम कल्लाणसाहणेक्कमुक्कसअलव्वावारे भअवदि चिरस्स जाणाविदासि दुःखं सिणेहेण । हा पिअसहि लवङ्गिए सिविणं[6]आवसरमेत्तदंसणा अहं दे संवुत्ता । (क)

(क) हा तात निष्करुण एष इदानीं ते नरेन्द्रचित्ताराधनोपकरणं जनो विपद्यते । हा अम्ब स्नेहमयहृदये हतासि दैवदुर्विलसितेन । हा मालतीमयजीविते मम कल्याणसाधनैकमुक्तसकलव्यापारे भगवति चिरस्य ज्ञापितासि दुःखं स्नेहेन । हा प्रियसखि लवङ्गिके स्वप्नावसरमात्रदर्शनाहं ते संवृत्ता ।

संभाव्यत इत्यन्वयः । उच्चैरनुत्तिष्ठन् । वितर्कसंप्रधारणमाह । नन्विति । ननु संभावनायाम् । ईदृशां संभाव्यमानजातीयानामनिष्टानां जनवधानामिदं करालायतनं स्थानमिति संभाव्यते । वध्यचिह्नं न्यस्तालक्तकेत्यादि ।

१२७–१२९. अत्र भगवति कामन्दकि इति शेषः । चिरस्य बहुकालम् । एकशुभस्थाने । एकमुखमिति पाठ एकमुखमेकवाक्यतापन्नम् । हन्तेति निश्चयलाभे ।

---

१ मंत्रिध्यानं B.; ईदृशं for ईदृशां A. B. C. २ देवता A.; व्यग्रहस्तौ A. D. ३ D. om. दाणिं; विपज्जइ N. ४ N. om. सिणेहमअ; A. D. insert तुमं वि before हदासि; हदंहि for हदासि N. ५ जीविए N.; मह for मम N.; ०णेक्कसुहस्सअल A. °णेक्कसुहसुक्कसअल C. °णेक्कसुक्क सअल N. ६ सिविणअदंसणमेत्ता अहं N. ७ मासः Com. ८ शुभ for मुक्त Com.; °नैकमुख noticed by Com.

माध० । हन्त सैवेयं[1] मदिरेक्षणा । संप्रति निरस्त एव संदेह । सदेहमपि[2] नामैनां जीवन्तीं संभावये । त्वरितं परिक्रामति ।

कापालिकौ[3] । देवि चामुण्डे नमस्ते नमस्ते ।

सावष्टम्भनिशुम्भनिर्भर[4]नमद्भूगोलनिष्पीडन-
न्यञ्चत्कर्परकूर्म[5]कम्पविगलद्ब्रह्माण्डखण्डस्थिति ।
पातालप्रतिमल्लगल्लविवरप्रक्षिप्तसप्तार्णवं
वन्दे नन्दितनीलकण्ठपरिषद्व्यक्तर्द्धि वः क्रीडितम् ॥

१३१–१३५. सावष्टम्भेत्यादि । देवि युष्माकं क्रीडितं नृत्यं वन्दे । कीदृशम् । साटोपो यो निशुम्भो निर्दयपन्त्रणं करणभेदस्तत्तः संभ्रमादा-नमतो भूगोलस्यावनिचक्रस्य निष्पीडनेन न्यञ्चदधोगच्छत्कर्परं पृष्ठास्थि यस्य कूर्मस्य तस्य कम्पेनाङ्गचालनेन विगलन्ती भ्रश्यन्ती ब्रह्माण्डख-ण्डस्य स्थितिर्यत्र तत्तथा । अनेन भूकम्प उक्तः । तथा च नम्रीभूतभूगोले त्वर्णवानामुत्सेकात्पातालतुल्यगल्लविवरे प्रक्षिप्ताः सप्तार्णवा यत्र तत् । नन्दितभैरवसभं च प्रकटविभवम् ।

उत्क्षिप्ता तु भवेत्पार्ष्णिर्निशुम्भोयं निगद्यते ।
अङ्गुल्योग्राञ्चिताः सर्वाः पादाग्रतलसंचरे ॥

इति भरतः ॥ कटाहे च कपालेपि पृष्ठास्थनि च कर्पर इति शाश्वतः ॥ नाट्येश्वरीवर्णनमिदम् ।

---

१ N. om. सै–क्षणा; हरिणेक्षणा B.; N. adds मे before संदेह. २ N. om. अहं; तदहमेवैनां B. °मपि नामैतां C.; N. adds एव after जीवन्तीं. ३ भैरोरघण्टकपालकुण्डले A. कपा–घण्टौ N.; N. om. one नमस्ते. ४ संभ्रम N.; नदन् for नमत् B. ५ कंप N.

अपि च[1] । प्रचलित[2]करिकृत्तिपर्यन्तचञ्चन्नखाघातभिन्नेन्दुनिःस्यन्दमानामृत[3]श्च्योतजीवत्कपालावलीमुक्तचण्डाट्टहासत्रसद्भूरिभूत[4]प्रवृत्तस्तुति, श्वसदसितभुजंगभोगाङ्गदग्रन्थिनिष्पीडनस्फार[5]फुल्लत्फणापीठनिर्यद्विषज्योतिरुज्जृम्भणोड्डामरव्यस्तविस्तारिदो[6]ःखण्डपर्यासितक्ष्माधरम् । ज्वलदनलपिशङ्गनेत्रच्छटाच्छ[7]न्नभीमोत्तमाङ्गभ्रमिग्रस्तता-

१३६–१४४. दण्डकमाह प्रचलितेत्यादि । देवि युष्माकं ताण्डवमुद्धतं नृत्यमस्माकमभीष्ट्या अशुभनाशाय तुष्ट्या आनन्दाय च भूयात् । अरिष्ट्या इति पाठे रिष्टिरशुभं तदभावोऽरिष्टिस्तस्यै । अनेन भाव्यनिष्टार्थसूचकदण्डोऽप्युक्तः । यदाह ।

आकास्मिकमसंवद्धं समर्थमिव यद्भवेत् ।
वाचामन्ते स दण्डः स्याद्भाव्यनिष्टार्थसूचकः ॥

रिष्टिः खड्गे नाशुभे स्त्रीति मेदिनी [illegible] अरिष्टे तु शुभाशुभ इत्यमरः ॥ यद्वा । ऋकारो देवमाता [illegible]दिति कोशादृशब्दात्संबुद्धौ गुणे च हे अः देवमातः इष्ट्या अभी[illegible] भूयादित्यर्थः । कीदृशम् । प्रचलितगजासुरचर्मपर्यन्तेषु भ्रमतां न[illegible]नामाघातैर्भिन्नात्स्फुटिताद्देवीमस्तकस्थचन्द्रात्क्षरदमृतस्य श्च्योतेन [illegible]न जीवन्तीभिः कपालावलिभिर्मुण्डमालाभिर्मुक्तैश्चण्डाट्टहासैरत्युच्च[illegible]नैस्त्रसतां बहुभूतगणानां प्रवृत्ता स्तुतिर्यत्र । यद्वा । भूतगणैः प्र[illegible]वर्तिता स्तुतिर्यत्र तत् ॥ अन्तर्भावितण्यर्थः ॥ यद्वा । प्रचलित[illegible]र्मरूपो वक्षिर्यत्र तत् । पश्चात्कर्मधारयः । तया ताण्डवाडम्ब[illegible]यासेन श्वसतां श्यामसर्पाणां कायैर्ये केयूराकारग्रन्थयस्तेषु निष्पीडनेनोत्काल उद्गतमुखविकासस्तरलो वा फुल्लन्विस्तारिता-

१ अ[illegible]र° for अपि च N. २ प्रचलन् C. ३ अमृतोद्गीत B. ४ भूभृत् for भूत C. ५ उत्फाल for स्फार N.; फुल्ल for फुल्लत् A. ६ व्यक्त C.; विस्तार D. ७ च्छ[illegible]ासारभीमो° B. °विशाङ्गरिखज्जटाजूटभीमो° N.

लातचक्रक्रियास्यूतदिग्भागमुत्तुङ्गखट्वाङ्गकोटिध्वजोद्धूतिविक्षिप्ततारागणं प्रमुदितकटपूतनोत्तालवेतालतालस्फुटत्कर्णसंभ्रान्तगौरीघनाश्लेषहृष्यन्मनस्त्र्यम्बकानन्दि वस्ताण्डवं देवि भूयादभीष्ट्यै च हृष्ट्यै च नः ॥ इत्यभिनयतः ।

माध० । हा धिक् । प्रमादः ।

ङ्गच्चयः फणापीठः । विस्तारितया पीठेन रूपकम् । ततो निर्गतविषाग्नेरुज्जृम्भणेनाधिक्येनोड्डामरः केलिस्तवस्तु [संस्तव ?] रसातिशयी भयंकरो वा विषमो वा व्यस्त इतस्ततोगामी विस्तारी दीर्घो यो दोःखण्डः समूहस्तेन पर्यासितः क्षिप्तः पर्वतो यत्र तत् । देव्या अनेकबाहुशालितया दोःखण्ड इत्युक्तम् ॥ अब्जादिकदम्बे खण्डमस्त्रियामित्यमरः ॥ तथा ज्वलतानलेन पिङ्गलं यन्नेत्रं ललाटलोचनं तस्य च्छटा ज्वालानिर्गमप्रसरस्तस्य साटेन विस्तारेण भीमं यदुत्तमाङ्गं शिरस्तस्य भ्रमिमण्डलाकारेण भ्रमणं तया प्रस्तुता प्रा[illegible]लातचक्रक्रिया वह्निप्रज्वलितार्धकाष्ठविशेषकर्म तया स्यूता इवैकत्र [illegible]बद्धा इव दिग्भागा यत्र तत् । तथातिमहत्खट्वाङ्गाग्रध्वजोत्कम्पाद्विक्षि[illegible] इतस्ततस्तारागणो यत्र तत् । तथा हृष्टकटपूतनोद्भटवेतालानां तालेन कलकलेन स्फुटत्कर्णात एव संभ्रान्ता त्रसन्ती सत्वरा वा गौरी तस्या नि[illegible]डालिङ्गनेन हृष्यच्चित्त त्र्यम्बकं शिवमत्यर्थमानन्दयति ॥ आभीक्ष्ण्ये णिनि[illegible] साटो निकुञ्जे विस्तार इति विश्वः । शृङ्गमग्रेपि कीर्तितमिति शाश्वत[illegible]

१४८–१४९. धिक्प्रमाद इत्यत्र वर्तत इ[illegible]ध्याहारः ॥ तत उपपदविभक्तेः कारकविभक्तिर्बलीयसीति धिग्योगे द्विती[illegible] बाधित्वा प्रथमेत्यवधेयम् ॥ न्यस्तेत्यादि । सेयं भूरिवसोः सुता यस्याः [illegible]ते मयैवं

---

१ स्फुट for स्यूत C.; खड़ाङ्ग A.; तुङ्ग for कोटि N.; ध्वजोद्धत B. D.; ध्वजोद्धति C. २ विकटपूतनो° B. ३ सनाश्लेष B. ४ भरिटौ N.; तुष्टौ for हृष्टौ B. ५ N. om. हा.

न्यस्तालक्तकरक्तमाल्यवसना पाखण्डचण्डालयोः
पापारम्भकयोर्मृगीव वृकयोर्भीरुर्गता गोचरम्।
सेयं भूरिवसोर्वसोरिव सुता मृत्योर्मुखे वर्तते
हा धिक्कष्टमनिष्टमस्तकरुणः कोयं विधेः प्रक्रमः ॥

दुःखमनुभूयते पाखण्डचाण्डालयोर्गोचरं संमुखं गता। पाखण्डेषु चाण्डालौसौ। सद्दर्शनविरुद्धक्रियाकारित्वात्। यदाह।

न भुञ्जीतार्कपत्रेषु स्त्रीबालं नैव घातयेत् ॥

यद्वा। पाखण्डौ च तौ चाण्डालौ च। निषिद्धक्रियत्वात्। यदाह।

वध्यास्तु समाख्याताः सर्वयोनिगताः स्त्रियः ॥

चाण्डालत्वादि। पापारम्भवतोर्मारणप्रवृत्तयोः। न्यस्ते अलक्तकरक्ते माल्यवसने यस्यां सा। एतद्वध्यचिह्नम्। यथा मृगी वृकयोः संमुखं गता तथेयं भीरुः। मृगीत्यनेन भयचलनेत्रतोक्ता। वसोर्देवताभेदस्य। एतेनास्य सुखित्वमुक्तम्। मृत्योर्यमस्य मुखे वर्तते। अत एव हाशब्दः परिदेविते स्त्रीरत्नमपि वध्यत इति। निन्दायां धिगिति। विषादे कष्टम्। कोपेनिष्टम्। अस्ता नष्टा करुणा दया यत्र। एतादृशो विधेरारम्भः कोयम्। निन्दितोयम्। कीदृग्वा ॥ किं वितर्के परिप्रश्ने क्षेपे निन्दाप्रकारयोरिति विश्वः ॥ करुणोयं रसः।

इष्टवधदर्शनाद्वा करुणरसो नाम संभवति ॥

इति भरतः। चण्डालोपि च चाण्डाल इति शब्दभेदः। पुष्पगुणस्रजौ माल्यमित्यमरः ॥

---

१ न्यस्ता° B.; पाषण्ड N. पापण्डचाण्डाल° A. २ °रम्भवतोः A. N.
३ आरिष्टम° B.

कपाल० । तं[1] भद्रे स्मर दयितोत्र यस्तवाभू-

द्देवे[2] त्वां त्वरयति दारुणः कृतान्तः ।

माल० । हा दइअ[3] माहव परलोअगदो वि सुमरिदव्वो तुझोहि अअं जणो । ण हु सो उवरदो जस्स वल्लहो जणो[4] सुमरेदि । (क)

कपाल० । हन्त माधवानुरक्तेयं तपस्विनी[5] ।

अघोर० । शस्त्रमुद्यम्य[6] । यदस्तु तदस्तु व्यापादयामि ।

(क) हा दयित[7] माधव परलोकगतोपि स्मर्तव्यो युष्माभिरयं जनः । न खलु स उपरतो यस्य वल्लभो जनः स्मरति ।

१५०–१५७. त्वं भद्रेत्यादि । प्रहर्षिणीच्छन्दसा श्लोकार्धम् । चामुण्डे भगवतीत्याद्यग्रिमार्धम् । हे भद्रे यस्तव दयितो भर्तृत्वेन इष्ट-स्तं स्मर । गुरुत्वात्स्मरणमस्य । यदाह ।

पतिरेको गुरुः स्त्रीणामिति ।

यद्वा । मदुपहरणीयत्वेन स इह जन्मनि ते वल्लभो न भूत एव । अतो जन्मान्तरेपि तल्लाभाय तं स्मर । यदाह ।

यं यं चापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।

तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥ इति ।

कृतान्तो यमः । स्मरणफलमाह [न खलु स उपरत इति] । यद्येश-त्राधीगर्थेति कर्मणि षष्ठी ॥ यस्य गुणमिति वा । अन्तकाले माधवस्मरणं मुक्तिहेतुरिति कटाक्षितम् । हन्त खेदे । कामन्दकीमित्रपुत्रत्वात्ममापि माधवस्तादृश एव । तदनुरक्ता चेयं कथं वध्येति खेद इति भावः । अत

१ त्वं A. B. C. D. २ °देव त्वां A. ३ A. adds णाह after दइअ; B. om. माहव; D. N. om. वि. ४ N. om. जणो and has सुमरइ. ५ वराकी before तपस्विनी A. B. C. D. ६ B. om. शस्त्र-°म्य; शक्तिमुद्यम्य A.; N. om. यद-°यामि. ७ Com. has नाथ for हा दयित.

चामुण्डे भगवति मन्त्रसाधनादा-
वुद्दिष्टामुपनिहितां भजस्व पूजाम् ॥

इति[1] हन्तुमुपक्रान्तः ।

माध० । सहसोपसृत्य प्रकोष्ठे मालतीं[2] विक्षिप्य । दुरात्मन् अपेहि । प्रतिहतोसि कापालिकापसद[3] ।

माल० । सहसावलोक्य । परित्ताअदु[4] मं महाभाओ । (क)

इति[5] माधवमालिङ्गति ।

(क) परित्रायतां मां महाभागः[6] ।

एव तपस्विन्यनुकम्प्या । उद्दिष्टां वाचा प्रतिज्ञाताम् । उपनिहितामुपढौकिताम् ।

१५९–१६७. कफोणेरधोभागो मणिबन्धपर्यन्तः प्रकोष्ठः । विक्षिप्यापसार्य । खड्गहस्तत्वेन बाहुमध्येपसारणं जातिः । प्रतिहतो निराकृतः । अपसद निन्दित । मरणेत्यादि । सोयं तव मित्रं पुरत एव वर्तत इत्याक्षेपात् । यो बकुलवीथ्यादिषु सानुरागदर्शनप्रसक्तया त्वया स्वीकृतः । मरणसमय इत्यनेनानुराग उक्तः । यदाह ।

साहसानुरक्तं हि स्त्रियो भजन्त इति ।

तत्र मुक्ताशङ्को निर्भयः । पाखण्डादिति भावः । अत एव प्रतापेन निरर्गलोनभिभाव्यः । प्रलापेति पाठे हा नाथ माधवेत्यादिमालतीप्रलापेन निरर्गल उच्छृङ्खल इत्यर्थः । त्यक्त्वा शङ्कामिति पाठे शङ्कां भयं

---

1 N. om. इति–क्रान्तः. 2 खड्गं for मालतीं B. N.; निक्षिप्य for विक्षिप्य A. B. D.; N. adds आः before दुरात्मन्. A. om. अपेहि.; A. adds एव before प्रतिहतोसि. 3 A. adds नन्वयं न भवसि after this. 4 N. repeats परित्ताअदु and om. मं; महाणुभा° A. B. महाभावो C. D.; A. adds पाहयो at the end. 5 B. om. इति and has तम् for माधवम्. 6 Com. adds माधव: at the end.

माध० । महाभागे न भेतव्यं न भेतव्यम् ।

मरणसमये त्यक्त्वा शङ्कां प्रलापनिरर्गलं
१६९ प्रकटितनिजस्नेहः सोयं सखा पुर एव ते ।
सुतनु विसृजोत्कम्पं संप्रत्यसाविह पाप्मनः
फलमनुभवत्वुग्रं पापः प्रतीपविपाकिनः ॥

अघो० । आः क एष पापोऽस्माकमन्तरायः संवृत्तः ।

कपा० । भगवन् स एवास्याः स्नेहभूमिः कामन्दकीसुहृज्जनो
१७० महामांसस्य पणायिता माधवः ।

माध० । सास्रम् । महाभागे किमेतत् ।

लज्जादिकं वा त्यक्त्वा प्रतापनिराकुलो वा प्रतापनिरङ्कुशो वेत्यर्थः । यद्वा । शङ्कां त्यक्त्वा यं प्रति त्वया प्रकटितो निजस्नेहः सोयमित्यर्थः । यद्वा । अयं कीदृशः । प्रकाशितात्मस्नेहः । मरणसमये रक्षणादिति भावः । हे सुतनु अत उद्भवं कम्पं त्यज । असौ पापः संप्रत्येव पाप्मनो निषिद्धाचरणस्य फलं मरणरूपमुग्रं तीव्रमनुभविष्यति । संप्रतीत्यनेन प्रकृतोपयुक्तं निजाप्तत्वं पौरुषं च ध्वनितम् । कीदृशस्य । प्रतीपो विपरीतो विपाको विरुद्धपरिणतिर्यत्र तस्य ॥ अनुभवत्वित्यत्र वर्तमानसामीप्ये वर्तमानवद्वेति भविष्यति लट् ॥ शृङ्गारवीररसभेदोत्र ।

१६८–१८०. अन्तरायो विघ्नः । भूमिः स्थानम् । नासातिशयाच्छिरान्निःश्वासः । अत्रोपरि सौधोपरि । अलिन्द ओट इति प्रसिद्धे । यूयमिति । अहमबला सुप्ता चान्येनानीता यूयं धीराधीरा विबुधा अपी-

---

१ A. B. om. one न भेतव्यम्. २ मुक्ताशङ्को Com.; प्रलाप for प्रलाप A. B. D. निरर्गलप्रेम° A. C. D. निरर्गलः B. ३ स पुनः N. ४ N. adds अयं after पापो. ५ भगवत्या एवास्याः A.; N. om. भगवन्. ६ ण° A. C. D. N.; A. adds नाम at the end.

माल० । चिरादाश्वस्य । महाभाअ अहं णं किं पि जाणामि । एत्तिअं उण जाणामि उवरिअलिन्दअं पसुत्ता इह पबुद्धह्मि । तुह्मे उण कहिं । (क)

माध० । सलज्जम् । त्वत्पाणिपङ्कजपरिग्रहधन्यजन्मा १७५
भूयासमित्यभिनिवेशकदर्थ्यमानः ।
भ्राम्यन्मृमांसपणनाय परेतभूमा-
वाकर्ण्य भीरु रुदितानि तवागतोऽस्मि ॥

(क) महाभाग अहं न किमपि जानामि । एतावत्पुनर्जानाम्युपर्यलिन्दकं प्रसुप्तेह प्रबुद्धास्मि । यूयं पुनः क्व ।

दानीमिह किमर्थमागता इत्यर्थः । त्वदित्यादि । हे भीरु महामांसविक्रयाय श्मशाने भ्रमंस्तव क्रन्दितान्याकर्ण्यागतोऽस्मि । महामांसविक्रयफलमाह । त्वदिति । त्वद्विवाहेन धन्यजन्मा पुण्यजन्माहं भवामीत्यभिनिवेशनातियत्नेनावेशेन वा कदर्थ्यमानः पीड्यमानः । अतस्त्वां विना न मे जीवनमिति संभाव्यमानफलतया मांसविक्रये प्रवृत्तोस्मीति भावः । त्वत्पादपङ्कजेति पाठे प्रेयसीचरणग्रहणस्य मान एव कर्तव्यतया मानप्रसादनमेवोत्तरोत्तरं चरितेत्याशंसितवान् । अत एव सलज्जमित्युक्तमिति भावः ॥ धन्यः पुण्यवति स्मृत इति विश्वः ॥ कुत्सितोर्थः कदर्थः । भीरु इत्यनेन रोदनोपपत्तिरुक्ता । तदिह त्वन्निमित्तमहं साहसी त्वं पुनः कीदृशीति न मान

---

१ N. adds वि before ण and om. किंपि. N. has आणामि for जाणामि. २ दाणिं for उण N. ३ °लिन्दे A. लिंदए D.; पसु° A. D. ४ पडिबु° B. N. परिबु° A. ५ त्वत्पाणि A. D. पाद for पाणि noticed by Com.; पुण्यजन्मा A. ६ Com. om. किं and has अपि before न. Com. adds एव after एतावत्. ७ °लिन्दके Com. विबु° Com.

माल० । स्वगतम्[1] । कथं मम कारणादो एव्वं[2] अप्पाणिरवेक्खो परिक्कामदि[3] । (क)

माध० । अहो नु खलु भोस्तदेतत्काकतालीयं नाम[4] । संप्रति हि

राहोश्चन्द्रकलामिवाननचरीं दैवात्समासाद्य मे
दस्योरस्य[5] कृपाणपातविषयादाच्छिन्दतः प्रेयसीम् ।

(क) कथं मम कारणादेवमात्मनिरपेक्षः परिक्रामति[6] ।

इति तात्पर्यम् । अत एव हर्षविस्मयवशादाह [मालती कथमित्यादि] । परिभ्रमणमितस्ततो गमनम् । आत्मनिरपेक्षः श्मशानभ्रमणेन ।

१८१–१८५. विस्मयेऽहो नु खलु भोः । काकतालीयमचिन्तितोपनतम् । यथा काकागमनतालपतनयोरेकदा संभवो दैवाधीनस्तथेदमपीत्यर्थः । राहोरित्यादि । दैवाद्विधिवशादासाद्य प्राप्य । अर्थात्प्रियाम् । अस्य दस्योश्चौरस्य खड्गपातविषयात्प्रेयसीमाकर्षतो मम चेतः कथं वर्तताम् । नवनवरसोदयात्तन्न जान इत्यर्थः । कामिव । राहोराननचरीमिन्दुकलामिव । कृपाणपातविषयामिति पाठे खड्गपतनस्य विषय आश्रयो यत्र तामेतादृशीं प्रेयसीं प्राप्य कथं मम चेतो वर्ततामिति योजना । यद्वा । अस्य कीदृशस्य । आच्छिन्दतो द्विधाकर्तुमुद्यतस्य । प्रियामित्यर्थात् । ततो जीवनाभाव एवास्या इति भावः । चौरिकयापहरणेन दस्युत्वम् । तदिह प्रथमार्धेन हेतुरुक्तः । द्वितीयेन फलमाह । आतङ्काञ्चितचमत्कारादिकलं नत्वस्य निसर्गसात्त्विकस्य भयमिति यद्यपि तथापि प्रियप्राप्त्या जीवनसव्यपेक्षतया भयमुचितमेव पूर्वं तु जीवननिरपेक्षतया निर्भयत्वमित्यातङ्को भयमेव । राहोरित्युपमानं भयहेतुः । चन्द्रकलोपमया जग-

१. अपवार्य B.; A. D. add हद्धी हद्धी before कधं; कहं मह काल° N. २ एव्व N.; B. D. om. एव्वं; A. N. add एदे after एव्वं. ३ °वेक्खा A. N. परिक्कामन्दि A. पडिक्कामदि B. पडिभमन्ति N. ४. B. om. नाम. ५ चोरस्य C., समयात् for °विषयात् B. °विषयां noticed by Com. ६ परिभ्रमति Com.

आतङ्काद्विकलं द्रुतं करुणया विक्षोभितं विस्मया-
त्क्रोधेन ज्वलितं मुदा विकसितं चेतः कथं वर्ततां[1]॥ १८५

अघो०। [2]रे रे ब्राह्मणडिम्भ।

व्याघ्राघ्रात[3]मृगीकृपाकुलमृगन्यायेन हिंसारुचेः
पापं[4] प्राण्युपहारकेतनजुषः प्राप्तोसि मे गोचरम्।

न्नेत्रोत्सव हरीयं व्यसनमुपगतेति करुणया द्रवीभूतम्। दैवादासाद्येति विस्मयाद्विचलितम्। दस्योरित्यनेन मालतीमयं हन्तुमुद्यतश्चौर इति कोपेन दीप्तम्। आच्छिन्दतः प्रेयसीमिति प्रियाजीवननिर्वाहेन हर्षेण प्रसन्नम्।

१८६–१९०. ब्राह्मणेति सिद्ध्यनुगुणशुचित्वार्थं यज्ञोपवीतधारणात्। डिम्भो बालकः। ब्राह्मणकपालभोजिनो मम ब्राह्मणवधेपि न दोष इत्युक्तमनेनेत्यपि भावः। व्याघ्रेत्यादि। हे पाप मालत्युपहारकृत्यपरस्य मे गोचरं समीपं यत्प्राप्तोसि। अत एव विघ्नकारितया पापेति। कीदृशस्य मे। व्याघ्रगृहीतहरिणीकृपयाकुलो यो मृगस्तन्न्यायेन मृगीमनुसरन्व्याघ्रसंनिधौ पतन्मृगस्तस्य भक्ष्यो भवत्येवं हिंसारुचेः। एनां न रक्षसि त्वं तु म्रियस इति भावमाश्रित्य। पाठान्तरं हिंसारुचे इति संबोधनं वा। सोहं भवतैव प्रागग्रे भूतजननीं जगन्मातरं चण्डिकामृध्नोमि प्रीणयामि॥ ऋधु वृद्धाविति स्वादिरपीति धातुप्रदीपः॥ कीदृशेन। खड्गाहत्या व्यस्तस्कन्धश्छिन्नग्रीवः। अत एव कबन्धस्तस्य रन्ध्राद्रुधिरप्राग्भारं श्चोतनं समूहं वा निःस्यन्दितुं शीलं यस्य तेन। रुचेरिति पञ्चम्यन्तपाठे रुचेर्हेतोर्मे गोचरं प्राप्तोसीत्यर्थः। पापस्थाने प्रायःपाठे समस्तमेव पदम्॥ केतनं कृत्ये केतावुपनिमन्त्रण इत्यमरः। गोचरस्तु समीपे

---

१ वर्तेत C. N. २ अरे for रे रे N. ३ घ्राण C. ४ पापः C. प्राय[illegible]
noticed by Com.

सोहं प्राग्भवतैव भूतजननी[1]गृह्णामि खड्गाहति-
१९० च्छि[2]न्नस्कन्धकबन्धरन्ध्ररुधिरप्राग्भारनिःष्यन्दिना ॥

माध० । दुरात्मन् पाख[3]ण्डचण्डाल ।

असारं संसारं परिमुषितरत्नं त्रिभुवनं
निरालोकं लोकं मरणशरणं बान्धवजनम् ।

स्यादिति धरणिः ॥ यत एव च्छिन्नग्रीवोत एव कबन्ध इति हेतुहेतुम-
द्भावेनोक्तिपोष एव । वीररसोयम् ।

१९१–१९५. मारणेपराधमाह । असारमित्यादि । हे पाखण्ड
जगदसारं सारशून्यं विधातुं कर्तुं कथं व्यवसितः कृतप्रारम्भोसि ।

अश्यक्यानि दुरन्तानि समव्ययफलानि च ।
असत्यानि च कार्याणि नारभेत विचक्षणः ॥

इति न श्रुतं त्वया । तथा च संसारसारभूतेयमेव । अनया विनासार
एव स इति । यदाह ।

सारं तु महिलारत्नं संसार इति निश्चयः ॥ इति ।
जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षते ॥ इति ।

तत्सर्वभाकृष्येयं निर्मिता । अतो रत्नमियम् । मनोहरत्वदीप्तिमत्त्व-
तरलत्वादिनेयं वा रत्नम् । अत एव तदभावात्परिमुषितरत्नं त्रिभु-
वनं कर्तुं व्यवसितोसि । तदेतत्सर्वविषयं चौर्यं दुरन्तमिति भावः ।
इयमतिकान्त्या जगदुद्द्योतयतीत्यालोकभूता । एतदभावान्निरालोकं तमः-
प्रविष्टं लोकं जनं कर्तुं व्यवसितोसि । अत एवोत्कृष्टं प्रति लोकोक्तिस्ते-
न विनान्धकारस्तत्सत्त्व उद्द्योत इति । बान्धवजनानामेतत्सखीनामिय-
ञ्जीवनहेतुः । अत एतन्नाशान्मरणशरणं सखीजनं विधातुं व्यवसितोसि ।

---

१ गृह्णोमि B. २ व्यस्त N. ३ ०षण्ड A. N.; चाण्डाळ A. B. D.

अदर्पं कन्दर्पं जननयननिर्माणमफलं
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः ॥ १९९

अपि च । रे[1] पाप ।

प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥ २००

अघोर० । दुरात्मन् प्रहर नन्वयं न भवसि ।

अन्यस्त्रीनाशे तत्सख्यो दुःखिताः । एतन्नाशे तु म्रियन्त एवेति भावः । अत्रासारं संसारमित्यादिना नायिकागतरामणीयकातिशयवर्णनमुपक्रम्य मरणशरणमित्यादिस्नेहविषयताप्रतिपादनात्तैकवाक्यतयैकरसनिर्वाह इत्यदेऽपथम् । मात्रादिबन्धुव्यतिरिक्तोदासीनबान्धवसंग्रहपराज्जनशब्दात्त्वस्यैव माधवस्तथा विधत्तिं सूचयतीत्यदोषात् । तदीयनानागुणचिन्तनादेव मरणशरणता ममेत्यारब्धनिर्वाहाच्च । कन्दर्पश्चैतया मोहनास्त्रेण दर्पं करोति । एतदभावाददर्पं कन्दर्पम् । जननयनस्यैतद्दर्शनमेव फलम् । अत एतन्नाशात्तदफलम् । जगदनयालंकृतमेव । एतदभावाज्जीर्णारण्यतुल्यं तदिति । अत्र प्रियाप्रशंसया शृङ्गारो बन्धुमरणात्करुणः पाखण्डाक्षेपाद्वीरः कथमित्यद्भुतमिति नाना रसाः ।

१९९–२००. पुनरपि दोषमुद्भाव्य दण्डं चिकीर्षुराह । प्रणयीत्यादि । हे पाप तव शिरस्येष भुज आकस्मिकयमदण्ड इव पततु । आकस्मिकत्वेनाप्रातिक्रियत्वमुक्तम् । कीदृशस्य । तत्र वपुषि वधाय शस्त्रमुत्तोलयतः । अत्र भुजपदेन बाहुव्यापारमात्रेणैव हन्तव्योऽसीति शौर्यातिशय उक्तः । यद्वपुः सुकुमारशिरीषपुष्पाघातैरपि ताम्यति खिद्यति । कीदृशैः । सप्रश्रयस-

---

१ रे रे A. N. २ प्रणय C. N.; रसाभिगतैः C. ३ ओं दुरा° A.; B. N. repeat प्रहर; B. om. ननु and has एष for अयं.

माल॰ । पसीद णाह साहसिअ[1] । दारुणो क्खु अअं हदासो । परित्तासु[2] मं पडिणिअत्तीअदु इमादो अणत्थसंसआदो । (क)

कपा॰ । भगवन् अप्रमत्तो भूत्वा दुरात्मानं[3] व्यापादय ।

माधवाघोरघण्टौ मालतीकपालकुण्डले प्रति । अयि भीरु

धैर्यं निधेहि[4] हृदये हत एष पापः
किं वा कदाचिदपि केनचिदन्वभावि ।
सारङ्गसंगरविधाविभकुम्भकूट-

(क) प्रसीद नाथ साहसिक । दारुणः खल्वयं हताशः । परित्रायस्व[5] मां प्रतिनिवर्ततामस्मादनर्थसंशयात् ।

खीसविलासपरिहासरसप्राप्तेः । अत्रापि शृङ्गारवीरकारुण्यसंभेदः । [माल॰ वा॰] अत्र त्वज्जीवने मम जीवनमपि सफलम् । अन्यथा तु मरणमेव वरमिति भावः । मालतीव कपालकुण्डलापि स्वनाथमाह । भगवन्निति । अवष्टम्भार्थमप्रमत्त इति ।

२०५–२०९. द्वयोर्भयं ज्ञात्वोभावाहतुः । धैर्यमित्यादि । हे भीरु त्वं हृदये धैर्यं कुरु । एष पापी हतः । अस्य वधे कुतः संशय इति वृथा भयं त इति भावः । अत्र युक्तिमाह । सारङ्गेण मृगेण सह युद्धविधाने हरेः सिंहस्य प्रमादोऽनवधानता किं वा केनचित्कदाप्यनुभूतः । कीदृशस्य । इभकुम्भरूपं यत्कूटमुच्चप्रदेशस्तत्कुट्टनशीलं हस्त एव वज्रं यस्य । यद्वा । हरेरिन्द्रस्य हस्तिना सह युद्धे नास्ति प्रमादः । कीदृशस्य । हस्तिकुम्भवत्पीवरशृङ्गकुट्टाकं पाणिस्थकुलिशं यस्य ॥ कुम्भकूटपाणिकुलिशपदे शाकपार्थिवा-

१ A. adds णाम after साहसिअ; एसो for अअं N.; B. om. अअं; N. om. हदासो. २ A. om. परित्तासु मं, ता परित्ताअदु D. परित्ताअ N.; C. N. om. पडि; णिवत्तअदु N. °वत्तीअदु B. ३ विक्रमस्व for दुरा– °द्रय B. °दयस्व N. ४ निधाय C. ५ Com. om. परि–मां and has तत् before प्रतिनि°.

कुट्टाकपाणिकुलिशस्य हरेः प्रमादः ॥

नेपथ्ये कलकलः । सर्व आ[1]कर्णयन्ति ।

पुन[2]र्नेपथ्ये । भो भो मालत्यन्वेषिणः सैनिकाः इयममात्यभूरिव-सुमाश्वासयन्त्यप्रतिहतप्रज्ञा[3]गतिर्भगवती कामन्दकी वः समादिशति । पर्यवष्टभ्यतामेतत्करालायतनम्[4] ।

नाघोरघण्टादन्यस्य[5] कर्मैतद्भीषणाद्भुतम् ।
न करालोपहाराच्च फलमन्यद्विभाव्यते ॥

कपा० । भो[6] भगवन् पर्यवष्टब्धाः स्मः ।

अघोर० । संप्रति विशेषतः पौरुषस्यावसरः ।

माल० । हा ताद हा भअवदि । (क)

(क) हा तात हा भगवति ।

दिः ॥ सारङ्गः पुंसि हरिणे चातके च मतङ्गज इति मेदिनीकारः ॥ वीरो रस इह ।

२११-२२०. मालतीगृहकथाकथनायाह । भो भो इति । अप्रतिहतेति सत्यवचनेत्यर्थः । एतेनाघोरघण्टकृतो मालत्यपहार इति कामन्दकीवचनं सत्यम् । मालतीमाधवयोश्च विवाहः सत्य इति षष्ठाङ्कावतार इति सूचितम् । पर्यवष्टम्भनं सर्वतो वेष्टनम् । नेत्यादि ।

१ समाकर्ण° B. २ B. N. om. पुनर्नेपथ्ये; अन्वेषणत्वराः B.; N. om. सैनिकाः ३ प्रतिज्ञा for प्रतिज्ञागतिः A. B.; N. om. प्रज्ञा; B. om. भगवती; N. om. वः; समाज्ञापयति for समादिशति D. ४ A. B. C. add द्रुतम् after °यतन and make this line the first half of a s'loka. A. has thus a s'loka and a half while the second half in B. C. is न करालो°–°भाव्यते, and for नाघोर–द्भुतम् they have कपालकुण्डलाप्रणयिनो नाघोरघंटादन्यतश्चैतत्कर्म भीषणाद्भुतम्, which in C. occurs between and in B. after the two halves. ५ °दन्यस्मात् N. दारुण for भीषण N. ६ A. N. om. भो.

माध० । भवतु बान्धवसमाज[1]सुस्थितां मालतीं विधाय तमस्मक्षमेनं [2]व्यापादयामि । मालतीमन्यतः कापालिकं चान्यतः प्रेरयन्परिक्रामति ।

माधवाघोरघण्टौ । अन्योन्यमुद्दिश्य । [3]आः पाप

कठोरास्थिग्रन्थिव्यतिकर[4]रणत्कारमुखरः

खरस्नायुच्छेदक्षणविहित[5]वेगव्युपशमः ।

एतत्कर्म मालत्यपहरणात्मकं भीषणं सिंहकौशल[कैशोर ?]हरणात् । अद्भुतं बहुरक्षकरक्षिताया अपि हरणात् । स्त्रीत्वाद्भयेन पलायनेच्छुराह । भगवन्निति । संग्रामादपसरणस्याधर्महेतुतया सात्त्विकतया चाह । संप्रतीति । पौरुषं पुरुषस्य व्यापारस्तेजो वा ॥ पौरुषं पुरुषस्योक्तं भावे कर्मणि तेजसीति विश्वः ॥ मालती तत्रावेगातिशयादाह । हा तात हा भगवति इति । मालतीरक्षार्थं कापालिको मया हत इत्यमात्यो जानात्वित्याशयेन मालतीं च कातरां वीक्ष्याह भवत्विति । बान्धवेत्यादिना भाविकार्योपयोग उक्तः । अन्यतः कापालिकादन्यदेशं स्वसंमुखमिति यावत् ।

२२३–२२६. द्वावप्येकश्लोकेन प्रहारव्यापारमाहतुः । कठोरेत्यादि । हे पाप ममासिः खड्गस्तव प्रत्यङ्गं लवशः खण्डं खण्डं सपदीदानीमेव विक्षिपतु । कर्दमेष्विव मांसपिण्डेषु निरातङ्को यथारुचि विचरन्सन् । कीदृशः । कठिनास्थिग्रन्थिघटनेन यो रणत्कारोऽव्यक्तध्वनिस्तेन मुखरः सशब्दः । कठिनस्नायुच्छेदेषु मुहूर्तं कृतवेगोपरमश्च ।

कतीह पञ्चमाङ्कके स्फुरन्ति नोद्भटा रसाः ।

मदीयबुद्धिरल्पिका क वेद तानशेषतः ॥

---

१ B. om. सु; बान्धवसंस्थामेनां विधाय N.; D. adds ततः before तं.
२ A. D. have दुरात्मानं after एनं; B. om. the second अन्यतः; N. om. कापालिकं चान्यतः. ३ रे रे for आः N. ४ क्षणत्कार N., मुखरा° B.
५ खेद for वेग B.; व्युपरम: N.

निरातङ्कः[1] पङ्क्तिष्विव पिशितपिण्डेषु विलस- २२९
न्नसिर्गात्रं गात्रं सपदि लवशस्ते विकिरतु ॥

इति निष्क्रान्ताः सर्वे[2] ।

श्मशानवर्णनं[3] नाम पञ्चमोऽङ्कः ।

प्रासोष्ट यं रत्नधरोतिभव्योतिभव्यरूपा दमयन्तिकापि ।
जगद्धरं तत्कृतटिप्पणेङ्कोगमन्मनोहारिणि पञ्चमोयम् ॥

॥ पञ्चमोऽङ्कः ॥

---

१ °तङ्कं N.; खण्डेषु for पिण्डेषु N. २ D. om. सर्वे. ३ A. B. N. om. श्मशान°–नाम; A. has मालतीमाधवे before पञ्च°; संपूर्णः after अङ्कः D.

॥ षष्ठोऽङ्कः ॥

[१] ततः प्रविशति कपालकुण्डला ।

कपा० । [२] आः दुरात्मन् मालतीनिमित्तं व्यापादितास्मद्गुरो माधवहतक [३] अहं त्वया तस्मिन्नवसरे निर्दयं निघ्नत्यपि स्त्रीत्यवज्ञाता । सक्रोधम्[४] । तदवश्यमनुभविष्यसि कपालकुण्डलाकोपस्य विजृम्भितम्[५] ।

शान्तिः कुतस्तस्य भुजंगशत्रोर्यस्मिन्नमुक्तानुशया सदैव[६] ।
जागर्ति दंशाय निशातदंष्ट्राकोटिर्विषोद्गारगुरुर्भुजंगी ॥ १ ॥

१–७. संप्रति पूर्वाङ्कवृत्तगुरुवधवर्तमानाङ्कभाविमालतीविवाहभाविष्यदङ्कमालतीहरणान्याह । तत इत्यादि । आः पीडायां कोपे च ॥ आस्तु स्यात्कोपपीडयोरित्यमरः ॥ स्त्रीनिमित्तं कापालिकवधेन पापेति । इहानुभविष्यसीत्यनेन क्रमरूपो गर्भसंधिरुक्तः । यदाह ।

भाविनोऽर्थस्य यज्ज्ञानं क्रमः स परिकीर्तितः ॥

दुरात्मन् कामोपहतात्मन् । विजृम्भितं मालत्यपहरणेनेति भावः । तदेवाह । शान्तिरित्यादि । तस्य भुजंगशत्रोः सर्पहिंसकस्य गरुडस्य वा कुतः शान्तिर्निर्वृतिरुपशमो वा । अपि तु नैव । यस्मिन्नत्यक्तकोपा तिग्मदन्ताग्रा विषोद्गारेण दुःसहा सर्पी सदैव दंशाय जागर्ति । एवकारेण मुहूर्तमात्रमपि न स्वस्थेत्याशयः । अनुशयो गाढरोषः । गरुडपक्षे तादृशी दंशार्थं जागर्ति । तस्यातिबलत्वान्न तत्करोतीति युक्तमेव ।

---

१ प्रविश्य कपा–ला N. २ D. adds पाप after आः; N. om. माल–त्तं; निपातितास्मद्गु° C. विनिपातितास्मद्गु° D. N. ३ B. adds च after अहं; निघ्नतापि C.; N. om. अपि. ४ B. om. सक्रोधम्; D. adds फलर्द्धि after अवश्यम्; D. om. कोपस्य. ५ विजृम्भितो D. °म्भितस्य फलं N. ६ यदैव B.

नेपथ्ये । [1]भो राजानश्चरमवयसामाज्ञया संचरध्वं
कर्तव्येषु श्रवणसुभगं भूमिदेवाः पठन्तु ।
चित्रं नाना[2]वचननिवहैश्चेष्ट्यतां मङ्गलेभ्यः
प्रत्यासन्नस्त्वरयतितरां जन्ययात्राप्रवेशः ॥ २

[3]यावत्संबन्धिनो न परापतन्ति तावद्वत्सया मालत्या नगरदेवतागृहमविघ्नमङ्गलाय गन्तव्यमित्यादि[4]शन्ति भगवतीनिदेशवर्तिनो-

८–११. अधुना विवाहमङ्गलकृत्यं दर्शयति । हे राजान इत्यादि । जन्या वरस्य स्निग्धास्तेषां यात्रायाः प्रवेशो वधूगृहप्राप्तिः प्रत्यासन्नः समीपवर्त्यत एवात्यर्थं त्वरयति । ततो भो राजानः क्षत्रियाः विवाहकृत्येषु चरमवयसां वृद्धानामाज्ञया संचरध्वं प्रवर्तध्वम् । विवाहारम्भे वृद्धोपदिष्टमेव कर्मकारैः क्रियते । इह तु प्रभुतातिशयान्नृपा एव कर्मकारा इति दर्शितम् । भूमिदेवा ब्राह्मणाः कर्णमनोहरं यथा तथा पठन्तु । वैवाहिकमङ्गलवेदानित्यर्थात् । यद्वा । यद्वेदस्वरूपं श्रवणसुभगं मङ्गलत्वात्तत्पठन्त्वित्यर्थः । पुरन्ध्रीर्लक्षीकृत्याह । नानारचनानां मङ्गलादीनां समूहैः करणैश्चित्रमद्भुतं यथा तथा चेष्ट्यताम् ॥ भावे तङ् ॥ यद्वा चित्रं नानाकर्म । केचिन्मङ्गलगीतं केचिद्वाद्यं केचिन्नृत्यं कुर्वन्त्वित्यर्थः । मङ्गलेभ्यो मङ्गलं कर्तुम् ॥ क्रियार्थोपपदस्येति चतुर्थी । तादर्थ्ये वा । संचरध्वमिति समस्तृतीयायुक्तादिति तङ् ॥ वरस्निग्धेपि जन्यः स्यादिति मेदिनीकारः ॥ एतेन चोरिकाविवाहमङ्गलमपि ध्वनिनोक्तम् ।

१२–१७. संबन्धिनो वरस्य भ्रात्रादयः । पित्रादीनां नन्दने वृद्धे संभवादिति । परापतन्त्यायान्ति । अविघ्नेति माधवविवाहायेति भावः । नन्द-

१ हे N. २ वचननिवहैश्चेष्टतां B. चेष्टतां C. रचन for वचन A. D. ३ C. N. add च after यावत्; वत्सया D.; A. B. add सह after मालत्या. ४ C. adds नो after °शन्ति; for आदिश°—दाराः N. has आदिशति भगवती कामन्दकी.

मात्यदाराः । अन्यत्र[1] यथा गृहीतसविशेषमण्डनः प्रतीक्षितामानुयात्रिको जनः।

कपा० । भवेत्वितो[2] मालतीविवाहकर्मसत्वरप्रतीहारशतसंकुलात्[3]प्रदेशादपक्रम्य माधवापकारं प्रत्यभिनिविष्टा भवामि । इति निष्क्रान्ता । विष्कम्भकः[4] ।

ततः प्रविशति[5] कलहंसकः ।

अणित्तोह्मि[6] णअरदेवदागब्भघरट्ठिदेण समअरन्देण णाहमाहवे-

नविवाहस्य विघ्नवत्त्वात् । निदेश आज्ञा । अमात्यो भूरिवसुः । दाराः स्त्रियः । अनुयात्रानुगमनं तत्र नियुक्त आनुयात्रिको मालत्यनुगामी । कामन्दकीनामश्रवणभीता निष्क्रमणार्थमाह । भवत्विति । परिकर्मेतिकर्तव्यता । अपक्रम्येति । [अ]मङ्गलवेशतयान्येनापि संभावितनिःसारणा यत इति भावः । माधवापकारमित्यनेनाष्टमाङ्कं सूचयन्ती किंमुदद्योतयति । अभिनिविष्टा बद्धकक्षा ।

१९–२७ हे राजान इत्यादौ श्लेषेण चोरिकाविवाहस्याप्यभिधानाज्जन्यपदेन माधवपरिजनतया कलहंसस्यापि वचनात्तत्प्रवेशमाह । प्रविश्येति । गर्भगृहवर्तित्वेन माधवस्य गुप्तत्वम् । राजविरुद्धचोरिकाविवाहस्य दुष्करतया कामन्दकीप्रतिज्ञासत्यत्वेन च संदेहवानाह । मालत्या इत्यादि । ममास्य विप्रलम्भजक्लेशस्य सर्वथोभयप्रकारेण निश्चितमद्यान्तः समाप्तिः । कीदृशस्य । मृगदृशो मालत्याः प्रचुरप्रेम्णा यानि विचेष्टितानि तैः परां

---

१ A. D. om. अन्यत्र; तथा C. तदा D. for यथा; N. om. यथा; गृहीतविशेष° B. C. D.; प्रतीक्षितां A. N. २ N. om. भवतु; N. om. मालती; विवाहपरिकर्म A. N.; D. om. कर्म; D. om. शत. ३ A. D. insert अस्मात् after संकुलात्; N. om. इति. ४ शुद्धविष्कंभः N. ५ प्रविश्य कलहंसः N. ६ आणत्तह्मि D. N.; हर for घर C; ट्ठिदेण A. वट्टिणा for ट्ठिदेण N.; पराड्डिदमाहवसभासवट्टिणा सअरन्देण B. C.; णाहेण for णाहमाहवेण N.

ण जह[1] जाणाहि दाव जत्ताहिमुहं पउत्ता मालदी ण वेत्ति । ता जाव ण आणन्दइस्सं । (क)

ततः प्रविशतो माधवमकरन्दौ ।

माध० । मालत्याः प्रथमाव[2]लोकदिवसादारभ्य विस्तारिणो
भूयःस्नेहविचेष्टितैर्मृगदृशो नीतस्य कोटिं पराम् । २९
अद्यान्तः खलु सर्वथास्य मदनायासप्रबन्धस्य मे
कल्याणं विदधातु वा[3] भगवतीनीतिर्विपर्येतु वा ॥

मक० । वयस्य क[4] भगवत्याः सुमेधसो नीतिर्विपर्येष्यति ।

(क) आज्ञप्तोऽस्मि नगरदेवतागर्भगृहस्थितेन समकरन्देन नाथमाधवेन यथा जानीहि तावद्यात्राभिमुखं प्रवृत्ता मा[illegible] न वेति । तद्यावदेनमानन्दयिष्यामि ।

कोटिं प्रकर्षकाष्ठां प्रापितस्य [illegible]दर्शनदिनादारभ्य विस्तारं गतेः । तत्र प्रथमे बकुलवीथिविसृष्टाभिः [illegible]वचित्रावलोकनादिना तृतीये स्वप्नोपभोगवर्णनादिना चतुर्थे [illegible]शाककरस्पर्शादिना पञ्चमे भयकम्पिताङ्गालिङ्गनादिना विस्त[illegible] भावः । पर्यवसानमाह । भगवतीनीतिः कामन्दकीनिसृष्टार्थदूतीव[illegible] कल्याणं शुभं मालतीविवाहलक्षणं वा करोतु विपर्येतु विफला वा भवतु । तथा च विवाहे सति शृङ्गारसंभोगलाभेन कामायासशान्तिः । विपर्यये मरणादिति भावः ।

२८–३७. सुमेधसः सुबुद्धेः । विपर्येष्यति विपर्ययमेष्यति । [कल० वा] अत्र यात्रा गमनम् । तस्य मुखमारम्भम् । तद्वाक्यस्याश्वासपरत्वं तर्कयन्नाह । अपीति । अपि नामेति संभावनायाम् । अस्माकमित्यादि । वा

---

१ N. om. जह; जभा B.; N. om. दाव; जत्तामुहं A.; पत्तोमुह N.; N. om. ता; २ °वलोकनदिना° A.; विस्तारितैः A. ३ मे for वा B.; ४ हि after कथं A. B.; सुमेधाया: N.; शक्तिः for नीतिः N.

कल० । उपसृत्य । णाँह दिट्ठिआ वड्ढसि पउत्ता क्खु जत्ताहिमुहं मालदित्ति । (क)

माध० । अपि नाम सत्यम् ।

मक० । सखे किमश्रद्दधानः पृच्छसि । न केवलं प्रवृत्ता प्रत्यासन्ना च वर्तते । तथा हि ।

अस्माकमेकपद एव मरुद्विकीर्ण-
जीमूतजालरसितानुकृतिर्निनादः ।
गम्भीरमङ्गलमृदङ्गसहस्रजन्मा
शब्दान्तरग्रहणशक्तिमपाकरोति ॥

तदेहि जालमार्गेण [illegible]याश्रः । तथा कुर्वन्ति ।

कल० । णाह पेक्ख पेक्खं [illegible] घ उप्पडिअराअहंसविब्भमा-

(क) नाथ दिष्ट्या वर्धसे प्रव[illegible]लु यात्राभिमुखं मालतीति ।

तविस्तारिमेघसमूहशब्दिततुल्यो ग[illegible]ङ्गलार्थमुरजसहस्रजन्मा शब्द एकपद एकस्मिन्क्षणेऽस्माकं शब्दान्त[illegible]सामर्थ्यं निराकरोति । वाद्यरवेणान्यशब्दो न श्रूयत इत्यर्थः । सहस्र[illegible]मनेकोपलक्षणम् । सहस्रपत्रवत् ।

३९–४६. माधवोत्साहार्थमाह नाथेति । अत्र उत्पतित उड्डीनः । विभ्रमो विलासो विशिष्टभ्रमणं वा । अभिरामस्तुल्यः । उद्वेल्लन्कम्पमानः । कदलिका पताका । तरंगितं तरंगयुक्तम् । उत्तानमगभीरम् । गगतमेव°

१ माहव after णाह A.; हि for क्खु C.; एत्तोहिमुहं for जत्ताहिमुहं B. C.; एत्तोमुहं N.; जत्तामुहं A. २ N. om. त्ति ३ N. om. नाम; एतत् after सत्यम् N. ४ B. om. सखे; इव after °दधान A.; निर्गता for प्रवृत्ता C. ५ अपि for च D. ६ एकपदमेव A.; विदीर्ण for विकीर्ण C. ७ निनद for रसित D. ८ श्रवण for ग्रहण N. ९ पश्याव: C. १० पेक्खस्स A.; इमे-ण दाव A.; °डिद D.; रासमंडली for राअहंस C.

हि[1]राममचामरसमीरणोव्वेल्लकदलिआवलीतरंगिदुत्ताणगअणङ्गणसरोवराणिरन्तरुद्दण्डपुण्डरीअविब्भमं [2]वहन्तो धवलादवत्तणिवहा दीसन्ति। इ[3]माओ सविलासकवलिदतम्बूलवीडिआपूरिदकवोलमण्डलाओ अव्वइअरक्[4]खलिदमहुरमङ्गलुग्गीअवद्धकोलाहलेहिं विविहरअणालंकारकिरणावलीवि[5]डम्बिदमहिन्दचावखण्डविच्छेदविच्छुरिदणहत्थलेहिं वारसुन्दरीकदम्बेहिं अज्झासि[6]आ झणन्तकणअकिङ्किणीजालझणझणझंकारिणीओ करिणीओ। (क) माधवमकरन्दौ सकौतुकं पश्यतः।

(क) नाथ प्रेक्ष[7]स्व प्रेक्षस्व। एते तावदुत्पतितराजहंसविभ्रमाभिरामचामरसमीरणोद्वेल्लकदलिकावलीतरंगितोत्तानगगनाङ्गनसरोवरनिरन्तरोद्दण्डपुण्डरीकविभ्रमं वहन्तो धवलातपत्रनिवहा दृश्यन्ते। इ[8]माः सविला-

सरः। उद्दण्डमुद्गतदण्डम्। आतपत्रं छत्रम्। मङ्गलातपत्रमिति पाठे विवाहे शुक्लच्छत्रस्य प्रशस्ततया मङ्गलपदेन श्वेतत्वमुक्तम्। एताः कारिण्यश्च दृश्यन्त इत्यन्वयः। चकारोत्राध्याहर्तव्यः। चर्वितं भक्षितम्। व्यतिकरः संघट्टः। स्खलितं भङ्गिमत्। मङ्गलोद्गीतं मङ्गलरूपमुच्चैर्गानम्। विडम्बितं सदृशीकृतम्। विच्छेदः खण्डः। विच्छुरितं व्याप्तम्। झणझणारूपो झंकारशब्दः।

१ °भिराम B. C. N.; णुव्वेल्लिअ N.; कअलीआ° B. C. कअलिआ° N.; उत्ताण for °दुत्ताण N.; °दुत्ताल A.; उत्ताणगणसरो° D.; सरोअर A. सरो N. २ वहन्ता B. D.; मंगलधवलातवत्त N.; तवत्त C.; °संदि for °सन्ति D. ३ एदा अ for इमाओ A.; C. N. om. इमाओ; चव्विद for कवलिद D. कवलिअन्तो N.; तम्बोल A. B. C.; वेडिआ for वीडिआ B.; वीटिआ A. C.; N. om. वीडिआ; पूरिअ A. N.; °भोग for °भोअ N.; D. om. अइअर. ४ खलिअ N.; °गीद A.; N. om. बद्ध. ५ °डम्बिअ C. D. N.; C. D. om. खण्ड; विच्छेअ A.; °रिअ A.; गणंगणेहिं for णहत्थलेहिं C. णहलेहेहिं B. ६ °सिदा N.; कणन्त A. N.; N. om. जाल; झणझणा D. N.; झंकारि° C. ७ पश्य पश्य Com. ८ एताश्च Com.

मक[1]० । स्पृहणीयाः खल्वमात्यभूरिवसोर्विभूतयः । तथा हि ।

प्रेङ्खद्भूरिमयूख[2]मेचकचयैरुन्मेषिचाषच्छद-
च्छायासंवलितैर्विवर्तिभिरिव प्रान्तेषु पर्यावृताः ।
व्यक्ताखण्डलकार्मुका इव भवन्त्युच्चित्रचीनांशुक-
प्रस्तारस्थगिता इवोन्मुखमणिज्योतिर्वितानैर्दिशः ॥

सकवलि[3]तताम्बूलवीटिकापूरितकपोलमण्डलाभोगव्यतिकरस्खलितमधुर-मङ्गलोद्गीतबद्धकोलाहलैर्विविधरत्नालंकारकिरणावलीविडम्बितमहेन्द्रचाप-खण्ड[4]विच्छेदविच्छुरितनभःस्थलैर्वारसुन्दरीकदम्बैरध्यासिता उत्कणत्कन-ककिङ्किणीजालझणझणझंकारिण्यः करिण्यः ।

४८–५१. प्रेङ्खदित्यादि । तरणिकिरणसंपर्कादूर्ध्वमुखैर्मणिदीप्तिसंघैर्विवर्तिभिरितस्ततो गतैः प्रान्तेषु निकटेषु पर्यावृता व्याप्ता इव दिशो व्यक्तेन्द्रचापा इव भवन्ति । कीदृशैः । प्रेङ्खन्त इतस्ततश्चलन्तो भूरीणां सुवर्णानां मयूखाः किरणा यत्र तादृशो मेचकः स्निग्धश्चयो येषु तैः । मयूरमेचकनिभैरिति पाठे प्रेङ्खन्नृत्यन्यो बहुमयूरस्तस्य मेचकाच्चन्द्रकान्निरतिशया भा येषां तैः ॥ मेचकश्चन्द्रके स्निग्धे श्यामलेऽपि च दृश्यत इति विश्वः । भूरि क्लीबं सुवर्णे च प्राज्ये स्याद्वाच्यलिङ्गक इति मेदिनीकारः ॥ उन्मेष्युड्डीनो यश्चाषः पक्षिभेदस्तस्य च्छदच्छायया पक्षकान्त्या संवलितैर्विमिलितैः । कीदृश्यः । उद्गतचित्रस्य चीनदेशभववस्त्रस्य प्रस्तारेण शय्यया प्रसारेण वा च्छन्ना इव ॥ प्रस्तारस्तानितं शय्येति हारावली ॥ मणय इहाभरणस्थरत्नानि ।

१ सस्पृहं after मक° D.; रमणीयाः for स्पृह° A. D. २ मयूर for मयूख A. N. निभैः for चयैः N.; चापच्छद A. ३ चर्वित for कवलित Com.; तंबूलावलिपूरित Com. ४ Com. om. खण्ड; क्वणत्कनक Com.

कल० । कधं[1] ससंभमाणेक्कपडिहारमण्डलावाडिजदुज्जलकणअक-लेहौअवत्तविचित्तवेत्तलदापरिक्खित्तरेहारइदमण्डलो[2] दूरदो ज्जेव्व से संट्ठिदो परिअणो । एसा अ बहलसिन्दूरणिअरसंज्झाराओवरत्त-[3]मुहघोलन्तकन्तणक्खत्तमालाभरणधारिणिं[4] करेणुरअणिं अलंकरन्ती इदो ज्जेव्व[5] कोदूहलुम्मुहसमत्थलोअदीसन्तमणुहरा पण्डुरपरिक्खाम-देहसोहा[6] पढमुग्गअचन्दलेहाविब्भमं वहन्ती किंपि अन्तरं पसरिदा मालदी । (क)

(क) कथं ससंभ्रमानेकप्रतिहारमण्डलावर्जितोज्ज्वलकनककलधौत-पत्त्रविचित्रवेत्रलतापरिक्षिप्तरेखारचितमण्डलो दूरत एवास्याः संस्थितः परिजनः । एषा च बहलसिन्दूरनिकरसंध्यारागोपरक्तमुखघूर्णत्कान्त-

---

५२–५८. अत्रावर्जिता तिर्यक्त्यक्ता । कनकं हिरण्यम् । कलधौतं रजतम् ॥ कलधौतं हेमरौप्ययोरिति विश्वः ॥ पङ्केन लेपेन । वेत्रलता वेत्रदण्डिका । परिक्षिप्ता रचिता । मण्डल इति । अस्मान्मण्डलात्केनापि न बहिर्गन्तव्यमिति भावः । दूरत एव मालत्या इत्यर्थात् । पृथुसिन्दूरपूर एव संध्यारागस्तेनोपरक्ता किंचिदारक्ता चटुला चपला घूर्णती लम्बमाना या नक्षत्रमाला सप्तविंशतिमौक्तिकमाला हस्तिप्रसाधनभेदो वा सैवाभरणं

---

१ कहं N.; °णेभ B. N.; °दुज्जलन्त N.; C. om. कणअ. २ कलधौद B. °धौअ N; N. om. वत्त; पङ्क for वत्त A. D. चित्त for विचित्त C. N; क्खद for खित्त B.; रइअअ N.; दूरादो N.; N. om. ज्जेव्व; A. D. N. om. से. ३ B. om. बहल, बहुल N.; °परत्त D. N.; चडुल after °वरत्त A. D. ४ B. D. om. मुह, मुहं C.; कणअ for कन्त C.; हरण for भरण B. °रिणीं A. C. D. N.; रअणिं D.; °रन्ति D. ५ एत्त्र for ज्जेव्व N.; °हलुप्फुल्लमुह N; समच्छ for समत्थ A. समत्त N.; मणहरा N; पाण्डु–क्खम A. ६ N. adds विभाविआणंगवेभणा after सोहा; पढमअन्द A. पढमचन्द D. पुढमचन्द N. अन्द for चन्द C.; दूरं for अन्तरं B. किंवि C. किंचि A. D. N.; पाविदा for पसरिदा N. ७ पङ्क for पत्त Com. ८ रागोपरक्त-चटुलघूर्णत Com.

मक० । अयस्य पश्य पश्य

इयमवयवैः पाण्डु[1]क्षामैरलंकृतमण्डना
कलितकुसुमा बा[2]लेवान्तर्लता परिशोषिणी ।
वहति च वरारोहा र[3]म्यां विवाहमहोत्सव-
श्रियमुदयिनीमु[4]द्गाढां च व्यनक्ति मनोरुजम् ॥

कथं निषादिता गजवधूः ।

नक्षत्रमालाभरणधारिणी करेणुरजनीमलंकुर्वतीव एव कौतूहलीन्मुखस-मस्तलोकदृश्यमानमनोहरा पाण्डुरपरिक्षामदेहशोभा प्रथमोद्गत[5]चन्द्रले-खाविभ्रमं वहन्ती किमप्य[6]न्तरं प्रसृता मालती ।

तद्धारिणीम् । रात्रिपक्षे नक्षत्रमाला तारकामाला । करेणुर्हस्तिनी सैव रात्रिस्ताम् । दृश्यमाना चासौ मनोहरा चेति समासः । पाण्डुरा धूसरा परिक्षामातिकृशाङ्गदीप्तिर्यस्याः सा । एतेन चन्द्रकलासाम्यमुक्तम् । दृश्यमानेत्यनेनान्येषां दर्शनमात्रं तत्र परमुपभोगो मालत्या इति सूचि-तम् । पाण्डुरेत्यादिना मालत्यामान्तर उद्वेग उक्तः । किंचिदन्तरं किय-द्दूरम् । प्रसृतागता । कलधौतटङ्कपत्रेति पाठे टङ्कपत्रं पट्टिकेत्यर्थः ।

६०–६४. इयमित्यादि । इयं वरारोहा प्रशस्तश्रोणिका विवाह-महोत्सवसंपत्तिं प्रकृष्टां रम्यां च वहति । सहजरमणीयत्वात् । उद्गाढां प्रबलां चित्तपीडां च प्रकाशयति । कीदृशी । पाण्डुक्षामैरङ्गैरलंकृतभू-षणा । अतिरम्यतयामीभिरेव भूषणान्यलंक्रियन्त इति भावः । अन्तरभ्य-न्तरे परिशोषिणी । अत एवाङ्गानां पाण्डुक्षामत्वम् । कलितं परिहितं कुसुमं यया सा । बाला षोडशवर्षवयस्का । अवयवैरित्यनेन सर्वाङ्गीणं पाण्डुत्वाद्युक्तम् । लतेव । यथा लता नवा वसन्तादिप्रभावात्पुष्पाणि

---

१ पाण्डुकान्तैः B.; मण्डला D. २ बालेयन्ती B. ३ रम्या B. ४ उद्गूर्णां for उद्गाढां N. ५ प्रथमचन्द्र Com. ६ किंचिदन्तरं Com.

माध० । सानन्दम् । कथमवतीर्य [1]भगवतीलवङ्गिकाभ्यां समभितः प्रवृत्तैव ।

ततः [2]प्रविशति कामन्दकी मालती लवङ्गिका च ।

काम० । [3]सहर्षमपवार्य ।

विधाता भद्रं नो वितरतु मनोज्ञाय विधये
विधेयासुर्देवाः परमरमणीयां परिणतिम् ।
[4]कृतार्था भूयासं प्रियसुहृदपत्योपयमने
प्रयत्नः कृत्स्नोयं फलतु शिव[5]तातिश्च भवतु ॥ ७ ॥

कुतश्चिद्धेतोरदन्तःपरिशोषं वहति तथेयमपीत्यर्थः । निषादिता उपवेशिता । अवतारणार्थमिदम् ।

६८–७५. सहर्षमित्यभीष्टसंपादनादिति भावः । विधातेत्यादि । नोऽस्माकं मनोज्ञाय हृदिस्थाय विधये व्यापाराय प्रकृतविवाहाय भद्रं कुशलमविघ्नं विधाता ददातु ॥ विधय इत्यत्र तादर्थ्ये चतुर्थी । क्रियार्थोपपदस्येति वा ॥ वृत्तेपि कार्ये राजविरोधादनिष्टमाशङ्क्याह । परमरमणीयामविरोधिनीं परिणतिमुत्तरविशुद्धिं देवाः कुर्वन्तु । स्वस्यापि फलमाह । अहं कृतकृत्या भूयासम् । यतो मालतीमाधवयोर्विवाहे समस्तोयं प्रयत्नः फलतु । उत्तरकालशुद्ध्या फलदायी भवत्वित्यर्थः । परिणतिशुद्ध्या शिवदायी भवतु । कल्याणकरोस्त्वित्यर्थः । शिवतातिश्च भवत्विति पाठे शिवतातिः शिवकरः ॥ सर्वदेवात्तातिलित्यनुवर्तमाने शिवशमरिष्टस्य कर इति तातिल् ॥ अत्र मरणमेव सर्वदुःखनाशकतया निर्वाणं मोक्षस्तस्यान्तरमवसरः । यद्वा । मरणमेव निर्वाणं निर्वृतिः सुखम् ॥ निर्वाणं निर्वृतौ मोक्ष इति विश्वः । अन्तरमवसराध्यात्मसदृशेष्विति मेदिनीकारः ॥

---

१ भगवती मालतीलवङ्गिकाभ्यां सहितेन एव प्रवृत्ता B., C. same as B. but has समं for सहिता. २ ततः प्रविशन्ति ताः B. ३ D. om. सह–र्षं. ४ कृतार्थीभूयासं A. D. °सुहृदि यत्नैरभिमतः N. ५ शिवदायी A.

माल० । स्वगतम्[1] । केण उण उवाएण संपदं मरणणिव्वाणस्स अन्तरं संभावइस्सं । मरणंपि[2] मन्दभाअधेआणं अहिमदं त्ति दुल्लहं होदि । (क)

लव० । स्वगतम् । अदिकिलाम्मिदा[3] क्खु पिअसही एदिणा अणुऊलविप्पलम्भेण । (ख)

प्रविश्य पेट्टालकहस्ता[4] प्रतीहारी । भअवदि अमच्चो भणादि एदिणा णलिन्दाणुप्पेसिदेण[5] विवाहणेवत्थेण देवदापुरदो अलंकरिदव्वा मालदित्ति[6] । (ग)

(क) केन पुनरुपायेन सांप्रतं मरणनिर्वाणस्यान्तरं संभावयिष्ये । मरणमपि मन्दभागधेयानामभिमतमिति दुर्लभं भवति ।

(ख) अतिक्लामिता खलु प्रियसख्येतेनानुकूलविप्रलम्भेन ।

(ग) भगवति अमात्यो भणत्येतेन नरेन्द्रानुप्रेषितेन विवाहनेपथ्येन देवतापुरतोलंकर्तव्या मालतीति ।

संभावयिष्ये सम्यक्प्राप्स्यामि ॥ भू प्राप्ताविल्यस्यात्मनेपादिनो रूपम् ॥ सांप्रतमित्यनेन माधवालाभान्नन्दनलाभविलम्बनाच्चेति दर्शितम् । मन्दभाग्यतया माधवप्राप्तिवन्मरणमपि न स्यादिति भावः ।

७६–९० अत्र क्लामिता क्लमं श्रमं प्रापिता । अनुकूलेन माधवेन सह विप्रलम्भो विरहस्तेन । यद्वा । अनुकूलो नन्दनस्तस्य विप्रलम्भेन वञ्चनया । पेटकं मञ्जूषा ॥ पेटकं पुस्तकादीनां मञ्जूषायां कदम्बके इति

१ B. om. स्वगतं; N. om. उण; अन्तरेण for उवाएण B.; अन्तरं B. २ णंवि A. C. D. N.; °हेआणं A. °हेआए N.; सुदुल्लहं A. ३ अति° A. C.; °मिदा B.; N. om. क्खु; B. om. एदिणा, एदेण N.; अणुकू° C. D. ४ पेटक A. D.; अमच्चो भअवदीं विण्णवेदि A. अमच्चो भअवदीं भणादि L. एदेण for एदिणा N. ५ णरेन्दा° B. N.; णेवच्छेण A. D. N.; अलंका° ६ °दीत्ति D. ७ Com. with A.

काम० । युक्तमाहामात्यः[१] । माङ्गलिकं तत्स्थानमतो दर्शय ।

प्रती० । एदं[२] दाव धवलपट्टंसुअचोलअं एदं च उत्तरीअं रत्तवण्णंसुअं[३] इमे अ सव्वाङ्गिआ आहरणसंजोआ अअं च मोत्तिआहारो चन्दणं कुसुमापीडो[४] अ । (क)

काम० । अपवार्य । रमणीयं हि[५] वत्समकरन्दमवलोकयिष्यति मदयन्तिका[६] । प्रकाशम् । गृहीत्वा । भवत्वोमित्युच्यताममात्यः ।

प्रती० तथा[७] । इति निष्क्रान्ता ।

काम० । लवङ्गिके प्रविश त्वमभ्यन्तरं वत्सया मालत्या[८] सह ।

(क) इदं तावद्धवलपट्टांशुकचोलकमेतच्चोत्तरीयं रक्तवर्णांशुकमिमे[९] च सर्वाङ्गिका आभरणसंयोगा अयं[१०] च मौक्तिकाहारश्चन्दनं कुसुमापीडश्च ।

मेदिनीकारः ॥ पेटकग्रहणं तु नन्दनप्रसाधनार्थम् । [प्रती० वा०] अत्र नेपथ्यं प्रसाधनम् । युक्तमिति । एतत्प्रसाधनेन मकरन्दमलंकृत्य मदयन्तिकां विवाहयिष्यामीति भावः । माङ्गलिकं मङ्गलहेतुः । अत्र धवलं यत्पट्टं सूत्रमयमंशुकं तेन निर्मितश्चोलकः कूर्पासकः ॥ चोलः कूर्पासकोऽस्त्रियामित्यमरः ॥ उत्तरीयरूपं रक्तांशुकं सिन्दूरीवस्त्रम् ॥ आपीडः शेखरेऽस्त्रियामिति मेदिनीकारः ॥ भवतीति संबोधनम् । गुरुसमक्षं मालत्यनुरागानुभवो माधवस्य न स्यादत उक्तं प्रविश त्वमिति । विविक्ते विजने ।

---

१ N. om. अमात्यः; एतत्स्थानं A. इतो for अतो D. N. २ इदं A. B.; पट्ट° A. पट्टंसुअं D. N.; °चोळ° A. D.; N. om. चोलअं; अ for च N.; °रीअवण्णंसुअं N. ३ रत्तंसुअं B.; सव्वङ्गिआहरण C. भरण N.; इमे for अअं N.; अ for च N.; मोत्तिअहारा N.; एदं before चन्दणं A. D. N. ४ एस च सितकुसु° D. एदं सितकुसुमापीडं त्ति N. ५ N. om. हि. ६ जनः for मदयन्तिका N.; एवं for ओमिति A.; भवति एवं N. ७ N. om. तथेति. ८ वत्से before लवङ्गिके A. D.; B. N. om. मालत्या. ९ Com. om. वर्ण; एते for इमे Com. १० एष for अयं Com.; इदं चन्दनं एष च सितकुसुमापीडः Com.

लव० । अध[1] भअवदी उण कहिं । (क)

काम० । अहमपि तावद्[2]विविक्तलंकरणरत्नानां प्राशस्त्यं शास्त्रतः परीक्षिष्ये । इति निष्क्रान्ता ।

माल० । स्व[3]गतम् । लवङ्गिआमेत्तपरिवाराह्मि संवुत्ता । (ख)

लव० । एदं[4] देवदामन्दिरदुवारं पविसह्म । इति प्रविशतः । (ग)

मक० । वयस्य[5] इतस्तावत्स्तम्भापवारितौ तिष्ठावः । तथा कुरुतः ।

लव० । सहि अअं[6] अङ्गराओ इमाओ कुसुममालाओ । (घ)

माल० । तदो किं । (ङ)

(क) अथ भगवती पुनः क ।

(ख) लवङ्गिकामात्रपरिवारास्मि संवृत्ता ।

(ग) एतद्देवतामन्दिरद्वारं प्रविशावः ।

(घ) सखि अयमङ्गराग इमाः कुसुममालाः ।

(ङ) ततः किम् ।

९२–९७. [मा० वा०] हृद्गतमरणावकाशप्राप्त्या सानन्दोक्तिरियम् । [ल० वा०] बाह्यसंवेदनाभावान्मालती न पश्यतीति भावः । अपवारितं व्यवहितम् । अत्राङ्गरागः कुङ्कुमादिः । तत्प्रयोजनमपश्य-

---

१ N. om. अअ; N. om. कहिं. २ B. om. तावत्; B. om. अलंकरण. ३ आत्मगतं N.; A. D. add करे before लवङ्गिआ°; परिअणाह्मि B.; N. adds प्रकाशम् after संवुत्ता and gives the following speech to मालती. ४ इदं A. C. D.; ता पविसह्म A.; B. D. om. पविसह्म; पविसदु पिअसही N.; B. N. om. इति. ५ N. om. वयस्य; इतस्तम्भापवारितशरीरौ A. D.; N. om. तावत्; °पवारितौ पश्यावः N. ६ इअं N.; °राआ N.; इमाइं कुसुमाइं B. ७ एव Com.

लव० । सहि[1] इमस्सिं पाणिग्गहणारम्भे कल्लाणसंपत्तिणिमित्तं देवदाओ पूजेहि[2] त्ति अम्बाए अणुप्पेसिदासि । (क)

माल[3]० । कीस दाणिं दारुणसमारम्भदेव्वदुव्विलासपरिणामदुःखणिद्दद्ध[4]माणसं पुणो पुणो णिव्वेददूसहं मं मन्दभाइणिं दूमावेसि[5] । (ख)

लव० । अह[6] किं सि वत्तुकामा । (ग)

(क) सखि अस्मिन्पाणिग्रहणारम्भे कल्याणसंपत्तिनिमित्तं देवताः पूजयेत्यम्बयानुप्रेषितासि ।

(ख) किमिदानीं दारुणसमारम्भदैवदुर्विलासपरिणामदुःखनिर्दग्धमानसां पुनः पुनर्निर्वेददुःसहं मां मन्दभागिनीं दुनोषि ।

(ग) अथ किमसि वक्तुकामा ।

न्तीवाह । ततः किं मयानेन कर्तव्यमित्यर्थः । अत्र पाणिग्रहणेति सामान्योक्त्या माधवनन्दनयोर्विवाहश्लेषेण नर्मस्फोटोऽयं भावः । यदाह ।

श्लेषेणोक्तिस्तु भावानां नर्मस्फोट इतीरितः ।

१००–१०८. अत्र दुर्विलासपरिणामः प्रियत्यागाप्रियप्राप्तिलक्षणः । दुःसहमिति क्रियाविशेषणम् । अनया श्लिष्टं मद्वचो न ज्ञातमत इयमेव वदत्वित्यत आह [लवङ्गिका] । अत्राभिनिवेशिना मनोरथेन

---

१ B. om. सहि; इदस्सिं C.; ग्गहणमङ्गलारम्भे A. °ग्गाहमङ्गला° N. २ पूजेसि त्ति C.; अच्चेहि त्ति N.; °गुत्तेसि° C. ३ N. inserts स० after मालती; किं for कीस A.; दाणीं B. C. D.; दुव्विलसिद B. ४ णिब्भालिद A. निहलिअ N. and णिव्वज्जीविद C. for णिद्दद्ध; B. D. om. one पुणो; वि after पुणो A. B. C. D.; मम्मच्छेअ A. and मम्मच्छेद D. N. for णिव्वेद. दुःसहं A.; C. N. om. मं; °इणीं A. B. C. D. ५ दुणेसि B. दुणावेसि C., दूमिज्जेदि N. ६ अइ A. अयि D. N. om. अह. ७ Com. with A. D. N. ८ Com. with A. D.

८ Com. with A. D. N. ९ Com. with A. D.

माल० । जं[1] दाणिं दुल्लहाहिणिवेसमणोरहविसंवदन्तभाअधेओ जणो मन्तेदि । (क)

माक० । सखे श्रूयताम्[2] ।

माध० । श्रुतमसंतोषश्च[3] हृदयस्य ।

माल० । लवङ्गिकां परिष्वज्य । परमत्थबहिणि[4] पिअसहि लवङ्गिए एसा दाणिं[5] दे पिअसही अणाहा मरणे वट्टमाणा आगअभणिग्गमाणिभिदाणिरन्तरोवआरोवरूढवीसम्भसरिसं[6] परिस्सइअ तुमं पत्थेदि जइ दे अहं अणुवट्टणीआ तदो मं हिअएण धारअन्ती सम-

---

(क) यदिदानीं दुर्लभाभिनिवे[8]शमनोरथविसंवदद्भागधेयो जनो मन्त्रयते ।

विसंवादं प्रतिकूलं भाग्यं यस्य सः । माधवे दुर्लभां वाञ्छां मत्वाह सखे श्रुतामिति । श्लिष्टे वचस्यनिष्टाशाङ्कितमाहासंतोष इति ।

१०६–१११. अत्र परमार्थेत्यादिना विश्वासपात्रत्वमुक्तम् । विरूढ उपचितः । सदृशं यथा तथा परिष्वज्येत्यन्वयः । अनुवर्तनीयोपकर्तव्या । समग्रसौभाग्यपदेनारविन्दस्पर्धिनी शोभोक्ता । यदाह ।

उत्तमैर्गुणिभिः स्पर्धा या सा शोभा प्रकीर्तिता ॥

मां हृदये धारयन्तीत्यनेन परंपरया ममापि दर्शनं स्यादित्युक्तम् ।

---

१ किं for जं N.; दाणीं C.; अभिणिवेसि D., अहिणिवेसि A., अभिणि° N.; मणरह N.; भाअहेओ D. N. २ श्रुतं A. N. ३ असंतोषश्च B.; तु for च C. N; हृदये D. ४ A. C. D. insert ता before परम°; भइणि N. ५ दाणीं B. D. ६ D. om. णिग्ग–द; N. om. णिम्मिद; °रोपआरविरूढ A. °रोवआर B. °रन्तरोपारूढ N.; विस्सम्भ N.; मरिस्सइअ B. परिस्सजीअ N.; N. om. तुमं. ७ अब्भत्थेदि for पत्थेदि N.; जादि N.; °वट्टिणीआ for °वट्टणीआ D.; हिअए for हिअएण C.; धारन्ती N. ८ °निवेशि or निवेशित Com. विसंवादि for विसंवदत् Com.

भासोहग्गलच्छीपरिग्गहेक्कमङ्गलं माहवसिरिणो[1] मुहारविन्दं आणं-[2]
न्दमसिणं अवलोअइस्ससि । (क) इति रोदिति ।

माध० । वयस्य मकरन्द

म्लानस्य जीवकुसुमस्य विकासनानि[3]
संतर्पणानि सकलेन्द्रियमोहनानि ।

(क) [4]परमार्थभगिनि प्रियसखि लवङ्गिके एषेदानीं ते प्रियसख्यनाथा मरणे वर्तमानागर्भनिर्गमनिर्मितानेरन्तर्योपकारोप[5]रूढविस्रम्भसदृशं परिष्वज्य त्वां प्रार्थयते यदि तेहमनुवर्तनीया ततो मां हृदयेन[6] धारयन्ती समग्रसौभाग्यलक्ष्मीपरिग्रहैकमङ्गलं माधवश्रियो मुखारविन्दमानन्दमसृणमवलोकयिष्यसि ।

माधवश्रिय इत्यत्र प्राकृते पूर्वनिपातानियमाच्छ्रीमाधवस्येत्यर्थः । आनन्दमसृणत्वेन स्निग्धा दृष्टिरुक्ता ।

११३–११६. म्लानस्येत्यादि । वचांस्येवामृतानि मयापि दिष्ट्या निर्णीतानि । त्वया श्रुतमित्यादिना निर्णीतानि मया त्वधुनेत्याधिपदार्थः । अमृततुल्यत्वमाह । म्लानस्य प्रत्याशाभङ्गज्ञानेन संकोचितस्य जीवपुष्पस्य प्रकाशनानि । अमृतेपि सर्वप्रकाशकतया म्लानपुष्पप्रकाशकत्वम् । संतर्पणानि तृप्तिकरणानि । अमृतेप्येवम् । संतर्पणे साति बाह्येन्द्रियतर्पकानि । अमृतेप्येवम् । आनन्दनान्यन्तर्मोदकानि । आप्यत आनीयतेनेनेत्यायनम् । रसस्यायनं रसायनम् । वचसां चित्तोल्लासकत्वेन नवत्वजननादिवामृतस्य जरादिनाशकत्वेन नवत्वजननादिदमिति भावः । यद्वा । अमृतपदेन जलमोक्षपीयूषाण्युच्यन्ते । तत्राद्यपदेन जलसाम्यम् ।

---

१ माहवस्स सिरिमुहा° N. २ N. has पलोएसु for आणन्द—स्ससि; पुलोएसि for अवलोअइस्ससि C. D. ३ विकाश° A. C. ४ तत्पर° Com. ५ °कारवि-रूढ Com. ६ हृदये Com.

आनन्दनानि हृदयैकरसायनानि
दिष्ट्या मयाप्यधिगतानि वचोमृतानि ॥ ४

माल० । [1]जहा तस्स जीविदप्पदाइणो जणस्स अवसिदं मं सुणिअ संतप्पमाणस्स तं[2] तहाविहं सरीररअणं ण परिहीअदि जधा [3]अं लोअन्तरगदं पि मं उद्दिसिअ सो जणो सुमरणसंकधामेत्तपरिसेसं

मोक्षसाम्यार्थमितरपदत्रयम् । मोक्षे हि सम्यक्तृप्तिविषये निराकाङ्क्षतैव । इन्द्रियमोहोऽपि विषयग्रहाभावात् ।

आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितम् ॥

इति श्रुतेरानन्दमयता मोक्षे । यद्वा । आद्यपदाभ्यां अलसाम्यमितरपदाभ्यां मोक्षसाम्यम् । पीयूषसाम्यार्थं शेषपदम् ॥ अमृतं मोक्षपीयूषसलिलेषु घृतेपि चेति धरणिः ॥

११७–१२६. अत्रावसिता मृता । तथाविधमनिर्वचनीयम् । न परिहीयते न नश्यति तया करिष्यसीत्यन्वयः । लोकयात्रा गार्हस्थ्यम-[स्थ्यं स-?]पत्नीकत्वं वा । माधवाप्तिप्रत्याशानाशादेवमेवेत्यवधारणम् । इन्त्वानुकम्पायाम् । करुणमिति । आलस्यादिसमुत्थो निरपेक्षभावः करुण औत्सुक्यचिन्तासमुत्थः सापेक्षभावो विप्रलम्भ इत्यनयोर्भेदः । अत एव निरपेक्षपदोपलक्षितनैराश्यमाह माधवः । नैराश्येत्यादि । नैराश्येन प्रत्याशानाशेन कातरा विसंष्ठुला धीर्यस्या हरिणनेत्रायाः । वात्सल्यं प्रियविश्लेषे प्राणत्यागेच्छा । मोहो भ्रमः सप्रत्याशत्वेपि नैराश्याभिमानः । ताभ्यां यत्परिदेवितं विलपनं वृत्तवर्तमानभाव्यर्थचिन्तनमतिकरुणं मनोज्ञं च श्रुत्वा चिन्तया

---

१ जइ N.; N. om. जणस्स; अवसिदोत्ति A. C. अवसिदत्ति D. अवसीदंती N. २ N. om. तं; जहा° C. and तह ° D. for तहा°; सरीररअणं B. सरीरं N. जहा D. जह N. ३ N. om. अ; गभं for गदं N. दं वि A. C. N.; परलोअभदम्मि A;. N. om. सो जणो; °रणकधा A. D. °रणसंकहा N.; संभरण for सुमरण C.; परिग्गहेण for परिसेसं N.

कालन्तरे[1] वि लोअजत्तं ण सिढिलेदि तहा करेसु। एवं उजेव्व पिअसहीए पसादादो[2] मालदी किदत्था भोदि। (क)

मक०। हन्त अतिकरुणं[3] वर्त्तते।

माध०। नैराश्यकातरधियो हरिणेक्षणायाः
श्रुत्वा निकामकरुणं च मनोहरं च।
वात्सल्यमोहपरिदेवितमुद्वहामि
चिन्ताविषादविपदं[4] च महोत्सवं च॥

(क) यथा[5] तस्य जी[illegible]प्रदायिनो जनस्यावसितां[6] मां श्रुत्वा संतप्यमानस्य तत्तथावि[illegible]ररत्नं न परिहीयते यथा च लोकान्तर[7]-गतामपि मामुद्दिश्य स[illegible]मरणसंकथामात्र[8]परिशेषां कालान्तरेपि लोक-यात्रां न शिथिलयति त[illegible]कुरुष्व[9]। एवमेव प्रियसख्याः[10] प्रसादान्मालती कृतार्था भवति।

यो विषादस्तेन विपत्तिमुद्वहामि। चिन्ताविषादरूपां वा विपत्तिं महोत्सवं चोद्वहामि। चकारो मिथो विरुद्धरसयोजने। इह हेतुफलभावेनान्वयः। तथा हि। नैराश्यकातरबुद्धित्वाद्वात्सल्यम्। ततः परिदेवनम्। तच्छ्रुत्वा मनोविषादः। तथा हरिणेक्षणत्वेनापहृतचित्तस्य ममालाभान्मनोज्ञपरिदेवितं श्रुत्वा महोत्सवः।

१ कालंदरेण N.; पि B.; D. N. om. वि; लोअभत्तं N.; °ळेइ N. तह C. N.; करेसि A. D. N.; N. om. उजेव्व; पिअसही दे N. २ सभासादो B. C.; N. om. पसादादो. प्पसा° A. मालई N. अणाहा सकामा होइ for किदत्था भोदि N.; कदत्था A. C.; भोदु B. भविस्सदि D. ३ B. om. अति; प्रस्तुतमनया for वर्तते N. ४ चिंताक्सान B. चिंताविसाद C. ५ यथा च तस्य Com. ६ अवसितेति मां Com. ७ परलोकगतामप्यु° Com. ८ संस्मरणकथा Com.; Com. om. अपि ९ करिष्यसि Com. १० °सखीप्रसा° Com.

लव० । पडिहदं[1] दे अमङ्गलं । ण अदो वि अधिअदरं सुणिस्सं । (क)

माल० । सहि पिअं क्खु तुह्माणं मालदीजीविदं ण उण[2] मालदी । (ख)

लव० । किं[3] एव्वं भणिदं भोदि । (ग)

माल० । आत्मानं[4] निर्दिश्य । जेण पच्चासाणिबन्धणेहिं

(क) प्रतिहतं तेऽमङ्गलम् । नातोऽप्यधिकतरं[5] श्रोष्यामि ।

(ख) सखि प्रियं खलु युष्माकं माल[illegible]जीवितं न पुनर्मालती ।

(ग) किमेवं[6] भणितं भवति ।

स पुनः क्रन्दनैर्मोहैः प्रलापैः परि[illegible] ।
देहायासाभिघातैश्च करुणाभिनयो [illegible] ॥

इति भरतः ।

१२७–१३०. अत्रामङ्गलप्रतिघात[illegible]विवाहादिति बाह्यम् । माधवसंनिधानादित्यान्तरम् । बाह्यार्थमाकलय्याह [सखि प्रियमिति] । अत्र तच्छरीरावच्छिन्नात्मा मालती । जीवनं त्वदृष्टविशेषकारितदेहात्मसंयोग इति जीवनमालत्योर्भेदः । जीवनस्य सुखहेतुतया प्रियत्वं तच्चेह दुःखसंततिजनकमतस्त्याज्यमेव भवतीति भावः ।

१३२–१३६. अत्रान्यजनेत्यत्रान्यपदेन माधवाभिधानम् । नन्दनापेक्षयान्यत्वात् । दुर्लभत्वेन परकीयत्वारोपाद्वा । बीभत्समिह नन्दनविवाहार्थमङ्गलस्यानिष्टस्य दर्शनात् । अनपराद्धमित्तीषदर्थे नञ् । आन-

१ भद्द पडि° A. D. N.; दाणिं before दे A. D. N.; णादो वि अधिअं सुणिस्सं D. णादो वरं सुणिस्सं N.; अहिअ° B. D. ends here. २ N. om. उण. ३ सहि before किं N.; त्ति for एव्वं N.; भणिदे E. भणिदेण C.; होदि N. ४ N. om. आत्मानं निर्दिश्य; C. om. जेण; A. E. have अण्णजण after जेण; °चासाबन्धणेहिं A. ५ नातोऽधिकं Com, ६ किमेव Com.

वअणसंविहाणेहिं[1] जीआविअ इमं महाबीभच्छारम्भं अणुभाविदह्मि। संपदं उण[2] मणोरहो एसो ज्जेव्व जं तस्स देवस्स परकेरअत्तणेण[3] अवरद्धं अत्ताणअं परिच्चइस्सं त्ति। ता इमस्सिं पओअणे पिअसही मे[4] अपरिपन्थिणी होदु। (क) इति पादयोः पतति।

माध०। सैषा[5] सीमा स्नेहस्य। लवङ्गिका माधवं संज्ञया समाह्वयति।

मक०। वयस्य उपसृत्य[6] लवङ्गिकास्थाने तिष्ठ।

(क) येन प्रत्याशानिबन्धनैर्वचनसंविधानैर्जीवयित्वेमं महाबीभत्सारम्भमनुभावितास्मि। सांप्रतं पुनर्मनोरथ एष एव यत्तस्य देवस्य परकीयत्वेनापराद्धमात्मानं परित्यक्ष्यामीति। तदस्मिन्प्रयोजने प्रियसखी मेऽपरिपन्थिनी भवतु।

न्दनविवाहपर्यन्तस्थायित्वे महापराधो यतः। अन्यस्य संभोगादेरभावादेष एवेत्युक्तम्। अपरिपन्थिन्यविरोधिनी। एतदात्मत्यागरूपम्।

१३७–१४५. संज्ञया संकेतेन। परवाननायत्तः। साध्वसेन जडतया। अत्यभीष्टलाभादियम्। नेदीयसां निकटानाम्। स्वैरं शनैः। [माल० वा०] अत्र मर्तुं स्वीकुर्वित्यर्थः। माधवस्य संस्कृतभाषया

---

१ वअणदिण्णसेहिं C. E. वअणविलअणेहिं B. वअणसंविहाणएहिं N.; ज्जेव्व after इमं A. E.; °भत्सारंभं B. C. °भच्छ आरंभं N. २ मम A. मह after उण E., N. has मे after मणोरहो; एत्तिअे एव्व for एसो ज्जेव्व N. B. om. ज्जेव्व; N. om. देवस्स. ३ परोक्खगुणकित्तणेण A. C. परोक्खगुणसंकित्तणेण B. परोक्खगुणकित्तणेण E.; अणवरद्धं A. C. E. अणवरदं B.; अत्ताणं A. N.; परिच्चइअ णिव्वुदा भविस्सं। सहि एदस्सिं for परिच्चइस्सं——स्सिं N.; परिच्चइस्सादि त्ति B. ४ B. om. मे; होइ for होदु C.; N. om. इति. ५ स एष N. संज्ञयाह्वयति N. ६ N. om. उपसृत्य; लवङ्गिकायाः A. C. ७ येनान्यजनप्रत्या° Com; °त्वैयमेवाहं. ८ महाबीभत्समनु° Com.; पुनर्ममसनो° Com. ९ परार्थीनत्वेनानपराद्धम् Com.; परित्यजामि Com.

माध० । [1]परवानस्मि साध्वसेन ।

मक० । इयमेव [2]नेदीयसां प्रकृतिरभ्युदयानाम् ।

माधवः स्वैरं लवङ्गिका[3]स्थाने तिष्ठति ।

माल० । सहि करेहि अणु[4]ऊलदाए पसादं । (क)

माध० । सरले साहसरागं परिहर रम्भोरु मुञ्च संरम्भम् ।

विरसं विरहायासं वोढुं[5] तव चित्तमसहं मे ॥

माल० । [6]अलङ्घणीओ उजेव्व दे मालदीप्पणामो । (ख)

माध० । [7]सहर्षम् । किं त्वां भणामि विच्छेददारुणायासकारिणि ।

(क) सखि कुर्वनुकूलतया प्रसादम् ।

(ख) [8]अलङ्घनीय एव ते मालतीप्रणामः ।

लवङ्गिकाभ्रमो न स्यादिति भाषासमावेशेनाह । सरले इत्यादि । साहस आत्मनिरपेक्षकार्ये रागमनुरागं परिहर । रम्भोरु कदलीसमोरुदेशे हे संरम्भं मरणे त्वरां त्यज जीवन्त्यां प्रत्याशापि स्यादिति भावः । विरसं रसशून्यं तव विश्लेषदुःखं सोढुं मे चित्तमक्षमं यतः । अतोपि वल्लभस्त्वयि दत्तोतस्त्यज मरणाभिनिवेशमिति लवङ्गिकाभिप्रायः । [9]अत एव सरले अज्ञे ऋजुप्रकृतिके वा । माधवपक्षे सरले अजानति हे तव विरहायासं सोढुं मे चित्तमसहमतस्तव समीपमागतोस्मि तन्मरणं त्यज । इतरत्समनेव । तदिह संस्कृतप्राकृतयोः साम्यात्प्राकृतसमकम् ।

१४७–१४८. किं वेत्यादि । किं वा भणामि । त्वदारम्भनिषेधं न करोमीत्यर्थः । हे विरहदुःसहकष्टकारिणि सुश्रोणि काममभीष्टं कुरु । यद्येवं

१ वयस्य before परवान् A. C. E. २ नेदीयसो B. ३ लवङ्गिकायाः C. ४ °कुल° N. ५ सोढुं A. N. ६ सहि before अलङ्घ° A. B.; अलङ्घणीओ C. E. अलङ्घणिदो B.; N. om. उजेव्व; पणामो N. ७ N. om. सहर्षम्. वा for त्वां A. N. °कारिणीं C. E. ८ °नायै Com. ९ सखि अल° Com. अयं for एव Com.

काम कुरु वरारोह देहि मे परिरम्भणम् ॥

मालo । सहर्षम्[1] । कधं अणुगहीदह्मि । उत्थाय । इअमालि-
ङ्गामि । दंसणं उण पिअसहीए[2] बाहुप्पीडेण णिरुद्धं ण लब्भी- १५०
अदि । आलिङ्ग्य[3] सानन्दम् । सहि कठोरकमलपह्मलो अण्णारि-
सो ज्जेव्व[4] दे अज्ज णिव्वावेदि सरीरप्फंसो । सास्रम् । किं च ।

(क) कथमनुगृहीतास्मि । इयमालिङ्गामि । दर्शनं पुनः प्रियसख्या
बाष्पोत्पीडेन निरुद्धं[5] न लभ्यते । सखि कठोरकमलपक्ष्मलोऽन्यादृश एव
तेऽद्य निर्वापयति शरीरस्पर्शः । किं[6] च । मौलिविनिवेशिताञ्जलिर्मम

सदा ममालिङ्गनं देहीति लवङ्गिकापक्षे । माधवपक्षे तु किं वा भणामि
किं वक्तव्येन कामं कामव्यापारं कुरु । अतः परिरम्भणं देहि ॥ आरो-
हः श्रोणिकाययोरिति धरणिः ॥ श्लोकद्वयमिदं सौरसेन्या । यदाह ।

स्पष्टार्थं लक्षणं प्रोक्तं सौरसेन्याः प्रपञ्चतः ।
लक्षणं त्वेकमेवास्याः संस्कृताद्यदनूनता ॥

१५०–१६३. अत्र उत्पीडः प्रबलीभूय निर्गमः । उत्पीडः समूहो
वा । अपश्चिमं चरमम् । प्रियस्पर्शादाह्लादात्सहर्षम् । कठोरमरालगर्भो
बीजकोशः । पक्ष्मलो रोमाञ्चयोगात् । समाधिना सुकुमारः । अन्यादृश
एवानुभूतसखीस्पर्शवैधर्म्यात् श्मशानानुभूतस्पर्शतुल्यः । निर्वापयति

१ B. om. सहर्षम् ; °भणीह्म for °गहीदह्मि N. २ E. om. पिअसहीए ; बाहुप्पीलणि° A. बाहुप्पाडणेण णि° B. बाहुप्पलाणि° C. बाहुप्पीडलेण E.; अपच्छि-म ण लब्भी° A. पच्चक्खं ण लब्भी° N.; लभेइ त्ति E. लहेइ B. लभेदि त्ति C. ३ इत्यालिंगति B.; N. om. सानन्दम्. कमलगब्भपह्म° A. E. N. ४ एव्व N.; B. om. अज्ज; °वेइ N. णिव्वादेदि B. C.; A. adds मं संतप्पमाणं पिअसहीए after °वेदि; मं after °वेदि E. N.; सहि before किं च N.; किं अ C. N. ५ °पीडनेन निरुद्धं प्रियसख्या अपश्चिमं न Com.; कमलगर्भकमलसुकुमारोऽन्या° Com. ६ तथान्यच्च for किं च Com.

[1]मउलिविणिवेसिदञ्जली मह वअणेण विण्णवेहि तं जणं ण मए मन्दभा[2]इणीए विअसन्तपुण्डरीअलच्छीविलासहारिणो मुहचन्दमण्डलस्स दे[3] सच्छन्ददंसणेण संभाविदो चिरं महूसवो लोअणाणं। मुधा[4]मणोरहेहिं अ अविरदविअम्भमाणदुव्वारुव्वेअव्वइअरुव्वत्तमाणबन्धणं धारिअं हिअअं। गमिआ अ वारं वारं सविसेस-

---

वचनेन विज्ञा[5]पय तं जनं न मया मन्दभाग्यया विकस[6]त्पुण्डरीकलक्ष्मीविलासहारिणो मुखचन्द्रम[7]ण्डलस्य ते स्वच्छन्ददर्शनेन संभावितश्चिरं महोत्सवो लोचनानाम्। मुधामनोरथैश्चाविरतविजृम्भमाणदुर्वारोद्वेगव्यतिकरोद्वर्तमानबन्धनं धारितं हृदयम्। गमिताश्च

तापं शमयति। तथा तादृशः स्पर्शः शङ्काविषयोऽप्यत्र नेति निर्वेदारसाश्रुता। अत्र विकसन्ति शतं पत्राणि यस्य तत्। अन्यथेदं व्यर्थं स्यात्। मण्डलपदं संपूर्णत्वार्थम्। चिरमित्यनेन स्वाधीनभर्तृकात्वमुक्तम्।

सुरतादिरसैर्यस्या बद्धः पार्श्वगतः प्रियः।
सामोदगुणसंप्राप्ता भवेत्स्वाधीनभर्तृका॥

निवेद्य दुःखं सुखी भवेदिति पूर्वानुभूतदुःखं निवेदयति। अविरतेत्यादि। उद्वर्तमानमुन्मूलितं बन्धनं स्थैर्यं यस्य तत्। बन्धनं स्वस्थानावस्थानं तस्योद्वर्तनमुन्मूलनारम्भ इति पाठान्तरव्याख्या। गमिताश्चेत्यादिना व्याध्यवस्थोक्ता। अतिवाहितातिक्रान्ता। चन्द्रातप इति तापकारित्वादातपः।

---

१ मौलि N.; °सिअंजली C. N. E.; मम A.; विण्णवेसि A.; जधा A. जह N. before ण मए. २ °भाआए N. विसट्टसदपत्तळच्छी N. °हारिणी संपुण्णचन्दमण्डलाहिरामस्स मुहस्स दे A.; अन्द for चन्द A. B. C. E. ३ B. om. दे; लोअणमहोसवो for महू—णाणं N. ४ सुधाम° B. मुहा° N.; °रहेहिं अविरअं N.; विजंभ° B. विइंभ° N.; दुआरदुक्खवइअ° N.; वइअ° B.; रुम्भिन्तमाण A. ५ विज्ञापयिष्यसि Com.; यथा न मया Com. ६ विकसच्छतपत्रपुण्डरी° Com. ७ Com. with A. ८ लोचनमहोत्सवः Com.

दूसहा[1]रम्भदूमाविअसहीअणा सरीरसंदावा । कधं त्ति अदिवा- हिदा [2]अ चन्दादवमलअमारुदप्पमुहा अणत्थपरंपरा संपदं उण णि[3]रासा संवुत्तेत्ति । तुए वि पिअसहि सव्वदा सुमरिदव्वाह्मि । १६०
एसा[4] अ माहवसिरीसहत्थणिम्माणमणुहरा वउलमाला मालदी- णिव्विसेसं पिअसहीए दट्ठव्वा सव्वधा हिअए धारणीएत्ति । (क) [6]स्वकण्ठादपनीय माधवस्य हृदि विन्यस्यन्ती सहसापसृत्य साध्वसो- त्कम्पं नाटयति ।

वारं वारं सविशेषदुःसहारम्भदा[7]वितसखीजनाः शरीरसंतापाः । क- थमप्यतिवाहिता च चन्द्रातपमलयमारुतप्रमुखानर्थपरंपरा सांप्रतं पुन- र्निराशा[8] संवृत्तेति । त्वयापि प्रियसखि सर्वदा स्मर्तव्यास्मि । एषा च श्रीमाधवस्वहस्तनिर्माणमनोहरा बकुलमाला मालतीनिर्विशेषं प्रियसख्या द्रष्टव्या सर्वथा हृदये धारणीयेति ।

एतेषामनर्थत्वमाह भरतः ।

संभोगे ये सुखं कुर्युस्ते दुःखं विरहे भृशम् । इति ।

स्मर्तव्येत्यनेन करुणव्यभिचारिभावं स्मरणमाह । यदाह । व्यभिचा- रिणोऽस्य

निर्वेदो ग्लानिमरणव्याधिदैन्यप्रमादयः ॥

---

१ सविसेस दूमण्णाइअसहीअणा A. दूसहाआसदूमा° N. °जणा N.; कहं N. २ A. N. om. अ; पुण for उण N. ३ णिरासाह्मि A. °सह्मि N.; पि- असहीए A. °सहि N.; सव्वहा N. E.; °व्वाह्मि N. E. ४ एसा वि मा° N. सिरिमाहवसह° A.; B. om. सिरि; °सिरिहत्थ N.; मणो° B. मण° N.; B. om. मालदी and has जीविद; मालदीजीविद A. C. E. ५ सव्वहा हिअएण N. ६ स्वकण्ठाद्बकुलमालामुन्मुच्य for स्वकण्ठादपनीय N., °दवनीय for °दप- नीय B.; हृदये for हृदि C. न्यस्य for विन्यस्यन्ती N.; °सोपसृत्य for °साप सृत्य A. B. C. N. ७ दुर्मनायित for दावित Com. ८ निराशास्मि सं° Com.

१६८ माध० । अपवार्य । हन्त[1] ।

एकीकृतस्त्वचि निषिक्त[2] इवावपीड्य

निर्भुग्न[3]पीनकुचकुड्मलयानया मे ।

कर्पूरहारहरिचन्दनचन्द्रकान्त-

निःस्यन्दशैवलमृणालहिमादिवर्गः ॥ १२

१७० माल० । स्वगतम्[4] । अहो लवङ्गिआए मालदी विप्पलद्धा । (क)

(क) अहो लवङ्गिकया[5] मालती विप्रलब्धा ।

नैराश्याच्च मरणोदयः । यदाह ।

सर्वैरेतैः प्रतीकारैर्यदि नास्ति समागमः ।

कामाग्निना प्रदीप्ताया जायते मरणं ततः ॥

विप्रलम्भकरुणानन्तरं स्थायिनः शृङ्गारस्योपक्रममाह । एषा चेति । साध्वसं भयम् ।

१६५–१६९. हन्त हर्षे । एकीत्यादि । अनया मालत्या कर्पूरादिवर्ग एकीकृतः सन्नालिङ्ग्य मे त्वचि निषिक्त इव । स्पर्शस्य त्वगिन्द्रियग्राह्यतया त्वचीत्युक्तम् । निर्भिन्नौ निरन्तरावलग्नौ पीनौ स्तनकुड्मलौ यस्यास्तया । हरिचन्दनं चन्दनविशेषः । निःस्यन्देन द्रव्याभिधानम् ॥ कृदभिहितो भावो द्रव्यवत्प्रकाशत इति न्यायात् ॥ निःस्यन्दीति पाठे निस्यन्दिनः सरसाः शैवालादय इत्यर्थः । अनेन प्रशान्तो मे कामजस्ताप इत्युक्तम् । बहूपमेयम् ।

१ N. om. हन्त. २ निषक्त A. B.; आपीड्य C. ३ निर्भिन्न for निर्भुग्न Com.; कुड्मल B. E. ४ N. om. स्वगतं; अहह for अहो N.; मालदीविप्पलद्धा पडुत्ती N. ५ लवङ्गिकाया मालतीविप्रलंभप्रमादः । Com.

माध० । अयि स्वचित्तवेदनामात्रनिवेदिनि परव्यथानभिज्ञे इयमुपालभ्यसे ।

उद्दामदेहपरिदाहमहाज्वराणि
संकल्पसंगमविनोदितवेदनानि ।
त्वत्स्नेहसंविदवलम्बितजीवितानि १७२
किं वा मयापि न दिनान्यतिवाहितानि ॥

लव० । सहि उवालम्भणिज्जेव्व उवालद्धासि । (क)

(क) सखि उपालम्भनीयैवोपालब्धासि ।

१७१–१७६. आत्मानुरागप्रकाशनायानुभूतवेदनामाह । अयीति । उद्दामेत्यादि । एतादृशानि दिनानि मयापि किं वा नातिक्रान्तानि । अपि त्वतिक्रान्तान्येव । किं वेति संभावनायाम् । यद्वा । किं निषेधे वैवार्थे । कीदृशानि । उद्दाम उद्भटो देहदाह एव महाज्वरो येषु । एतेनोद्वेग उक्तः । संकल्पसंगमेनापनीता व्यथा येषु । अनेनोन्माद उक्तः । यदाह ।

बाहू प्रसार्य गमनं संकल्पाकल्पिते प्रिये ।
निवृत्तिः सहसान्यस्मिन्नुन्मादे हि प्रजायते ॥

यद्वा । संकल्पसंगमेनान्यस्त्रीद्वेषः सूचितस्तेन च निःसपत्नीकत्वं कन्याहरणबीजमाह । यदाह । आसक्तिं वा दर्शयेत्सुखमनुपहतमेकपत्नीकत्वे वा वर्णयेदिति । त्वदीयस्नेहज्ञानेनावलम्बितं जीवितं येषु । त्वत्स्नेहाज्ञाने मम मरणमेव स्यादित्याशयः ॥ उपलब्धिश्चित्संविदित्यमरः ॥

१७७–१८६. अर्हणीयः ॥ अत्र सरसत्वेन शृङ्गारादित्वेन रम्यता । यदाह ।

शृङ्गारकरुणावेव रसेष्वादौ प्रकीर्तितौ ॥

१ A. om. चित्त; वेदिनि for निवेदिनि N.; चित्तवेदना for व्यथा N. २ विनोदनवेदनानि B., निवेदितवेदनानि C. ३ उवाळहणिज्जे उवा° N., उवालम्भणिज्जं उवा° A.

वाल० । अहो सरसरमणीअदा संविहाणस्स[1] । (क)

मक० । महाभागे एवमेतत् ।

त्वं वत्सलेति कथमप्यवलम्बितात्मा
सत्यं जनोयम्[2] इयतो दिवसाननैषीत् ।
आबद्धकङ्कणकरप्रणयप्रसाद-
मासाद्य नन्दतु चिराय फलन्तु कामाः ॥

लव० । म[3]हाणुभाअ हिअए वि अप्पडिहदसअंगाहसाहसो अअं जणो किं दा[4]णिं कङ्कणाभरणं करं विआरेदि । (ख)

(क) अहो सरसरमणीयता संविधानस्य ।

(ख) महानुभाव हृदयेप्यप्रतिहतस्वयंग्राहसाहसोयं जनः किमिदा[5]नीं कङ्कणाभरणं करं विचारयति[6] ।

संविधानं नायिकासंघट्टनप्रकारः । त्वमित्यादि । त्वं वत्सला सस्नेहेति-हेतोरयं जनो माधवो विधृतजीवितः सन्सत्यमियद्दिनानि कथमप्यनैषी-न्नीतवान् । अत आबद्धकङ्कणो धृतविवाहसूत्रो धृतविभूषणो वा यः कर-स्तस्य प्रणयो विवाहकाले ग्रहणं तद्रूपं प्रसादं प्राप्य नन्दतु । बहुकाल-मभीष्टाः संभोगादयः फलन्तु ॥ कङ्कणं भूषणे सूत्र इति विश्वः ॥ अप्रा-प्रतिहतः परिगृहीतः । अयं जनो मालती । स्वयमेवास्याः करं गृहाणेत्या-

---

१ °धानस्स C. २ °यदियतो C. ३ महाभाअ N., °भाव A.; आदि° A. B. E.; °गह B. N. ४ °णीं E.; °भरणे करे N.; A. adds महाभाओ and E. महाणुभाओ after विआरेदि. ५ नत्किम् Com. ६ विचारयति महाभाग: Com.

माल० ॥ हा[1] हदम्हि । कण्णआअणविरुद्धं किं पि[2] एसा ववणस्सदि । (क)

प्रविश्य कामन्दकी । पुत्रि[3] कातरे किमेतत् ।

मालती कम्पमाना कामन्दकीमालिङ्गति ।

काम० । तस्याश्चिबुकमुन्नमय्य ।

पुर[4]श्चक्षूरागस्तदनु मनसोनन्यपरता
तनुग्लानि[5]र्यस्य त्वयि समभवद्यत्र च तव ।

(क) हा[6] हतास्मि । कन्यकाजनविरुद्धं किमप्येषोपन्यस्यति ।

शयः । अत्र अम्मका कुलकन्यका । विरुद्धमिति कुलकन्याविवाहः दैवार्षब्राह्मा एव शुभा दृश्यन्त इति भावः ।

१८८–१९४. स्वयंग्राहविवाहं कर्तुमनर्हमिति मन्यमानां मालतीमाह । पुत्रीति ॥ अत्र गौरादित्वान्ङीषित्यवधेयम् ॥ कातरे विव्हले । करग्रहभयेन तदङ्गस्पर्शेन माधवस्य दर्शनहर्षेण च मालत्याः कम्पः । यदाह ।

शीतभयहर्षरोषस्पर्शजरासंभवः कम्पः ॥

नर्मस्फोटोयम् । यदाह ।

नर्मस्फोटस्तु भावानां देहस्थानां प्रकाशनम् ।

चिबुकमुन्नमय्योष्ठाधःप्रदेशमुत्तोल्य ॥ अधः स्याच्चिबुकमित्यमरः पुरावृत्तं संकलय्याह । पुर इत्यादि । प्रथमं नेत्रप्रीतिरथ मनसस्तद्गतत्वं

---

१ A. C. E. add स्वगतम् before हा; हद्धी हद्धी after हा A.; अहिदं for हा हदाह्मि N.; अङ्गणा for कण्णआ N.; जण for अण B. N. २ किं वा N.; N. om. एसा; °सदि A. B. C. E. ३ N. here omits the portion beginning with पुत्रि कातरे and ending with हा अम्म and has after प्रविश्य कामन्दकी, वत्स माधव &c. ४ N. adds वत्से before पुरः. ५ म्लानिर्यस्य B. N.; तत्र च B. ६ धिक् हा धिक् after हा Com.; अम्मका for कन्यका Com.

युवा सोयं प्रेयानिह सुवदने मुञ्च जडतां
विधातुर्वैदग्ध्यं विलसतु सकामोस्तु मदनः ॥

लव० । भअवदि[1] कसणचउद्दसीरअणीमसाणसंचरणणिव्वत्तिद-विसमव्ववसाअणिट्ठाविअचण्डपासण्डपअण्डदोहण्डसाहसो[2] सोह[3]-

---

शरीरग्लानिश्च त्वद्विषये यस्याभूद्यद्विषये तवाप्येतादृशा अभूवन्हे सुमुखि सोयं युवा प्रेयान्प्रियतमः । अतो जडतां कार्याप्रतिपत्तिं त्यज गान्धर्वविवाहपरा भवेत्याशयः । तेन धातुः प्रयत्नो विलसतु । कामः पूर्णेच्छो भवतु । आत्मव्यापारस्त्वनौद्धत्याय नोक्तः । इह चक्षूरागादिकं कामावस्था । यदाह ।

चक्षुःप्रीतिर्मनःसङ्गः संकल्पोत्पत्तिरेव च ।
निद्राच्छेदस्तनुत्वं च व्यावृत्तिर्विषयान्तरात् ॥
लज्जाप्रणाश उन्मादो मूर्च्छामरणमेव च ॥ इति ।

मनसोनन्यपरतया मनःसङ्गसंकल्पोत्पत्ती उक्ते । ग्लानिरित्यनेन निद्राच्छेदादयो मूर्च्छान्ता उक्ताः । तेषां ग्लानिहेतुत्वात् । अत्र च पुरस्तदन्वित्यादिना हेतुफलभावः सूचितः । युवत्वप्रियत्वे प्रवृत्तिहेतू उक्ते । प्रियश्च

यो विप्रियं न कुरुते न चायुक्तं प्रभाषते ।
तथार्जवसमाचारः स प्रियः परिकीर्तितः ॥

इति भरतोक्तः ॥ तत्रापि प्रकर्ष इयसुन् ॥ जडताप्रियदर्शनात् ।

१९५—२०७. अत्र कृष्णरजनी कृष्णपक्षचतुर्दशीरात्रिः । विषमव्यवसायो महामांसविक्रयः । निष्ठापितो निहतः । पाखण्डो घोरघण्टः । साहसं

---

१ N. om. भअवदि; किसण N.; चउद्दसीए मसाण° B.; संचार N.; णिव° A. C. E. २ वव° C. N.; N. adds साहसो and B. वैअ after व्ववसाअ; णिट्ठाविअ A. and णिट्ठाविद N. for णिट्ठाविअ; B. om. पासण्ड; C. N. om. पअण्ड; C. om. दोहण्ड. ३ N. om. साहसिओ; °सिको B. C.

सिओ क्खु एसो । अहो पिअसही उक्कम्पिदा । (क)

मक० । [1]स्वगतम् । साधु लवङ्गिके साधु । अवसरे खलु रागोपकारयोर्गरीयसोरुपन्यासः ।

मा[2]ल० । हा ताद हा अम्ब । (ख)

काम० । व[3]त्स ।

माध० । आज्ञापय ।

काम० । इयमशेष[4]सामन्तमस्तकोत्तंसपरागरञ्जितचरणाङ्गुलेरमात्यभूरिवसोरेक[5]मपत्यरत्नं मालती भगवता सदृशसंयोगरसिकेन वेधसा मन्मथे[6]न मया च तुभ्यं दीयते । इति रोदिति ।

मक० । [7]कलितं तस्तर्हि भगवतीपादप्रसादेन ।

(क) भगवति कृष्णचतुर्दशीरजनीश्मशानसंचरणनिर्वर्तितविषमव्यवसायनिर्वापित[9]चण्डपाखण्डप्रचण्डदोर्दण्डसाहसः साहसिकः खल्वेषः । अ[10]तः प्रियसख्युत्कम्पिता ।

(ख) हा तात हा अम्ब ।

स्त्रीवधरूपम् । साहसिकाद्धि भयं भवत्येव । तया च प्राणदानेन माधवक्रीतमात्मानं कथं न समर्पयसीति भावः । [मा० वा०] साहसविवाहारम्भाद्दुर्जनभयात्पित्रादिवियोगशङ्कनाच्च खेदे हाशब्दः ॥ उत्तंसः कर्णपूरे च शेखरे च प्रकीर्तित इति विश्वः ॥ अङ्गुलिपदेन चरणाग्रे प्रणामादधृष्यतोक्ता । अन्योन्यदर्शनेन धात्रा । प्रीतिजननात्कामेन । चोरिकावि-

---

१ B. N. om. स्वगतं; स्थाने for अवसरे N.; अनुराग for राग A. N. २ N. adds स्वगतं after माल.; N. om. हा ताद. ३ A. N. add माधव after वत्स. ४ अशेषभुवनसामन्त B. ५ °रेकापत्य B.; मालती नाम B.; वस्तु for संयोग N. ६ च before मया C.; प्रदी° A.; N. om. इति–ति. ७ हि after कलितं A. N.; E. N. om. नः; भगवत्याः प्रसादेन N. ८ Com. om. चतुर्दशी; संचार for संचरण Com. ९ निर्वापित Com. १० अतो मे Com.

माध॰ । [1]नत्किमिति बाष्पायितं भगवत्या ।

काम॰ । [2]चीवराञ्चलेन नेत्रे प्रमृज्य । विज्ञापयामि कल्याणिनम् ।

माध॰ । [3]नन्वाज्ञापय ।

काम॰ । परिणतिरमणीयाः प्रीतयस्त्वद्विधाना-
[4]महमपि तव मान्या हेतुभिस्तैश्च तैश्च ।
तदिह सुवदनायां तात मत्तः परस्ता-
[5]त्परिचयक[6]रुणायां सर्वथा मा विरंसीः ॥

इति न[7]न्तुमिच्छति ।

वाहान्मयेत्याशयः । बाष्पायितमुद्गतबाष्पं वृत्तम् । मातृवत्स्नेहेनेदमुपपन्नम् ।

२११-२१६. परिणतीत्यादि । त्वद्विधानां कुलादिमतां प्रीतयः परिपाकरम्या भवन्ति । अधुनावश्यत्वेन परिणतिपदम् । तैस्तैर्हेतुभिः पितृबन्धुत्वोपदेशकत्वादिभिरहं तव मान्या । हेतूनां बहुत्वेन वीप्सा । तत इह मालत्यां मत्तः परस्तान्मत्परोक्षे परिचयरूपकरुणायां मा विरंसीर्मा विरतो भविष्यसि । करुणाया इति पाठे जुगुप्साविरामप्रमादार्थानामुपसंख्यानमिति पञ्चमी ॥ ताततेति सर्वं ततं व्याप्तमनेनेति तात व्यापक हे । यद्वा । तातो विधेयः ॥ तातो विधेये जनक इति विश्वः ॥ विरंसीरित्यत्र माङि लुङिति भविष्यति लुङ् ॥ वात्सल्यात्प्रपन्नानुकम्पावः । अतिक्रमोऽन्यथात्वम् । अत्र माला नाम नाट्यालंकारकथनम् । यदाह ।

---

१ N. om. माध॰ and gives the speech to मक॰; ॰यितमनन्तं भगवत्याः N. २ चीर for चीवर C. N.; परिमृज्य A. B.; for विज्ञा—णिनम् N. has वत्स किमपि कल्याणिनं त्वां वक्तुकामास्मि. ३ B. N. om. ननु. ४ वयं for अहं N. ५ परस्मात् N. ६ ॰णायाः N. ७ पादयोः पतितुम् for नन्तुम् A.; N. om. इति—च्छति.

माध० । वारयन्[1] । अहो वात्सल्यादतिक्रामति प्रसङ्गः ।

मक० । भगवति

श्लाघ्यान्वयेति नयनोत्सवकारिणीति
निर्व्यूढसौहृदभरेति[2] गुणोज्ज्वलेति ।
एकैकमेव हि वशीकरणं गरीयो
युष्माकमेवमियमित्यथ किं ब्रवीमि[3] ।

काम० । वत्स[4]

माध० । आज्ञापय ।

काम० । वत्से[5] ।

माला बहूनां हेतूनां निर्देशः साध्यसिद्धये ॥ इति ।

२१८–२२१. श्लाघ्यान्वयेत्यादि । उज्ज्वलकुला । चक्षुःप्रीतिजननी रूपवती । उपचितसौहार्दातिशयानुरक्ता । गुणोज्ज्वला शीलादिमती । एतत्सर्वं वशीकरणमस्त्येव गुरुतरम् । एवं सति युष्माकमियमिति हेतोरनन्तरं किं ब्रवीमि । अतः परं न वाच्यमस्तीत्यर्थः । इतिकारचतुष्टयं स्वरूपोपदर्शनाय । तथा च त्वदभ्यर्थना सहजसिद्धैवेति भावः । इह प्रसिद्धिनामा नाट्यालंकारः । यदाह ।

वर्णने वस्तुनो यत्तु गुणस्योत्कीर्तनं भवेत् ।
प्रसिद्धिरिह सा ज्ञेया नाटके कथिता बुधैः ॥ इति ।

---

१ मक° for माध° N.; निवारयन् A.; B. N. om. वारयन्; B. om. अहो; N. adds क्रमादति before प्रसङ्गः. २ सौहृदमयीति N. ३ After this, N. adds the following speeches काम० । वत्स माधव । माध० । आज्ञापय । काम० । स्वीक्रियतामियम् । माल० । हद्धी हद्धी भअवगाजणाहिद्धं किं उण उवण्णस्सदि; after this follows the portion omitted above (p. 223 n. 3) and then काम० । वत्स माधव &c. ४ माधव after वत्स A. N. ५ मालति after वत्से A. N.

२२९ माल० । आणवेदु भअवदी । (क)

काम० । प्रेयो मित्रं बन्धुता वा समग्रा

सर्वे कामाः शेवधिर्जीवितं वा ।

स्त्रीणां भर्ता धर्मदाराश्च पुंसा-

मित्यन्योन्यं वत्सयोर्ज्ञातमस्तु ॥

२३० मक० । अथ किम् ।

लव० । भअवदी जधा आणवेदि । (ख)

काम० । वत्स मकरन्द त्वमनेनैव वैवाहिकेन मालतीनेपथ्येन

(क) आज्ञापयतु भगवती ।

(ख) भगवती यथाज्ञापयति ।

२२६–२२९. प्रेय इत्यादि । वत्सयोर्मालतीमाधवयोरन्योन्यमेतद्विदितमस्तु यत्स्त्रीणां भर्ता प्रेयः प्रियतमं वस्तु मित्रं सुहृद्बन्धुता बन्धुसमूहः सर्वे ईप्सिताः समग्रा मिलिताः शेवधिर्निधिर्जीवनं च । पुरुषाणां धर्मदाराः पाणिगृहीताः प्रेय इत्यादि ॥ बन्धुतेत्यत्र ग्रामजनबन्धुसहायेभ्यस्तलिति समूहे तल् ॥ निधिर्ना शेवधिरित्यमरः ॥ अनेन गान्धर्वविवाहो दर्शितः । स चानुरागमूलत्वाच्छ्रेष्ठः । यदाह ।

अनुरागात्मकत्वेन गान्धर्वः श्रेष्ठतां गतः । इति ।

२३३–२५०. परिवर्तस्व परिवृत्य गच्छ । जवनिका पिधानपटः । तत्रान्तर्धानम् । स्त्रीणामग्रे स्त्रीवेषादिकरणेनौचित्यात् । मालत्यस्मि संवृत्त इत्यनेन वैमूढकनामा भाव उक्तः । यदाह ।

१ लव० for माल० A. N. २ संपदो for शेवधिः N.; च for वा A. C. E. ३ माध० for मक०. N. ४ °वदि A. B.; N. om. भअवदी; जह B. N.; A. N. add तुझे after जधा; आणवेध A. B. N. ५ B. om. मकरन्द; N. om. त्वं; B. om. एव; वैवाहिकनैपथ्येनालंकारितः प्रवर्तस्व परिणयाय आत्मनः for वैवा–त्मानं. N. ६ Com. has लव० मा० before this. ७ Com. with A.

[1]प्रसाधितः परिणाययात्मानम्। इति पेट्टालकमर्पयति।

मक०। [2]यथाज्ञापयति भगवती। यावदिमाञ्चित्रजवनिकामन्तर्धाय नेपथ्यं [3]भावयामि। तथा करोति।

माध०। भगवति सुलभ[4]बहुनर्मातिसंकटमिदं वयस्यस्य।

काम०। [5]आः कस्त्वमस्यां चिन्तायाम्।

माध०। एवं भगवत्येव जानाति।

प्रविश्य [6]मकरन्दः। विहसन्। वयस्य मालत्यस्मि। सर्वे सकौतुकं पश्यन्ति।

माध०। [7]मकरन्दं परिष्वज्य सोपहासम्। भगवति कृतपुण्य एव नन्दनो [8]यः प्रियामीदृशीं कामयिष्यते।

वैमूढकं तु लास्यं स्यात्पुंसः स्त्रीवेषधारणम्॥ इति। सस्मितमिति क्रियाविशेषणम्। मुहूर्तमित्यनेनानन्तर एव विच्छेद उक्तः। कामयिष्यत इत्यनेन पराङ्कावतारः कृतः। अनुपलम्भार्थमाह। वृक्षगहनेनेति। गहनेन वनेन विषमेन वा॥ गहनं विषमे श्विनि विश्वः॥ उद्वाहमङ्गलं विवाहार्थं कर्म। गाढेत्यादि। तद्भुवो भागा उद्यानवाटिकायाः

---

१ प्रसाधितशरीरः E.; परिणय for परिणायय A. C. E.; N. om. इति; पेट्टालम् A.; पिट्टालकम् B. पट्टालकम् C. पटलकम् N. २ यदा° for यथा° A. N.; °यसि for °यति N.; N. om. भगवती; यवनिका N.; °धाय N. ३ नैपथ्यं N.; रचयामि for भावयामि B. ४ सुलभमपि बहु° N.; N. om. अति and इदं; वयस्यस्येति B. ५ N. om. आः. ६ मालतीवेशधारी before मकरन्दः C.; विहस्य for विहसन् N.; B. om. विहसन्; N. om. वयस्य; संवृत्ता B. संवृत्तः Com. after अस्मि सविस्मयं च for सकौतुकम् N. ७ N. om. मकरन्दं; N. om. सोपहासम्. ८ यतः for यः N.; प्रियवयस्यमीदृशीं for प्रियामीदृशीं N.; A. N. add मनसा मुहूर्तमपि after ईदृशीं; °ष्यति A. B.

कामं० । वत्सौ मालतीमाधवौ इतो निर्गत्य वृक्ष[1]गहनेन गम्यता-मुद्दामकुलार्थ[2]मस्मद्विहारिकायाः पश्चादुद्यानवाटः । [3]सुविहितं च तत्र[4] वैवाहिकं द्रव्यजातमवलोकितया । भूयश्च

गाढोत्कण्ठकठोरकेरलवधूगण्डावपाण्डुच्छदै-
स्ताम्बूलीपटलैः पिनद्धफलिन[5]श्चानम्रपूगद्रुमाः ।
[6]कक्कोलीफलजग्धिमुग्धविकिरव्याहारिणस्तद्भुवो

प्रदेशा वां युवयोः श्रेयः शृङ्गारादिकं विधास्यन्ति शृङ्गारस्योपवनविहरणजन्यत्वात् । यदाह ।

उपवनगमनविहारैः शृङ्गाररसः समुद्भवति ॥

कीदृशाः । ताम्बुली पर्णलता तासां समूहैः पिनद्धा वेष्टिताः फलिनाः फलयुक्ता अत एवानता क्रमुकवृक्षा येषु ते ॥ सापेक्षकत्वेपि गमकत्वात्समासः ॥ कीदृशैः । गाढोत्कण्ठा यस्याः सा च कठोरा तृतीययौवनवयाः केरलदेशवधूस्तस्याः कपोलवदवपाण्डुरीषद्धूसरश्छदः पत्रं येषां तैः ।

रतिसंभोगे दक्षा प्रतिपक्षासूयिका गुणाढ्या च ।
अनिभृतगर्वितचेष्टा सा विज्ञेया तृतीया तु ॥

इति भरतः । अत एवोत्कण्ठाधिक्यम् । केरलदेशजत्वेन गौरत्वमुक्तम् । अतः पीतिमसंबन्धाच्छ्वेत ईषत्पाण्डुरत्वम् । यदाह ।

सितपीतसमायोगादीषत्पाण्डुरिति स्मृतः ॥

पिनद्धेति वष्टि भागुरिरल्लोपमित्यल्लोपे रूपम् । फलिन इति फलबर्हाभ्या-मिनच्मत्वर्थीयः ॥ तथा कक्कोलीफलस्य जग्ध्या भक्षणेन मुग्धाः प्रीता

१ गहनं B. गहने C.; निर्गम्यताम् A. २ अस्ति च तत्र विहाराय for अस्मद्विहारिकायाः N.; वाटिकायाः A. वाटिकायां E. ३ E. om. सु; संनिहितं for सुविहितं C.; A. N. om. च. ४ तत्रैव A. N.; B. om. वैवाहिकं; वैवाहिकद्रव्य° A.; A. adds सर्वं संपादितमास्ते after अवलोकितया. ५ फलित B. C. N. ६ तक्कोली N. कक्कोली Com.

भाग्याः प्रेङ्खितमातुलुङ्गवृतयः[1] प्रेयो विधास्यन्ति वाम् ॥
गत्वा[2] च तत्रैव मकरन्दमदयन्तिकागमनं यावत्स्थातव्यम् ।

माध० । सहर्षम्[3] । कल्याणावतंसा हि कल्याणसंपदुपतिष्ठा-
ङ्गवति ।

कल० । दिट्ठिआ[4] एव्वं पि भविस्सदि । (क)

मक०[5] । कथं संदेह एवात्र भवतः ।

लव० । सुदं पिअसहीए[6] । (ख)

काम० । वत्स मकरन्द वत्से[7] लवङ्गिके इत इतः प्रतिष्ठामहे ।

(क) दिष्ट्या एवमपि भविष्यति ।

(ख) श्रुतं प्रियसख्या ।

ये विकिराः पक्षिविशेषास्तेषां व्याहार उक्तिर्येषु ते ॥ कक्कोली बदरी कोलीत्यनेकार्थः ॥ भूमिं नखैर्विलिख्य ये चरन्ति ते विकिराः ॥ नगौको-वाजिविकिरविविष्किरपतत्रय इत्यमरः ॥ अदो जग्धिः ॥ व्याहार उक्तिर्ल-पितमित्यमरः ॥ तथा प्रेङ्खिता वातेन चलिता मातुलुङ्गवृतिर्वेष्टनं येषु ते । तथा चैवंविधनानागुणवनगमनेन सर्वमनोरथसिद्धिस्ते भविष्यती-ति भावः । मातुलुङ्गश्छोलङ्गवृक्षः ॥ रुचको मातुलुङ्गक इत्यमरः ॥

२५१–२५८. कल्याणान्तरावतंसा मकरन्दविवाहकल्याणभूषणा माधवविवाहसंपत्तिः । कलहंसकवाक्ये [दिष्ट्येत्यादि] । मकरन्दविवाहे-नाप्यस्माकं प्रमोदः स्यादित्यर्थः । संभोगार्थं विजनकरणाय कर्त-

---

१ मातुलिंग B. C. E. मातुलङ्ग A.; श्रेयो for प्रेयो B. २ अतः for गत्वा च N.; B. om. एव; मदयंतिकामकरंदयोरागमनं N.; मंगलं for आगमनं B. E. ३ N. om. सहर्षं; N. om. कल्याणावतंसाहि, कल्याणान्तराव° A. ४ कहं for दिट्ठिआ N.; एदम् for एव्वं A.; णो after पि A. C. N.; भोदि for भविस्सदि C. ५ मान० । A.; संदेहो भवतः N. ६ तुए for पिअसहीए B. ७ भद्रे for वत्से N.; N. om. one इतः.

माल० । सहि तुए वि गन्तव्वं । (क)

लव० । विहस्य । संपदं क्खु अम्ह एत्थ तुवराम । (ख)

इति निष्क्रान्ता कामन्दकी लवङ्गिका मकरन्दश्च ।

२६० माध० । अयमहमिदानीम्

आमूलकण्टकितकोमलबाहुनाल-

मार्द्राङ्गुलीदलमनङ्गनिदाघतप्तः ।

(क) सखि त्वयापि गन्तव्यम् ।

(ख) सांप्रतं खलु वयमत्र त्वरामहे ।

ऽयमकरन्दविप्रलम्भार्थं च सर्वेषां निष्क्रमणमाह वत्स इत्यादि । माल० वा० । सखि त्वयापि गन्तव्यम् । एकाकिन्या मयात्र कथं स्थातव्यमिति भावः । ल० वा० । सांप्रतं खलु वयमत्रावशिष्यामहे । पूर्वं सर्व एव स्वार्थं चलिता इत्यर्थः ।

२६०–२६४. आमूलेत्यादि । अस्या रम्यं हस्तं हस्तेन गृह्णामि । यथा सरस्या ईषद्रक्तपद्मं मनोज्ञं हस्ती करेण स्थूलहस्तेन गृह्णाति तथेत्यर्थः । कोमलाङ्ग्याः कर ईषद्रक्त एवेति साम्यम् । कीदृशम् । आमूलं कक्षादेशपर्यन्तं कण्टकितो रोमाञ्चितः कोमलो बाहुरेव नालं यस्य तम् ॥ कण्टकः क्षुद्रशत्रौ च रोमाञ्चेऽपि च दृश्यत इति विश्वः ॥ आर्द्राङ्गुल्य एव दलानि पत्राणि यस्य तम् । रोमाञ्चितत्वार्द्रत्वे सात्त्विकभावात् । अहं कीदृशः । अनङ्ग एव ग्रीष्मस्तेन तप्तः । तथा च कामतापप्रशान्त्यर्थं करग्रहणमित्यर्थः । पद्मस्याप्युद्धृततया तस्य कण्टकितकोमलनालत्वमार्द्रपत्रत्वं च भवति । गजोऽपि ग्रीष्मतप्तः । पद्मपक्ष आमूलं कन्दपर्यन्तम् । तदनेनानन्तरकर्तव्यताव्यवसायपक्ष धैर्यमुक्तम् ।

---

१ गंतव्वं B. २ वअं एत्थ उवचरामो A. अवसरामो N. ३ निष्क्रान्ताः कामन्दाः A. N. ४ वयमत्रावशिष्यामहे Com.

अस्याः करेण करमाकलयामि कान्त-
मारक्तपङ्कजमिव द्विरदः सरस्याः ॥

इति निष्क्रान्ताः सर्वे[1] ।

॥ मालत्युपहारो[2] नाम षष्ठोऽङ्कः ॥

सूते स्म यं रत्नधरः पवित्रः पवित्ररूपा दमयन्तिकापि ।
जगद्धरं तत्कृतटिप्पणेऽङ्कः षष्ठोऽगमद्व्यरसाधिवासः ॥

॥ इति षष्ठोऽङ्कः ॥

---

१ N. om. सर्वे; मालतीमाधवे चौरिकाविवाहो नाम after सर्वे A. २ C. E. N. om. मालत्युपहारो नाम; षष्ठोऽङ्कः समाप्तः C.

॥ सप्तमोऽङ्कः ॥

ततः[1] प्रविशति बुद्धरक्षिता ।

बुद्ध० । अम्महे सुसिलिट्ठमालदीणेवेत्थ[2]लच्छीविप्पलद्धणन्दणकिदकरग्गहो अमच्च[3]भूरिवसुमन्दिरे भअवदीवअणसंविहाणेहिं खेमेण गोवाइदो[4] मअरन्दो । अज्ज अम्हे पि णन्दणावासं उवगदा । तदो भअवदी णन्दणमापुच्छिअ गदा आवसहं । अअं[5] च णववहूघ-

(क) अम्महे सुश्लिष्टमालतीनेपथ्यलक्ष्मीविप्रलब्धनन्दनकृतकरग्रहोमात्यभूरिवसुमन्दिरे भगवतीवचनसंविधानैः[6] क्षेमेण गोपायितो मकरन्दः । अद्य[7] वयमपि नन्दनावासमुपगताः । ततो भगवती नन्दनमापृच्छ्य गतावसथम् । अयं च नववधूगृहप्रवेशाविराचितकाल-

अधुना मालतीरूपधारिणा मकरन्देन कथं नन्दनविप्रलम्भो मदयन्तिकाहरणं च कृतं भवेदिति प्रबन्धाभिधानाय नियुक्तैव तत्र भयेत्यादिना प्रथमाङ्कसूचितबुद्धरक्षिताप्रवेशः ।

२—१३ अत्र माधवविवाहनिर्वाहाद्दर्शाश्चर्येम्महेशब्दः । सुश्लिष्टत्वं मकरन्दस्य गौरत्वादश्मश्रुलत्वादिना मालतीसाम्यात् । भगवतीति भगवत्यैवालंकृत्य प्रहित इत्यर्थः । क्षेमेण कुशलेन । एतत्तु केनाप्यनु-

१ प्रविश्य for ततः प्रविशति N. २ °पत्थ B. °पच्छ N. वच्छ A. E.; N. om. किद. ३ N. om. अमच्च; संविहाणेण A.; भअवदीए संविहाणेण N.; क्खेमेण B. ४ गोरा° E.; अज्ज after गोवाइदो N; C. om. मअरन्दो; तुम्पनि after मअरन्दो A.; इमं before णंदणावासं A. अह्मेहि समं णंदणावासं गआ भअवदी तदो णंदणमापुच्छिअ णिअवासं गआ N. ५ अण्णं च for अअं च A. B.; N. om. च; गिह for घर A. B. C. E. ६ संविधानेन Com. ७ अद्य च वयमिमं नंदनावासमुप° Com.

रणोवसंनिरइदेदाकालकोमुदीमहूसवप्पउत्तिपज्जाउलासेसपरिअणो[1] पदोसो अणुऊलइस्सदि अज्ज णो वेवसिदं[2] । संपदं तुवरन्तकामो कामिणिं[3] कामेदुं बहुसो सपादवन्दणं अब्भत्थिअ पुणो वि बलामोडिअ अहिद्दवन्तो[4] मअरन्देण णिट्ठुरं पडिहदो जामादा। तदो सो क्खु अधिअवेलक्खक्खलन्तअक्खरो[5] सरोसणिब्भरदुःक्खिदो मदप्पप्फुरन्त-

---

कौमुदीमहोत्सवप्रवृत्तिपर्याकुलाशेषपरिजनः प्रदोषानुकूलयिष्यत्यद्य नो व्यवसितम्। सांप्रतं त्वरमाणकामः कामिनीं[6] कामयितुं बहुशः सपादवन्दनमभ्यर्थ्य पुनर्बलात्कारेणाभिद्रवन्मकरन्देन निष्ठुरं प्रतिहतो जामा[7]ता। ततः स खल्वधिकवैलक्ष्यस्खलदक्षरो सरोषनिर्भरदुःखितो मदप्रस्फु-

---

पल्लम्भात्। गोपायितो गुप्तीकृतः। आपृच्छ्य संवादं कृत्वा। तत्र नन्दनगृहं गच्छामीति तद्भवाननुमन्यतामिति संवादः। आपृच्छिः संवादार्थ इति शाब्दिकाः। अत एवापृच्छस्व प्रियसखममुमिति मेघदूतादौ टीकाकृता तथैव विवृतमित्यवधेयम्। आवसथं गृहम्। कौमुद्याश्विनपूर्णिमाव्रतम्। यद्वा। कार्तिक्यां चन्द्रमण्डलपूजा कौमुदीव्रतम्। तदुभयं च ग्रीष्मे प्रवृत्तमित्यकालकौमुदीत्युक्तम्। यद्वा। जननयनानन्दकत्वेन कौमुदीव

---

१ °इआ for °इदा N.; पमत्त for पउत्ति C. N.; एसो after परिअणो B.; पओसो N. २ व्व° for व° A. E.; क्खु after संपदं A. ३ E. N. om. कामिणिं; °णीं for णिं A. C.; N. om. बहुसो; °वाद for °पाद B. E.; पडणं for वन्दणं N.; °च्छिअ for °त्थिअ C.; N. om. वि; °मोडिएण N. ४ अभि° for अहि° N.; °दवन्तो A. C.; णिट्ठुरपडिहदो A.; अहि° for पडि° N.; जामादरा C.; स अ for तदो सो क्खु A.; अधिअदरवेल° A.; जामादा। सो वेलक्खरोसणिब्भरदुक्खिदो N. ५ B. E. add रोस after वेलक्ख; वेलक्ख B.; रोस for सरोस A.; रुदिअ A. रुदद N. for मद; पप्फु° for प्फु° A. B. C. N.; वअणो for णअणो N. ६ Com. with A. ७ जामाता। सचाधिकतरवैलक्ष्य स्खलदक्षरस्वरो रोषनिर्भरसंशुष्कनारुदितप्रस्फुरद्वदनो Com.

णअणो ण मे संपदं तुए कोमारबन्धईए पओअणं त्ति ससवहं पइण्णं काउण वासभवणादो णिग्गदो त्ति। एदिणा पसङ्गेण मदअन्तिअं आणीअ मअरन्देण सह संजोजइस्सं। (क)

इति निष्क्रान्ता। प्रवेशकः।

रञ्जयनो न मे सांप्रतं त्वया कौमारबन्धक्या प्रयोजनमिति सशपथं प्रतिज्ञां कृत्वा वासभवनान्निर्गत इति। एतेन प्रसङ्गेन मदयन्तिकामानीय मकरन्देन सह संयोजयिष्ये।

कौमुदीति रूपकम्। कौमुदी चन्द्रज्योत्स्ना यथाकालसंभवा संध्याकालीना वर्षर्तुभवा जनानन्दाय तथेयमपीत्यर्थः। अः केशवस्तस्य कालो वर्षाकालः संध्याकालश्च॥ प्रदोषो रजनीमुखमित्यमरः॥ व्यवसितं मदयन्तिकाविवाहरूपम्। अन्यकार्यव्यावृत्ते जने तदप्रत्यूहं निर्वहेदिति भावः। त्वरमाणेति विलम्बासहकामावेश इत्यर्थः। विरस्काराद्वैलक्ष्येण स्खलन्नक्षरैः सह स्वरो यस्य सः। रोषेण निर्भरं व्याप्तम्। खुलुङ्कितमिति पाठे खुलुङ्कितं मौनम्। खुलुङ्कितमाहुर्मुखसंकोचं च काव्यविद इत्यभिधानात्। कौमारबन्धकी वेश्या। माधवानुरक्तत्वात्। तदत्र नन्दनस्य विवाहदिन एव बलादभिद्रवणेनाधार्मिकत्वम्। कामशास्त्राविज्ञत्वं च दर्शितम्। यदाह।

सुकुमाराः पुरुषाणामाराध्या योषितः सदा।
अनिच्छया प्रवृत्तश्चेच्छृङ्गारं नाशयेद्रसम्॥

बन्धकीति परुषवाक्येन दुराचारत्वमप्यस्य। यदाह।

ताडनं बन्धनं वा यो न विमृश्य समाचरेत्।
ब्रूते परुषवाक्यं च दुराचारः स उच्यते॥

प्रसङ्गेन संविधानकेन। एतेन सूचनात्प्रवेशः।

---

१ तुमए A. इमाए N. for तुए; °सवहं N. पडिण्णं for पइण्णं B. २ कदुअ for काउण B.; N. om. त्ति; ता एदेण पसङ्गेण N. ३ समं for सह N.; सजोइस्सं B.; त्ति after संजोइस्सं N. ४ N. om. इति.

ततः प्रविशति शय्यागतो मालतीवेशो मकरन्दो लवङ्गिका च।

मक०। लवङ्गिके अपि नाम बुद्धरक्षितासंक्रान्ता भगवतीनीतिर्विजेष्यते।

लव०। को[3] संदेहो एत्थ महाणुभाभस्स। किं बहुणा जहा एसो मञ्जीरसद्दो सुणीअदि तहा जाणामि तेण वपदेसेण आणीदा बुद्धरक्खिदाए मदअन्तिआ त्ति। ता उत्तरीआपवारिदो पसुत्तलक्खणो चिट्ठ। (क) मकरन्दस्तथा करोति।

(क) कः संदेहोत्र महानुभावस्य। किं बहुना यथैष मञ्जीरशब्दः श्रूयते तथा जानामि तेन व्यपदेशेनानीता बुद्धरक्षितया मदयन्तिकेति। तदुत्तरीयापवारितः प्रसुप्तलक्षणस्तिष्ठ।

१९–२१. सुप्तस्य प्रवेशो भरतनिषिद्ध इति शय्यागत इत्युक्तम्। भगवतीनीतेरव्यभिचारित्वेप्याश्रयभेदात्तदाशङ्क्याह। अपीति संभावनायाम्। अव्यभिचारित्वमेवाह। लवङ्गिकावाक्ये। कः संदेहोत्र महानुभावस्य। मदयन्तिकापरिणयोवश्यं भावीति भावः। अत्र किं बहुना भणितेनेत्यर्थः। मञ्जीरो नूपुरम्। व्यपदेशेन मालतीप्रबोधच्छलेन उत्तरीयेति उपरिवासःपिहिताङ्ग इत्यर्थः। लक्षेण व्याजेन। इह नर्मगर्भा कैशिकीवृत्तिः। यदाह।

---

१ N. om. मालतीवेशो. २ B. om. लवङ्गिके; नामेयं बुद्ध° B.; नीतिरविपर्येष्यति A. नीतिर्विपर्येष्यते E. नीतिर्न विपर्येष्यते C. ३ कहं संदेहो महाभाअ सा क्खु निउणा। जहा N.; भावस्स C. E. ४ तक्केमि for जाणामि A.; ववे° A. E.; आणिदा B. C. ५ °आए N.; मदअंतिएत्ति C. E.; B. om. त्ति; °रीअवारिदो B. °रीओवंतरिदो C. °रीओवारिदो A. E.; सुत्तलक्ख° N. °लक्खणो A. C. °लक्खो E.; चिट्ठदु A. ६ तर्कयामि Com. ७ सुप्तलक्षेण Com.

ततः प्रविशति मदयन्तिका बुद्धरक्षिता च ।

मद० । सहि सच्चं ज्जेव[1] परिकोविदो मे भादा मालदीए । (क)

बुद्ध० । अध ई[2] । (ख)

मद० । अहो अच्चाहिदं ता एहि वामसीलं[3] मालदिं निभच्छेम्ह । (ग) परिक्रामतः ।

बुद्ध० । इदं वासभवणदुवारं[4] । (घ) इति प्रविशतः ।

(क) सखि सत्यमेव परिकोपितो मे भ्राता मालत्या ।

(ख) अथ किम् ।

(ग) अहो अत्याहितं तदेहि वामशीलां मालतीं निर्भर्त्सयावः ।

(घ) [6]इदं वासभवनद्वारम् ।

कार्यकारणतो यत्र नायको गोपयेत्तनुम् ।
नर्मगर्भः स कथितो नाट्यवेदिभिरुत्तमः ॥

२५-२७. अत्रात्याहितमतिक्रमः । निर्भर्त्सयाम इति ।

निरात्रं नायकं ज्ञात्वा वाचा हीनं तु कन्यका ।
पश्यन्ती स्तम्भयच्छन्नं निर्विद्येत ततः परम् ॥

इति भरतानुरोधेन कन्याविस्रम्भपरे मे भ्रातरि व्यर्थमियं रुष्टेति निर्भर्त्सनमस्या इति भावः । बुद्धरक्षितावाक्ये । एतद्वासभवनद्वारम् । तत्प्रविशेति शेषः ।

---

१ एव्व N. २ अह N. ३ सीळां B. शीळं A. C. E.; वामसीळं निभच्छिअ मालदिं गच्छम्ह N.; °दी. C. ४ N. om. दुवारं; B. om. इति; उभे for इति N. ५ Com. om. परि. ६ एतद् for इदं Com.

मद०। सहि लवङ्गिए जाणीअदि[1] पसुत्ता दे पिअसही त्ति। (क)

लव०। [2]एहि मा णं पडिबोधेम्हि जदो एसा चिरं दुम्मणाअन्ती दा[3]णिं उज्जेव्व ईस मण्णुं उज्झिअ पसुत्तेत्ति। तदो सणिअं [4]इध उज्जेव्व सअणुप्पन्ते उवविस। (ख)

मद०। तथा कृत्वा। [5]सहि दुम्मणाअदि इअं वामसीला। (ग)

(क) सखि लवङ्गिके [6]ज्ञायते प्रसुप्ता ते प्रियसखीति।

(ख) [7]एहि मैनां प्रतिबोधय यत एषा चिरं दुर्मनायमानेदानीमेवेषन्मन्युमुज्झित्वा प्रसुप्तेति। ततः शनैरिहैव शयनीयोपान्त उपविश।

(ग) सखि दुर्मनायत इयं वामशीला।

३०–३८. अत्र कथमस्माद्दुराचारात्स्थास्यामीति चिन्तया दौर्मनस्यान्निद्रा। यदाह।

आलस्यदौर्मनस्यक्लेशश्रमचिन्तनस्वभावेभ्यः।
रात्रौ जागरणादपि निद्रा मनुजे दिवापि संभवति।

तथा च दुःखहानाय निद्रयापि क्षणं नयत्वियमित्याशयः। अत्र विस्रम्भणं विश्वासमुत्पाद्य वशीकरणम्। लडहं मनोहरम्। विदग्धं कलाभिज्ञम्। नववधूविस्रम्भणोपायस्ताम्बूलादिदानम्। यदाह। बाला ताम्बूलमालाफ-

---

१ जाणीहि दाव A.; ते for दे B.; E. om. त्ति; पिअसही न वेत्ति A. २ सहि before एहि A. N.; पडिओबोहि E.; N. om. जदो. ३ इदाणीं for दाणिं A. C. E.; N. om. ज्जेव्व; ईसि मण्णे पसुत्तेत्ति N.; °त्तेत्ति A. B. E.; इदो C. अदो N. for तदो.; अदो एदास्सि सअणञ्चम्मि उवविस N. ४ इह ज्जेव्व सअणुप्पन्ते B.; °णुप्पन्तं E.; उप° C. ५ N. om. सहि; कधं after सहि A.; °अदि किं इअं N. ६ Com. with A. ७ सखि before एहि Com. प्रतिबोधयिष्यसि एषा हि चिरं Com. ८ त्यक्त्वा. Com.

लव० । [1]कहं णाम णववहूविस्सम्भणोवाअजाणुअं ळडहं विअ-[2]डमहुरभासिणं ससिणेहं अरोसणं अ दे भादरं भत्तारं समासादिअ [3]सही ण दुम्मणाइस्सादि । (क)

मद० । [4]बुद्धरक्खिदे पेक्ख विप्पदीअं अह्मे वि उवालम्भी-आमो । (ख)

(क) कथं नाम[5] नववधूविस्रम्भणोपायज्ञातारं मनोहरं विदग्धम-धुरभाषिणं सस्नेहमरोषणं च ते भ्रातरं भर्तारं समासाद्य सखी न दुर्मनायिष्यते ।

(ख) [6]बुद्धरक्षिते प्रेक्षस्व विप्रतीपं वयमपि उपालभ्यामहे ।

लरससुरसाहारसंमानहार्येत्यादिकः सुप्रसिद्ध एव । प्रकृते कृताकम्भप-रत्वाद्विपरीतार्थकत्वमिति भावः । विप्रतीपं विपरीतम् । पादपतितनन्द-नाननुवर्तनान्मालत्यैवोपालभ्या तदकरणाद्विपरीतत्वमिति भावः । पादप-तनेनुवृत्तौ भरतः ।

क्रीडायुक्तापि या योषिदतिरुष्टापि या भवेत् ।
पादे पतन्तं पुरुषमनुवर्तेत सर्वदा ॥

---

१ कथं A.; णाम ण णव° B.; जाणअं B. C.; ळडुहं C.; विअड्ड N.; B. has मनोहरं for ळडहं and om. विअड्ड. २ महुरालावभासिणं N. °भासग C.; A. N. om. ससिणेहं; च for अ B.; अरोसणं अकामुद दे N. भत्तरं A. ३ पिअसही A. E. N.; णो for ण B.; E. om. ण; °दिअ ण दुम्मणाइस्सदि दे पिअसही N. ४ कहं before बुद्ध° N.; पेक्ख पेक्ख A. B.; °प्प B. °दीवं N.; N. om. अह्मे वि; उआलं° C. उआलद्धाहि N. ५ समासाद्य अविप्रव-वा Com. ६ सखि before बुद्ध° Com.; पश्य पश्य वयमेव Com.

बुद्ध०। वि[1]प्पदीअं ण विप्पदीअं वा। (क)

मद०। क[2]धं विअ। (ख)

बुद्ध०। जं दाव चलणपडिदो[3] वि भत्ता ण बहुमाणिदो एत्थ लज्जादोसेण एसो जणो[4] उआलम्भणिज्जो। जं पि पिअसहि णववहूविरुद्धसा[5]हसोवक्कमक्खलणवेलक्खविच्छडिदमहाणुभावत्तण -

---

(क) विप्रतीपं न विप्रतीपं वा।

(ख) कथमिव।

बुद्धरक्षितावाक्ये। विप्रतीपं न वा विप्रतीपम्। तच्चित्तानुवर्तनेन स्वीकृत-युक्त्या निराकरणेन न वैपरीत्यमिति भावः।

४०—४६ स्वाभिप्रायं गोपायितुं साधारणोक्त्या स्ववचो वदति [बुद्ध०]। अत्रेयमिति वक्तव्ये जन इत्यभिधानं मालतीमकरन्दसा-धारण्यार्थम्। नववध्वा लज्जयातिक्रमे न दोषः। यदाह।

> नवपरिणीता योषिद्यत्नादपनीय साध्वसं सद्यः।
> विविधविनोदकथाभिर्विश्वासं नीयते सरसैः॥

रभसोपक्रमः सहसा प्रवृत्तिः स च विरुद्धः। यदाह।

> सहसा वाप्युपक्रान्ता कन्याचित्तमविन्दता।
> साध्वसं त्रासमुद्वेगं सद्यो द्वेषं च विन्दति॥
> सा प्रीतियोगमप्राप्य तेनोद्वेगेन दुःखिता।
> पुरुषद्वेषिणी वा स्याद्विद्विष्टा वा ततोन्यगा॥

---

१ °दीतं B. °दीवं N. in both places.; वि for वा A.; C. om. वा. २ कहं N. ३ पडिओ A. E.; चळणाणदो भत्ता N.: °मण्णिदो N. ४ जणो ण उआल° A. C. E. N.; उवाळं° N.; जं पिअसहि B. N. ५ रहसोवक्कम A. भसोवक्कम N.; विच्छडिअ for विच्छडिद N.; °भावत्तणस्स B.

स्स भादुणो दे वा[१]आगदं किं वि अपरिट्ठाणं[६] तेण तुम्हे त्ति । किं [२]च । कुसुमसधम्माणो हि योषितः सुकुमारोपक्रमाः । ता[३]स्त्वनधिगतविश्वासैः प्रसभमुपक्रम्यमाणाः सद्यः संप्रयोगविद्वेषिण्यो भवन्ति । एवं किल कामसुत्तआरा आमण[४]न्ति । (क)

(क) यत्तावच्चरणपतितोपि भर्त्ता न बहुमानितोत्र लज्जादोषेणैव जन उपालम्भनीयः । यदपि प्रियसखि नववधूविरुद्धतीव्रोपक्रमस्खलनवैलक्ष्यविच्छर्दितमहानुभावत्वस्य भ्रातुस्ते वाचागतं किमप्यपरिस्थानं तेन यूयमिति । एवं किल कामसूत्रकारा आमनन्ति ।

स्खलनमुपक्रान्तानिर्वाहः । विच्छर्दितं विशीर्णम् । अपरिस्थानकमपरिस्थितिः । अधैर्यमिति यावत् । यूयमुपालम्भ्या इति मदयन्तिकां प्रति वचनम् । भ्रातृपक्षप्रवेशात् । अहेति पाठे बुद्धरक्षिता मदयन्तिकया सह स्वाभेदं मन्यमाना वयमित्याह । शिल्पकारित्वात्संस्कृताश्रयणम् । यदाह ।

दिव्याया गणिकायाश्च शिल्पकार्यास्तथैव च ।
विदग्धायाः स्त्रिया भाषां संस्कृतेनापि योजयेत् ।

यद्वा । कामसूत्रानुकरणात्संस्कृतभाषा । सधर्माणस्तुल्याः । उपक्रम आरम्भः । प्रसभं हठात् । संप्रयोगः सुरतम् । किल प्रसिद्धौ । कामसूत्रकारा मन्त्रयन्ते ।

१ वाआगमं B. °गअं N. किं पि B.; N. om. वि; अपरि° N.; तेण वि तुह्मो त्ति C. तेण वअं त्ति B. तेण जाणीआदि अवरद्धा त्ति तुह्मे त्ति E. तेण जाणीअदि किं अवराहा अह्मे त्ति N. २ किं अ N.; A. N. add संस्कृतमाश्रित्य after किं च; कुसुमधर्माणो B. कुसुमसमधर्माणो N. ३ ताश्चानधि° A., E. om. तास्तु; संप्रयोगे A.; द्वेषिण्यो E.; °विद्वेषिण्योऽपि पुरुषद्वेषिण्यो भवंति N. ४ भणंति A. C. E. आमणांते N. for आमणन्ति. ५ रभसोपक्रम Com. ६ अपरिस्थानकं Com.

लव० । सास्रम् । घरे घरे [1]पुरिसा अम्मकाओ समुव्वहन्ति ण [2]क्खु को वि लज्जापराधीणं अणवरद्धं मुद्धलडहसहावं कुलकुमारिअणं [3]पहवामि त्ति वाआणलेण पज्जालेदि । एदे क्खु दे हिअअसल्लणिक्खेवा [4]आमरणं संभरिज्जन्तदूसहा पदिघरणिवासवेरग्गकारिणो महापरि[5]भवा जाणं कदे इत्थिआणं जम्मलाहं जुगुच्छन्ति बान्धवा ।(क)

(क) गृहे गृहे पुरुषाः कुलकन्यकाः समुद्वहन्ति न खलु कोपि लज्जापराधीनमनपराद्धं मुग्धसुकुमारस्वभावं कुलकुमारिजनं प्र[6]भवामीति वाचानलेन प्रज्वालयति । एते खलु ते हृदयशल्यनिक्षेपा आमरणं [7]संस्मर्यमाणदुःसहाः पतिगृहनिवासवैराग्यकारिणो महापरिभवा येषां कृते स्त्रीणां जन्मलाभं जुगुप्सन्ते बान्धवाः ।

४९–६४ अत्र निक्षेप आरोपणम् । जुगुप्सन्ते निन्दन्ति । दुःशीला कन्या मा जायतामिति भावः । [मद० वा०] कथमन्यथात्युद्विग्नेयमिति भावः । [मद० वा०] । अत्र प्रभवामीति वरभगिन्यपि त्वयि

१ पुरुसा B. N.; कुलकण्णकाओ A. कण्णआओ E. अज्जयाओ N. for अम्मकाओ; उव्वहंति N. २ ण हु को वि B. C. ण अ को वि N.; पराहीणं C. वराधीणं B. लज्जापसाहणं N.; अणवरद्धं B. अणवलद्धं E.; A. om. मुद्ध; लडहसहावं B. लडहस° C. लड्डस° E., N. om. लडह; कुलकुमारिणं पहवामि C. ३ पहरामीति A.; दाआअणले B.; पज्जाकुलेअदि N.; E. om. दे; णिक्खेवा A. B. N. ४ आमरणसंभ° N.; सुमरिज्जन्त A.; समरिज्जंत B.; दुःसहा A. B. C. E.; दूसहाआसा N.; परघर B. C. E.; °आरिणो N. ५ °हवा B.; किदे B. किए N.; इत्थिजणाणं B. इत्थिआजम्म° N. इत्थिअणजम्म° E.; जुउच्छन्दि N. °च्छन्दि B.; बंधवा B.; बंधवजणा N. ६ पहरामीति Com. ७ स्मर्यमाण Com.

मद०। [1]बुद्धरक्खिदे अदिदुम्मिदा पिअसही लवङ्गिआ। [2]महन्तो को वि मे भादुणा वाआवराधो से कदो। (क)

बुद्द०। [3]अध इं। सुदं अह्मेहिं जधा मम ण तुए संपदं कोमारबन्धईए पओअणं त्ति। (ख)

(क) [4]बुद्धरक्षिते अतिदूना प्रियसखी लवङ्गिका। [5]महान्कोपि मे भ्रात्रा वाचापराधोस्याः कृतः।

(ख) [6]अथ किम्। श्रुतमस्माभिर्यथा मम न त्वया सांप्रतं कौमारबन्धक्या प्रयोजनमिति।

प्रणयवशादाश्वासवत्यहमिति भावः। [ल० वा०] अत्र यथेच्छसि तथा ब्रूहीत्यर्थः। [म० वा०] अत्रेदृशोपि दुःशीलोपि। यथाचित्तं चित्तानतिक्रमेण। भर्तेति।

कोपि देवः कुलस्त्रीणां पतिरेव पतन्नापि॥

---

१ अइ A. सहि N. before बुद्धरक्खिदे; °रक्खिए N.; अदिदुम्मविदा A.; धूमिआ N.; N. om. पिअ. २ अदिमहन्तो A. अवि महंतो N.; क्खु after महन्तो A. E.; भादुणो N.; वाआअवराधो A. °राहो N.; N. om. से; किदो B. N.; E. gives the portion of this speech beginning with महन्तो to लवङ्गिका and has दे for मे. ३ बुद्ध०। अधइं सुदं अह्मेहिं। मद०। सहि कीरिसो। बुद्ध०। मम ण &c. A., बुद्ध०। अवइं। मद०। सहि कीरिसो। बुद्ध०। सुदं अह्मेहिं जधा मइ ण &c. C.; N. om. जधा; मइ for मम E.; ण मे संपदं इमाए N.; कुमारबंध० C.; बंधइए A.; after पओअणं त्ति N. adds मसपदं पइण्णं काऊण वासभवणादो गदो।. ४ Com. with A.; अन्यत्रनापिना Com. ५ Com. with A. ६ Com. with A. except that it has यथा before मम.

मद०। कर्णौ पिधाय। अहो अदिक्कमो। अहो पमादो[1]। सहि लवङ्गिए असमत्थह्मि दे मुहं पि संपदं दंसिदुं[2] तधावि पहवामि त्ति किं पि[3] मन्तइस्सं। (क)

लव०। साधीणो[4] दे अअं जणो। (ख)

मद०। चिट्ठदु इज्जेव्व[5] मह भादुणो दुस्सीलदा अवरिट्ठाणं अ। तुह्मोहिं[6] ईदिसो वि संपदं जधाचित्तमणुवत्तणीओ जेण भत्ता एसो त्ति। अण्णं च[7]। तुह्मे इमस्स अणहिजादक्खराहिक्खेवोवालम्भदूसणस्स[8] जं मूलं तं ण आणध। (ग)

(क) अहो अतिक्रमो। अहो प्रमादः। सखि लवङ्गिके असमर्थास्मि ते मुखमपि सांप्रतं दर्शयितुं तथापि[9] प्रभवामीति किमपि मन्त्रयिष्ये।

(ख) स्वाधीनस्तेयं जनः।

(ग) तिष्ठत्वेव मम भ्रातुर्दुःशीलतापरिस्थानं च। युष्माभिरीदृशोपि सांप्रतं यथाचित्तमनुवर्तनीयो येन भर्तैष इति। अन्यच्च। यूयमस्यानभिजाताक्षराधिक्षेपोपालम्भदूषणस्य यन्मूलं तन्न जानीथ।

इतिवचनात्स्त्रीषु भर्ता प्रभवतीति भावः। न चेति न च न जानीथ। किं तु जानीथ एवेत्यर्थः।

१ पमादो A. B. C. E. मुहं वि B. N.; C. E. om. पि. २ दअदुं for दंसिदुं A.; तह वि N.; पहवामि A. C. E. ३ किं वि N. ४ स्साधीणो B. साहीणो N. ५ दाव for इज्जेव्व N.; मम for मह B., N. om. मह; अणरि° N. अवरिट्ठाणअं B. C.; च for अ B. ६ तुह्मोहिं वि ईदिसो N.; एरिसो A.; B. om. संपदं; जह N. °मणुवत्तणीओ B. ७ N. om. अण्णं च; अ for च B.; A. adds ण अ before तुह्मे; इमस्सिं B.; किं after इमस्स C.; अणहिआदअक्खरा° N. इमस्स अणक्खराहिक्खे° B. C. इमस्स इत्थीअणअणभिजादुदुरक्खराहिक्खे° A. इत्थीयाजणाणहिजाद E. ८ A. N. om. दूसण; B. om. ण; जाणध A. आणेह N. ९ तथापि च प्रभ° Com. १० Com. with A. except that it has उपालम्भदीनस्यस्य.

लव० । कधं वाआमन्तिदं[1] वि णाम ण जाणीमो । (क)

मद० । जं दाणिं[2] तस्सिं महाणुभावे माहवे किं पि किल मालदीए तारामेत्तअं[3] आसी तहिं सव्वलोअस्स अदिभूमिं गदो पवादो । तं[4] क्खु एदं विअम्भादि । ता पिअसहि जधा एस भत्तुणो अवक्खाहिणिवेसो णिरवसेसं हिअआदो उद्धरीअदि तधा[5] करेध । अण्णधा महादोसो त्ति जाणिदं भोदु[6] । णिक्कम्पदारुणा अम्मकाओ दूमावेन्ति हिअअं मणुस्साणं ईदिसादो[7] दुरभिसङ्गादो त्ति मा णं भणिस्सध मदअन्तिआए कधिदं त्ति । (ख)

(क) कथं वाचामन्त्रितमपि नाम न जानीमः ।

(ख) यदिदानीं तस्मिन्महानुभावे माधवे किमपि किल मालत्यास्तारामैत्रकमासीत्तत्र सर्वलोकस्यातिभूमिं गतः प्रवादः । तत्खल्विदं विजृम्भते । तत्प्रियसखि यथैष भर्तुरपक्षाभिनिवेशो निरवशेषं

६६—७४ अत्र किल प्रसिद्धौ । तारामैत्रकं प्रेम । तत्र माधवे । अतिभूमिमतिदूरम् । तत्खल्विति । माधवानुरक्ता मालतीयं स्यादिति[8] इत्याशयः । विजृम्भते प्रकाशते । अपक्षे मालती माधवपरेत्यसत्पक्षे । अभिनिवेशो रोषः । निरवशेषमिति क्रियाविशेषणम् । दोष इत्यस्या दौर्भाग्यं त्यागो वा नित्यशा-

१ कहं अहो असंतं वि जाणामो for कधं—जाणीमो N.; E. om. ण. २ °णीं E; °णुभाए B.; °णुहावे N.; किं वि A. C. D. ३ वाआमेत्तअं A. वाआमेत्तं N. तारामेत्तिअं C.; आसि B. C. E.; आसी ताहे तस्सिं सव्व° N.; तहिंअ A. E.; स° A. C. E. ४ ता क्खु A.; विअम्हाहि C. विइम्भइ N.; जह N.; एसो N. एसा B. E. for एस; अवक्खराहिणिवेसो B. वक्खराहिणिवेसो C. वेलक्खाहिणिवेसो N. ५ तह करेह N.; अण्णहा N. ६ होदु N.; °दारुणासु अम्मकासु दूमावेदि° B.; °दारुणो क्खु अम्मकासु C.; °दारुणा क्खु अम्मकाओ E. °दारुणा क्खु अण्णकाओ A.; दूमवेदि A.; C. E. ७ ईरिसी दुरभिसंकोत्ति E. ईरिसो दुरभिसंगोत्ति A. B. ईदिसो दुरभिसंगोत्ति C. A. N. om. णं; भणह N.; मदअंतिआअ भणिदं त्ति B. कहिदं N. ८ नागममपि Com.

लव० । अइ असा[1]वधाणे असंबद्धलोअप्पवादमोहिदे अवेहि ण तुए[2] सह जंपिस्सं । (क)

मद० । स[3]हि पसीद पसीद । अहवा ण तुह्मे अफुडं भणिदाओ चि[4]ट्ठध । किं च । अह्मे सच्चं ज्जेव्व माहवेक्कमअजीअलोअं मालदिं

हृदयादुद्भूयते तथा कुरुत । अन्यथा महादोष इति ज्ञातं भवतु । निष्कम्पतारुणाः क[5]न्यका दुन्वन्ति हृदयं मनुष्याणामीदृशाद्दुरभिसङ्गादिति । मैनां भणिष्यथ मदयन्तिकया कथितमिति ।

(क) अयि अ[6]सावधाने असंबद्धलोकप्रवादमोहिते अपेहि न त्वया सह[7] जल्पिष्यामि ।

(ख) सखि प्रसीद प्रसीद । अथवा न यूयमस्फुटं भणितास्तिष्ठथ । किं च । वयं सत्यमेव माधवैकमयजीवलोकां मालतीं जानीमः ।

ङ्काकुलतया स्यादिति भावः । निष्कम्पेति । सततपरपुरुषालोकनेन लज्जाहीनतया दारुणत्वमत एवेयं कुलटा न वेत्ति परेषां संदेह इति भावः । [लव० वा०] अत्रापेहि दूरं गच्छ ।

७५–८८ अत्र न यूयमिति त्वदस्फुटवादे मेवसाद इत्यर्थः । न खलु न जानीमः । अपि तु जानीम एव । तथा च त्वमपह्नवं किं करोषीत्यर्थः । कठोरः परिणतो जातपाण्डिमेत्यर्थः । यद्वा । अकठोरा बाला केतकीत्यर्थः ।

१ N. om. असावधाणे. २ सह किं पि मन्तिदव्वं A. तुए सह ण मंतइस्सं N. ३ N. om. सहि; C. om. one पसीद, पसीद B.; णं for ण E.; अफुडं A. अफुटं C. अप्फुटं E. मह एव्वं for अफुडं N. ४ चिट्ठद A. चिट्ठह N.; अ for च A., E. om. च; पि after अह्मे N.; सच्चकं A. C. E.; एव्व N.; माधवमअजीविदं N.; °दीं A. B. C. E. ५ Com. with E. and has उपतापयन्ति for दुन्वन्ति. ६ Com. om. असावधाने. ७ सह किमपि मन्त्रयिष्ये Com. ८ भणन्त्यः Com. ९ मालतीं खलु न जानीमः Com. but Jag. takes मालतीं न खलु न &c.

जाणिमो। केण वा कठोरकेदअगब्भविब्भमावअवदोब्बल्लणिव्वहिदसुंदरत्तणविसेसं माहवसहत्थणिम्मिविदबउलावलीविरइदकण्ठावलम्बमेत्तसंधारिदजीवणं मालदीए माहवस्स अ पभातचन्दमण्डलावाण्डुरपरिक्खामरमणीअदंसणं ण विभाविदं सरीरं। किं च तद्दिअसे कुसुमाअरुज्जाणपेरन्तरच्छामुहसमागमे सविब्भमुल्लसिदको-

---

केन वा कठोरकेतकगर्भविभ्रमावयवदौर्बल्यनिर्वाहितसुन्दरत्वविशेषं माधवस्वहस्तनिर्मितबकुलावलीविरचितकण्ठावलम्बमात्रसंधारितजीवनं मालत्या माधवस्य च प्रभातचन्द्रमण्डलापाण्डुरपरिक्षामरमणीयदर्शनं न विभावितं शरीरम्। किं च। तद्दिवसे कुसुमाकरोद्यानपर्यन्तरथ्यामुखसमागमे सविभ्रमोल्लसितकौतूहलोत्फुल्लप्रसरन्नयनोत्पलबहलविलासमसृणसंचारचारु-

---

तादृशी सातिपाण्डुरेव भवति। न विभावितं न ज्ञातम्। अपि तु सर्वैरेव ज्ञातमित्यर्थः। तत्किमपह्नवं करोषीति भावः। विभ्रमो विलासः। स च स्त्रियां यथा।

यानस्थानासनादीनां नेत्रवक्त्रादिकर्मणाम्।
उत्पद्यते विशेषो यः स विलास इति स्मृतः॥

पुरुषे यथा।

मन्दसंचारिणी दृष्टिर्गतिश्च वृषभायिता।

---

१ क्खु ण A. and ण B. E. before जाणीमो; जाणामो N.; अकठोरकेभई N.; कवाभअ for केदअ B.; °वअवसोहावहिवअसुंदरत्तणं माहव° N.; णिव्वत्तिद for णिव्वहिद A. E. २ णिम्मिद for णिम्माविद E.; वउलमाला N.; रइद for विरइद C. E.; °इअ N. ३ °मेत्तसंजीवणं A. °वलीविअमेत्तसंजीवणं णिअसहीए मालदीए N.; व्वभात A. पहात्त N. ४ पाण्डुर A. पंडुर E. N.; कपोल for परिक्खाम N.; अ for च A. C. N.; तद्दिअहे C. तस्सिं दिअहे N. ५ रत्था for रच्छा A. B.; समाअमे N.; °सिअ N. ६ °लोत्फुल्ललोचनविलास Com.

[1]दूहलुप्फुल्लपसरन्तणअणुप्पलवहलविलासमासिणसंचारचारुतारआ- विराअन्तविब्भमा अणङ्ग[2]णट्टाआरिअसव्वाआरोवदेसणिम्मविअविअ-[3]ड्ढमुद्धमहुरा तुए वि ण णिरूविदा इमाणं दिट्ठिसंभेदा । किं अ । मम भादुणो दाणववुत्तन्तं सुणिअ तक्खणुच्छलिद[4]गम्भीरावेअव्वइअरमि-लाअन्तदेहसोहा[5]णं उव्वत्तमाणमूलं विअ ण लक्खिदं हिअअं । किं अ । [6]एदं पि अवरं सुमरिदं मए । (ख)

तारकाविराजमानविभ्रमा अनङ्गनाट्या[7]चार्यसर्वाकारोपदेशनिर्मितवैदग्ध्यमुग्धमधुरास्त्वयापि न निरूपिता अनयोर्दृष्टिसंभेदाः । किं च । मम भ्रातुर्दानववृत्तान्तं श्रुत्वा तत्क्षणोच्छलितगम्भीरावेगव्यतिकर[8]म्लायमानदेहशोभयोरुद्वर्तमानमूल[9]मिव न लक्षितं हृदयम् । किं च । [10]एतदप्यपरं स्मृतं मया ।

स्मृतिपूर्वस्तथालापो विलासः कथ्यते यथा ॥

किं न त्वया निरूपिता येनापकुष इत्यर्थः । आवेगोप्राप्तिदुःखम् । अङ्गारितं सुतप्तम् । उद्वर्तमानमुत्पतत् । आवेगोयमिष्टानाप्तिजः । यदाह ।

आवेगश्च भवेत्पुंसामिष्टानावाप्तिसंभवात् ॥

---

१ कोऊहलुप्फुण्ण N.; °फुल्लीअणविलास A. °प्फुण्णपरिसरुवत्तमाणसविलास N.; तारअविइम्भमाणाणंगसिंगारागुरिअणट्टाआरोवदेस N. २ णट्टारिअ B.; णिम्मिद for णिम्मविअ A. णिम्मिअ N. ३ मणहरा for महुरा N.; मए for तुए A. B.; मए णं णिरूविदा N.; किं च B.; मह for मम N. ४ तक्खणुब्भरिद B. E. तक्खणुवत्तमाण N.; गभीर C.; °रुव्वेअव्वइअर N. व्वइअरंगारिदमिला° A. व्वइअरुद्दीविदमिला° E. ५ देहसोहंउक्खंडिअमाणमूलं N.; °मलवन्त्रणं A.; लक्खिअं N.; किं च B. ६ अअं for एदं B.; एअं for एदं E.; वि for पि C.; A. N. om. एदं पि; अवरम्पि सु° A.; अवरं वि सु° N.; विसुमरिदं C. E. ७ नृत्यायिन for नाट्याचार्य Com. ८ व्यतिकराङ्गारितग्लायमान Com. ९ मलबन्धनमिव Com. १० Com. with A.

लव० । किं दाणिं अवरं । (क)

मद० । [1]जं मम तस्स जीविदप्पदाइणो महाणुभावस्स चेअ[2]णापडिलम्भपिअणिवेदिआए मालदीए भअवदीविअड्ढवअणोवण्णासबोधिदेण हिअअं जीविदं [3]अ माहवेण पारितोसिअत्तणेण सअंगाहसाहसे णि[4]उत्तं । अह अ लवङ्गिए तहिं तुए ज्जेव्व भणिदं [5]पडिच्छिदो क्खु णो पिअसहीए अअं पसादो त्ति । (ख)

(क) किमिदानीमपरम् ।

(ख) यत्खलु मम तस्य जीवितप्रदायिनो महानुभावस्य चेतनाप्रतिलम्भप्रियनिवेदिकाया मालत्या भगवतीविदग्धवचनोपन्यासबोधितेन हृदयं जीवितं च माधवेन पारितोषिकत्वेन स्वयंग्राहसाहसे नियुक्तम् । अथ च लवङ्गिके तत्र त्वयैव भणितं प्रतीष्टः खलु नः प्रियसख्या अयं प्रसाद इति ।

[लव० वा०] किमिदानीमपरम् । त्वया स्मृतमिति शेषः ।

९०–९४. अत्र चेतनाप्राप्तिरूपमेव प्रियम् । पारितोषिकं यद्यालक्ष्मणितेत्यादिश्लोके दर्शितम् । नियुक्तं दत्तम् । तन्निसानुरागं विना नोपपन्नमिति भावः । अर्थान्तरोक्तिप्रसङ्गेन प्रकृतापकृष्टार्थमाह । [लव० वा०] आं सखि इति । आमिति पूर्वस्मरणार्थः । विस्मृतमिति । ज्ञात्वापि तत्कथाकथनायायं प्रश्न इति भावः ।

---

१ जं क्खु मम A. E.; मह for मम C. N.; °ददाइणो B. C.; °हावस्स N. °भाअस्स B. २ चेअणालाहे पिअ° B. C. चेअणोवलंभपिअ° N.; B om. मालदीए; विदड्ढ B.; °ण्णासेण चोदिदेण N. ३ B. C. om. अ; च for अ N.; पारितोसिअअत्तणो सअंग्गहेण णिउत्तं B. पारिदोसिअत्तणेण सअंगाहे णिउत्तं N.; सअंग्गहेण E. ४ णिछ्त्तं for णिउत्तं C.; B. N. om. अ; N. om. तहिं; ते N. एव्व C. एव्वं E. for ज्जेव्व. ५ पडिच्छदो B.; पसादो A.

लव०। क[1]दमो उण महाभाओ त्ति विसुमरिदं मए। (क)

मद०। स[2]हि सुमर सुमर जेण तस्सिं दिअसे विअडदुट्ठसावदावदेसकालगोचरं ग[3]दा असरणा तक्कालसंणिहिदेण जीविदप्पदाइणा पीअ[4]रभुअत्थम्भेण णिक्कारणबन्धवेण सअलभुवणेक्कसारणिअदेहोवहारसाहसं कदुअ परि[5]रक्खिदह्मि। जेण अ दिढदाढाविदारिअविअडमंसलु[6]त्ताणपरिणाहिवक्खत्थलेण जरढजज्जरिअजवापीडहारिणा क[7]रुणक्कमणेण मम किदे विसहिदा अतिदुट्ठसद्दूलणहसिहावज्जप्पहारा मारिदो अ[8] सो दुट्ठसावदमहारक्खसो त्ति (ख)

(क) कतमः पुन[9]र्महाभाग इति विस्मृतं मया।

(ख) सखि स्मर स्मर येन तस्मिन्दिवसे विक[10]टदुष्टश्वापदापदेशका-

९५—१०२. अत्र स्मर इति मकरन्दामिति भावः। विकुष्टो रुष्टः। श्वापद इति व्याघ्रव्याजेन यम इत्यर्थः। अवलम्बसंनिहितेति पाठे-

[1] आं सहि before कदमो A.; महाणुभावो C. N.; °भावो E.; B. N. om. त्ति. [2] N. om. सहि; N. om. one सुमर; दिअहे C. N. दिवहे E.; विकटदुट्टसद्दूलावदेसगोभरं A.; सावदपादगोभरं N. [3] गआ N.; सुलग्ग for तक्काल N.; °दायिणा C. E.; N. om. जीविदप्पदाइणा. [4] पीवर भुअत्थंभेण संभाविदा णिक्कारणसिणिद्धबंधवेण N.; भुज for भुअ C. E.; भुअत्थम्भसम्भाविदणिक्कारण A.; बंधुणा C. बान्धवेण A.; णिज्ज for णिअ E.; °वहार N. [5] N. om. परि; जेण अ उड्डदाढादारिअ C. अतिदिढदंट्ठाविआरिद E.; N. om. दिढदाढाविदारिअ. [6] मांसलु° N.; मंसलोत्ताल E.; वक्खत्थलललंछणेण A. वक्खत्थलंलंछणं E. वच्छत्थलुच्चलंतजरढ N.; जरठ A. जठर B. C. for जरढ; जाआपीड E. मुत्ताळदा for जवाडि N.; धारिणा N. [7] कलिकरुणे° E.; करुणाभरेण N.; कदे for किदे C. E.; निवडंत for अतिदुट्ठ B. E.; अदिदुट्ठ C.; °दुट्ट A.; णहसिहग्घादवज्ज° B. णहरसिहा A. णहराणिघ्घादवज्ज° E.; मम किदे णिमज्जंतसअलणहणिकाअवज्जावंजरप्पहारो N. [8] अ एसो E.; दुट्ठरक्खसो त्ति B. दुट्ठसद्दूलमहारक्खसो त्ति A. E.; N. om. त्ति. [9] आं सखि कतमः पुनरसौ महा° Com. [10] विकुष्ट for विकट Com.

लव० । हुं मअरन्दो । (क)

मद० । सानन्दम् । पिअसहि किं किं भणासि । (ख)

लव० । णं भणामि मअरन्दो त्ति । (ग) सस्पृहं शरीरमस्याः स्पृशन्ती संस्कृतमाश्रित्य ।

लगोचरं गताशरणा तत्कालसंनिहितेन जीवितप्रदायिना पीवरभुजस्त-म्भेन निष्कारणबान्धवेन सकलभुवनैकसारनिजदेहोपसंहारसाहसं कृत्वा परिरक्षितास्मि । येन च दृढदंष्ट्राविदारितविकटमांसलोत्तानपरिणाहि-वक्षःस्थलेन जरठजर्जरितजवापीडहारिणा करुणैकमनसा मम कृते विसोढा अतिदुष्टशार्दूलनखशिखावज्रप्रहारा मारितश्च स दुष्टश्वापद-महाराक्षस इति ।

(क) हुं मकरन्दः ।

(ख) प्रियसखि किं किं भणसि ।

(ग) ननु भणामि मकरन्द इति ।

वलग्नं कण्ठः । संभावितः ख्यातः ॥ कर्मधारयोत्र ॥ विकटं विशालम् । मांसलं स्थूलम् । उत्तानमुच्छ्रितम् । जरठं कठिनं जर्जरितं विध्वंसितं यदोड्रपुष्पमुकुटं तदिव हरति ॥ कर्तर्युपमान इति णिनिः ॥ हरणमिह समीकरणम् । रक्ताक्तदेहतया साम्यम् । शिखाग्रम् । [ल० वा०] अत्र हुं वितर्के ॥ हुं वितर्के विस्मय इत्यमरः ॥

१०३–१०४ [मद० वा०] अत्राह्लादातिशयात्पुनः पुनः प्रश्नः । प्रियनाममधुपानेपि न तृप्तातो श्रुत्वेवाहेति भावः । [लव० वा०] ननुशब्द आशयाविष्कारे ।

---

१ N. om. पिअ; A. C. E. om. one किं. २ णणु A. and ननु C. E. for णं; सस्मितं for सस्पृहं N. ३ °रणा पवनसंनिभनिजजीवितेन जीवित° one Ms. Com. °रणास्त्रजलसंनिभनिजजीवितेन another Ms. Com.; ३ वलग्नसं-निहितेन noticed by Com.; भुजस्तम्भसंभावितनिष्कारण Com. ४ वक्षःस्थल-लाञ्छनेन Com.

[1]वयं तथा नाम यदात्थ किं वदा-
म्ययं [2]त्वकस्माद्विकलः कथान्तरे ।
कदम्बगोलाकृतिमाश्रितः कथं
विशुद्धमुग्धः कुलकन्यकाजनः ॥

मद० । सलज्जम् । सहि कीस[3] मं उवहससि । णं भणामि णिव्वा-
वअन्ति [4]मं तारिसस्स अप्पणिरवेक्खव्ववसाइणो किदन्तकवलिज्ज-
न्तजीविद[5]बलामोडिअपच्चाणअणगुरुओवआरिणो जणस्स संकधासु

(क) सखि किं मामुपहससि । ननु भणामि निर्वापयन्ति मां तादृश-
स्यात्मनिरपेक्षव्यवसायिनः कृतान्तकवल्यमानजीवितबलात्कारप्रत्यानयन-
गुरु[6]कोपकारिणो जनस्य संकथासु नामग्रहणस्मरणानि । तथा च

१०६–१०९. अहमित्यादि । यथात्वमात्थ तत्तथा । मालती माध-
वानुरक्तेति स्वीकृतमित्यर्थः । अहं किं नाम वदामीत्यभिनिवेशमात्रम् ।
अयं पुनः कुलकन्यकाजनः कथमस्यै कथमकस्मात्कदम्बगोलका-
कारमाश्रितः । बहलपुलकशालित्वात् । विकलो विह्वलः सन् । कीदृशः ।
विशुद्धः निष्कलङ्कः । कामाभिषङ्गदोषशून्य इति यावत् । मुग्धो
रसानभिज्ञः । सर्वमिदं सोत्प्रासम् । अत एव वैदग्ध्यतया शिल्पका-
रिणीत्वेन संस्कृताश्रयणम् ।

११०–११७. अत्र उपहससीति नाहं मकरन्दानुरक्ततया हृष्टा
किं तु तद्धीरत्वमभिनन्दामीति न हासस्थानमिति भावः । अत एव चित्तचो-
रिकयाह । नन्विति । एवं स्वहर्षस्यान्यथासिद्धिमुक्त्वा निजाङ्गसङ्गजं स्वे-

---

१ अहं for वयं B. E. २ °म्ययं च कस्मा° A. N. ३ किं तुमं उवहससि N.; णिव्वावेदि A. E. and सहआदि N. for णिव्वावआन्ति. ४ N. om. मं; अंगाणि for मं C.; तादिसस्स A. C. E.; °पेक्ख° N.; ववसा° B. N.; °सायिणो C. E.; कदंत B. कअंत N. for किदंत. ५ जीविअ N.; पच्चाभग for पच्चाणअण B.; गुरुदरोवआरिणो A.; संकहाणामग्गहण N. ६ गुरुतरोपकारिणो Com.

णामग्गहणसुमरणाइं[1]। तधा अ सो तुए वि गाढप्पहारवेअणारम्भविह्मारिद[2]सरीरसंगालिदसेअसलिलुप्पीलो मोहमउलाअन्तणेत्तकन्दोट्टजुअलो भूमि[3]विलग्गिदासिलदाविट्ठम्भधीरधारिदसरीरभारो पच्चक्खीकिदो[4] उजेव्व मदअन्तिआणिमित्तमेत्तविच्छड्डिअमहामहग्घजीवलोओ महाभाओ त्ति[5]। (क) मदयन्तिका स्वेदादीन्विकारान्नाटयति।

स त्वयापि गाढप्रहारवेदनारम्भविस्मारितशरीरसंगलितस्वेदसलिलोत्पीडो मोहमु[6]कुलायमाननेत्रकन्दोट्टयुगलो भूमिविलग्नासिलताविष्टम्भधैर्यधारितशरीर[7]भारः प्रत्यक्षीकृत एव मदयन्तिकानिमित्तमात्रविच्छर्दितमहामहार्घजीवलोको महाभाग इति।

दादिकं मकरन्देन्यथयति तथा चेति। विस्मारितशरीरेति मूर्छाकथनम्। संगलितो मिलितः। उत्पीडः पूरः। कन्दोट्टो नीलोत्पलम्। मोहेति मोहेन नेत्रमीलनं न तु मदङ्गसङ्गादिति भावः। यदाह। व्यसनाभिघातभयपूर्ववैरस्मरणजो भवति मोह इति। प्रहारमूर्छने कथमयं भूमौ न पतितोत आह भूमीति। विष्टम्भः संबन्धः। विच्छर्दितः परित्यक्तः। महामहार्घमतिदुर्लभम्। जीवलोको मर्त्यभुवनम्। प्रियालिङ्गनस्मरणादिना स्वेदादिकम्। स्वेदादीनित्यनेन किलकिंचितभावाविष्करणम्। यदाह।

---

१ °णाइं अ A.; तह सो N.; गाढणहयरप्पहार N.; वेदणा B.; वेअणालंभविवलिअसरीर N. २ विब्भमाविद C. E. for विह्मारिद; °लिअ N.; N. om. सेअ; °लुप्पथो N.; मोहमुउलंतणेत्त N. मोहमउलंतणेत्त B. E.; कंदोट्ट C. N. ३ भूमिविगलिदासि A. भूमिलग्गिदासि C. E. भूमिगिइदासे N.; धीरत्तणधारिदसरीरो A. धारिअसरीरो B. धारिदसरीरसारो N. ४ °कदो A. C. E.; एव्व N.; मदअंतिआमेत्तनिमित्तअ N.; °छड्डिअ A. N.; N. om. महा; जीअ B. C.; जीविदो for जीवलोओ N. ५ N. om. त्ति; इति स्वेदादिविकारान् N.; E. om. मदयंतिका; B. om. विकारान्. ६ मोहमिलन्नेव Com.; यट्ट for ळत्त Com. ७ शरीरः Com.

बुद्ध०। [1]ववसिदं पिअसहीए सरीरेण। (क)

मद०। [2]सलज्जम्। पिअसहि अवेहि। उब्भिण्णह्मि सहवासिणीए वीसम्भेण। (ख)

लव०। सहि मदअन्तिए अह्मे वि जाणिदव्वं [3]जाणीमो। ता पसीद [4]विरम ववदेसादो। एहि वीसम्भगब्भकधाबन्धसरिसं सुहं चिट्ठह्म। (ग)

(क) [5]व्यवसितं प्रियसख्याः शरीरेण।

(ख) प्रियसखि अपेहि। उद्भिन्नास्मि सहवासिन्या वि[6]स्रम्भेण।

(ग) सखि मदयन्तिके वयमपि ज्ञातव्यं जानी[7]मः। तत्प्रसीद विरम व्यपदेशात्। [8]एहि विस्रम्भगर्भकथाबन्धसदृशं सुखं तिष्ठामः।

यदन्तर्निहितस्याङ्गैः सव्यापारैर्मनोभुवः।
सव्रीडाविष्कृतिः स्त्रीणां तदाहुः किलकिंचितम्॥

११८–१२६. अत्र स्वेदादिमता तव शरीरेण मकरन्दसंभोगोभिलषित इत्यर्थः। अत्र सहवासिन्याः सख्याः। नाहं कामजस्वेदादिनोद्भिन्ना किं तु त्वद्विस्रम्भकथयेति भावः। अभिण्णह्मीति पाठेभिज्ञातास्मीत्यर्थः। अत्र जानीम एवेति कामन्दक्यादिद्वारा तव मकरन्दस्य च चेष्टितं ज्ञातमेव। तत्कथमपह्नव इति भावः। व्यपदेशाच्छलात्। सदृशमिति मकरन्दे स्नेहानुबन्धमपि कथयेत्याशयः। उभयमपि

१ व्वव° A.; N. has after बुद्ध°, शरीरमस्याः स्पृशन्ती and has भंस्सथ्यसरीरे पिअसहि for ववसिदं–रेण. २ A. om. सलज्जं; N. om. पिअसहि अवेहि; अपेहि B.; अभिण्णह्मि noticed by Com.; N. has पिअसहीए मालदीए for वीसम्भेण. ३ जाणामो N. ४ N. om. विरम; व्वव° A. B. C.; उवदेसाववदेसादो for ववदेसादो E.; सहि before एहि E.; विस्स° N.; कधाणुबन्ध A.; संकहाए सविसेसं for गब्भ–रिसं N. ५ व्यवसितमिव ते शरीरेण प्रियसख्यावेदितं Com. ६ विस्रम्भतया Com. ७ जानीम एव Com. ८ सखि before एहि Com.; कथानुबंध Com.

बुद्ध० । सोहणं लवङ्गिआ भणादि । (क)

मद० । विधेअह्मि संपदं पिअसहीओ । (ख)

लव० । जइ एव्वं ता कधेहि कधं णु दे कालो गच्छदि त्ति । (ग)

मद० । णिसामेहि पिअसहि । मम बुद्धरक्खिदापक्खवादपच्चएण पढमं उज्जेअ तस्सिं जणे अदिभूमिं गदो अणुराओ । अवि अ । त-

(क) शोभनं लवङ्गिका भणति ।

(ख) विधेयास्मि सांप्रतं प्रियसख्यौ ।

(ग) यद्येवं तत्कथय कथं नु ते कालो गच्छतीति ।

क्रियाविशेषणम् । अत्र शोभनं कथयितुमर्हसीत्यर्थः । [लव० वा०] अत्र मकरन्दवियोगेन कथं वर्तस इति भावः ।

१२७–१५५. अत्र निशामय शृणु । एकवचनमिह लवङ्गिकापेक्षया । बुद्धरक्षिताया विदितवृत्तान्तत्वात् । कथाकथनं तु रागवृद्धये यदाह ।

याञा पुरस्कन्दनमुत्सवो वा स्वमोथ चित्रं रतिसंकथा च ।
भवन्त्युपायाः प्रथमावलोके यूनोर्यतो वृद्धिमुपैति रागः ॥

पक्षपात इति बुद्धरक्षितापक्षपातो गुणबाहुल्यं विना न भवतीति विश्वास इति भावः । भृतोद्वृत्तमतिरिक्तीभवत् । कौतूहलमुत्कण्ठा च मनोरथश्चेति विग्रहः । ततो बहुव्रीहिः । यद्वा । अतिरिक्तीभवत्कौतूहलमुत्कण्ठा च यत्र मनोरथे तादृशो मनोरथो यत्र तत्तथा ।

सर्वाङ्गदाहो व्याध्यवस्थायाम् । यदाह ।

१ सहि before सोहणं N.; लवंगिआए भणिदं N. २ विहे° B.; पिअसहीणं A. N.; E. om. this speech and the following. ३ कहेहि B. N.; कहं N.; B. om. त्ति. ४ णीसा° A. C. E.; °मेह N.; B. om. मम, बह N.; परोक्खवाद A. C.; वअणेण for पच्चएण N. ५ पुढमं N.; एव्व N. ६ वदति Com. ७ प्रियसखीनां Com.

स्सिं[1] जणे भरिदुव्वरन्तकोदूहलुक्कण्ठामणोरहं हिअअं आसी। तदो [2]विहिणिओअणिव्वुत्तदंसणा भविअ दुव्वारदारुणाणङ्गदुक्खसंदाविदकढ्[3]न्तचित्तविहडन्तजीविदा संभाविआह्मि। विअम्भिआपुव्वसव्वङ्गप्पइ[4]ज्जालिअमअणहुअवहुद्दामदूसहाआसदुम्मणाअन्तपरिअणा पव्वासाविमोक्खमेत्तसुलहामि[5]च्चुणिव्वाणपडिऊलबुद्धरक्खिदावअणव्वड्ढिदावेअ[6]व्वइअराविसंठुला इमं जीअलोअपरिवत्तं अणुभवामि। (क)

(क) निशामय प्रियसखि मम[7] बुद्धरक्षितापक्षपातप्रत्ययेन प्रथममेव तस्मिञ्जनेतिभूमिं गतोनुरागः। अपि च तस्मिञ्जने भृतोद्धुरकौतूहलोत्कण्ठामनोरथं हृदयमासीत्। ततो विधिनियोगनिर्वृत्तदर्शना भूत्वा दुर्वारदारुणानङ्गदुःखसंतापितकथञ्चित्ताविघटमानजीविता संभाविताह्मि। विजृम्भितापूर्वसर्वाङ्गप्रज्वलितमदनहुतवहोद्दामदुःसहायासदुर्म-

---

मनःसंमोहसर्वाङ्गदाहवृत्यादिभिस्तथा।
शिरसो वेदनाभिश्च व्याधेरभिनयो यथा॥

---

१ N. has तस्सिं जणे अविरलुक्कण्ठामणहरं for तस्सिं जणे अदिभूमिं—मणोरहं; भरिदुव्वरन्त A. B. C. मणोहरं B. E.; आसि A. B. C. २ विहि A. C. E.; णिउत्त A.; रमणी for दंसणा C.; N. om. भविअ; दारुणाअसहुक्खसंतावदज्झंतचित्त N.; C. E. add संग after अणङ्ग. ३ उक्कण्ठिअ for कढुन्त A. E.; जीविआ A.; जीविआसा दूरविहंभिअपुव्व N.; °दह्मि B.; °म्मिहअपुव्व A. °ह्मिआवापुव्व C.; संभाविदह्मि अव्वसव्वंग B.; सव्वंगसंदावसंजलिअ N. ४ संज्जालिद A. पज्जालिद C. जालिद E.; हुदवहुद्दाहदूसह° B. हुदवहुद्दामदाहदूसह° N.; दूमणा° B. ५ मिच्चु B. and मरण A. E. for मिच्चु; °क्खिअा N.; विरइदा° for वड्ढिदा° B. ६ °अवेग N.; वइ° N.; लोक A. B; °वुत्तं N. ७ मम हि तावद्बुद्ध° Com. ८ Com. om. अतिभू—जने; भृतोद्धृतकौ° Com. ९ मदन for अनङ्ग Com.; संतापितोत्कंठितचित्त Com. १० संज्वलित Com.

संकप्पसिविणअन्तरेसु अ मणोरहुम्मादमोहिदा पेक्खामि तं जणं। [2]सो वि पिअसहि मुहुत्तणिव्वूढविम्हअविसंठुलुव्वेल्लवित्थरन्तलुलिदणेत्तपुण्डरीअतण्डवुप्पीलडम्बरपाडिरूढमेरेअदप्पं विअ चिरं णिज्झाअदि मं। (क)

नायमानपरिजना प्रत्याशाविमोक्षमात्रसुलभ[5]मृत्युनिर्वाणप्रतिकूलबुद्धरक्षितावचनवर्धितावेगव्यतिकरविसंष्ठुलमं जीवलोकपरिवर्तमनुभवामि।

(क) संकल्पस्वप्नान्तरेषु च मनोरथोन्मादमोहिता प्रेक्षे[6] तं जनम्। [7]सोपि प्रियसखि मुहूर्तनिर्व्यूढविस्मयविसंष्ठुलोद्वेल्लविस्तार्यमाणलालितने·

मरणमेव निर्वाणं मोक्षः। सर्वदुःखापहारकत्वात्। मद्यत्नादिष्टसङ्गस्तव स्यादिति बुद्धरक्षितावचनम्। विसंष्ठुला संशयितचित्ता। जीवलोकस्य परिवर्तोऽन्यथात्वं मूर्छेत्यर्थः। यद्वा। मूर्छानन्तरं पुनर्जीवलोकप्रवेशोऽत्र परिवर्तनम्।

१३६–१३९ संकल्पान्तरे भावनाबलजज्ञानमध्ये स्वप्नज्ञानमध्ये चेत्यर्थः। निर्व्यूढ उपचितः। उद्वेल्लस्तभ्रूक्षेपम्। प्ररूढमेरेयं प्रसन्नमद्यम्। तस्य मदो मत्तता॥ मैरेयमासवः सीधुरित्यमरः॥ घूर्णितमितिक्रियाविशेषणम्। निध्यायति चिन्तयति।

---

१ सिविणन्तरेसु A. सिविणएसु N.; मणोहरुम्माद B. N.; °हिआ N.; A. B. insert अ and C. E. विअ before तं. २ स चावि C. तथा अ E. तह वि N. for सो वि; णिव्वुह B. णिक्कंत C. and उव्वूढ N. for णिव्वूढ; विसंठलु° N. विसंखलु° C. विसंकुलु° E. for विसंठुलु°; थरथरंत for वित्थरन्त N. ३ N. om. ललिद.; तण्डवुब्भडप्परूढ A. तंडवुप्पीलमइरेअ B.; °रीअं उव्वेअडामरारूढमेरेअ N.; मअघुण्णिअं A. and मअघुम्मिदं E. for दप्पं; N. om. विअ. ४ °णाइ A. E. णमि N.; C. N. om. मं. ५ मरण for मृत्यु Com. ६ पश्यामि Com. ७ स चापि Com. ८ °लोद्वेल्लित° Com.: रक्त for ललित Com.

किं अ। कवलिदारविन्दकेसरकसाअकण्ठकलहंसघोसघग्घरक्खलिदगम्भीरतारधीरणादभरिदकण्णविवरं पिए मदअन्तिए त्ति वाहरादि। अध अ। पप्फुरन्तपओहरुच्छलदुत्तरीअअञ्चलावलम्बणपरिभवेण ससंभमुत्तरंगिधमधमाअन्तहिअअं मं समुत्तासेदि। (क) १४१

...पुण्डरीकताण्डवोत्पीडडम्बरप्रतिरूढमैरेयदर्पमिव चिरं निध्यायेति माम्।

(क) किं च। कवलितारविन्दकेसरकषायकण्ठकलहंसघोषघर्घरस्खलितगम्भीरतारधीरनादभरितकर्णविवरं प्रिये मदयन्तिके इति व्याहरति। अथ च। प्रस्फुरत्पयोधरोच्छलदुत्तरीयाञ्चलावलम्बनपरिभवेन ससंभ्रमोत्तरंगिधमधमायमानहृदयां मां समुत्त्रासयति।

१४०–१४२ कषायः सुरभितः। कलहंसो राजहंसः। घोषः शब्दः। घर्घरमस्फुटम्। स्खलितं च्युतम्। एतदुभयं साध्वसवशात्। हर्षसंजातस्वरभेदाद्वा। यदाह।

स्वरभेदो भयक्रोधमदहर्षादिभिर्भवेत्।

भरितकर्णविवरमिति क्रियाविशेषणम्। वस्त्राञ्चलग्रहणेन स्त्रीप्रसादनम्। यदाह।

रहसि ग्रहणेनापि हस्ते वस्त्रे च मूर्धनि।
कार्यं प्रसादनं नार्या अपराधं समीक्षता।

---

१ किं च B.; °लिआर° N. स्खलिदं A. स्खलिअ N. २ A. om. तारधीरणाद; गंभीरभारईवूरिअकण्ण N.; मं before पिए A.; °अन्तिअत्ति N.; एहि before त्ति A. E; मं after त्ति N.; व्वाह° E.; °रइ N. ३ °रंद E.; °हरूत्तंगुत्तरीअ E.; °रिअअंतुअञ्चला° A.; अवलुंचन for अवलम्बण C.; वाहरइ वाहरंतो कोगुञ्चलंतुत्तरीअंचलावलंबणावराहसिमुत्तरंगधमधमाअंत N. ४ ससब्भुत्तरङ्गि A. ससंभमुत्तरंग C.; C. om. मं; समुल्लासेदि for समुत्तासेदि B.; °सेइ N. ५ तांडवोड्डटप्ररूढमैरेयमदघूर्णितमिव Com. ६ गंभीरभारनीभरित Com.; मां before प्रिये Com. ७ उत्तरीयांशुकानला° Com.

सहसा विसज्जिअंसुअ[1]मोसरिअतक्खणकठोरकमलदण्डाअमाण-बाहुबन्धणा[2]ववारिअपओहरुग्गमं विहडन्तविअडमेहलावलअसंदाणि-उजन्तपीव[3]रूरुप्पडिसिद्धविप्पदीवगमणं पडिऊलवादिणिं पि अन्ना-अरपअत्ताणि[4]व्वत्तिअमुहुत्तकोवोवराअदुक्खपरूसीकिदाहिअअं सिणिद्ध-पुणरुत्त[5]पल्लत्थलोअणविभाविदासेसचित्तसारं उवहसदि । (क)

(क) सहसा विसर्जितांशुका[6]मवसृत्य तत्क्षणकठोरकमलदण्डायमानबाहुबन्धनापवारितपयोधरोद्गमां विघटमानविक[7]टमेखलावलयसंदानितपीवरोरुप्रतिषिद्धविप्रतीपगमनां प्रतिकूलवादिनीम[8]प्यत्यादरप्रयत्ननिर्वर्तितमुहूर्तकोपोपरागदुःखपरुषीकृतहृदयां स्नि[9]ग्धपुनरुक्तपर्यस्तलोचनविभाविताशेषचित्तसारामुपहसति ।

परिभवेन प्रतिकारबुद्ध्या । सभयं पूर्वाननुभवात् । अत्र किं स्यादित्युत्तरंगि कम्पवत् । आतङ्काद्धमधमायमानमुष्णमिव चित्तं यस्यास्ताम् । यद्वा । उत्तरंगमुद्गतकल्लोलम् । धमधमायमानं सकम्पम् । कल्लोलश्च कम्पस्योत्तरोत्तरप्रकर्षः । उत्त्रासयति चकितां करोति ।

१४४–१४८. शीघ्रं त्यक्तवस्त्रा च सा प्रसृता गमनोद्यता च ।

१ विसज्जिअंसुअपसरिदं A. विसज्जिअंसुअं मं तक्कालकठोर B. विसज्जिअंसुओ ओसरिअकोवं तक्खण N.; कठोरकंडइअणालकमलदिण्णाअंतबाहु N.; दंडाअंत B. २ बंधणोव्वारिअ B. बंधणावारिअ C. E.; विहड A. B. विअल C. विअलिअ N. for विअड; मेखला B.; कलाव for वलअ N. ३ पीवरोरु B. N.; पडिकुल C. E.; णीं पि A. C. E.; मं after पि A.; पडिऊलविहिदादरप्पअत्त N.; अन्नादर B. ४ °व्वत्तिद B. णिव्वत्तिअ E. °वत्तिअ A.; B. om. मुहुत्त; कोवो° N.; कद for किद C. E.; णिसिद्ध for सिणिद्ध A. B. ५ °रुत्तपअत्तविलोअणविभाविआ° N.; हिअअ for चित्त N.; मं before उवहसदि A.; उवहसिअ N. ६ विसर्जितांशुकमसृतां च तत्क्षण Com. ७ विकलमेखला Com.; ८ °वादिनीमपि मामत्या° Com. ९ निषिद्ध for स्निग्ध Com.; °सारां मामुप° Com.

दि[1]उणबाहुदण्डावेढणाणिअन्तिदं पिअसहि पल्ढसद्दलकठोर-
क[2]रेरुहोरम्फाविअडपत्तावलीपसाहणुत्ताणवच्छत्थलणिट्ठुरणिवेसणीसहं

कर्मधारयः । पुलकितत्वेन च दण्डायमानता । अयवारितोऽपिहितः । उद्गमो विस्तारः । आलिङ्गनाविघटनं कृत्वापसरणे कुचालोकनादिकं नायकस्य जायते । नायिका च तदा संवरणाय न प्रभवतीति भावः । तर्हि पलायते किमिति नेत्यत आह । विघटमानेति । विघटमानालिङ्गनजरोमाञ्चसंचयात् । विकला स्वस्थानचलनात् । संदानं बन्धनम् । तथापिताभ्यामित्यर्थः । प्रतीपं प्रतिकूलम् । गमनाभावे पुनःकान्तावरुद्धतया हूं हूमित्यादिनिषेधमाह प्रतिकूलेति । उपरागः संबन्धः । निषिद्धपुनरुक्ते पुनःपुनर्निषेधवाक्ये पर्यस्तं निषेधविपरीतं स्निग्धत्वादिधर्मत्वात् । यद्वा । पर्यस्तं विश्रान्तम् । चित्तसारः संभोगेच्छापरता । उपहासः परिहासः । स च हृदि संभोगेच्छा वाचि परं ते निषेध इत्येवंरूप इत्यर्थः । स्निग्धपुनरुक्तेति पाठे स्निग्धपुनरुक्तं पुनःपुनः स्निग्धं पर्यस्तं क्षिप्तं लोचनमित्यर्थः ।

१४९–१५६. आवेष्टनमावेष्टः । तेन गाढालिङ्गनमुक्तम् । कररुहो नखः । ओरम्फ आक्रमणम् । प्रौढव्याघ्रनखवत्कठोरं यत्कररुहमिति भावः । निष्ठुरं निबिडम् । निवेशोऽर्पणम् । निःसहां वचनाद्यक्षमाम् । अत्र कररुहाक्रमणमेव पत्रावलीति रूपकम् । चुम्बनमाह । सावेगेति । ओवग्गिदं पुञ्जीकृतं लम्बितमित्यर्थः । मुखावयवा ललाटादयः । विकासितं चुम्बनादिनियुक्तम् । वदनस्य वैदग्ध्यं चुम्बनचातुर्यात् । इह कन्यायास्त्रिविधं चुम्बनम् । ललितकच्छुरितकघटितकभेदात् । तत्र ललितकमाह । प्रस्फुरितेति । घटितकमाह । पुञ्जितं योजितम् । ईषत्पारि-

१ दुउणिअ for दिउण N.; णिव्वेढ after वेढण E. N.; णिअन्तिअं for णिअन्तिदं N. °अंतिअं E.; N. om. कठोर. २ कररुहोरप्पहार A. कररुहाक्कमण B. कररुहोरच्चंड E. कररुहखुरप्पविणिहिदविअड N.; वत्ता° B.; °पुत्ताणविअडवच्छत्थल N.; वच्छथलाणिट्ठुर E.; णिवेसणिट्ठुरणीसहं A.; मं before कदुअ A.; णिट्ठुरणिवेसणं मअंगाहमाहसं.कदुअ N.

कदुअ सात्रेअविहुअमत्थआविद्ध[1]कबरीणिहिदकरपरिग्गहोवग्गिदुण्णमिदणिच्चलमुहावअं[2]वसच्छन्दविआसविअड्ढवअणकमलो वामगण्डमूलोवरिणिहिद[3]पप्फुरन्तपुज्जिदाहरसमुग्गअमणुहरप्फंसणिब्भरुब्भमाविदसरीरसोहं उल्लसिदसज्झ[4]साणन्दविसमसंभमवलणमोहमन्थरअमन्तलोअ[5]णं किं पि दुव्विणीदसाहसाणुरूववव्वसाओ मं अणब्भत्थणीअं अब्भत्थेदि। (क)

(क) द्विगुणबाहुदण्डावेष्टननियन्त्रि[6]तां प्रियसखि प्रौढशार्दूलकठो-

---

गृह्य मीलितनेत्रा जिव्हाग्रेण घटयति करेण नेत्रे तस्याच्छादयतीति घटितकम्। छुरितकं तु प्रागेवोक्तम्। समुद्गम उद्रेकः। एवं च सर्वाङ्गीणनायकस्पर्शात्प्रमोदमाह मनोहरेति। उद्धर्षितमुद्गतरोमाञ्चम्। नायिकाया वामाङ्गे सकलोपचारव्यवस्थापनाद्वामकपोलेत्युक्तम्। वर्द्धमानां सुरतावस्थामाह। समुल्लसितेति। समुल्लसिताभ्यां साध्वसानन्दाभ्यां विषमो यः संभ्रमः संवेगस्तत्र मोहेन किंकर्तव्यतामूढतया मन्थरत्वमेकतरपक्षाव्यवस्थितिः। साध्वसेन प्रवृत्तिरानन्देन च निवृत्तिरित्याशयः। अनभ्यर्थनीयं सुरतादिकम्।

१५७. ततो झटितीति जागरावस्थाकथनम्।

---

१ बद्ध for विद्ध A.; विणिहिद N.; परिग्गहोवग्गिदणामिद A. परिग्गहण्णुंजीकिदोण्णामिद E. °मिअ N. २ °वअवं N.; विकासिद A. विहसोविअ C. विभासिद E. for विआस; विअद्ध B.; वदण N.; वामकपोलमूलचिराणिहिद A. वामकवोलमूलचिराणिहिद E. वामगंडमूलाचिरणिहिद N. ३ णिहित्त C.; विप्फुरंत N. पप्फुरंद E.; °आहरसमग्गमणहर N.; ग्गद A.; कर before फंस E.; °भरुल्लसिदसरीर A. °भरुद्धुअसरीर N. ४ सद्धसा° A. B.; B. om. वलण, चलण for वलण E.; मंथरं E. ५ चेअणं for लोअणं N.; किं वि किं वि N.; दुव्विणद A.; मं अणब्भत्थणीअं अब्भत्थेदि णामेत्ति C. मं अब्भत्थेइ णामेत्ति N. ६ निगडिना for नियन्त्रिता Com.

पिअसहि[1] समक्खं अ सव्वं अणुभविअ झत्ति पडिबुद्धा सुण्णारण्णसंणिहं[2] पुणो वि मन्दभाइणी विभावेमि जीअलोअं त्ति । (क)

लव० । विहस्य[3] । सहि मदअन्तिए फुडं आचक्खेहि । अध तस्सिं अवसरे सिणेहविब्भमुम्मीमहासविअसन्तबुद्धरक्खिदालोअणाणिरू-[4]

रु करुरुहाक्रमणाविकट[5]पत्त्रावलीप्रसाधनोत्तानवक्षःस्थलनिष्ठुरनिवेशनिःसहां कृत्वा[6] सावेगविधुतमस्तकाविद्धकबरीनिहितकरपरिग्रहपुञ्जीकृतोन्नामितनिश्चलमुखावयवस्वच्छन्दविकास[7]विदग्धवदनकमलो वामगण्डमूलोपरिनिहितप्रस्फुरत्[8]पुञ्जिताधरसमुद्भवमनोहरस्पर्शनिर्भरोद्भ्रामितशरीरशोभामुल्लसित[9][10]साध्वसानन्दविषमसंभ्रमवलनमोहमन्थरभ्रमल्लोचनां किमपि दुर्विनीत[11]साहसानुरूपव्यवसायो मामनभ्यर्थनीयमभ्यर्थयति ।

(क) प्रियसखि समक्षं च सर्वमनुभूय[12] झटिति प्रतिबुद्धा शून्यारण्यसंनिभं पुनरपि मन्दभाग्या विभावयामि जीवलोकमिति ।

१६१–१७९ अत्र मच्चूडकं विधावीति ख्यातम् । निःसहतनुत्वेनासनमच्चूडकेपि धातुत्यागप्रश्नवैदग्धीयमिति भावः । पुष्पवतीशङ्कया परिजनहासनिवारणाय गोपनम् । [बुद्ध० वा०] अत्र पृच्छामि यदि हृद्गतं

१ A. om. पिअसहि; पिअसमक्खं च सव्वं B.; A. E. N. om. अ; अणुहविअ B.; तदो before झत्ति A. E.; A. E. om. पडिबुद्धा. २ संणिभं N. and सरिसं A. E. for संणिहं; इमं after वि N. ३ N. om. विहस्य; B. om. सहि; आचक्ख E. आअक्खअहि N.; अवि for अध N. ४ सिणेहविहल्भंस° B. °म्मिस्सहा° E.; अवसरे सविब्भमं ईसिहासविआसितबुद्धरक्खिआ N.; विलोभण B. लोभणान्तणिरू° A. ५ विकच for विकट Com. ६ मां before कृत्वा Com.; आबद्ध for आविद्ध Com. ७ विकासित for विकास Com.; वामकपोलमूलाचिरानिहित Com. ८ प्रस्फुरित for प्रस्फुरत् Com. ९ निर्भरोद्धार्वितशरीर Com. १० समुल्लसित Com. ११ दुर्विनय for दुर्विनीत Com. १२ °भूय तनो झटिति शून्या° Com.

विदं परिअणादो गोवेणिज्जं दे णिअम्बस्समूलं सअणिज्जपच्छदव डावारिदं भोदि किं ण वोत्ति । (क)

मद० । अइ असंबद्धपरिहाससीले अवेहि । (ख)

बुद्ध० । सहि मदअन्तिए मालदीपिअसही क्खु ईदिसाइं उलेव मन्तिदुं जाणादि । (ग)

मद० । सहि मा क्खु एव्वं मालदिं उवहस । (घ)

(क) सखि मदयन्तिके स्फुटमाख्याहि । अथ तस्मिन्नवसरे स्नेहविभ्रमोन्मिश्रहासविकसद्दृष्टिरक्षितालोचनानिरूपितं परिजनाद्गोपनीयं ते नितम्बस्य मूलं शयनीयप्रच्छदपटापवारितं भवति किं न वेत्ति ।

(ख) अयि असंबद्धपरिहासशीले अपेहि ।

(ग) सखि मदयन्तिके मालतीप्रियसखी खल्वीदृशान्येव मन्त्रयितुं जानाति ।

(घ) सखि मा खल्वेवं मालतीमुपहस ।

रहस्यं कथयसीति भावः । अत्र कृतापराध इत्यत्र शिरश्चालनमाति: । [बुद्ध०वा०] अत्रात्मसमर्पणमेव त्वया कार्यमिति भावः । [मद० वा०] अत्र तद्दर्शनामृतसेकशीतला भविष्यामीति भावः । निःसङ्गः सर्वाङ्गव्यापी । [बुद्ध० वा०] अत्राथशब्दो यदर्थे । बलात्कारितो बलात्कारेण प्रवर्तितः । रुक्मिणी काममाता प्रद्युम्नमातृत्वात् । पक्षे कामावस्थाकारिणीम् । पुरुषो-

---

१ गोभणिज्जं A. गोवाअणिज्जे C. आसणमचूलअं for णिअम्बस्समूलं A.; सअणिअ A.; सअणिज्जं B. वटोवारिदं A. E.; परिअणादो गोवाइणिज्जं दे अणवसणसूअअं सअणिज्जं पच्छदपडं वा होइ त्ति किं ण वेत्ति N. २ होदि A.; वा after किं A. ३ सुसलिट्ठ for असंबद्ध N.; परिवार for परिहास E.; A. adds ण तुए सह मंतेस्सं after अवेहि. ४ N. om. सहि; A. om. क्खु; एव्वं for क्खु ईदिसाइं E.; णिअसही इअं ईदिसाइं जाणाइ N. ५ सहिओ E.; B. om. एव्वं; °ही A. B. E. ° दीए C.; उवहसअ E. ६ आसनमचूडकं for नितम्बस्य मूलं Com.

बुद्ध० । सहि मदअन्तिए भणिस्सं दाणिं दे किं वि जइ ण वीसासभङ्गं करेसि । (क)

मद० । सहि किं पुणो वि पणअभङ्गेण कदावराहो अअं जणो जेण एव्वं मन्तेसि । पिअसहि तुमं लवङ्गिआए सह संपदं मे हिअअं । (ख)

बुद्ध० । जइ दे कधं वि मअरन्दो पुणो वि दंसणपहं ओदरादि तदो किं तुए कादव्वं । (ग)

(क) सखि मदयन्तिके भणिष्यामीदानीं ते किमपि यदि न विश्वासभङ्गं करोषि ।

(ख) सखि किं पुनरपि प्रणयभङ्गेन कृतापराधोयं जनो येनैवं मन्त्रयसि । प्रियसखि त्वं लवङ्गिकया सह सांप्रतं मे हृदयम् ।

(ग) यदि ते कथमपि मकरन्दः पुनरपि दर्शनपथमवतरति ततः किं त्वया कर्तव्यम् ।

त्तमः कृष्णः । अथ च पुरुषेषूत्तमो मकरन्दः । स्वयंग्राहेण गान्धर्वेण । सधर्मचारिणी भार्या । प्रवृत्तिर्वार्ता । [मद० वा०] इह ममाभाग्येन किं स्यादिति निःश्वास इति भावः ।

---

१ पुच्छिस्सं for भणिस्सं A. N.; N. om. दे; किं ति A.; B. om. किंवि; जदि C. E.; णाम after जदि C.; मे after ण N. २ कदा उण for सहि—वि N.; किदा° B. किआ° N.; °राधो C. E. ३ भणेसि for मन्तेसि A.; N. om. पिअ; B. om. तुमं; लवंगिआ अ संपदं C. N.; समं for सह and मम for मे A. ४ सहि जइ एव्वं ता कहेहि जइ दे कहं वि N. जदि C. E.; दि for दे C.; °धम्पि A. B. वहं C. E.; °रइ N. ५प्रक्ष्यामि for भणिष्यामि Com.; मे after यदि Com. ६ समं for सह Com.

मद०। एक्केक्कावअवणीसङ्कलग्गणिच्चले[1] चिरं लोअणे णिव्वावइस्सं। (क)

बुद्ध०। जइ[2] सो वि मम्महबलक्कारिदो कन्दप्पजणणिं तुमं रुक्किणिं[3] विअ पुरिसोत्तमो सअंग्गाहसहधम्मचारिणिं करोदि तदो का पडिवत्ती[4]। (ख)

मद०। निःश्वस्य[5]। कीस मं एत्तिअं आसासेसि। (ग)

बुद्ध०। सहि[6] कहेहि। (घ)

लव०। कहिदं[7] ज्जेव्व हिअआवेअसूअएहिं दीहणीसासेहिं। (ङ)

(क) एकैकावयवनिःसङ्गलग्ननिश्चले चिरं लोचने निर्वापयिष्यामि।

(ख) यदि[8] सोपि मन्मथबलात्कारितः कन्दर्पजननीं त्वां रुक्मिणीमिव पुरुषोत्तमः स्वयंग्राहसहधर्मचारिणीं[9] करोति ततः का प्रतिपत्तिः।

(ग) किं[10] मामेतावदाश्वासयसि।

(घ) सखि कथय।

(ङ) कथितमेव[11] हृदयावेगसूचकैर्दीर्घनिःश्वासैः।

---

१ णिस्संग N.; लग्गणिच्चलं A.; N. om. चिरं; N. adds तदो हिअअं after णिव्वावइस्सं. २ सहि before जइ B. E.; अभ A. and अह N. for जइ; N. om. वि; °रिओ N.; °णीं A. C. ३ रुक्मि° A. B. रुग्गि° N.; पुरुसो° A. N. °गाह C. °गाहसधम्मचारिणीं A. °ग्गाहधम्मचारि° B. C. E. °गाहेण सहधम्मचारिणिं N.; °णीं C. E.; करेइ N.; तदा for तदो A. ४ पउत्ती A. B. ५ B. om. निःश्वस्य; तुए for मं N.; एत्तिकं E.; °सेअ A. °सासिदासि N. ६ तह वि before कहेहि C.; कधेहि B. E. ७ काहिदं एव्व N.; हिअअआवेअ A. हिअआवेग B. हिअआवेअ C. E.; सूच° B. ८ अथासावपि for यदि सोपि Com. ९ सधर्मचारिणीं Com.; प्रवृत्तिः for प्रतिपत्तिः Com. १० सखि before किं Com. ११ सखि before कथितं Com.

मद०। सहि[1] का अहं इमस्स तेण ज्जेव्व अत्ताणअं पणीकदुअ दुट्ठसद्दूल[2]कवलादो कड्ढिअस्स तस्स ज्जेव्व केरअस्स अत्तणो
सरीरस्स। (क) १८९

लव०। सरिसं[3] महाणुभावदाए। (ख)

बुद्ध०। सुमरेहि[4] एदं वअणं। (ग)

मद०। कधं[5] दुदीअपहरणाडिआविच्छेदपडहो ताडीअदि। ता जाव णन्दणं[6] णिब्भच्छिअ से पादपडणं अब्भत्थिअ मालदीए उवरि
अणुऊलइस्सं (घ)। इत्युत्थाय गन्तुमिच्छति। १९०

(क) सखि काहमस्य तेनैवात्मानं पणीकृत्य दुष्टशार्दूलकवलादाकृष्टस्य तस्यैव कृत्यकरस्यात्मनः शरीरस्य।

(ख) सदृशं महानुभावतायाः।

(ग) स्मरैतद्वचनम्।

(घ) कथं द्वितीयप्रहरनाडिकाविच्छेदपटहस्ताड्यते। तद्यावन्नन्दनं निर्भर्त्स्य तस्य पादपतनमभ्यर्थ्य मालत्या उपर्यनुकूलयिष्यामि।

१८३–१९३ अत्र काहमात्मशरीरस्य किं तु न कापि। मकरन्दस्यैव मच्छरीरमिति भावः। केरकशब्दः कृत्यकरवाची। पणीकृत्य मूल्यतया यो व्यवस्थाप्यते स कृत्यकरः। अत्र महानुभावता कृतज्ञता।

---

१ सहिओ E.; तेणेव्व for तेण ज्जेव्व N.; अत्ताणं N. २ मिच्चु for दुट्ठसद्दूल N.; वळादो for कवलादो B.; आकड्ढि° B. कड्ढिदस्स A. कड्ढिअस्स E.; उक्खडिअस्स N.; तस्स पहुणो सरीरस्स E.; एव्व परकेरअस्स N.; सरीरअस्स A. ३ खु after सरिसं N.; °भाअ° B. °हाव° N. ४ सहि before सुमरेहि N.; सुमरिहासि A. सुमरेसि B. E.; N. om. वअणं. ५ कहं N.; N .om. पहर, विछेदमुअओ पडहो N.; फडओ B.; चिरं वहिणिआविछेदं उवरूदा पीडिआरि after ताडिअदि E. ६ णं for णंदणं N. णिब्भच्छिअ A.; सपाअपडणं A. सपादपडणं वा अब्भत्थिअ N.; °कूल° C. E.; इति उत्थातुमिच्छति A. उत्थातुमिच्छति N. ७ स्मरिष्यसि for स्मर Com. ८ Com. om. प्रहर. ९ निर्भर्त्स्य सपादपतनं Com.

मकरन्दो मुखमुद्धाटच हस्तेन[1] गृह्णाति ।

मद० । सहि मालदि विप्पबुद्धासि[2] । विलोक्य सहर्षसाध्वसम् ।
अम्मो[3] अण्णं ज्जेव्व किं पि एदं वट्टदि । (क)

मक० । रम्भोरु संहर भयं क्षमते विसोढु-[4]
मुत्कम्पितं[5] स्तनभरस्य न मध्यभागः ।
इत्थं त्वयैव कथितप्रणयप्रसादः
संकल्पनिर्वृतिषु संस्तुत एष दासः ॥

(क) सखि मालति विप्रबुद्धासि[6] । अम्मो अन्यदेव किमप्येतद्वर्तते ।

सांप्रतमेवैतद्वचनस्योपयोगं स्थिरीकृत्याह । [वृद्ध० वा०] स्मरिष्यसीदं वचनम् । अत्र ॥ नाडी कालेपि षट्क्षणइत्यमरः ॥ षट्क्षणावच्छिन्नः कालो नाडी । द्वितीया नाडी द्वादशक्षणात्मकः कालः । मदयन्तिकामकरन्दसंघट्टनविषयस्य समाप्तिपटहोपमित्यर्थः । यद्वा । द्वितीयनाडी द्वितीयभगिनी मालती तया सह विच्छेदो वियोगो यथोपक्रान्तसंबन्धविघटनमित्यर्थः । गृह्णाति मदयन्तिकामित्यर्थः । अत्राम्मो इति स्वच्छन्दप्रलपितस्याभिप्रायानुवादे ।

१९४–१९७ रम्भेत्यादि । हे रम्भोरु भयं त्यज । यतस्तव स्तनभारस्योत्कम्पं सोढुं मध्यभागो न क्षमते समर्थो न भवति । अतिकृशो मध्यदेशः कुचयोर्भयकम्पस्य भारं न सहत इति भावः । भयमिहापरिचितदर्शनात् । विकारमिति पाठे तत्र सकम्पस्य स्तनभारस्य विकारं मध्यभागो न क्षमते । संकल्पसुखेष्वनेनोक्तप्रकारेण त्वयैव कथितप्रार्थनासंपत्तिरेषोऽहं संस्तुतः परिचितो दासो विधेयः । प्रणयः प्रेम तद्रूपो वा प्रसादः ।

१ हस्ते for हस्तेन B. N. २ किं पडिबुद्धासि N. विबुद्धासि A. विरुद्धासि E. प्पबुद्धासि C.; सहर्षं ससाध्वसं च A. N. ३ अहो A. अह्मो N.; एव्व N.; किं वि N.; A. B. om. एदं; वट्टइ N. ४ न सोढुं C. विकारं N. for विसोढुं. ५. उत्कम्पनं A. उत्कंठितं C. उत्कंपिनः N.; च for न C. ६ विबुद्धासि Com.; Com. om. एतत्.

[1]बुद्धरक्षिता मदयन्तिकामुखमुन्नमय्य संस्कृतमाश्रित्य ।

प्रेयान्मनोरथसहस्रवृतः स एष
सुप्तप्रमत्तजनमेतदमात्यवेश्म ।
प्रौढं तमः कुरु कृतज्ञतयैव[2] भद्र-
मुत्क्षिप्त[3]मूकमणिनूपुरमेहि यामः ॥

मद० । सहि बुद्धरक्खि[4]दे कहिं उण अह्मेहिं गन्तव्वं । (क)

बुद्ध० । जहिं ज्जेव्व[5] मालदी । (ख)

(क) सखि बुद्धरक्षिते क पुनरस्माभिर्गन्तव्यम् ।

(ख) यत्रैव मालती ।

१९९–२०२ प्रेयानित्यादि । प्रेयान्प्रियतमो मनोरथसहस्रैर्वृतः प्रार्थितो यस्त्वया संकल्पादिष्वनुभूतः स एष सोयमित्यर्थ इति प्रागनुरागोद्भेदः । अतः कृतज्ञतया पूर्वोपकारस्य स्मरणेनैव भद्रमभीष्टं विवाहरूपं कुरु । तत्र सामग्रीमाह । एतदमात्यगृहं केचित्सुप्ताः केचित्प्रमत्ता जना यत्र तादृशम् । गाढं तमः । अन्धमिति पाठेन्धं करोतीत्यन्धम् । तम इत्यर्थः । उत्क्षिप्तमुच्चोलितमत एव मूकमशब्दं मणिप्रधानं नूपुरं यथा तथेहि यामः । विवाहसंपादनायेति भावः । तत्र सुप्तादिना गृहलोकानामदर्शनं प्रौढान्धकारतया बहिर्लोकानामदर्शनम् । नूपुरस्याप्यशब्दतया परवित्तर्कभाव इति गमनमप्रत्यूहं स्यादिति दर्शितम् ॥ प्रमत्त इति रदाभ्यां निष्ठातो न इति नत्वं न भवति । न ध्याख्यापृमूर्छिमदामिति निषेधात् ॥

२०३–२०९. [मद० वा०] अत्रानेन मकरन्दसंमतिमाह । यत्रैव मालती । वर्तत इति शेषः । एतेनागामिनोङ्कस्यावतारः सूचितः ।

---

१ लवंगिका for बुद्धरक्षिता B. C. E.; मदयंतिकाया मुखं C. E. अवलंब्य for आश्रित्य N. २ एक for एव A. ३ उत्क्षिप्य E. ४ °क्खिए N.; क्खु for उण B., N. om. उण; गंदव्वं A. B. ५ पुव्वं before ज्जेव्व A.; एव्व N.

२०९ मद० । किं[1] णिव्वुत्तसाहसा मालदी । (क)

बुद्ध०[2] । अध इं । अण्णं च । तुमं भणासि का अहं इमस्स (ख) इत्यादि पठति । मदयन्तिकाश्रूणि पातयति ।

बुद्ध० । महाभाअ[3] दिण्णं क्खु अत्ताणं पिअसहीए पडिवज्जस्स । (ग)

२१० मक० । अद्योर्जितं[4] विजितमेव मया किमन्य-
दद्योत्सवः फलवतो मम यौवनस्य ।
यस्य[5] प्रसादसुमुखेन समुद्धृतेयं
दैवेन बान्धवधुरा मकरध्वजेन ॥

(क) किं निर्वृत्तसाहसा मालती ।

(ख) अथ किम् । अन्यच्च । त्वं भणसि काहमस्य ।

(ग) महाभाग दत्तं[6] खल्वात्मानं प्रियसख्या प्रतिपद्यस्व ।

[मद० वा०] अत्र पितुर्नैरपेक्ष्येण मालत्यात्मनिवेदनं यदि तदा ममापि तत्स्यादित्याशयः । [बुद्ध० वा०] अत्र च तथा प्रागेव मत्समक्षं त्वया मकरन्दायात्मा दत्तः । इदानीं कुतस्तेपास्यमित्याशयः । स्वगृहत्यागदुःखादश्रुपातेन सूचितात्मदानां मदयन्तिकामाह [बुद्धरक्षिता] । अत्र तुभ्यमिति शेषः ।

२१०–२१४ अद्येत्यादि । अद्योर्जितं सातिशयं कृत्वा मया विजितम् । सर्वकार्यसंपादनात् । सफलस्य मम यौवनस्याद्योत्सवः । अत एवान्यत्किम् । अपि तु न किमपि । साध्यमस्तीति शेषः । यस्य मम

१ C. om. किं. २ लव० for बुद्ध० C.; अह इं N.; अ for च C. N.; भणामि A. C. E.; C. E. om. अहं; N. om. इमस्स. ३ महाणुभाअ C.; दिण्णो A. E.; अत्ता A. B. E. अत्ताणअं C.; A. B. E. om. पडिवज्जस्स, गेण्ह for पडिवज्जस्स C. ४ अपि for अद्य A. B. C. E. ५ यस्मै for यस्य N; समर्पितेयं B. समर्पितेयं C. E. समुद्धृतैव A. ६ Com. with A.

तदनेन पक्षद्वारेण [1]निर्गत्य साधयामः। निभृतं परिक्रामन्ति।

[2]मक०। अहो निशीथनिःसंचाररमणीयता राजमार्गस्य। तथा २१९
हि संप्रति[3]

प्रासादानामुपरि वलभीतु[4]ङ्गवातायनेषु
भ्रान्त्वा[5]वृत्तः परिणतसुरागन्धसंस्कारगर्भः।
माल्यामोदी मुहुरु[6]पचितस्फारकर्पूरवासो

बान्धवधुरा मित्रकृत्यं कामदेवेन सम्यग्धृता। प्रसन्नतया सुमुखेन। एवकारो ऽप्यत एव। यदि माधवसंगतेयं स्यात्तदा मया सर्वाकारं जितं न स्यादिति भावः। कन्यावरणे बान्धवा एवं भवन्ति। यदाह।

कन्याया वरणे माता पितरौ बान्धवा अपि॥

पक्षद्वारं खडिक्किका॥

२१९–२२०. अर्धरात्रनिशीथौ द्वावित्यमरः॥ प्रासादानामिति। अयं वायुस्तरुणानां नूतनस्त्रीसमागमं प्रकाशयति। अनेन मदयन्तिकाप्रोत्साहनमुक्तम्। कीदृशः। उक्तस्थानेषु भ्रा न्त्वावृत्तः। आदौ भ्रान्तः पुनरावृत्त आयातः। अनेन मन्दत्वम्। भ्रान्त्या भ्रमणेनायात इति वा। परिणतपुष्परसगन्धसमूहबन्धुः। पुष्पस्रजा हृष्टः सुरभिर्वा। मुहुरुपचितोत्यर्थं प्रवृद्धः। स्फारो दीर्घतया बृहत्तरः। कर्पूरसंपर्की च। पश्चात्कर्मधारयः। यद्वा। कर्पूरविशेषणमेव द्वयम्। एभिरतिसौगन्ध्ये ध्वनिते यतोतिमनोहरोत एव स्त्रीसांनिध्यकर इति भावः। उपहितम्लानेति पाठेपि कर्मधारयः।

---

१ विनिर्गत्य A. C.; समाहितं after निर्गत्य E. २ B. om. मक०; निशीथिनीसंचाररमणीयता N.; A. om. राज; A. om. तथाहि. ३ हि after संप्रति N. ४ जाल for तुङ्ग N. ५ भ्रान्त्या E.; माल्यामोदः परिणत N.; परिचित for परिणत A.; संभार for संस्कार B. ६ उपहितम्लान noticed by Com.

धाता[1]यूनामभिनववधूसंनिधानं व्यनक्ति ॥

इति निष्क्रान्ताः सर्वे ।

॥ [2]नन्दनविप्रलम्भो नाम सप्तमोऽङ्कः ॥

प्रासोष्ट यं रत्नधरो द्विजेशो द्विजेशवन्द्या दमयन्तिकापि ।
जगद्धरं तत्कृतटिप्पणेऽङ्कोगमन्मनोहारिणि सप्तमोऽयम् ॥

इति सप्तमोऽङ्कः ।

---

१ धातो यूनामभिमतवधू N. २ N. om. नंद°—नाम; मालतीमाधवे for नंद°—नाम A. E.

॥ अष्टमोऽङ्कः ॥

ततः प्रविशत्यवलोकिता ।

अव० । वन्दिदा मए[1] णन्दणावासपडिणिउत्ता भअवदी । ता जाव मालदीमाहवसआसं गेच्छामि[2] । परिक्रम्य । एदे दे णिव्वत्तिदगिह्म-दिअ[3]हावसाणमज्जणा दीहिआतडसिलादलं अलंकरन्ति मालदीमाहवा । ता[4] जाव उवसप्पिस्सं । (क) निष्क्रान्ता । प्रवेशकः ।

ततः प्रविशतः[5] उपविष्टौ मालतीमाधवाववलोकिता च ।

(क) वन्दिता मया नन्दनावासप्रतिनिवृत्ता भगवती । तद्यावन्मालतीमाधवसकाशं[6] गच्छामि । एतौ तौ निर्वर्तितग्रीष्मदिवसावसानमज्जनौ दीर्घिकातटशिलातलमलंकुरुतो मालतीमाधवौ[7] । तद्यावदुपसर्पामि ।

तदेवं मदयन्तिकामादाय मकरन्दे माधवान्तिकं चलिते मालतीमादाय निर्गतस्य माधवस्य कामन्दकीगृहास्थितस्य वार्ताप्रस्तावनायावलोकिताप्रवेशः । सूचनं च पूर्वाङ्के । जहिं ज्जेव्व मालतीति वचनेन मालतीमाधवयोरेकत्र वासः सूचितः । तत्र च यद्यपि तयोरेव प्रवेशोऽस्ति तथापि कन्याप्रलोभने सख्यानुकूल्ये तत्प्रवेश इति पूर्वाङ्के कृतमेव ।

४–१२. अत्र सरो वापी तु दीर्घिकेत्यमरः ॥ दलयतीत्यादि । अयं चान्द्र उद्योत उद्गच्छन्नत एव शुष्कप्रगल्भतालीपत्त्रवत्पाण्डुरस्तिमिरसंघं

---

१ जाव after मए A.; °णिअत्ता C. °णिवत्तमाणा N.; देवी before भअवदी B. २ ज्जेव before गच्छामि A.; परिक्रम्यावलोक्य N.; A. om. एदे दे; ते for दे C.; एदे खु मालदीमाहवा णिव्वुत्तगिह्म N. ३ दिवसा° N.; सिलावलं A. N.; °करेंति C. °करंति N.; A. om. मालदीमाहवा, N. has it above. ४ A. om. ता; B. N. om. जाव; उप° C. E.; उपसप्पामि N.; इति before निष्क्रान्ता A. E.; N. om. निष्क्रान्ता. ५ ततः प्रविष्टौ माल° A. ६ सकाशमेव Com. ७ Com. om. मालतीमाधवौ; उपसर्पामि Com.

माध० । सानन्दम्[1] । वर्तते हि मन्मथप्रौढसुहृदो निशीथस्य यौवनश्रीः । तथाहि ।

दलयति परिशुष्यत्[2]प्रौढतालीविपाण्डु-
स्तिमिरनिकरमुद्यन्नैन्दवः प्राक्प्रकाशः ।
वियति पवनवेगादुन्मुखः केतकीनां
प्रचलित इव सान्द्रो माकरन्दः[3] परागः ॥

स्वगतम्[4] । तत्कथं वामशीलां मालतीमुपावर्तये । भवत्वेवं तावत् । प्रकाशम् । प्रिये मालति प्रत्यग्र[5]सायंतनस्नानसविशेषशीतलामञ्जवर्ती निदाघ[6]शान्तये विज्ञापयामि । तत्किमित्यवानिमिसमन्यथैव संभावयसि ।

निश्च्योतन्ते[7] सुतनु कबरीबिन्दवो यावदेते
यावन्मध्यः स्तन[8]मुकुलयोनार्द्रभावं जहाति ।
यावत्सान्द्रप्रतनु[9]पुलकोद्भेदवत्यङ्कपालि-
स्तावद्गाढं वितर सकृदप्यङ्क[10]पालीं प्रसीद ॥

खण्डयति । प्रथमतो व्योम्नि वायुवेगेनोर्ध्वमुखीभूय प्रचलितो घनः केतकीपराग इव । इन्दोरयमैन्दवः । मन्दमन्दमिति प्रचलनक्रियाविशेषणम् । उपावर्तये संमुखीकरोमि ।

१७–२०. निश्च्योतन्त इत्यादि । हे सुशरीरे यावदेते कबरीजलबिन्दवः स्रवन्ति यावत्कुचकलिकयोर्मध्य आर्द्रतां न त्यजति यावच्च निबिड-

---

१ स्वगतं before सानन्दम् A.; N. om. हि; निशीथिनीनाथस्य यौवनश्रीः B. २ शुष्क for शुष्यत् E. ३ मन्दमन्दः A. मंदमंदं B. for माकरन्दः. ४ A. B. om. स्वगतम्. ५ स्नानविशेष A. ६ निदाघतापशान्तये A. E.; किंचित् before विज्ञापयामि N.; अपि after भव C.; तत्किमिति मित्यमन्यथैव मां संभावयसि A. तत्किमित्यन्यथैव मां संभावयसि N. ७ निश्च्यो० N. ८ स्तनयुगलयोः A.; मुकुलयोरार्द्रभावं N. ९ प्रतत for प्रतनु B. E. १० अङ्कपालिं N.

अयि[1] निरनुरोधे

जीवयन्निव समूढसाध्वसस्वेदबिन्दुरधिकण्ठमर्प्यताम्।
बाहुरैन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः॥

अथवा दूरे तावदेतत्[2]। कथमालापसंविभागस्याप्यभाजनमयं जनो भवत्याः।

दग्धं चिराय मलयानिलचन्द्रपादै-

र्व्यापि रोमाञ्चं प्रकाशयन्ती काययष्टिस्तावद्गाढं यथा तथा सकृदपि मेऽङ्कपालिं क्रोडप्रदेशं देहि। अतः प्रसीद। तदिह निदाघतापशान्तये जलबिन्दवः। कुचार्द्रता पुलकोद्गमश्च सर्वाङ्गशैत्यापत्तये। यावत्तावच्छब्दाववध्यर्थौ॥ सान्द्रेत्यादिपदे कर्मधारयमत्वर्थीयाद्बहुव्रीहिरेवेष्टो लघुत्वादिति न्यायेन बहुव्रीहिसंभवे कथं मत्वर्थीय इति न देश्यम्। एतद्वचनस्य प्रायिकत्वात्। तथैव नानाप्रयोगदर्शनादिति दिक्॥ पालिः पङ्क्तिप्रदेशयोरिति शाश्वतः॥

२२—२५. जीवयन्नित्यादि। बाहुः कण्ठेऽर्प्यताम्। कीदृशः। समूढं सद्योजातं पुञ्जितं वा यत्साध्वसं भयं तेन स्वेदबिन्दुर्यत्र सः। अननुभूततया भयम्। चान्द्रकरस्पृष्टोत एव स्यन्दी क्षरन्वालचन्द्रकान्तहारस्तत्तुल्यः। घर्मविघातकत्वात्। अत एव सौहित्याज्जीवयन्निव॥ समूढः पुञ्जिते भुग्ने सद्योजाते सुनिश्चित इति विश्वः॥ ससाध्वसश्रमेति पाठे ससाध्वसो भयवान्यः श्रम इत्यर्थः। संविभागो भेदः। अभाजनमस्थानम्। अजहल्लिङ्गोयम्। अयं जन इत्यनेन दीनतोद्भावनेनानुकूल्यं स्वीयमाह। भवत्या इत्यनेन नायिकोत्तेजनम्।

२६—२९. दग्धमित्यादि। चिरं दक्षिणवायुचन्द्रकरैस्तापितं मे वपुरालिङ्ग्य न चेन्निर्वापितमतपीकृतं तदा समदकोकिलरवपीडिता

---

[1] मालति after अयि N. [2] B. om. एतत्.

निर्वापितं तु परिरभ्य वपुर्न नाम ।
आमत्तकोकिलरुतव्यथिता[1] तु हृद्या-
मद्य श्रुतिः पिवतु किंनरकण्ठि वाचम् ॥

अव० । उपसृत्य[2] । अइ अणिव्वहणसीले जं दाणिं मुहुसंतरिद-माहवा[3] दुम्मणाअन्ती मम पुरदो भणासि चिराअदि अज्जउत्तो अवि[4] णाम कोविरेण पेक्खिस्सं जेण विच्छडिआसेससज्झसा विसुमेरिदणिमेसविग्धं[5] आलोअअन्ती एव्वं भणिस्सं विउणवेढपरिरम्भेण

मे श्रुतिः कर्णाविदानीं. हृद्यां वाचं पिबतु । सादरं शृणोत्वित्यर्थः । अत एव वाङ्माधुर्यद्योतनाय किंनरकण्ठि इति संबोधनम् । किंनरस्येव कण्ठः स्वरो यस्यास्तादृशि हे ॥ स्वरे कण्ठः प्रकीर्तित इति रत्नकोशः । अङ्गकण्ठगात्रेषूपसंख्यानान्ङीष् ॥ पूर्वार्धे तुशब्दो यद्यर्थः । द्वितीये पुनरर्थः । यदि नालिङ्गनं देयं तदा मधुरमालपेति भावः । नाम संभावनायाम् । आलिङ्गनादानं संभाव्यते यतः । त्वयि वदन्त्यां कलकोकिलरवोपि कर्णकटुरित्यनुरागाधिक्यमात्मन उक्तम् । इहाद्यपदमिदानीमर्थे । अन्यथा निशीथवर्णनेद्यास्मिन्नहनीत्यस्यानर्थक्यापत्तेः । एवं चाद्यास्मिन्नहनीति व्युत्पत्तिः प्रायिका ।

३०–३९. अत्र यदिदानीमिति वाक्यभूषायाम् । भणनस्वरूपमेवाह चिरयतीति संभावयेरितीत्यन्तम् । सांप्रतमिति शिरश्चालनकाको । चिरयति विलम्बते । विच्छर्दितं त्यक्तम् । विघ्नमिति क्रियाविशेषणम् ।

१ व्यथिता नु हृद्यान्यद्य श्रुतिः पिबतु वर्णरसायनानि B.; नु for तु E. २ N. om. उपसृत्य; अवि for अइ C.; °व्वहणासीले B.; आदेह A. दरिद B. तरिअ N. for तरिद. ३ माहवे E.; वि after माहवा N.; उम्मणाअन्ती C.; मह for मम C. N.; भणसि C. ४ वि णाम कियत् चिरेण B.; अवि णाम अइरादो तं पेक्खे N.; विच्छडि° A. विछड्डि° E.; सज्झसा A. B.; सज्झसं N. ५ °रिअ B. E. N.; णिमेसाविआलोअंती B.; विग्घमवलोअअन्ती A. विलोअंती N.; दुउणवेढ° B. द्विउणवेढन A. वेढण C. वेढ E.; णिब्भरिद for विउणवेढ N.

संभावअसि[1] त्ति तस्स दे अअं परिणामो । (क) मालती सासूयमिव तां पश्यति ।

माध० । स्वगतम्[2] । अहो भगवतीप्रधानान्तेवासिन्याः सर्वतोमुखं वैदग्ध्यम्[3] । प्रकाशम् । सत्यमवलोकिता वदति ।

मालती मूर्धानं[4] चालयति ।

माध० । शापितासि मम[5] लवङ्गिकावलोकितयोश्च जीवितेन यदि वाचा न कथयसि ।

माल० । णाहं[6] किं वि जाणामि । (ख) इत्यर्धोक्ते लज्जां नाटयति ।

(क) अयि अनिर्वाहनशीले यदिदानीं मुहूर्तान्तरितमाधवा[7] दुर्मनायमाना मम पुरतो भणसि चिरयत्यार्यपुत्रोपि नाम किर्यच्चिरेण[8] प्रेक्षिष्ये येन विच्छर्दिताशेषसाध्वसा विस्मृतनिमेषविघ्नमालोकयन्त्येवं भणिष्यामि द्विगुणावेष्टपरिरम्भेण संभावयेरिति तस्य[9] तेयं परिणामः ।

(ख) नाहं किमपि जानामि ।

परिणाम इति । या त्वं चिरविरहमसहमाना माधवार्थिनी सा कथमधुना तत्र वाग्यमनमालम्बस इति भावः । असूया गुणेषु दोषारोपः । सा चेह रहस्यनिवेदनादिति भावः । सर्वतोमुखं सर्वतोगामि । सुभाषितान्येव रत्नानि तेषां कोषः पात्रम् ॥ कोषोस्त्री कुङ्मले पात्र इति मेदिनीकारः ॥ प्रियेत्यादि प्रश्नवाक्यम् । मूर्धकम्प उक्तनिषेधाय । शापितासि शपथीकृतासि ।

---

१ संभावएत्ति A. संभावइस्संत्ति N.; संवदं before तस्स A. N.; तस्सि A.; N. om. दे. २ अपवार्य for स्वगतं N.; भगवत्याः प्रधाना° N. ३ अक्षयश्च सुभाषितरत्नकोषः A. अक्षयः सुभाषितरत्नकोशः N. अक्षयं सुभाषितरत्नसंस्करणं E. after वैदग्ध्यम्; प्रिये सत्य° A. प्रिये अपि सत्य° N. ४ तिर्यङ्मूर्धानं A. ५ मया for मम A.; °तयोर्जीवितेन A.; N. om. वाचा. ६ ण अहं C. E.; किं पि C.; अर्धोक्तौ B. ७ मुहूर्तमात्रान्तरितमाधवोपि Com. ८ कियता चिरेण Com. ९ Com. with A.

माध० । अहो[1] अनवसितार्थमन्थरस्य वचसश्चारुता । सहसा निरूप्य[2] । अवलोकिते किमेतत् ।

बाष्पाम्भसा मृगदृशो विमलः कपोलः
प्रक्षाल्यते सपदि राजत[3] एष यस्मिन् ।
गण्डूषपेयमिव कान्त्यमृतं पिपासु-
रिन्दुर्निवेशितमयूखमृणालदण्डः ॥

अव० । सहि किं दाणिं उच्छलिदबाहुप्पीलमन्थरं रोदिसि[4] । (क)

माल० । सहि[5] केच्चिरं पिअसहीए लवङ्गिआए असंणिधाणदुःखं अणुभविस्सं[6] । पउत्तिलम्भो वि मे दुल्लहो । (ख)

(क) सखि किमिदानीमुच्छलितबाष्पोत्पीडमन्थरं रोदिषि ।

(ख) सखि कियच्चिरं प्रियसख्या लवङ्गिकाया असंनिधानदुःखमनुभविष्यामि । प्रवृत्तिलाभोऽपि[7] मे दुर्लभः ।

४२–४७. अनवसितोऽनिश्चितः । किमेतदिति वक्ष्यमाणवाक्यार्थस्य प्रश्नः । बाष्पेत्यादि । हरिणाक्ष्या एष कपोलो बाष्पजलेन सपदि प्रक्षाल्यते । अत एव विमलः । किमेतत् । यत्र चन्द्रो राजते । कीदृक् । गण्डूषेण मुखपूरणेन पातव्यं दीप्त्यमृतं पातुमिच्छुरिव निहितः किरण एव मृणालदण्डो येन सः । किरणरूपमृणाललतिकया पातुमिच्छतीत्यर्थः । अनेन कपोलस्य चन्द्राधिककान्तिमत्त्वमुक्तम् ॥ गण्डूषो मुखपूर्तौ स्यादिति शाश्वतः ॥

४८–५०. अत्रोच्छलितो बहुलीभवन् । मन्थरमिति क्रियावि-

१ B. om. अहो; °सितार्थस्य वचसः B. °सितार्थमंदमथैवचसः N. २ अवलोक्य for निरूप्य B. ३ एव N. ४ उच्चलिअबाहुप्पीडमंथरा रोदिति N. उच्छलिद B.; बाहूप्पी° A.; °प्पीड B.; मंथरा A.; रोदेसि B. ५ जनान्तिकं after माल०। A.; A. om. सहि; लवंगिकाए E.; °हाण N. ६ °हविस्सं N.; से for मे A. E. N. मुदुल्लहो त्ति A. दुल्लहो त्ति C. E. ७ लंभोऽपि तस्या दुर्लभ इति Com.

माध० । अवलोकिते किं[1] नाम ।

अव० । तुह उज्जेण[2] सवधोवण्णासेण एसा लवङ्गिअं संभारिअ ताए पउत्तिणिमित्तं[3] उत्तम्मदि । (क)

माध० । नन्विदानीमेव तत्र[4] मया कलहंसकः प्रेषितः प्रच्छन्नमु-
पेगत्य[5] नन्दनावासप्रवृत्तिमुपलभस्वेति । साशंसम् । अवलोकिते अपि ५५
नाम बुद्धरक्षिताप्रयत्नः सफलोदर्कः[6] एव मदयन्तिकां प्रति स्यात् ।

अव० । कुदो[7] संदेहो महाणुभाअस्स । महाभाअ पढमं उज्जेव्व सद्दूलणहरालंकिदस्स मअरन्दस्स मोहविरामूहूसवं[8] णिवेदअन्तीए

(क) तवैव शपथोपन्यासेनैषा लवङ्गिकां स्मृत्वा तस्याः प्रवृत्तिनिमित्तमुत्ताम्यति ।

श्लेषणम् । अत्रासंनिधानदुःखमसंगमेन जनितक्लेशम् । प्रवृत्तिलम्भो वार्ताप्राप्तिः ॥ वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वय इत्यमरः ॥

५८–६८. अत्र निवेदयन्त्या मालत्या इत्यन्वयः । मालत्या इति षष्ठ्यन्तम् । मालत्याः कृत इत्यर्थः । अनुयुक्तः पृष्टः । स्वकीयहृदयालोकनमागामिश्लोकस्थरसद्योतनाय । प्रसवः पुष्पम् । प्रेम्णेत्यादि । या माला प्रियसख्या लवङ्गिकया हस्तेनोपनीता मद्ग्रथितेति हेतोः प्रेम्णानया मालत्या पीनकुचघटमुकुलस्य भरो यत्र तेन क्रोडेन सह संभाविता संभावनां नीता ततो नन्दनेन सह विवाहे संप्राप्ते मां प्रति निरस्तप्रत्याशया

---

१ किं हि नामैतत् N. २ एव्व N.; सवहो° B. सपधो° C. वअणो° for सव-धो° N.; सुमरिअ for संभरिअ A. N. ३ पउत्तिलंभणिमित्तं N. ४ A. om. तत्र, हि for तत्र N.; कलहंसः N.; प्रहितः A.; गच्छ त्वं before प्रछन्न N.; प्रछन्नः सन्निपत्य नन्दनावासं प्रवृत्ति° A. ५ उपगम्य C. N.; नंदनावासं प्रवृत्ति° E.; उपालभस्वेति B.; साशंकं C.; B. om. अवलोकिते. ६ फलोदर्कं N. सफलोदय E. ७ B. N. om. कुदो—°भाअस्स, महाभाअ कुदो संदेहो E.; पुढमं तस्स एव्व सद्दूलणहरालेखिदस्स N. ८ मोहविरहूसवं णिवेद° C. E. मोहविच्छेदिअं णिवेद° N.

[1]भअवदीए णिउत्तेण भवदा मालदीए जीविदेण समं पसादीकिदं हिअअं । [2]जइ को वि तुमं संपदं मदअन्तिआलम्भेण वड्ढावेदि तदा किं [3]दाणिं तस्स पारितोसिअं करेसि त्ति । (क)

माध० । [4]अनुयोक्तव्यमनुयुक्तोऽस्मि । हृदयमवलोक्य । इयमस्ति मालतीप्रथमदर्शना[5]भिषङ्गसाक्षिणः कामकाननालंकारस्य लक्ष्मीवतः केसरतरोः प्र[6]सूनमाला ।

प्रेम्णा मद्ग्रथितेति [7]या प्रियसखीहस्तोपनीतानया
विस्तारिस्तनकुम्भ[8]कुड्मलभरोत्सङ्गेन संभाविता ।
संप्राप्ते त्वथ पाणिपीडनविधौ मां प्रत्यपेताशया

(क) कुतः संदेहो महानुभावस्य । महाभाग प्रथममेव शार्दूलनखरालंकृतस्य मकरन्दस्य मोहविराममहोत्सवं निवेदयन्त्यै भगवत्या नियुक्तेन भ[9]वता मालत्यै जीवितेन समं प्रसादीकृतं हृदयम् । यदि कोपि त्वां [10]सांप्रतं मदयन्तिकालाभेन वर्धापयति तदा किमिदानीं तस्य पारितोषिकं [11]करोषीति ।

लवङ्गिकेयमित्यधिगते मय्येव यया सर्वस्वदानं कृतम् । अनेन पूर्वानुरागकथनेन नायिकाविस्रम्भ उक्तः । विस्तारः परिणाहः । कुम्भपदेनोन्न-

१ B. om. भअवदीए-°वदा; भअवदा for भवदा A. C. E.; समं before and after जीविदेण B.; अ after °किदं C. २ ता before जइ N.; जदि C. E.; N. om. तुमं; तस्स एव्व after संपदं N.; जेव्व after संपदं C. E.; मदअंतिआए लंभेण C. E.; वड्ढावेदि B. वद्धावेदि A.; A. N. om. तदा. ३ A. om. दाणिं; °दोसिअं N.; भविस्सदि for करेसि त्ति A. N. ४ अनया before अनुयोक्तव्यं A.; °क्तव्यमेवानु° N. ५ अभिष्वंग for अभिषङ्ग- C.; °लंकारभूतस्य N. ६ प्रसव for प्रसून A. E. N. ७ वा for या N.; °नीता यया C. °नीतेति वा N. ८ कुड्मल B. E. ९ भगवता for भवता Com. १० सांप्रतमेव मद° Com. ११ भविष्यति for करोषीति Com.

या[1] मय्येव लवङ्गिकेत्यवगते सर्वस्वदायीकृता ॥

अव० । सहि मालदि वल्लहा खु[2] दे इअं वउलमाला तदो अवहिदा भव[3] मा दाणिं एसा सहसज्जेव्व परहत्थगदा भविस्सदि त्ति ।(क)

माल० । पिअं पिअ[4]सही मे उवदिसादि । (ख)

अव० । कधं[5] पदसद्दो विअ । (ग)

माध० । नेपथ्याभिमुखमवलोक्य । अये[6] कलहंसकः प्राप्तः ।

माल० । दिट्ठिआ वड्ढसि[8] मदअन्तिआलम्भेण[7] । (घ)

(क) सखि मालति वल्लभा खलु त इयं वकुलमाला ततोवहिता भव मेदानीमेषा सहसैव परहस्तगता भविष्यतीति ।

(ख) प्रियं प्रियसखी म उपदिशति ।

(ग) कथं पदशब्द इव ।

(घ) दिष्ट्या वर्धसे मदयन्तिकालाभेन ।

तता । कुड्मलपदेन मृदुता । भरशब्देन प्रौढिरुक्ता । पाणिपीडनं विवाहः । दीयत इति दायः ।

६९—८६. अत्र येनैव मकरन्दस्य मदयन्तिकालाभः कथनीयस्तेनैवेयं प्राप्या । अतस्त्वमेव तं कथयेति गुह्या माधवेन सहात्मानं संभावयेत्याशयः । [माल० वा०] तथा चाहमेव कथयामीति भावः । [अव० वा०]

---

१ मय्येवं हि for या मय्येव E.; दायः कृतः B. N. २ खु N.; जदो for तदो N. ३ N. om. भव मा—°त्ति and has ओलोएसि after अवहिदा; होहि C. भविस्ससि E. for भव; B. om. मा, जवा for मा A.; सहसं ज्जेव्व A.; ण after गदा A.; B. om. त्ति. ४ पिअसहि A. E.; उवदिससि A. E. उवहसदि B.; for पिअं—°दिसदि N. has सहि मं उवहससि. ५ कहं N.; पाद B. ६ अये कलहंसस्संप्राप्तः N. ७ लाहेण for लम्भेण N. ८ अतः for ततः Com. ९ सखि प्रियं मे उपदिशसि Com.

माध० । सहर्षं[1] परिष्वज्य । प्रियं प्रियं नः । आत्मनः कण्ठादवतार्य बकुलमालां ददाति ।

अव० । णिव्वूढो क्खु[2] भअवदीए संभावणाभारो बुद्धरक्खिदाए । (क)

माल० । सहर्षम्[3] । अम्महे पिअसही लवङ्गिआ वि दीसइ । (ख) उत्तिष्ठति ।

प्रविश्य[4] संभ्रान्ताः कलहंसकमदयन्तिकाबुद्धरक्षितालवङ्गिकाः ।

लवं[5]० । परित्ताअदु परित्ताअदु महाभाओ । अद्धमग्गे क्खु णअर[6]रक्खिपुरुसाभिओओ मअरन्दस्स जादो तदो तक्कालमिलि-

(क) निर्व्यूढः खलु भगवत्याः संभावनाभारो बुद्धरक्षितया ।
(ख) अम्महे प्रियसखी लवङ्गिकापि दृश्यते ।

अत्र श्रूयत इति भावः ।[माल०वा०] अत्र मकरन्दस्य मदयन्तिकाविवाहेनेत्यर्थः । इदं वचनं मालत्या माधवं प्रति । प्रियं न इति । आलापलाभेनातिप्रियमित्यर्थः । अत्र निर्व्यूढो निर्वाहं नीतः । खलु निश्चये ।

१ B. E. om. परिष्वज्य; प्रियां before परिष्वज्य C.; A. om. one प्रियं, प्रियं नः प्रियं नः N.; N. om. आत्मनः—°तार्य; कण्ठे before ददाति E. N. २ N. om. क्खु; संभावणभारो B. C. E. ३ B. E. om. सहर्षम्; N. om. अम्महे; E. N. om. वि; सर्वे उत्तिष्ठन्ति A. इत्युत्तिष्ठति N. ४ ततः प्रविशन्ति A. and ततः प्रविशति N. for प्रविश्य; B. om. संभ्रान्ताः, संभ्रांतः कलहंसकः बुद्धरक्षिता मदयंतिका लवंगिका च N.; कलहंस A. E. ५ बुद्ध० for लवं० N.; सर्वाः for लवं० Com.; N. om. one परित्ताअदु; खु N. ६ णअररक्खअपुरुसेहिं आहिओओ N.; पुरिसा° C. E.; मकरंदस्स C.; संजादो N.; N. om. तदो.

देण कलहंसएण सहिदा[1] अह्मे अणुप्पेसिदाओ त्ति । (क)

कल० । जधा[2] इदोमुहागदेहिं पि महन्तो कलकलो सुदो अह्मेहिं तधा तक्केमि[3] अण्णं पि पारक्कअं बलं उवगदं त्ति । (ख)

मालत्यवलोकिते[4] । हद्धी हद्धी समं ज्जेव्व हरिसुव्वेअसंभेदो उवणदो[5] । (ग)

माध० । सखि[6] मदयन्तिके स्वागतमेह्येहि । अनुगृहीतमस्मद्गृहं

(क) परित्रायतां परित्रायतां महाभागः । अर्द्धमार्गे खलु नगररक्षिपुरुषाभियोगो मकरन्दस्य जातस्तत्स्तत्कालमिलितेन कलहंसकेन सहिता[7] वयमनुप्रेषिता इति ।

(ख) यथेतोमुखागतैरपि महान्कलकलः श्रुतोऽस्माभिस्तथा तर्कयाम्यन्यदपि पारक्यं बलमुपगतमिति ।

(ग) हा धिक् हा धिक् सममेव[8] हर्षोद्वेगसंभेद उपनतः ।

संभावना प्रतिष्ठा । अत्र अम्महे विस्मये । [सर्वत्रा०] अत्राभियोगो अवस्कन्दः । [कल० वा०] अत्र पारक्यं परकीयम् ।

८९—९६. स्वागतं कुशलम् । स एव प्रसिद्धपौरुषः । असौ मकरन्दः । यत्किंचिदिति न गणनीयमित्यर्थः । हरेरित्यादि । हरेः सिंहस्य स उक्तगुणः क्रूर एव सखा द्वितीयो भवति । विक्रमे कर्तव्ये । नान्यमत्रा-

---

१ समं for सहिदा N.; B. om. अह्मे; N. om. त्ति. २ जह एत्तोमुहं आअदेहिं अह्मेहिं वि कलकलो सुदो तह तक्केमि N.; एदो for इदो E.; °देहिं वि E.; A. B. om. पि; जोअकलकलो A. कलअलो E. ३ तक्केम B.; अण्णं वि E.; अण्णं वि उवगअं आरक्खिअभजालं ति N.; पारेक्कं C. E.; उवागदं त्ति B. ४ माल० । अवलोइदे हद्धी &c. A. B. C. E.; समकालं for समं A.; एव्व N.; संभेओ N. ५ उवगदो A. उअणदो B. ६ B. om. सखि; N. om. एह्येहि; अस्मद्गृहिणी for अस्मद्गृहं N. ७ कलहंसकेन समं वयमत्रानु° Com. ८ समकालमेव for सममेव Com.

भवत्या[1] । ननु स एवासौ किमित्यस्वस्था भवती । एकाकिनो बहुभिरभियोग[2] इति यत्किंचिदेतद्वयस्यस्य ।

हरेस्तुलविक्रमप्रणयलालसस्याहवे
स एव[3] भवति क्वणत्कररुहप्रचण्डः सखा ।
स्फुरत्[4]करटकोटरस्खलितदानसिक्तानन-
द्विपेश्वरशिरःस्थितास्थिदलनैकवीरः करः ॥

तदहमपि विक्रान्तप्लुतं[6] विलसतः प्रियसुहृदः प्रत्यनन्तरो भवामि ।

इति[7] विकटं परिक्रम्य कलहंसकेन सह निष्क्रान्तः ।

अवलोकितालवङ्गिकाबुद्धरक्षिताः । अवि[8] णाम अणाहदा पडिणिअत्तिस्सन्ति एदे[9] महाणुभावा । (क)

मालं० । सहिओ अवलोइदाबुद्धरक्खिदाओ[10] तुरिदं गडुअ

(क) अपि नामानाहतौ प्रतिनिवर्तिष्येते एतौ महानुभावौ ।

पेक्षत इत्यर्थः । करः कीदृशः । अतिपराक्रमप्रश्रये सतृष्णः । शब्दायमाननखैः प्रचण्डः । स्फुटतः करटस्य गण्डस्थलस्य मध्याच्च्युतेन मदजलेन सिक्तमुखहस्तिराजमस्तकस्थितास्थिविदारणे श्रेष्ठवीरः । यथा च

१ भवत्याः A.; स्वस्था भवतु भवत्यः for स एवासौ–भवती N.; मा मृतु परिभवि(?)गः after असौ A.; B. E. have तत्र and C. तत् before किमिति; एकाकिनोपि बहु° N. २ योग for अभियोग B.; न किञ्चिद् for यत्किंचिद् A.; B. om. एतद् ; वयस्य before हरे &c. A. ३ एष for एव A. ४ स्फुटत् for स्फुरत् C. E. ५ स्थितास्थिकदलनास्थिरैकः करः B.; स्थिर for स्थित N. ६ °हमपि विक्रमानुरूपं विलसतः A.; °हमपि विक्रान्तिपूतः सुहृदः प्रत्यनन्तरीभवामि N.; प्रत्यनन्तरीभवामि A. C. ७ N. om. इति; परिक्रामन् for परिक्रम्य A.; कलहंसेन N.; C. om. सह. ८ अप्पाडिहदा णिवत्तिस्सन्ति N.; °णिवत्ति° B. ९ ते for एदे B.; °णुभाआ A. B. °हावा N. १० B. om. अवलो–दाओ; E. has lost the portion beginning with अवलोइदा and ending with परिलोभस्स हा मह (l. 124): तुरिअं A. N.; दाडुअ for गडुअ B.

भअवदीए ऐदं[1] वुत्तन्तं कहेध । तुमं पि लवङ्गिए विण्णवेहि अज्जउत्तं जेइ[2] दाव तुह्माणं अह्मे अणुकम्पणीआ तदो अप्पमत्ता परिक्कमेध त्ति । (क)

निष्क्रान्ता[3] लवङ्गिकाबुद्धरक्षितावलोकिताः ।

माल० । हद्धी[4] हद्धी ण आणीअदि कधं वेला गमिअदु त्ति । भोदु पिअसहीए लवङ्गिआए पडिणिवुत्ति[5]मग्गं अवलोअअन्ती चिट्ठिस्सं । परि॰

(क) सख्यौ अवलोकिताबुद्धरक्षिते त्वरितं गत्वा भगवत्या एतं[6] वृत्तान्तं कथयतम् । त्वमपि[7] लवङ्गिके विज्ञापयार्यपुत्रं यदि तावद्युष्माकं वयमनुकम्पनीयास्ततोऽप्रमत्ताः परिक्रामतेति ।

सखा मकरन्दः सिंह इव साहसे द्वितीयानपेक्ष इत्यर्थः ॥ काकेभगण्डौ करटाविल्यमरः ॥ निष्कुहः कोटरं वा नेत्यपि ॥ विक्रान्तस्य वीरस्य प्लुतं गतिविशेषम् । विलसतः कुर्वतः । प्रत्यनन्तरो द्वितीयः ।

---

१ इमं A. एमं G. for एदं; कधेन C. णिवेदह A. णिवेदेध G. णिवेदेह N. for कहेध; वि for पि A. N.; पिअसहि before लवङ्गिए A.; तुरिदं A. G. and तुरिअं N. before विण्णवेहि; विणवेहि B. C. E. २ जदि for जइ; ताव for दाव A.; °णीआओ N.; तदा for तदो G.; अप्पमत्तं G.; परिक्कमेत्ति A. ३ मालतीमदयन्तिकावर्जं सर्वे निष्क्रान्ताः for निष्क्रा–किताः N. ४ G. om. हद्धी हद्धी, A. om. one हद्धी; आणीएअदि B. आणिअदि N.; लवङ्गिआ किं चिराअदि A. and कधं एत्तिअं लवंगिआ चिराअदि B. before कधं; B. om. कधं–°अदु त्ति; कहं N.; एत्तिआ before वेला A. C.; गमिअदि त्ति G. N.; होदु N.; पिअसहि मदअन्तिए before पिअसहीए A.; °सहिलव° G. ५ °णिउत्ति A. B. G.; मग्गं ओलोअन्ती चिट्ठिस्सं N. मग्गमणुगमिस्सं A. मग्गं अणुगमिस्सं G.; इति परिक्रामति G. ६ इमं for एतं Com. ७ त्वमपि प्रियसखि लवङ्गिके गत्वा त्वरितं विज्ञा° Com.

क्रामति । [1]सातङ्कम् । फुरिदं क्खु मे वामेदरेण लोअणेण । (क) उपविशति[2] ।

[3]प्रविश्य कपालकुण्डला । आः पापे तिष्ठ ।

माल० । सत्रासम् । [4]हा अज्जउत्त । (ख) इत्यर्धोक्ते वाक्स्तम्भं नाटयति ।

कपा० । सक्रोधहासम्[5] । नन्वाक्रन्द ।

त्वद्वत्सलः क्व [6]स तपस्विजनस्य हन्ता
कन्याविटः पतिरसौ परिरक्षतु[7] त्वाम् ।
श्येनावपातचकिता [8]वनवर्तिकेव
किं चेष्टसे ननु चिरात्कवलीकृतासि ॥

यावच्छ्रीपर्वतमुन्नीय[9] लवशो लवश एनां निकृत्य दुःखमरणां करोमि । [10]इति मालतीमाक्षिप्य निष्क्रान्ता ।

(क) हा धिक् हा धिक् [11]न ज्ञायते कथं वेला गम्यतामिति । भवतु प्रियसख्या लवङ्गिकायाः प्रतिनिवृत्तिमार्गमवलोकयन्ती स्थास्यामि । [12]स्फुरितं खलु मे वामेतरेण लोचनेन ।

(ख) हा आर्यपुत्र ।

१०७–११६. अत्र वाममनिष्टम् । अवामो दक्षिणः । दक्षिणाक्षिस्पन्दनं स्त्रीणामनिष्टसूचकमिति भावः । अनेन कपालकुण्डलाप्रवेशोपि

---

१ मद० before सातङ्कम् &c. A. B. C. G. साशंकं for सातङ्कम् N.; कहं before फुरिदं N.; N. om. क्खु, B. om. क्खु मे; वामदरणभेणण B. वामेदरलोअणेण G. वामेभरेण C.; मे वामं अवामेण लोअणेण N. २ G. om. उपविशति. ३ ततः प्रविशति for प्रविश्य G. N.; मालति before तिष्ठ N. ४ A. om. हा; इत्यर्धोक्तेन स्तंभं G. इति वाक्स्तंभं N. ५ सक्रोधं A.; G. om. सक्रोधहासम् ; A. C. repeat नन्वाक्रन्द. ६ नु for स N. ७ परिरक्षति A. परिरक्षिता C. ८ नववर्तिकेव G. ९ उपनीय A. N. उपगत्य G. for उन्नीय; B. om. one लवशः, पर्वशस्तिलश एनां G. तिलशस्तिलशस्तिलश एनां N. for लवशो लवश एनां; निःकृत्य C. निष्कृत्य G.; दुःखमरणं B. C. दुःखमारणी N. १० N. om. इति; मालतीमादाय N. मालत्या सह नि० A. B. G. ११ न ज्ञायते लवंगिका किं चिरयति कथमेतावती वेला Com.; प्रियसखि मदयंतिके after भवतु Com. १२ मद० । स्फुरितं मे वाममवामलोचनेन Com.

मद० । अहं पि[1] मालादिं ज्जेव्व अणुगमिस्सं । परिक्रम्य । [2]सहि मालदि । (क)

प्रविश्य लवङ्गिका । सहि मदअन्तिए लवङ्गिआ क्खु अहं । (ख)

मद० । अवि संभाविदो क्खु[3] तुए महाभाओ । (ग)

लव० । [4]णाहि णहि सो क्खु उज्जाणवाडोवणिग्गमादो ज्जेव्व कल-

(क) अहमपि मालतीमेवानुगमिष्यामि । [5]सखि मालति ।

(ख) सखि मदयन्तिके लवङ्गिका खल्वहम् ।

(ग) अपि संभावितः खलु त्वया महाभागः ।

सूचितः । त्वदित्यादि । ननु हे स त्वत्प्रियः क्व वर्तते । तापसजनस्याघोरघण्टस्य घातकः कन्याया विटोतिकामुकोसौ त्वां रक्षतु । अत एव पातीति पतिः । यच्चिराय कवलितासि किं चेष्टसे वनवार्तिकेव । श्येनः सैवान इति ख्यातः पक्षी तस्यावपातोतिवेगस्तेन त्रस्तारण्यवार्तिका यथेत्यर्थः ॥ वर्तको वार्तिकादय इत्यमरः ॥ अत्र वनग्रहणेन वार्तिकायाः स्वकुलवेष्टितत्वमुक्तम् । एतस्यास्तद्वैपरीत्यमिति भावः । यद्वा । वनेनारक्षितत्वेन वर्तिकाया अतिभीरुत्वमुक्तम् । यद्वा । वनावस्थानेन वर्तिकाया एकाकिनीत्वमुक्तम् । अत एव मालत्यपि तथेति साम्यम् । नववर्तिकेत्यपि पाठः । लवशो लवशोनेककणान्कृत्वा । आक्षिप्य गृहीत्वा ।

१२०—१२८. अत्रापि प्रश्ने । संभावितो लब्धः । अत्र उपनिर्गमः समीपगमनम् । एतेन मार्गस्य शून्यत्वमुक्तम् । अवक्षेपोवहेला । अपविद्ध-

---

१ वि N.; °दीं A. B. C.; एव्व N.; G. om. ज्जेव्व. २ पिअ before सहि A.; after परिक्रम्य N. has प्रविश्य लवंगिका । सहि मालदि सहि मालदि । मद० । सहि लवंगिए मदअंतिआ अहं । अवि संभाविदो सो महाभाओ तुए instead of the above. ३ A. G. N. om. क्खु; महाणुभाओ A. G. ४ G. om. one णहि; नहि नाहि N.; वाडोआडोणिग्ग° B. वाडोणिग्ग° G.; उज्जाणवाडोणिग्गमादो N.; ज्जव्व N.; कलकलं A. ५ प्रियसखि Com.

अलं सुणिअ[1] साधिक्खेवं दूरणिक्खेवाविद्धविअडोरुदण्डणिट्ठुरं पधाविअ पराणीअं पविट्ठो । तदो[2] पडिणिउत्तह्मि मन्दभाइणी । सुणामि अ[3] घरे घरे गुणाणुराअणिब्भरस्स पोरलोअस्स हा महाणुभाव माहव हा[4] मअरन्द हा साहसिअ त्ति परिदेवणाओ । महाराओ वि किल मन्तिधीआणं[5] विप्पलम्भवुत्तन्तं सुणिअ संजादमच्छराधिक्खेवो तक्खणाविसज्जिदा[6]णेअप्पोढपाइक्कणिवहो चन्दादवेण सोहासिहरट्ठिदो[7] पेक्खदि त्ति मन्तीअदि । (क)

(क) न हि न हि स खलूद्यानवाटोपनिर्गमादेव कलकलं श्रुत्वा सा-[8]धिक्षेपं दूरनिक्षेपाविद्धविकटोरुदण्डनिष्ठुरं प्रधाव्य परानीकं प्रविष्टः । ततः प्रतिनिवृत्तास्मि मन्दभागिनी । शृणोमि च गृहे गृहे गुणानुरागनिर्भरस्य पौरलोकस्य हा महानुभाव माधव हा मकरन्द हा साहसिक इति परिदेवनाः । महाराजोऽपि किल मन्त्रिदुहित्रोर्विप्रलम्भवृत्तान्तं श्रुत्वा संजात-

---

माक्रान्तम् । विशालोरुयुगुलदण्डाभ्यां निर्भरं गाढं यथा तथा धावित्वेत्यर्थः । अनीकं सैन्यम् । धिआ दुहिता । विप्रलम्भो वञ्चनम् । चन्द्रातपश्चन्द्रप्र-

---

१ सुणिस्सं for सुणिअ B.; सावक्खेवाविद्धविकडो° A. साविक्खेवाविद्ध G. सावलेवदूर N.; णिब्भरं for णिट्ठुरं A. G. N. निट्ठुरं B.; पहाविअ for पधाविअ N. २ तदा C. °णिअत्तह्मि C. G. °णिउत्ता° A. B. ३ N. om. अ; काअरस्स A. कादरस्स G. for णिब्भरस्स; पौल for पोर A.; N. om. महाणुभाव, °णुभाअ A. °णुहाव E.; हा before माहव A. ४ N. om. हा; ° सिएत्ति E.; परिदेवणा B. परि-देवणं C. पलिदेवणं E.; महाभाओ for महाराओ C.; त्ति for वि A.; एदाणं after किल A. ५ बहूवराणं for मन्तिधिआणं N.; दुहिदुविप्प° for धिआणं विप्प° E.; सं-जाअ A. N.; °वेओ for °धिक्खेवो N. ६ °आ for °दा E. N.; °ज्जिदपोढ-पाइक्क A.; N. om. प्पोढ; पोढ C.; पआत्ति for पाइक्क E.; °तवेण B. °तवेण E.; चंदादवमोअ N.; सोह A.; सिहरत्ती B.; सोअसिअरट्ठिओ E.; सोअ C.; एव्व before पेक्खदि N. ७ मंति° N. ८ सावक्षेपाविद्धविकटो° Com.; निर्भरं for निष्ठुरं Com.

मद० । हा हदह्मि मन्दभाइणी । (क)

लव० । सहि मालदी उण कहिं । (ख) १३०

मद० । सा क्खु पढमं ज्जेव्व दे मग्गं अवलोइदुं पसरिदा । पच्छादो अहं ण तं[2] पेक्खामि । अवि णाम उज्जाणगहणं पविट्ठा भवे । (ग)

लव० । सहि तुरिदं[3] अण्णेसह्म । अदिकादरा मे पिअसही । उवद्विदाणत्थे ईमस्सिं[4] अवसरे सा ण धारेदि अत्ताणअं । त्वरितं परिक्रम्य । १३१

मत्सराधिक्षेपस्खलत्क्षणविसर्जितानेकप्रौढपदातिनिवहश्चन्द्रातपेन सौधशिखरास्थितः प्रेक्षत इति मन्यते ।

(क) हा हतास्मि मन्दभागिनी ।

(ख) सखि मालती पुनः क्व ।

(ग) सा खलु प्रथममेव ते मार्गमवलोकयितुं प्रसृता । पश्चादहं न तां प्रेक्षे[5] । अपि नामोद्यानगहनं प्रविष्टा भवेत् ।

काशः । मालत्या वियोगदशायां तापकत्वेनानुभवादातप इत्युक्तम् । मन्यते पौरलोकेनैव ।

१३१–१३२. अत्र प्रसृता निर्गता । अहं प्रसृतेत्यन्वयः । अपीत्यादि शङ्कायाम् ।

---

१ पुढमं एव्व N.; ते for दे B.; ओलोइदुं for अवलोइदुं N., B. om. अवलोइदुं; पउत्ता for पसरिदा E.; पुणो for पच्छादो N. २ अ before तं B. C. सा for तं A.; N. om. अवि; णं for णाम N.; गहणे A. C.; हवे N. ३ तुवरिदं E. तुरिअं N.; अणेसह for अण्णेसह्म C.; अदिकाअरा णो पिअसही A.; खु before मे E.; उभअण्णे after पिअसही E.; A. om. उवद्विदाणत्थे. ४ एदस्सिं अवसले E.; for उवद्विदा°–अत्ताणअं B. has तं णत्थि भविदव्वं जं सहसा ण करेदि and N. has उवत्थणद्विदे इमस्सिं अवसरे सा ण करेदि; अप्पाणं ण धारेदि for सा–°णअं A.; द्विदा before सा E.; अत्ताणं E.; after धारेदि अत्ताणं E. has तण्णत्थि भविदव्वं &c. as in B.; त्वरितं परिक्रामन्त्यौ । उभे । सहि मालदि मालदि इतीतस्ततः C.; त्वरितं परिक्रामतः । उभे । सहि N. ५ पश्यामि Com.

सहि मालदि णं भणामि सहि मालदि त्ति । (क) इतस्ततः परिक्रामतः।

[2]प्रविश्य प्रहृष्टः कलहंसकः । दिट्ठिआ कुसलेण अह्मे णिग्गदा [3]संघट्टदुग्गमादो । (ख)

[4]हीमाणहे पेक्खामि विअ णिम्मलणिरन्तरुद्धूदधोदतरवारिधारापरिप्फुरिद[5]चन्दकिरणुज्जलविडुरिल्लदंसणं मदलीलाकलिदकामवालविअ-

---

(क) सखि त्वरितमन्विष्याव: । अतिकातरा मे[6] प्रियसखी । उपस्थितानर्थेऽस्मिन्नवसरे सा[7] न धारयत्यात्मानम् । सखि मालति ननु भणामि [8]सखि मालति इति ।

(ख) दिष्ट्या कुशलेन वयं निर्गताः संघट्टदुर्गमात् ।

---

१३६. अत्र नन्वहम् । अव्ययत्वादनेकार्थत्वम् । तथा च । मद्वचनमपि न शृणोषीत्यर्थः ।

१३९–१४४. अत्र हीमाणहे इति हे मातरितिवच्चीचस्य हर्षाश्चर्ये । पश्यामीव परबलमित्यन्वयः । धौतो निशितः । तरवारिः खड्गः । विडुरिल्लं भीषणम् । कलितः स्वीकृतः ॥ कलिवली कामधेनू इति शाब्दिकाः । कामपालो हलायुध इत्यमरः ॥ आविद्धा वक्रं प्रेरिता । हेला क्रीडा । कलिन्दतनया यमुना । संनिभमिति यथा बलेन हलाकृष्टा यमुना

---

१ E. om. इत–°मत:. २ E. om. प्रवि–°सकः; N. om. प्रहृष्ट:; हृष्टः for प्रहृष्टः B.; B. om. कुसलेण; वअं for अह्मे E.; N. om. अह्मे; णिग्गदो N. ३ समर before संघट्ट A. E.; संकटादो for संघट्टदुग्गमादो N. ४ हीहीमाणहे C. हीमाणहि N.; पेक्खामो E.; अ for विअ N;. °रुद्धत A. C.; °रुद्धूअ E.; धोत B. धोद C. धौत A.; °रुद्धूअंनतुंगकरवालधारापडिहलिभचंद N.; तरवार E.; परिप्फुडिद B. पडिप्फलिद A. ५ B. om. चन्द, चंद for चन्द C. °ज्जलरमणीयभीसणदंसणं B. °ज्जलदुरिदंसणं C. °ज्जलंतर्भिबरिअदंसणं N.; कलछ for कलिद N.; कामपाल A.; विब्भट A. ६ नः for मे Com. ७ Com. om. सा. ८ Com. om. सखि.

डभु[1]अदण्डाविद्धहलहेलाविक्खुभिदुव्वेल्लिदतरंगकालिन्दतणआसोतसं-णिहं वि[2]अडविसङ्खलुप्पडिदणिद्दआमन्दमअरन्दव्वइअरक्खोहाविअल-पडि[3]जोहपरिवत्तणुग्गदसमत्थगअणङ्गणावआसओसरन्तकलअलं पाइक्कसमूहं । (क)

(क) हीमाणहे प्रेक्ष[4] इव निर्मलनिरन्तरोद्भूतधौतवरवारिधारापरिस्फुरितचन्द्रकिरणोज्ज्वल[5]रमणीयभीषणदर्शनं मदलीलाकलितकामपालविकटभुजदण्डाविद्धहलहेलाविक्षु[6]भितोद्वेल्लिततरंगकालिन्दतनयास्रोतःसंनिभं विकटविशृङ्खलोत्पतित[7]निर्दयामन्दमकरन्दव्यतिकरक्षोभविकलप्रतियोधपरिवर्तनोद्गतसमस्तगगनाङ्गनावकाशविसरत्[8]कलकलं पदातिसमूहम् ।

प्रतीपमागतां तथा परबलमपीति भावः । विस्तारेण वा बलस्य तादृग्यमुनासाम्यम् । विकटं विस्तीर्णं यथा तथा । विशृङ्खलः स्वच्छन्दः । आपतितः संमुखागतः । निर्दयो निष्करुणः । अमन्दः सत्वरः । व्यतिकरेण मिलनेन क्षोभः । परिवर्तनेन पलायनेन । उद्गत उत्थितः । विशङ्कलितो व्याप्तः ॥ दोर्दोषा भुजा भुज इति शब्दप्रकाशः ।

---

१ भुज A. C.; हेळाविक्खुभिदकालिंद B.; हेळाविब्भलिदुव्वेल्लुदोलिदकालिन्द A. हेळाविदुव्वेल्लिदतरंगकलिंद E. हेळावखंडणतरुव्वेल्लतरंगकलिंदकण्णआगत्तसंणिहं N. हेलाविरल्लिदुव्वेल्लिद C. संकुलं for संणिहं B. C. २ विकड B. विअट A. for विअड; N. om. विअड; °संखळपडिद E.; णिद्दअमन्द A.; °संखळोवइअणिद्दअमअरंद N.; वइ° A. C. E N.; °अक्खो° B. N.; क्खोभ A. च्छोभ N.; विअड A. विहळ N. for विअल. ३ °जोध A. B.; विहळप्पडिणितुत्तणुग्गअगणंगणोवआसणिसंटंतकळअळं N.; पडिवत्तणु° A. B.; ओसहंत C. विसहंत E. विअसत् A. for ओसरन्त; कळकलं A.; पारेक्कसमूहं C. E. पारक्कबलसमूहं A. ४ पद्मपाणिव Com.; प्रतिफलित for परिस्फुरित Com. ५ उज्ज्वलित Com. ६ विशूकित one Ms. Com. विच्छुरित another. ७ आपातित Com. ८ विशंकलित Com. for अवसरत्; पारकपवलसमूहं one Ms. Com. पारकबलं another.

सुमरामि अ भीसणभुअवज्जजज्जरिदपञ्जरोवसण्णसुहडहत्थावलुत्तविविहाउहोपमद्दसमोसारिअसेणिअणिअरं पाइक्करिक्कमग्गसंचारणिव्वत्तिदविसमसमरसाहसं णाहमाहवं । (क)

अहो गुणाणुराओ णरिन्दस्स जं दाणिं सोधसिहरंतरिदाबद्दिण्णपडिहारविणओवण्णासपडिसामिदविरोहसंकडो उवणिदमाहवमअरन्दमुहचन्दे वारं वारं संचारिअसिणिद्धलोअणो कलहंसआदो अहिअणं जाणिअ णिव्वत्तिदमहग्घगुरुअबहुमाणो पप्फुरन्त-

---

(क) स्मरामि च भीषणभुजवज्रजर्जरितपञ्जरोपसन्नसुभटहस्तावलुप्तविविधायुधोपमर्दसमवसारितसैनिकानिकरं पदातिरिक्तमार्गसंचारनिर्वर्तितविषमसमरसाहसं नाथमाधवम् ।

१४५–१४६. जर्जरितपञ्जरा अत एवापसृताः पलायिताः । ओअल्लोपसृतः । हस्तेभ्योवलुप्त आच्छेदितः । विकटो विषमः । अपसारः पलायनम् । रिक्तः शून्यः ।

---

१ अवि अ before सुमरामि A.; A. om. अ; सुमरामि असिभीसण C.; भुअवज्जपंजरजज्जरिअवज्जंतसुभटसत्थमुक्कविहा° N. पञ्जरापसीरदसुभड A. पंजरावसण [सु?] हड E. ओअल्लो for उवसण्ण Com. २ विविहाउहणिअडपादिदावेअरिउसेणाहदविअडापसारपाइक्कसुण्णमग्गसञ्चारणिअन्तिदविसम A. °पमद्दपादिदासेसरिपुजणं पाइक्कमग्गसंचार B. °पमद्दं ओसारिअसेणविअडापसारवइआरिक्कमग्गसंचारणिम्मिदववसाअसाहसं णाहं माहवं N.; सार before पाइक्क C. ३ णिम्मविद for निव्वत्तिद E.; णाअ C. E. ४ णरन्दस्स A. णरेंदस्स N.; B. om. जं; दाणीं E.; सोह A.; सिहरद्धिदावत्तिण्णपडिहार A. सिहरद्विदो पडिहार B. सिहरंतरावदिणपडिहार E. ५ विणवोवणास C. E.; विण्णवोवण्णास B.; °वण्णास A.; °समिद A. °सामिअ N.; सङ्कडोवणीदे माहव A.; समिदविरोधो संकडोवणीदमाहव B.; विरोहसंकओ उवणदमाहव E.; विरोहो सोमेकरसो उवणदमाहव N. ६ मुहारविंदे B. मुहचंदं C. मुहारविंदं पलोइअ वारं वारं वारिअणिअलोअकलअलो अहिअणं जाणिअ सबहुमाणं णिव्वत्तिअपसाओ फुरंत N.; सञ्चारिदासिणिद्धलोअणो A.; कळहंससआसादो C. ७ अभिजणं A. अहिजणं B.; आणिअ for जाणिअ C.; A. om. गुरुअ, गरुअ E.; फुरिद for पप्फुरन्त A. ८ भुजावज्र Com.; पंजरापसृतसुभट Com.; °युधनिवहपातिनाशेषरिपुसैन्यदत्तविकटत्वरितापसारपदातिशून्यमार्ग Com.

मच्छर[1]वेलक्खमसीमइलिदमुहे भूरिवसुणन्दणे महुरोवण्णासेण किं दाणिं तुह्माणं भु[2]अणाभोअभूसणेहिं महाणुभाएहिं णवदंसणगुणाहि[3]रामेहिं जामादुकेहिं अपरितोसो त्ति पडिबोधिअ गदो [4]अब्भन्तरं राआ। इमे वि माहवमअरन्दा आअच्छन्ति। अहं पि भअवदीए इ[5]मं वुत्तन्तं णिवेदेमि त्ति। (क) निष्क्रान्तः।

(क) अहो गुणानुरागो नरेन्द्रस्य यदिदानीं सौधशिखरान्तरितावतीर्णप्रतीहारविनयोपन्यासप्रतिशामितविरोधसंकटे उपनीतमाधवमकरन्दमुखचन्द्रे वारं वारं संचारितस्निग्धलोचनः कलहंसकादभिजनं ज्ञात्वा निर्वर्तितमहार्घगुरुबहुमानः प्रस्फुरन्मत्सरवैलक्ष्यमसीमलिनितमुखे भूरिवसुनन्दने म[6]धुरोपन्यासेन किमिदानीं युवयोर्भुवनाभोगभूषणाभ्यां महानुभावाभ्यां [7]नवदर्शनगुणाभिरामाभ्यां जामातृभ्यामपरितोष इति प्रतिबोध्य गतोभ्यन्तरं राजा। इ[8]मावपि माधवमकरन्दावागच्छतः। अहमपि भगवत्या इमं वृत्तान्तं निवेदयामीति।

१४८–१५४. सौधेति। प्रतीहारेण सौधाग्रादवतीर्य तयोः स्वरूपं ज्ञात्वा तदुपन्यासः कृत इत्यर्थः। अभिजनो वंशः। बहुमानः संमानः। तावानीय दृष्ट्वा तयोः सापराधयोरपि गुणानुरागादतिगौरवमेव राज्ञा कृतमिति भावः। न परितोष इति नः शिरश्चालने।

---

१ वेलक्खमइलमुहे B. वेलक्खमसीमलिणिअमुहे A. वेलक्खामरिसमुउलिअणिअमुहे N.; महुरवअणोवण्ण° A. २ भुआभोअभूस° B. भुवणाभोअ C.; भूसणमहाणु° C. E. N.; °हाएहिं N. °भावेहिं A.; अभिअण A. पउर B. E. for णव. ३ °भिरा° B. N. °णुरा° C.; A. has after अहिरामेहिं, णवचन्ददंसणरमणीएहिं; जामादुएहिं A. N.; परितोसो A. अपरितोस N. परिदोसो E.; °बोहिअ A.; गओ N. ४ गदोब्भंतरं B.; B. om. राआ; अ for वि N.; °च्छन्दि B.; अहं वि A. E. N. ५ एदं for इमं A. N.; णिवेदिस्सं त्ति C. णिवेदइस्सं त्ति E.; N. om. त्ति and has इति निष्क्रान्तः. ६ मधुरवचनोप° Com.; भुजाभोग for भुवनाभोग Com. ७ अभिजन for नव Com.; न परितोष for अपरितोष Com. ८ एतावपि Com.

ततः प्रविशतो माधवमकरन्दौ ।

मक० । अहो[1] प्रेयसः सर्वपुरुषातिशायि निर्व्याजमूर्जितं तेजः ।

तथा हि । दोर्निष्पेषविशीर्णसंचयदलत्कङ्कालमुन्मथ्नतः

प्राग्वीराननुपेत्य[2] तत्प्रहरणान्याच्छिद्य विक्रामतः ।

उद्वेल्लद्घन[3]रुण्डखण्डनिकराकीर्णस्य संख्योदधे-

र्द्वैधास्तम्भितपत्तिपङ्क्तिविकटः पन्थाः पुरस्तादभूत् ॥

माध० । [4]नन्वनुशयस्थानमेतत् । पश्य

अद्यैवेन्दुमयूखखण्डखचितं पीतं निशीथोत्सवे

यैर्लीलापरिरम्भदायिदयितागण्डूषशेषं मधु ।

संप्रत्येव भवद्भुजार्गलगुरुव्यापारभग्नास्थिभि-

र्गात्रैस्ते[5] कथयन्त्यसारविधुरान्प्रायेण संसारिणः ॥

१५८–१६२. प्रेयसः प्रीतस्य । मकरन्दस्येत्यर्थः । निर्व्याजं वास्तवम् । ऊर्जितं बलवत् । दोरित्यादि । प्रेयसो युद्धार्णवस्य पन्था अग्र एवमभूत् । द्वेधा पार्श्वद्वये स्तम्भितया पत्तिपङ्क्त्या भयंकरः । प्रेयसः कीदृशस्य । बाहुसंचूर्णनत्रुटितसंधिस्फुटत्कङ्कालं यथा तथा प्रथमं वीरा-नुन्मथ्नतोऽभिभवतः । इतरत्र तदीयायुधानि गृहीत्वा पराक्रमं कुर्वतः । इदं विशेषणद्वयं योग्यतया प्रेयस इत्यस्य । संख्योदधेः कीदृशस्य । स्फुरन्नरमुण्डखण्डसमूहव्याप्तस्य ।

१६४–१६७. अद्येत्यादि । ये रात्र्युत्सवे चन्द्रकिरणखण्डख-चितं क्रीडालिङ्गनदातृवनितागण्डूषावशिष्टं मधु पीतमद्यैव ते संप्रत्येव लोकान्बाहुल्येन तुच्छविकलाङ्गशरीरैः कथयन्ति । कीदृशैः । त्वदीयभु-

---

१ मे after अहो B. २ अनुनत्य B. अनुगम्य N. and अपरत्र C. for अनुगम्य. ३ उद्वेल्लन्नारिरुण्ड A.; तुंड C. and मुंड N. for रुण्ड; उदधे for उदधेः N. ४ वयस्य नन्वनु° N.; A. om. पश्य. ५ तैः for ते B.; विकरान् for विधुरान् B.

स्मर्तव्यं तु सौजन्यमस्य नरपतेर्[1]यदपराधिनोरप्यनपराद्धयोरिव नौ[2] सांप्रतं चेष्टितवान् । तदेहि मालतीसमक्षमधुना मदयन्तिकाहरणवृत्तान्तं विस्तरतः [3]कथ्यमानं श्रोतुमिच्छामि । तथा च

कथयति त्वयि सस्मितमालती[4]वलितलोलकटाक्षपराहतम् ।
वदनपङ्कज[5]मुल्लसितत्रपास्तिमितदृष्टि सखी नमयिष्यति ॥

[6]इति परिक्रामतः । अयमसावुद्यानवाटः । प्रविशतः ।

माध० । कथं शून्य[7] एव दीर्घिकाप्रदेशः ।

मक० । वयस्य नूनमस्मद्व्यतिकरोद्वेगपर्याकुलत्वादितस्ततः परिभ्रमन्त्य [9]आत्मनोऽत्रैवोद्यानगहने विनोदयन्त्यो भविष्यन्ति । तदेहि प्र[10]विशावः । उभौ परिक्रामतः ।

जार्गलप्रबलताडनात्त्रुटितास्थिभिः । तथा च । क्षणदृष्टनष्टमुग्धचेष्टिताः प्राक्तनकर्मायत्ता जना इति भावः ।

१७१–१७२. कथयतीत्यादि । त्वयि कथयति सति वदनपद्मं सखी मालत्या एव मदयन्तिका नमयिष्यति । कीदृशम् । सहासमालतीचञ्चलपक्ष्मकटाक्षैः पराहतम् । उद्गतलज्जानिश्चलदृष्टि च । मदयन्तिकानिमित्तयुद्धश्रवणेन मालत्या हासः ।

---

१ पर for यद् B.; भपराद्धयोरप्य° N.; अनपराधिनोरिव C. अनपराधयोरिव A. २ नौ कृतप्रसादमविष्ठितवान् A. नौ कृतोपसदनं चेष्टितवान् N.; मदयन्तिकायाः कलहंसेन रणवृत्तान्तं विस्तरतः A. ३ कथ्यमानमनुभवामः N.; अन्यच्च for तथा च A., N. om. तथा च. ४ चलित for वलित C. E. ५ °मुकुलितभ्रु वलितस्मित N. ६ N. om. इति परिक्रामतः, परिक्रम्य for इति–मतः B. E.; C. om. अय–वाटः; प्रवेशं नाटयतः N.; माधवमकरन्दौ after प्रविशतः A. ७ शून्या एव प्रदेशाः A. शून्या इदानीं प्रदेशाः C.; प्रवेशः for प्रदेशः B.; N. om. this speech and the following. ८ व्यतिरेक for व्यतिकर A.; एव after इतस्ततः B. ९ आत्मानं for आत्मनः A. C. E.; विनोदयिष्यति for विनोदयन्त्यो भविष्यन्ति A.; अयमसावुद्यानवाटः after भविष्यन्ति C. १० प्रविशावः for प्रविशावः C. E.; B. om. उभौ परिक्रामतः, उभौ प्रविशतः C.

[१]लवङ्गिकामदयन्तिके । सहि मालदि । सहसावलोक्य । दिट्ठिआ पुणो वि एदे[२] अणाहदा महाणुभाआ दीसन्ति । (क)

माधवमकरन्दौ । [३]भवत्यौ क्व मालती ।

उभे । [४]कुदो मालदी पदसद्देण अह्मे विप्पलद्धाओ मन्दभाइणीओ । (ख)

माध० । [५]भवत्यौ कथं कथमपि सहसैव विध्वंसते नो हृदय[६]मतः स्पष्टमभिधीयताम् ।

मम हि कुवलयाक्षीं प्रत्यनिष्टैकबुद्धे-
[७]द्रवति हृदयमन्तर्भ्रश्यतीवान्तरात्मा ।
[८]स्फुरति च खलु चक्षुर्वाममेतच्च कष्टं
[९]वचनमिह भवत्योः सर्वथा हा हतोस्मि ॥

(क) सखि मालति । दिष्ट्या पुनरप्येतावनाहतौ महानुभावौ दृश्येते ।

(ख) कुतो मालती पदशब्देनावां विप्रलब्धे मन्दभागिन्यौ ।

१८१–१८८. अत्रानेनावाभ्यां समर्थिता मालती । अधुना तु युवयोरवलोकनेनावां वञ्चिते इत्यर्थः । कथमिति त्रासे । कथमप्यनिर्वचनीयेन रूपेण ध्वंसते । स्थितिं न बध्नाति । ममेत्यादि । यतोयं ममान्तरात्मात्यर्थमनुगतोत्कम्प एवास्ति । कीदृशस्य । पद्माक्षीं प्रत्यनिष्टैकमतेः । मम.वामं चक्षुः

१ लव । सहि मदअन्तिए मालदि A.; सहि मालदि twice, N. २ N. om. एदे; A. B. N. om. अणाहदा. ३ B. om. भवत्यौ; क्व सा मालती A. कासौ मालती N. ४ B. om. कुदो; अम्मे for अह्मे B. ५ A. om. भवत्यौ; E. N. om. one कथं; कथं । त्रासे । कथमपि C.; °त्यौ कथमिव सहसैव ध्वंसते N.; A. om. सहसैव; मे for नो A. N. ६ N. om. अतः A. om. स्पष्टम्, स्फुटं for स्पष्टं N.; समभिधीयताम् A. ७ बुद्धेरविरतमनुबद्धोत्कंप एवांतरात्मा N.; त्रस्यति for भ्रश्यति A. ८ स्फुरति हि खलु चक्षुः स्पष्टमेतच्च वामं A. ९ वचनमपि भवत्योः N.

मद० । तीए इदो णिग्गदे महाणुभावे अवलोइदं बुद्धरक्खिदं अ [2]भअवदीसआसं विसज्जिअ अप्पमादणिमित्तं विण्णवेहि अज्ज-उत्तं त्ति लवङ्गिआ अणुप्पेसिदा । तदो उत्तम्ममाणा [3]एदाए मग्गं [4]अवलोइदुं अग्गदो पसरिदा । पच्छादो अह्मे ण तं पेक्खामो । तदो [5]अह्मेहिं जाव विडवन्तराइं विचिणिदाइं ताव तुह्मे दिट्ठात्ति । (क)

माध० । हा प्रिये मालति

(क) [6]तयेतो निर्गते महानुभावेवलोकितां बुद्धरक्षितां च भगवतीसकाशं विसृज्याप्रमादनिमित्तं विज्ञापयार्यपुत्रमिति लवङ्गिको[7]नुप्रेषिता । तत उत्ताम्यमानैतस्या[8] मार्गमवलोकयितुमग्रेतः प्रसृता । पश्चादावां न तां प्रेक्षावहे । तत आवाभ्यां यावद्विटपान्तराणि विचितानि तावद्युवां दृष्टाविति ।

स्फुरति च । इह भवत्योर्वचनम् । कष्टमेतद्दुःखदायि । हा कष्टे । सर्वथा हतोस्मि । अन्तरात्मनोशकुनस्य भवद्वचनस्य चैकमत्यादिति भावः ।

१९२–२०२. अत्र पश्चादावां प्रसृते इत्यन्वयः । विचितान्यन्विष्टानि । किमपीत्यादि । मङ्गलेभ्योन्यदनिष्टं किमप्यनिर्वचनीयं यद्यस्मात्परिहासादहं शङ्के स परिहासो विरमतु । परिहासेन तव निह्नवेनिष्टं शङ्कितस्तं मुञ्चेति भावः । हे चण्डि कोपने समुत्सुकोस्मि यतः । तथा च

---

१ तदा क्खु इदो A. ताए क्खु इदो N.; B. om. ताए; °णुभाए B. °णुहावे N.; अवलोइदा बुद्धरक्खिदा अ उभे भअवदी C. E. अवलोइदादुदिआ बुद्धरक्खिदा भअवदी B.; °रक्खिअं N. २ भअवदीए सआसं पेसिअ अप° A. N.; अप्पमत्तणिमित्तं A. ३ एताए A. ताए N. for एदाए. ४ आलोअइदुं N.; परिट्ठिदा A. ओसारिआ N. for पसरिदा; पच्छदे अहं ण अ तं पेक्खामि A.; पच्चादो अहं तं ण पेक्खामि N.; ण अ तं E. ५ अह्मेहिं मग्गिदाइं एत्थ विडवंतराइं जाव तुह्मेहिं ण दिट्ठत्ति N.; एत्थ after अह्मेहिं A.; °न्तराणि A.; विसुणिदाणि A. विचिणदाइं C.; दाव for ताव B.; तुह्मे इति B. दिट्ठंति C. दिट्ठेत्ति A. ६ तदा खल्वितो Com.; बुद्धरक्षितामवलोकिता चोभे भग° Com. ७ लवङ्गिकामनुप्रेष्य Com. ८ तस्याः Com.; आवाभ्यामिह विहरन्तीभ्यां यावद्वि° Com.

किमपि किमपि शङ्के मङ्कुलेभ्यो यदन्य
द्विरमतु परिहासश्चण्डि पर्युत्सुकोस्मि ।
कलयसि कलितोहं बल्लभे देहि वाचं
भ्रमति हृदयमन्तर्विह्वलं निर्दयासि ॥

उभे । हा पिअसहि कहिं सि । (क)

मक० । [३]वयस्य किमित्यविज्ञाय वैक्लव्यमवलम्ब्यते ।

माध० । सखे त्वमपि किं न जानासि माधवस्नेहदुःखितायास्तस्याः कातर्यचेष्टितानि ।

मक० । अस्त्येतत् । किं तु भगवतीपादमूलगमनमप्याशङ्क्यते । तदेहि [५]तत्र तावत्पश्यावः ।

उभे० । [६]एवं पि संभावीअदि । (ख)

माध० । एवं [७]नामास्तु ।

(क) हा प्रियसखि कासि ।
(ख) एवमपि संभाव्यते ।

कोपेनापि निह्नवं माकुर्वित्याशयः । अथ मामनेन प्रकारेण कलयसि जिज्ञाससे तर्हि कलितो ज्ञातोहम् । हे बल्लभे वाचं देहि । त्वमेव मे बल्लभा । अतो वदेत्यर्थः । विह्वलमधीरं सन्मम चित्तमन्तर्भ्रमति स्थितिं न लभते । अत एव सोपालम्भमाह निष्करुणासि । वैक्लव्यं दुःखित्वम् । कातर्यं कातरत्वं तेन चेष्टितानि प्राणत्यागादीनि ।

१ कथय विकल्पितोहं N. २ N. om. this speech; गदा after कहिं A. ३ B. N. om. वयस्य; अवज्ञाय for अविज्ञाय B. N.; आलंब्यते for अवलम्ब्यते C. E. ४ दुःस्थितायाः for दुःखितायाः N.; तन्व्याः for तस्याः B. ५ B. om. तत्र; गच्छावः for पश्यावः N. ६ एदं वि संभाविअदि N. ७ N. om. नाम; भवतु for अस्तु A. N.; सर्वे परिक्रामन्ति A. परिक्रामति N. after अस्तु. ८ एतत् for एवं Com.

मक[1]० । विचिन्त्य स्वगतम् ।

याता भवेद्भगवतीभवनं[2] सखी नो
जीवन्त्युपैष्यति न वेत्युपशङ्कितास्मि[3] ।
प्रायेण बान्धवसुहृत्प्रियसंगमादि २१०
सौदामिनीस्फुरणचञ्चलमेव सौख्यम् ॥

इति निष्क्रान्ताः सर्वे ।

॥ मालत्यपहारो[4] नामाष्टमोऽङ्कः ॥

२०८–२११. यातेत्यादि । अस्माकं सखी भगवतीगृहं यदि गता भवेत्तदा जीवन्ती समागमिष्यति । न वा गता तदा नागमिष्यतीत्याशङ्कितास्मि । तत्र हेतुः । बन्धुजनमित्रप्रियाणां संगम आदौ यस्य तत्सौख्यं बाहुल्येन विद्युत्स्फुरणचञ्चलमेव भवति । तदिह भगवतीपादमूलेति साधारणपदोल्लेखेन मालत्या भविष्यत्सौदामिनीपार्श्वगमनस्य सूचनेन नवमाङ्कावतारोऽपि सूचितः । अत एवाङ्कावतारोऽयम् । यदाह ।

समाप्यमान एकस्मिन्नङ्केऽन्यस्य च सूचनम् ।
समासतो हि नाट्यज्ञैरङ्कावतार उच्यते ॥

सुहृन्मित्रम् । प्रियं प्रीतिविषयं मनोज्ञं वस्तु ।

सूते स्म यं रत्नधरेतिमान्यो मान्यातिमान्या दमयन्तिकापि ।
जगद्धरं तत्कृतटिप्पणेऽङ्को गतोऽष्टमोऽयं रसरम्यरूपः ॥

॥ इत्यष्टमोऽङ्कः ॥

---

१ B. om. मक० N. om. विचिन्त्य; आत्मगतं for स्वगतं A., C. om. स्वगतम्. २ सदनं for भवनं N. ३ जीवन्त्यथैष्यति न चेत्यभिशङ्कितास्मि A. जीवन्त्यथैष्यति न वेत्यभिशंसितास्मि N. ४ इति मालतीमाधवे A. मालतीमाधवे C. for माल–नाम; N. E. om. माल–नाम.

॥ नवमोऽङ्कः ॥

ततः प्रविशति सौदामिनी ।

सौदा० । [1]एषास्मि सौदामिनी भगवतः श्रीपर्वतादुत्पत्य पद्मावतीमुपाश्रिता । मालतीवि[2]रहिणः संस्तुतप्रदेशदर्शनासहिष्णोः संस्त्यायं परित्यज्य सह सुहृद्वर्गेण [3]बृहद्द्रोणीशैलकान्तारप्रदेशमधितिष्ठतो माधवस्याधुनान्तिकं प्रयामि । भोस्तथाहमुत्पतिता यथा सक[4]ल एष गिरिनगरग्रामसरिदरण्यव्यतिकरश्चक्षुषा परिक्षिप्यते । पश्चाद्विलोक्य । [5]साधु साधु ।

पद्मावती[6]विमलवारिविशालसिन्धु-
पारासरित्परिकरच्छलतो बिभर्ति ।

१–११. अधुना पूर्वसूचितसौदामिन्या मालतीजीवननिवेदनेन माधवप्रत्युज्जीवनाय प्रवेशमाह । तत इति । नानासिद्धिस्थानत्वेन देवतात्मकतया भगवत्पदं श्रीपर्वते । संस्तुतः परिचितः । द्रोणी नद्या मध्यम् । तथेत्यनेनोत्पतनस्य दूरत्वमुक्तम् । व्यतिकरः समूहः । परिक्षिप्यत इव नेत्रमण्डले प्रविष्टीक्रियत इव । पद्मावतीत्यादि । पद्मावती पुरी गगनमिव धारयति । विमलवारिरच्छजला महती सिन्धुश्च पारा च सरितौ

---

१ B. C. om. एषास्मि सौदामिनी; उत्प्लुत्य for उत्पत्य A. B. C.; उपसृत्य A. B. C. E. उपाश्रित्य N. for उपाश्रिता, the text उपाश्रिता with G.; तत्र before मालती N. २ विरहिणो माधवस्य संस्तु° N. संस्तुतादर्शना° B.; स्थानं A. संस्त्यानं B. संस्थायं C. for संस्त्यायं. ३ ब्रह्मद्रोण for बृहद्द्रोणी N. कान्तारप्रवेशं परिभ्रमतो माधवस्याधुनान्तिकमुपयामीति A. कांतारप्रवेशी माधवस्याधुना तदंतिकमनुप्रयामीति C. E.; B. with C. E. except that it omits अधुना; कांतारमुपसृत्याधुना तदंतिकं प्रयामि N., the text with G. ४ सकलगिरिनगर B. ५ N. om. साधु साधु. ६ विपुल for विमल E. सिंधुर्वीसरित् N.; परिसर for परिकर C.

उत्तुङ्गसौधसुरमन्दिरगोपुराट्ट-
संघट्टपाटितविमुक्तमिवान्तरिक्षम् ॥

अपि च । सैषा विभाति लवणा ललितोर्मिपङ्क्ति-
रभ्रागमे जनपदप्रमदाय यस्याः ।
गोगर्भिणीप्रियनवोलपमालभारि-
सेव्योपकण्ठविपिनावलयो भवन्ति ॥ ८

अन्यतोवलोक्य । अयमसौ भगवत्याः सिन्धोर्दारितरसातलस्तटप्रपातः ।

यत्रत्य एष तुमुलो ध्वनिरम्बुगर्भ-

तयोः परिकरो वेष्टनं तद्व्याजात् । उच्छ्रितप्रासाददेवकुलपुरद्वाराट्टालिकानां घर्षणेनादौ विदीर्णं ततो विशेषेणोभयतस्त्यक्तम् । उत्तुङ्गसौधादय आकाशं पाटयित्वा निर्गताः । अथ नदीच्छलेन तदाकाशं पतितमिवेत्यर्थः ।

१२–१७. सैषेत्यादि । सैषा लवणा नदीभेदो विभाति । मनोज्ञकल्लोलावलिः । वर्षासु यस्या गवां गर्भिणीनां प्रिया नवा योलपमाला तृणविशेषराजिस्तां बिभ्रति ॥ ताच्छील्ये णिनिः ॥ अत एव सेव्याः परिशीलकसुखदाः समीपवनपङ्क्तयो लोकहर्षाय भवन्तीति । सैषेत्यनेन पूर्वदृष्टत्वमुक्तम् । अपो बिभर्तीत्यब्भ्रम् । अभ्रति गच्छति वेत्यभ्रम् । अतो बकारयुक्तं तद् । अयुक्तं चेदं पदमित्यवधेयम् ॥ चतुष्पादो गर्भिण्येति समासः । उलपो नाम तृणान्तर इति मेदिनीकारः ॥ मालभारीत्यत्रेष्टकेषीकामालानां चिततूलभारिष्विति ह्रस्वः ॥ रसातलतटः पृथ्वीतटः । तलशब्दः स्वरूपे । प्रपातोतटम् । यद्वा । तटे प्रपातोतिशयितं पतनम् ।

१८–२६. यत्रत्येत्यादि । यदीय एष महाध्वनिः सिन्धोः पर्यन्तगिरिकुञ्जेषु वर्धमान[नो?]विघ्नेशगलध्वनिसाम्यं गच्छति । तस्य गजास्यत्वेन

१ उत्तुंगसौधपुरगोपुरमंदिराट्टसंघट्ट N. २ अन्तरीक्षं A. ३ वरदा for लवणा N. ४ विभान्ति for भवन्ति A. C. E. N. ५ रसातलतटः C. तलप्रायस्तटः A. ६ तुमुलध्वनि B. N.

गम्भीरनूतनघनस्तनितप्रचण्डः ।।
पर्यन्तभूधरनिकुञ्जविजृम्भमाणो
हेरम्बकण्ठरसितप्रतिमानमेति ।

एताश्च चन्दनाश्वकर्णकेसरपाटलाप्रायतरुगहनाः परिणतमालूरसुरभयोरण्यगिरिभूमयः स्मारयन्ति खलु तरुणकदम्बजम्बूवनावनद्धान्धकारगुरुनिकुञ्जगम्भीरगह्वरोद्गारगोदावरीमुखरितस्निग्धविशालमेखलाभुवो दक्षिणारण्यभूधरान् । अयं च मधुमतीसिन्धुसंभेदपावनो भगवान्भवानीपतिरपौरुषेयप्रतिष्ठः सुवर्णबिन्दुरित्याख्यायते । प्रणम्य ।

गभीरध्वनित्वात् । कीदृशः । जलपूर्णगभीरनवमेघध्वानिवत्प्रचण्डः ॥ तुमुलो महति स्मृत इति विश्वः ॥ चन्दनं रक्तचन्दनं देवदारुर्वा। उपचाराद् । अन्यथास्य मलयजत्वविरोधात् । अश्वकर्णो वृक्षभेदः । प्रायःशब्दः प्रभृत्यर्थो बाहुल्यार्थो वा । परिणतं पक्वम् । मालूरं बिल्वफलम् । तरुणो वृक्षभेदः । अवनद्धो धृतः । उद्गारः प्रतिशब्दः । गोदावरी नदीभेदः । मेखला नितम्बः । भूधरान्मलयादीन् । सौदामिन्या दक्षिणदेशवासित्वेन स्मरणम् । मधुमतीसिन्ध्वोर्नद्योः संभेदः संगमस्तस्य पावनः पावित्र्यहेतुः । स्वयंभूसंनिधानस्य महातीर्थहेतुत्वात् । अपरिमिताज्ञाता पुरुषकृता प्रतिष्ठा स्थितिर्यस्य । एतेन स्वयंभूत्वमुक्तम् । आख्यानं प्रसिद्धिः ।

---

१ निकुञ्जविजृम्भमाणहेरम्ब A.; निकुंजविजृंभणेषु हेरंब B. C. E. २ रसित for रासित N. ३ एताश्चन्दनाश्वकर्णसरळपाटलप्राय A. N. एताश्च चंदनाश्वकर्णसरळपाटळप्राय E.; परिणाममाळूरसु° N. ४ N. om. गिरि; स्मरयंति B. E.; N. B. om. खलु; तांस्तरुण N.; अनवद्ध for अवनद्ध N. ५ अंधकारि B. C.; गुरुगिरिनिकुंजगुंजद्गंभीरगह्वरोद्गारघोरघोषणगोदावरीरवमुखरितविशाल N. निकुंजगुंजगंभीरगह्वरोद्गार B. गह्वरोदारगोदा C.; गभीर A.; गोदावरीरवमुख° A.; A. om. स्निग्ध. ६ संभेदे पार्वतीभवानीपतिर° C. ७ प्रतिष्ठस्वर्णबिंदु N.; E. om. इति.

जय देव भुवनभावन जय भगवन्[1]निखिलनिगमनिधे ।
जय रुचिरचन्द्रशेखर जय मदनान्तक ज[2]याद्दिगुरो ॥

गमनमभिनीय । अयमभिनवमेघश्यामलोत्तुङ्गसानु-
र्मदमुखरम[3]यूरीमुक्तसंसक्तकेकः ।
शकुनिशबलनीडा[4]नोकहस्निग्धवर्ष्मा
वितरति बृहदश्मा पर्वतः प्रीतिमक्ष्णोः ॥

२८—२९. अदृष्टार्थं शिवनुतिमाह । जयेति । भुवनानां कार्यजातानां भावन उत्पादक । दीव्यतीति देव द्युतियुक्त । भगवन् भगं तत्त्वज्ञानं तद्युक्त । तथा च रागद्वेषादिरहित इत्यर्थः । स्तुतिफलमाह । अखिलवरान्भुक्तिमुक्त्या-दीन्ददाति तादृशो निगमो वेदस्तन्निधे तत्कर्तः । यद्वा । निगम आवि-र्भावस्तदाश्रय । तथा च । वेदद्वाराविर्भावेन जगदुपकारक इत्यर्थः । मनो-ज्ञचन्द्रभूषण । तथा च वेदकारणाय कृतशरीरपरिग्रह इत्यर्थः । तर्हि पौरुषेयत्वाद्वेदाप्रामाण्यं स्यादित्यत आह । मदनेति । सर्वदोषनिधेः कामस्य नाशन निर्दोष । अत एव भगवन् । तथा च नोक्तदोषः । आदौ सर्गा-दौ गुरो । ब्रह्मादीनामित्यर्थात् । तथा च वेदस्य भगवत्कर्तृत्वमायाति ।

३०—३३. अयमित्यादि । अयं गिरिर्नेत्रयोर्हर्षं ददाति । कीदृशः । नवीनमेघश्यामतुङ्गसानुः । हर्षप्रीतमयूरस्त्रीकृता संसक्ता मिलिता केका मयूरवाणी यत्र सः । शकुनिभिः पक्षिभिः शबलाः कर्बुरा ये नीडानोक-हाः पक्षिवासवृक्षास्तैः स्निग्धं वर्ष्म शरीरं यस्य सः । तरूणां पक्षिव्याप्तत्वे-नाशेषपक्षिणो नीड एव वसन्तीति भावः । बृहदश्मा विपुलशिलः ॥ केका वाणी मयूरस्येत्यमरः । शबलैताश्च कर्बुर इति च । कुलायो नीडमस्त्रिया-मिति च । अनोकहः कुटः शाल इति च । शरीरं वर्ष्म विग्रह इति च ॥

१ निखिलवाङ्निगम B.; अखिल for निखिल A. C.; वेद for निगम C. २ जयजयादिगुरो E. जय जगदादिगुरो A. ३ चकोरी for मयूरी C. ४ नीडानो-कह B.

[1]अपि च । दधति कुहरभाजामत्र भल्लूकयूना-
मनुरसितगुरूणि स्त्यानमम्बूकृतानि ।
शिशिरकटुकषायः स्त्यायते सल्लकीना-[2]
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः[3] ॥

[4]ऊर्ध्वमवलोक्य । कथं मध्याह्नः । तथाह्यत्र संप्रति
[5]काश्मर्याः कृतमालमुद्गतदलं कोयष्टिकष्टीकते

३४–३७. दधतीत्यादि । अत्र गिरौ गुहावासिनां तरुणभल्लूकानामम्बूकृतानि सश्लेष्मकथूत्कारध्वनयोनुरसितेन प्रतिरवेण स्थूलानि स्त्यानं घनतां दधति । शल्लकीनां वृक्षभेदानां गजखण्डितविस्तीर्णसंधिपर्वनिर्गतगन्धः स्त्यायते निबिडीभवति । निष्यन्दः स्पर्शाच्छिशिरः शीतो रसतः कटुः कषायः । स्त्यानमिति भावप्रधानो निर्देशः ॥ अम्बूकृतं सनिष्ठीवमित्यमरः ॥

३९–४२. काश्मर्या इत्यादि । गम्भार्याः सकाशात्कृतमालमारग्वधवृक्षमुद्गतपत्रम् । घनच्छायामिति यावत् । कोयष्टिकः कोवा इति ख्यातः पक्षी टीकते गच्छति । गम्भार्या अल्पपत्रत्वात् । यद्वा । कृता संपन्ना माला वृक्षपङ्क्तिर्यत्र तं प्रदेशं गच्छतीत्यर्थः । तीरस्थोश्मन्तकस्तीराश्मन्तकः । शाकपार्थिवादिः । अश्मन्तकोल्लकोला इति ख्यात आम्रातको वा वीरणं वा । तस्य शिम्बिः शिखा लताभेदो वा तस्याश्चुम्बिनं चुम्बनकरणं मुखं यासां तादृशाः पूर्णिका पक्षजातयोपः पानीयानि धावन्ति गच्छन्ति । ग्रीष्मतप्तास्ता नीडं विहाय जलमनुगच्छन्तीत्यर्थः । यद्वा । तीराश्मन्तकं तीरवर्तिवीरणमपःपूर्णिका कुम्भीरमक्षिका धावन्ति व्रजन्ति । ग्रीष्मतप्तजलं त्यक्त्वा तीरवीरणादिच्छायामनुसरन्तीत्यर्थः । यद्वा ।

---

[1] C. N. om. अपि च; °भाजा मत्तभल्लूक A. E. [2] शल्ल° A. E. [3] विशीर्ण for विकीर्ण N. [4] N. om. ऊर्ध्वमवलोक्य; अये before कथं N.; N. om. अत्र; E. om. संप्रति. [5] काश्मीर्याः B. C. काश्मर्यान् N.

[1]नीराश्मन्तकशिम्बिचुम्बितमुखा धावन्त्यपः पूर्णिकाः ।
दात्यूहैस्ति[2]निशस्य कोटरवति स्कन्धे निलीय स्थितं
वीरुन्नीडकपोतकूजितमनुक्रन्दन्त्यधः [3]कुक्कुटाः ।
[4]भवतु माधवमकरन्दावन्विष्य यथाप्रस्तुतं साधयामि ।

इति निष्क्रान्ता । विष्क[5]म्भकः ।

अश्मन्तकं शिंशिपावृक्षस्तस्य शिम्बिरग्रमित्यर्थः । तिनिशस्यातिमुक्ताख्यवृक्षस्य च्छिद्रवति स्कन्धे प्रकाण्डे च्छायासेवनार्थं दात्यूहैः पक्षिभेदैः कोण्डाडाल्क इति ख्यातैर्निलीय स्थितम् । वीरुल्लता नीडं वासो यस्य कपोतस्य पाण्डुनामपक्षिणः शब्दितं लक्षीकृत्य कुक्कुभा अधस्तरूणां रुदन्ति । ग्रीष्मतापात्कपोता निजनीडवासिनः कुक्कुभाश्च तृषार्ता रुदन्तीत्यर्थः । जातिस्वभाव एवासौ । यद्वा । कुक्कुभाः क्रन्दन्त्याल्हादयन्ति । अहो कपोतरुतमित्यभिलषन्तीत्यर्थः ॥ गम्भारी सर्वतोभद्रा काश्मरी मधुपर्णिकेत्यमरः । आरग्वधे राजवृक्षशम्याकचतुरङ्गुलाः । आरेवतव्याधिघातकृतमालसुवर्णका इति च । कोयष्टिकष्टिट्टिभक इत्यपि । आम्रातकेम्लिकायामश्मन्तको वीरणेपि च । शिंशिपाश्मन्तकं प्राहुरिति धरणिः । शिम्बिः शिखा लताभेद इति विश्वः । नासाच्छिन्न्यां तु पूर्णिकेति च ॥ पूर्णिका पल्लीति ख्याता पतविङ्गेति ख्याता वा ॥ अपःपूर्णिका कुम्भीरमक्षिकेत्यपि धरणिः । दात्यूहः कालकण्टक इत्यमरः । तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तक इति च । अस्त्री प्रकाण्डः स्कन्धः स्यादिति च । तित्तिरिः कुक्कुभो लाव इति च ॥ मयूरप्रमाणोयं पक्षी । तदित्युपसंहारे । विष्कम्भक इति । शुद्धविष्कम्भकोयम् । यदाह ।

1 नीराश्मन्तकशिम्बि C.; चुंबित C. E.; चुंबन B.; अथः for अपः B.; नीराश्मान्तरकच्छाविचुंबनारा भाव° N. 2 निलिशस्य E. निमिशस्य N. 3 कुक्कुभाः E. 4 यावत् for भवतु B.; सान्त्वयामि A. संपादयामि C. for साधयामि 5 शुद्धविष्कंभः N.

ततः प्रविशतो माधवमकरन्दौ[1] ।

मक० । सकरुणं निःश्वस्य[2] ।

न यत्र प्रत्याशामनुपतति नो वा रहयति[3]
प्रतिक्षिप्तं[4] चेतः प्रविशति च मोहान्धतमसम् ।
अकिंचित्कुर्वाणाः पशव इव तस्यां[5] वयमहो
विधातुर्वामत्वाद्विपदि परिवर्तामह इमे ॥

माध० । हा प्रिये मालति क्वासि[6] । कथमविज्ञाततत्त्वमद्भुतं झटिति पर्यवसितासि । नन्वकरुणे प्रसीद संभावय माम् ।

प्रियमाधवे किमसि मय्यवत्सला
ननु सोऽहमेव यमनन्दयत्पुरा ।

शुद्धो मध्यमपात्रेण संस्कृतोक्त्या निबध्यते ॥ इति ।

४७–५०. न यत्रेत्यादि । यैरस्माभिस्तादृशं राजसैन्यं जितमिमे वयं स्रष्टुर्वाम्याद्विपत्तौ पुनःपुनर्वर्तामहे । यत्र विपत्तौ चित्तम् ॥ कर्तृ ॥ प्रत्याशां नानुगच्छति न वा त्यजति । अन्वयव्यतिरेकानिश्चयात् । तथा च सा जीवति न वेति न ज्ञायत इति भावः ॥ रहस्त्यागे स्वार्थे णिच् ॥ प्रतिक्षिप्तं पुनःपुनः प्रेरितं सच्चेतः पुनर्मोहरूपगाढान्धकारं प्रविशति । किं कर्तव्यमिति न जानीम इति भावः । अत एव काम्यपर्थक्रियाम-कुर्वाणाः पशव इव ।

५१–५७. यत एवाविज्ञातं तत्त्वमत एवाश्चर्यम् । पर्यवसिता समाप्तिं गता । संभावयाश्वासय । प्रियेत्यादि । हे प्रियमाधवे मयि किमस्निग्धासि । माधवान्यशङ्कामपनयति । ननु हे अहमेव स यं पूर्वं त्वम्

---

१ प्रविशति माधवो मकरन्दश्च A. N. २ निःश्वसन् for सकरुणं निःश्वस्य B. E. om. निःश्वस्य. ३ नो वाहयति च E. ४ प्रतिक्षिप्तं B. E.; तु for च E. N. ५ तस्या A. ६ क्वासि प्रयच्छ मे प्रतिवचनं कथमवि० B.; A. om. अद्भुतं; क्षिप्रे B. न N. after अद्भुतं; उपसृता B. अपक्रान्ता N. for पर्यवसिता.

स्वयमागृहीतकमनीयकङ्कण-[1]
स्तव मूर्तिमानिव महोत्सवः करः ॥

वयस्य मकरन्द दुर्लभः पुनर्जगति तावतः[2] स्नेहस्य संभवः।

सरसकुसुमक्षामैरङ्गैरनङ्गमहाज्वर-[3]
श्चिरमविरतोन्माथी सोढः प्रतिक्षणदारुणः।
तृणमिव ततः प्राणान्मोक्तुं मनो विधृतं तया
किमपरमतो[4] निर्व्यूढं यत्करार्पणसाहसम् ॥

आपि च। मयि विगलितप्रत्याशत्वाद्विवाहविधेः पुरा

करः स्वयमनन्दयत्। तथा च माधवान्यशङ्कामपि मा कृथा इति भावः। आगृहीतमीषद्गृहीतं सात्त्विककम्पादिना चपलतया मनोज्ञसूत्रं येन सः। यद्वा। आगृहीतमभिगृहीतं करसमर्पणात्। अत एव मूर्तिमान्कृतदेहपरिग्रहो महोत्सव इव। सोपि गृहीतमण्डनो नन्दकश्च भवति। उद्गृहीतमिति पाठ उच्चैर्गृहीतमित्यर्थः॥ कङ्कणं मण्डने सूत्र इति विश्वः॥ तादृशस्येत्यनुस्मृतिः करग्रहणमहोत्सवानुध्यानस्वास्थ्यात्तदभ्यासाद्वा। यदाह।

स्वास्थ्याभ्याससमुत्था श्रुतिदर्शनसंभवानुस्मृतिः॥ इति।

५८–६१. सरसेत्यादि। तया काममहाज्वरोवस्थादशको बहुकालं सोढः। अनङ्ग एव महाज्वर इति वा। नवपुष्पमृदुभिरङ्गैः। कीदृशः। संततमर्मव्यथाकारी। अत एव प्रतिमुहूर्तमुन्मूलनोद्यतः। एतेन दुःसहत्वमुक्तम्। ततः प्राणांस्त्यक्तुं तया मनो विशेषेण निरपेक्षतया धृतम्। अत एव तृणमिव। सारमाह। इतः करार्पणसाहसादपरं किमस्ति। अपि तु न किमपीत्यर्थः। यत्करस्यार्पणं स्वयमेव दानं तदेव साहसं निर्व्यूढं निःशेषेण दोषमपहाय वृत्तम्। कुलकन्यकानां तन्निषेधात्साहसत्वम्।

---

१ अयमुद्गृहीत A. E. अयमागृहीत N. २ पुनस्तादृशस्य स्नेहस्य B. ३ सरलकु° N. ४ इतो for भतो Com.; तत् for यत् E.

विकलकरणै[1]र्मर्मच्छेदव्यथाविधुरैरिव ।
[2]स्मरसि रुदितैः स्नेहाकूतं तथा व्यतनोदसा-
६५ वहमपि [3]यथाभूवं पीडातरंगितमानसः ॥

सावेगम् । [4]अहो नु खलु भोः ।

दलति हृदयं गाढोद्वेगं द्विधा तु न भि[5]द्यते
वहति विकलः कायो [6]मोहं न मुञ्चति चेतनाम् ।

तृणमिवेत्यत्र लिङ्गवचनभेदे नोपमादोषो भवति । रसान्वयवशेन धीमतामनुद्वेगात् । यत्रोद्वेगो न धीमतामिति दण्डिवचनात् ।

६२–६५. मयीत्यादि । सखे असौ प्रिया स्नेहेङ्गितं रुदितैस्तथा विस्तारयामास यथा पीडाचपलचित्तोहमप्यभूवं मृतोऽस्मीति स्मरसि । इति-रध्याहार्यः । अन्यथा कर्माप्राप्तिः । रुदितस्य करुणजन्यत्वात्करुणहेतुमाह । विवाहविधेः पूर्वं मयि नैराश्याद्विकलानि स्वविषयव्यावृत्तानि करणानी-न्द्रियाणि तैर्लक्षिता । अनेन मोह उक्तः । लक्षणे तृतीया । कीदृशैः । मर्मच्छेदव्यथादीनैरिव । अनेन निःश्वासवत्त्वमुक्तम् । निःश्वासेन मर्म-च्छेदोन्नयनात् । तथा च निःश्वासरुदितमोहैः करुणरस उक्तः । यद्वा । विकलकरणैर्व्यतनोद्रुदितैरिव । इतरत्समम् ।

६६–७०. अहो नु खलु भो इत्याश्चर्ये । दलतीत्यादि । मम हृदयं दलति विदीर्यते । सवेदनत्वात् । दृढोद्वेगम् । नैव द्विधा भिद्यते द्विधा भिन्नं न भवति । स्फुटिते पीडोपशान्तिरिति भावः । तुशब्द एवार्थे पुन-रर्थे वा । पुनर्न भिद्यत इत्यर्थात् ॥ भिद्यत इति कर्मकर्तरि लट् ॥ अथ च दलति तन्न भिद्यत इति विरोधाभासः । एवमुत्तरत्रापि । विह्वलः कायो मोहं

---

१ करणैर्म° A. N., मर्मच्छेदैर्व्यथामधुरैरिव B. २ स्मरति B. स्मरसि कलितै स्नेह° N.; यथा for तथा B. ३ तथाभूवं N. ४ B. om. अहो—भो; E. om. नु. ५ भज्यते E. ६ नूनं for मोहं B.

ज्वलयति तनुमन्तर्दाहः करोति न भस्मसा-

त्प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥

मक० । [1]वयस्य निरवग्रहं दहति देवमिव दारुणो विवस्वान् । [2]इयं च ते शरीरावस्था । तदस्य पद्मसरसः परिसरे मुहूर्तमास्यताम् । [3]अत्र हि

[4]उन्नालबालकमलाकरमाकरन्द-

निष्यन्दसं[5]वलनमांसलगन्धबन्धुः ।

दधाति न तु चेतनां त्यजति । पुनश्चैतन्ययोगात् । स्थिरे मोहे दुःखाज्ञानात्कृतार्थः स्यामिति भावः । तदिहाध्यात्मिकविपद्द्वयमुक्तम् । अन्तर्दाहः शरीरं दीपयति न भस्मसात्करोति । कार्त्स्न्येन भस्मरूपं न करोतीत्यर्थः ॥ सातिः कार्त्स्न्ये ॥ तथात्वे दुःखाज्ञानमेव स्यादित्याशयः । अनेनाधिभौतिकी विपदुक्ता । तदिह व्याधिदशायां मोहादय उक्ताः । यदाह ।

मनःसंमोहसर्वाङ्गदाहवृत्त्यादिभिस्तथा ।

शिरसो वेदनाभिश्च व्याधेरभिनयो भवेत् ॥ इति ।

इह कायावच्छिन्न आत्मा कायपदेनोक्तः । अन्यथा मोहस्यात्मधर्मतया कायेसंभव इत्यवधेयम् ॥ स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः ॥

७१–७७. जडतानिवृत्त्यर्थं माधवमन्यचित्तं कर्तुमाह । वयस्य इति । निरवग्रहं निष्प्रतिबन्धं यथा । उपवेशनफलमाह । उन्नालेत्यादि । समीरो वायुरिह त्वां प्रीणयिष्यति प्रीतिं करिष्यति । तद्योग्यतामाह । ग्रीष्मान्तेल्पोदकतयोद्गतनाला बाला ये पद्मसंघास्तेषां पुष्परसीयक्षरणेन यन्मिश्रणं तेन मांसलः पुष्टो यो गन्धस्तन्मित्रम् । अग्रे दोलायमानकल्लोलशीकरैः शीतलो जडो मन्दः । यद्वा । शीकर एव तुषारस्तैर्जडः

---

१ माधव after वयस्य A. E. N.; दाव इव for देवमिव N. २ भस्मान् after विवस्वान् C.; B. om. इयं च–°वस्था; तटे for परिसरे B. ३ यत्र B, अय N. for अत्र. ४ उन्नालबाल C. E. ५ सञ्वलन A.

त्वां प्रीणयिष्यति[१] पुरःपरिवर्तमान-
कल्लोलशीकरतुषारजडः समीरः ॥

[२]परिक्रम्योपविशतः ।

मक० । [३]स्वगतम् । भवत्वेवं तावदाक्षिपामि । प्रकाशम् । वयस्य माधव

एतस्मिन्मदकलमल्लिकाक्ष[४]पक्ष-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः ।
बाष्पाम्भःपरिपतनोद्गमान्तराले
दृश्यन्तामविरहितश्रियो विभागाः ॥ [५]

माधवः [६]सावेगमुत्तिष्ठति ।

शीत इत्यर्थात् ॥ आकरो निवहोत्पत्तिस्थानश्रेष्ठेषु कथ्यत इति मेदिनीकारः ॥ माकरन्दः ॥ तस्येदमित्यण् ॥

७९–८४. आक्षेपोन्यमनस्कता । एतस्मिन्नित्यादि । अत्र सरसि भुवः प्रदेशा दृश्यन्ताम् । अश्रुपूर्णनेत्रतयादर्शनमाशङ्क्याह । एकस्य नेत्रजलस्य परिपतनमन्यस्योत्थानं तयोर्मध्ये । कीदृशाः । हर्षाव्यक्तमधुरस्वहंसविशेषपक्षकम्पितचलद्दीर्घनालपद्माः । नीलोत्पलयुक्ताश्च । पूर्वं विशिष्टपद्ममुक्तमिह तु नीलपद्ममात्रमित्यपौनरुक्त्यम् । यद्वा । पूर्वं श्वेतपद्ममुक्तम् । इह तु नीलं तदित्यदोषः । श्वेतश्यामकमलसंवलनेनातिरम्यतोक्ता । अविरहिश्रिय इति पाठे श्रीः शोभा लक्ष्मीर्वा । सरसि तस्याः सतताधिवासात् । तथा च श्रीयुक्ता इत्यर्थः ॥ मल्लिनेर्मल्लिकाख्यास्त इत्यमरः ॥ मल्लिको हंसभिद्यपीति मेदिनीकारान्मल्लिक आख्या यस्येति ज्ञायते । अनुप्रासश्च नागरागेति समानश्रुत्यापि संभवतीत्यवधेयम् । सोद्वेगं शीतवातादिदुःसहत्वादिति भावः ।

---

१ प्राणयिष्यति N.; पुरा for पुरः A.; परिवर्तमानः C. २ इति before परिक्रम्य A. E.. ३ B. om. स्वगतं; तावदन्यतः प्रक्षिपामि A. E.; B. om. प्रकाशम्. ४ मल्लिकाख्य A. E. मल्लिकाक्षि B. ५ दृश्यन्तां कुवलयिनो भुवो विभागाः appears to be the reading of Com. ६ सोद्वेगमु° A. B.

मक० । कथं प्रतिपत्तिशून्यमुत्थायान्यतः प्रवृत्तः । निःश्वस्योत्थाय च[2] । सखे प्रसीद । पश्य पश्य

[3]वानीरप्रसवैर्निकुञ्जसरितामासक्तवासं पयः
पर्यन्तेषु च यूथिकासुमनसामुज्जृम्भितं जालकैः ।

८५–९०. प्रतिवाक्यप्रदानादिश्रुत्यालोकनवर्जनम् ।
तूष्णींभावो विचेतस्त्वं जडतायां भवन्ति हि ॥

इति जडताचिह्नं माधवे सचमत्कारमाह । कथमिति । निरूप्य नेयं जडता किं त्वनुस्मृतिरित्याह शून्यमिति । शून्यं निर्लक्ष्यमन्यतो गमनेनानुस्मृतिः । यद्वा । अन्यतः शून्यं मालतीव्यतिरिक्तवस्त्वज्ञानात् । अत एव प्रद्वेषादन्यकार्याणां कथितानुस्मृतिरिति । अप्रतिपत्तिशून्यमिति पाठेनवधानेन चैतन्यविरहो यथा तथोत्थायेत्यर्थः । वानीरेत्यादि । सखे कुञ्जसंबन्धि नदीनां पयः पश्य । वेतसपुष्पैर्लग्नसौरभम् । तासामेवोपान्तेषु च यूथिकाकुसुमानां जालकैः कोरकैर्विकासितम् । यद्वा । यूथिकाश्च सुमनसश्च तासां जालकैः । यूथिका जूहीति प्रसिद्धा । सुमनसो जात्यः ॥ सुमना मालती जातिरित्यमरः ॥ तथा गिरेः सानूनेकदेशानालम्ब्येह प्राग्भारेषु शिखरेषु वर्तमानैर्मेघैर्वितानाय्यते । वितानाचारः क्रियते । मयूरनृत्यविधाननिमित्तम् । निमित्तसप्तमीयम् । कीदृशेषु । विकसत्कुटजपुष्परूपहासवत्सु । तदिह मयूरनृत्यार्थं मेघैर्वितानं कुटजैर्हास इति यत्तत्पश्येत्यर्थः । एवं च कुटजवृक्षा द्रष्टारो मयूरा नर्तका मेघो वितानमिति नृत्यसामग्री । ध्वनिस्तु शिखण्डिपदेन पञ्चचूडोपेतशिरस्कत्वेन विदूषक उक्तः । प्राग्भारपदेन च प्राश्नुतीति प्राक्प्रकृष्टज्ञानवान्भारो दुःसहो यस्य स मूर्खो द्रष्टोक्तः । तस्य च हास उचित एव ।

---

१ कथमप्रतिपत्ति C.; उत्थाप्य for उत्थाय A. २ C. N. om. च; B. N. repeat प्रसीद; A. B. N. om. one पश्य. ३ नीवार for वानीर B.

उन्मीलत्कुटजप्रहासिषु गिरेरालम्ब्य सानूनितः
प्राग्भारेषु शिखण्डिताण्डवविधौ मेघैर्वितानाय्यते ॥
आपि च । जृम्भाजर्जरडिम्बडम्बरघनश्रीमत्कदम्बद्रुमाः
शैलाभोगभुवो भवन्ति ककुभः कादम्बिनीश्यामलाः ।

यद्वा । शिखण्डिपदेन त्रिशिखण्डयोगितया बाल उक्तः । तस्य च नृत्ये मूर्खो हसत्येव ।

बालानामपि कर्तव्यं त्रिशिखण्डविभूषणम् ॥

इति बालानां शिखण्डित्वे मानम् ॥ वानीरवञ्जुला इत्यमरः । क्षारको जालकं क्लीबे कलिका कोरकः पुमानिति च ॥ वितानमाचरन्तीत्यर्थे क्यङन्ताद्यकि वितानाय्यत इति रूपम् ॥

९१–९४. जृम्भेत्यादि । सखे शैलपर्यन्तभूमयो जृम्भया विकासेन जर्जरः पृथग्भूतो यो डिम्बो गोलकस्तस्य डम्बरेणारम्भेण व्याप्ता अत एव श्रीमन्तो नीपवृक्षा यत्र तादृश्यो भवन्तीति यत्तत्पश्येत्यर्थः । एवं सर्वा दिशो मेघमालाश्यामा भवन्ति । यद्वा । कादम्बानां कलहंसानां स्त्रियः कादम्बिन्यस्ताभिः श्यामाः । नदीप्रवाहानां कच्छाः कूलान्युद्भिन्नविकसितैः कन्दलैर्नवाङ्कुरैः कान्ता मनोज्ञा ये केतकवृक्षास्तद्धारका भवन्ति । यद्वा । उद्यन्कन्दलः कन्दो यस्य कान्तकेतकस्येत्यर्थः । यद्वा । उद्यन्थः कन्दलो मल्लीवृक्षस्तं कान्तकेतकं च बिभ्रतीत्यर्थः । वनानां बाला विगन्धानि व्यक्तीभवत्सौरभानि यानि शिलीन्ध्रलोध्रकुसुमानि तैः स्मेरा सहासेव । मनोज्ञा वा ॥ शिलीन्ध्रं कन्दलीपुष्पमिति विश्वः ॥ शिलीन्ध्रं सूल [सून] इति ख्यातम् । वनमिह पद्मं जलं विपिनं वा ॥ जृम्भा विकासजम्भयोरिति विश्वः । डिम्बोण्डेपि च गोलक इति धर-

---

१ प्रहासिनि C.; इह for इतः A. २ प्राग्भारेषु E. प्राग्भारे नु N.; वितानायते B. E. N. ३ जर्झर N.

[1]उद्यत्कन्दलकान्तकेतकभृतः कच्छाः सरित्स्रोतसा-
[2]माविर्भूतशिलीन्ध्रलोध्रकुसुमस्मेरा वनानां ततिः ॥

माध० । सखे पश्यामि किं तु [3]दुरालोकरमणीयाः संप्रत्यरण्यगिरिभूमयः । तत्किमेतत् । सास्रम् । अथवा किमन्यत् ।

उत्फुल्लार्जुन[4]सर्जवासितवहत्पौरस्त्यझञ्झामरु-
त्प्रे[5]ङ्खोलस्खलितेन्द्रनीलशकलस्निग्धाम्बुदश्रेणयः ।

णिः । डम्बरोस्त्री समारम्भ इति विश्वः । कादम्बिनी मेघमाला कादम्बस्त्री च कथ्यत इति शाश्वतः । कन्दलः कलहे कन्दे मल्यामङ्कुरसंघयोरिति मेदिनीकारः । पुंसि कच्छस्तथाविध इत्यमरः । वनं नीरेम्बुजे क्लीबं काननेप्यालये वनमिति मेदिनीकारः ॥

९७–१००. उत्फुल्लेत्यादि । अधुना त एते दिवसाः प्राप्ता ये मनोराज्येन मया धृता इत्यर्थः । इह त एत इति सर्वनामभ्यां दिनानामत्युत्कण्ठाहेतुत्वं ध्वनितम् । कीदृशाः । उत्फुल्लाभ्यामर्जुनशालाभ्यां वासितः सुरभीकृतो वहन्पौरस्त्यः प्राच्यो यो झञ्झानिलः प्रचण्डवायुः प्रावृषेण्यवातो वा तस्य प्रेङ्खोल आन्दोलनं तेन स्खलिताः स्वस्थानच्युता इन्द्रनीलमणिखण्डा इव श्यामा मेघपङ्क्तयो येषु ते । अत्रार्जुनग्रहणेपि द्वितीयतरोः सर्जस्य ग्रहणं कदम्बाद्युपलक्षणार्थम् । तथा ग्रीष्मोष्मतप्तमहीसेकसौरभवन्तः । ईषद्वृष्टौ तदुद्गमात् । घर्मस्य ग्रीष्मस्य विगमोपगमोम्भस आगम आगमनं तयोर्व्यतिकरः संबन्धस्तेन श्रियं शोभां वोढुं शीलं येषां ते । यद्वा । घर्माम्भसः स्वेदजलस्य यौ विगमागमौ तयोर्व्यतिकरः संभेदः । वर्षारम्भ इत्यर्थः । तस्य श्रीः संपत्तिस्तद्वाहिन इत्य-

[1] B. has lost the part from उद्यत्कन्दल to स्निग्धाम्बुदश्रेणयः.
[2] मानिर्गतशिलो॰ N. [3] दूरालोक E.; संप्रत्यारण्य N.; A. N. om. गिरि.
[4] सार्ज C.; झञ्झानिल A. E. [5] प्रेंखोलत्स्खलि॰ N.; ॰तेंद्रशेखरमणिस्निग्धा॰ C.; निचय for शकल E.

धारासिक्तवसुंधरासुरभयः प्राप्तास्त एतेधुना
घर्माम्भोविगमागमव्यतिकरश्रीवाहिणो वासराः ॥

हा प्रिये मालति

तरुणतमालनीलबहुलोन्नमदम्बुधराः
शिशिरसमीरणविधूतनूतनवारिकणाः ।
कथमवलोकयेयमधुना हरिहेतिमती-

र्थः ॥ पौरस्त्य इति पुरसस्त्यक् ॥ झञ्झा ध्वनिविशेषे स्यादिति मेदिनीकारः ॥ तदन्वितोनिलो झञ्झानिलः । यद्वा । झञ्झानिलः प्रावृषेण्य इति रत्नकोशः ॥ अत्र वास्यमानेति कर्तव्ये संपूर्णक्रियत्वपरनिष्ठाप्रत्ययान्तवासितपदोपादानात्समस्तपुष्पसौरभसंक्रान्तिर्वायोर्ध्वनिता । अत एव मलयानिलाज्झञ्झानिलोत्कर्षः कटाक्षितः । उन्मादावस्थो माधवः । उन्मादश्चेष्टवियोगात् । यदाह ।

इष्टजनस्य वियोगादुन्मादो विभवनाशाच्च ।

१०२–१०६. तरुणेत्यादि । कथमधुना दिशोहमवलोकयेयम् । तरुणतमालान्नीलास्तद्वद्वा नीलाः प्रचुरा उद्गच्छन्तो मेघा यासु ताः । शीतवातक्षिप्तनवजलकणाः । हरेरिन्द्रस्य हेतिरस्त्रं धनुस्तद्वतीः । मदकलमयूरकोलाहलैः शब्दवतीः ॥ कलहं कलकलेपि चेति विश्वः ॥ सरित इति पाठे प्रातिबिम्बेन मेघवत्त्वम् । हरेः कृष्णस्य हेतिश्चक्रं तन्नामकपक्षियुक्ताः । दुःखितेनर्तुज्ञानं दुःखमयत्वेनैव । यदाह ।

ऋतून्पश्यति दुःखार्तः सर्वान्दुःखसमाश्रितान् ॥ इति ।

तदनेन प्रबन्धेन वर्षाकाल उक्तः । यदाह ।

कदम्बनीपकुटजैः शाद्वलैः सेन्द्रगोपकैः ।

---

१ एताधुना A. E. N. २ वाहिनो A. E. N. ३ °णाविधुत N. ४ °येहमधुना E.

मेदुरकलनीलकण्ठकलहैर्मुखराः ककुभः ॥

शोका[2]र्तिं नाटयति ।

मक० । को[3]ऽप्यतिदारुणो दशाविपाकः संप्रति वयस्यस्य । सास्रम् । मया पुनर्वञ्च[4]यमाणेन विनोद आरब्धः । निःश्वस्य । एवं च पर्यवसि[5]तप्रायैव नो माधवं प्रति प्रत्याशा । सभयं विलोक्य । कथं प्रमुग्ध ए[6]व । आकाशे । मालति मालति किमपरं निरनुक्रोशासि ।

अपहस्तितबान्धवे त्वया विहितं साहस[7]मस्य तृष्णया ।
तदिहानपराधिनि प्रिये सखि कोयं करुणोज्झितक्रमः ॥ [8]

कथमद्या[9]पि नोच्छ्वसिति । हन्त मुषितोऽस्मि दैवेन ।

मेघवातैः सुखस्पर्शैः प्रावृट्कालं प्रदर्शयेत् ॥

शोकेति । मूर्च्छितः पततीति भावः ।

१०८—११३. विनोदश्चित्तस्वास्थ्यम् । प्रमुग्धः संज्ञाशून्यः । अनुक्रोशोऽनुकम्पा तद्विपरीतासि । अपेत्यादि । अगणितमात्रादिके हे सखि अस्य लोभेन त्वया साहसं कृतम् । तदिह प्रिये प्रीते निरपराधेपि निर्दयः क्रमः कोयम् । केयं परिपाटिस्तवेत्यर्थः । कथमीदृशं पतिं त्यक्त्वा निर्दयासीति भावः । उच्छ्वासः संज्ञालाभः ।

---

१ हरितः C. सरितः noticed by Com. for ककुभः. २ इति शोकार्तिं B. शोकार्तं C. ३ कोयमति° C. कोऽप्यतिशयदारुणो B.; C. om. संप्रति; वर्तते after संप्रति N. ४ वञ्चमयेन A. E.; वञ्चायमानेन पुरो विनोदनमारब्धं B.; पुनरज्ञानेन वञ्चमयेन किल विनोदनं प्रारब्धं N.; कोपि before विनोद A. E.; निश्वस्य A. C. E. N.; A. E. om. च. ५ प्रायैव माधवप्रत्याशा नः B.; नो माधवप्रत्याशा N. ६ वयस्य: after एव C.; N. om. आकाशे; सखि A. E. and हा N. before मालति; A. E. N. om. one मालति; किं वा निरनु° N. ७ साहसमप्यभूदया N. ८ °ज्झितः क्रमः B. ९ E. om. अपि; E. om. अस्मि; N. om. दैवेन.

मातर्मातर्दलति हृदयं ध्वंसते देहबन्धः
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि ।
सीदन्नन्धेतमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥

कष्टं भोः कष्टम् ।

बन्धुताहृदयकौमुदीमहो मालतीनयनमुग्धचन्द्रमाः ।
सोयमद्य मकरन्दनन्दनो जीवलोकतिलकः प्रलीयते ॥ ८ ।

हा वयस्य माधव ।

गात्रेषु चन्दनरसो दृशि शारदेन्दु-
रानन्द एव हृदये मम यस्त्वमासीः ।

११४–११८. मातरित्यादि । मातर्मातरित्यावेगः । द्विधा भवति हृदयमिति पीडा । अवयवसंधिः शिथिलीभवतीत्यस्वस्थता । विश्वं शून्यं मन्य इति बाह्यासंवेदना निर्वेदः । अविरतज्वालं यथा तथान्तर्ज्वलामीति चिन्ताजनितो दाहः । अन्तरात्मा निरालम्बः सीदन्नवसादं गच्छन्गाढान्धकारे मज्जतीवेति ग्लानिः । विष्वक्सर्वतो मोहश्छादयतीति मोहः । मन्दभाग्योहं किं करोमीति दैन्यम् । कथंशब्दः किमित्यर्थे । सर्वनामत्वान्नार्थता ॥ विष्वमित्यत्र सुषमादित्वात्षत्वम् ॥ परिदेवितमाह । कष्टमिति ।

११९–१२५ बन्धुतेत्यादि । सोयं बन्धुसमूहचित्तकौमुदीमहोत्सवो मालतीनेत्रबालचन्द्रो मकरन्दहर्षजनकः सर्वजनतिलकोद्य प्रलयमापद्यत इत्यर्थः ॥ मह उद्धव उत्सव इत्यमरः ॥ गात्रेष्वित्यादि । यस्त्वं मम काये चन्दनरस आसीः । सुखस्पर्शत्वात् । नेत्रे शरत्कालीनचन्द्रः । आनन्दजनकत्वात् । चित्त आनन्द एव साक्षाद्धर्ष एवासीः । तं त्वामतिक्रान्तमकस्मादेव

---

१ अविकल B. अविरल C. for अविरत २ C. om. भोः. ३ पूर्ण for मुग्ध A. E. ४ माधवोय for सोयमद्य B.

तं[1] त्वां निकामकमनीयमकाण्ड एव
कालेन जीवितमिवोद्धरता हतोस्मि ॥ १२९

स्पृशन्[2] ।

अकरुण वितर स्मितोज्ज्वलां दृशमतिदारुण देहि मे गिरम् ।
सहचरमनुरक्तचेतसं प्रियमकरन्द कथं न मन्यसे ॥

माधवः संज्ञां लभते ।

मक० । सोच्छ्वासम् । अयम्[3]चिरधौतराजपट्टरुचिरमांसलच्छविर्न- १३०
वजलधर[4]स्तोयसीकरासारेण प्रियवयस्यं मे जीवयति । दिष्ट्या समु-
च्छ्वसितस्तावत् ।

मम जीवनमिवोद्धरतोन्मूलयता कालेन समयेन यमेन वा हतोस्मि । यथा जीवनोद्धारेहं हतस्तथा त्वदुद्धारेपीति भावः ।

१२७-१३०. सोन्मादो विलपति । अकरुणेत्यादि । हे निर्दय हासमनोज्ञां दृशं देहि । हासपूर्वं पश्येत्यर्थः । यद्वा । स्मितेन विकासेनोज्ज्वलां विकसितामित्यर्थः । वचनादानादतिदारुण हे मे वाचं देहि । मित्रमनुरक्तचित्तं हे प्रियमकरन्द कथं न मन्यसे । कथं नाङ्गीकरोषि । इहावेगादीनां सत्त्वात्करुणो रसः । यदाह ।

इष्टनाशधनापायबन्धुव्यसनताडनैः ।
शापक्लेशोपघातैश्च जायते करुणो रसः ॥
अश्रुनिश्वासवैवर्ण्यस्रस्ताङ्गैश्च स्मृतिक्षयैः ।
परिदेवितशोकाद्यैरभिनेयः स सूरिभिः ॥

अचिरधौतत्वेन राजपट्टस्य नीलत्वस्निग्धत्वे उक्ते । राजपट्टं खडीति ख्यातम् । रुचिरा दीप्तिमती मांसला घना च्छविः कान्तिर्यस्य सः ।

---

१ तत्त्वां A. तं त्वा B. E. २ गात्रमस्य स्पृशन् C. ३ प्रियं for अयं B. ४ नवजलदस्तोय N.; शीकरा° E. N.; °सारवर्षेण B.; A. E. om प्रिय; C. om. मे; संजीवयति N.; दिष्ट्या जगदुच्छ्वसितस्तावत् A. यदुच्छ्वसि° for समुच्छ्वसि° C. E., उच्छ्व° for समुच्छ्व° B.; माधवः after तावत् B.

माध० । तत्कमत्र विपिने[1] प्रियावार्ताहरं करोमि । विलोक्य । साधु साधु ।

१३५ फलभरपरिणाम[2]श्यामजम्बूनिकुञ्ज-
स्खलिततनुतरङ्गा[3]मुत्तरेण स्रवन्तीम् ।
उपरि[4] विघटमानः प्रौढतापिच्छनीलः
श्रयति शिखरमद्रेर्नूतनस्तोयवाहः ॥ 24

सरभस[5]मुत्थायोन्मुखः कृताञ्जलिः ।

१३३–१३९. वार्ताहारो दूतः । अतिप्रवृद्धकालतया दूतप्रेषणम् । यदाह ।

प्रसह्यमानकामार्तो बहुस्थानसमुत्थितः ।
स्वावस्थादर्शनार्थं तु प्रेषयेद्दूतमात्मनः ॥

फलेत्यादि । नवमेघो गिरेरग्रं श्रयति । फलभारपाकश्यामजम्बूनिकुञ्जात्स्खलनेनाल्पकल्लोलां नदीमुत्तरेण नद्या उत्तरसमीपे ॥ एनपा द्वितीया ॥ कीदृशः । उपरि विघटमान ऊर्ध्वस्थानं त्यजन् । विकासितमालपुष्पान्नीलस्तद्वद्वा नीलः । उपचितघनमालेति पाठ उपचिता घना च माला येषामित्यर्थः । घने नूतनत्वेनातिश्यामता । यद्वा । स्रवन्तीमुपरि विघटमानो विविधप्रकारेण श्रयन् । उत्तरेणोत्तरदेशे ॥ उत्तरेणेति विभक्तिप्रतिरूपको निपातः ॥ किंचिदेवोत्तरेणेतिवत् । आश्रयार्थकतया घटेः सकर्मकता ॥ स्रवन्ती निम्नगापगेत्यमरः ॥ कृताञ्जलिरित्यनेन विनय उक्तः । विनयपूर्वकश्च संदेशः कार्यः । यदाह ।

संदेशं चैव दूत्यास्तु प्रदद्यान्मदनाश्रयम् ।
तस्येयं समवस्थेति कथया विनयेन हि ॥

---

१ तत्कथमत्र A. B. तत्किमिवात्र N.; E. om. विपिने; प्रियाया. वार्ता C.; वार्ताहर्तारं E. २ परिणाहश्याम N. ३ तनुशरीरामु° N.; स्रवंती C. E. ४ उपचितघनमालप्रौढ A.; °मानप्रौढ N. ५ सादरं for सरभसं A. E.; उन्मुखं E.

कच्चित्सौम्य प्रिय[1]सहचरी विद्युदालिङ्गति त्वा-
माविर्भूतप्रणयसुमुखा[2]श्चातका वा भजन्ते ।
पौरस्त्यो वा सुखयति मरुत्साधुसंवाहनाभि-
र्बिम्बं[3] बिभ्रत्सुरपतिधनुर्लक्ष्म लक्ष्मीं तनोति ॥

आकर्ण्य । अयं[4] प्रतिरवभरितकन्दरानन्दितोत्कण्ठनीलकण्ठकलकेका-

१४०–१४३. कच्चिदित्यादि । प्रार्थनोचितं सुभगप्रश्नमाह । हे सौम्य सुन्दर प्रिया वल्लभा सहचरी सततानुगता विद्युत्त्वामालिङ्गति कच्चित् । कथयेत्यर्थः ॥ कच्चित्कामप्रवेदन इत्यमरः ॥ विरहित्वेन कान्ताभिलाषात्प्रथमं कान्तासंगमप्रश्नः ॥ चारुचन्द्रजयोः सौम्य इति शाश्वतः ॥ प्रियालिङ्गने सुखं तद्विरहे दुःखमिति त्वमपि जानासीति ध्वनितम् । यद्वा । कच्चिदेवमभिमतं ममेत्यर्थः । उत्पन्नस्नेहेन सुभगाः सुमुखाश्चातकास्त्वां सेवन्ते । वा समुच्चये । अनेनार्थिसंपत्तिरुक्ता । पुरोवातश्च मृदुप्रेरणाभिस्त्वां सुखयति । अन्योपि सहायश्चरणमुष्टिग्रहणादिरूपसंवाहनां कुरुत इति ध्वनिः । अनेन सहायसंपत्तिरुक्ता । विश्वक्सर्वतो लक्ष्मीं शोभां बिभ्रदिन्द्रधनुः ॥ कर्तृ ॥ लक्ष्म चिह्नं तव तनोति । अनेन प्रसाधनमुक्तम् । विश्वं बिभ्रदिति पाठे हे विश्वं बिभ्रद्भुवनं दधान । वर्षेण सस्यादिसमृद्ध्या जगदुपकारकत्वमुक्तम् । प्रसाधनमाह । इन्द्रधनूरूपं चिह्नं तव शोभां तनोति । बिम्बं बिभ्रदिति पाठे तु बिम्बं मण्डलं शोभां तनोति । कीदृशम् । इन्द्रधनुश्चिह्नं बिभ्रद्दधानम् । तदिह जगदुपकारकतया ममाप्युपकारं करिष्यसीति भावः ।

१४४–१५०. गर्जितेनानुमतिमाह । अये इति । प्रतिशब्दभरितकन्दरत्वेनानन्दिता समृद्धोत्कण्ठा यस्य सः । यद्वा । आनन्दिता

---

१ सहचरं A. २ मुखराः B. सुखिताः E. सुभगाः Com. for सुमुखाः. ३ विश्वग्बिभ्रत्सु° B. विष्वग्द्रीचं सु° N. विश्वं बिभ्रत् and बिंबं बिभ्रत् noticed by Com. ४ अथ किमयं प्रतिरव B.; अये for अयं Com. °नंदितोत्कंठितनीलकंठेन कांतेन ध्वनिना मामनुमन्यते N.; A. om. नीलकण्ठ.

नुबन्धिना [1]मन्द्रहुंकृतेन मामनुमन्यते । यावदभ्यर्थये । भगवन् जीमूत

[2]दैवात्पश्येर्जगति विचरन्निच्छया मत्प्रियां चे-
[3]दाश्वास्यादौ तदनु कथयेर्माधवीयामवस्थाम् ।
आशातन्तुर्न च कथयतात्यन्तमुच्छेदनीयः
प्राणत्राणं कथमपि करोत्यायताक्ष्याः [4]स एकः ॥

सहर्षम् । [5]अये प्रचलितस्तदन्यतः संचरामि । परिक्रामति ।

हृष्टा उत्कण्ठा उद्ग्रीवा इत्यर्थः । मन्द्रं गभीरम् । अनुमन्यते स्वीकरोति । आर्तिवशाद्देवत्वारोपणेन भगवन्निति । अवधारणे यावत् । जीमूत मेघ । दैवादित्यादि । इच्छया जगति विचरंस्त्वं मत्प्रियां यदि दैववशात्पश्येर्द्रक्ष्यसि तदा प्रथमं तां प्रबोध्याथ माधवदशां कथयिष्यसि । अवस्थानिवेदनेन तन्मरणमाशङ्क्याह । कथयता त्वयाशा पुनःसंगमप्रत्याशा सैव तन्तुः । जीवनबन्धहेतुत्वात् । नैवात्यर्थमुच्छेद्यः । चैवार्थे । अत्र हेतुमाह । स आशातन्तुरेकस्तस्याः प्राणत्राणं कष्टाकष्ट्या करोति नाहमित्यर्थः। इह तावत्कालं सा जीवति न वेति संभावना दर्शनस्य दैवादित्यनेनोक्तम् । प्रसङ्गतो मत्कार्यमिति जगति विचरन्नित्यनेनोक्तम् । मत्प्रियामित्यनेन सुकुमारत्वादिना विरहदुःखासहिष्णुतोक्ता । आदावाश्वासनं वार्ताश्रवणपटुत्वार्थम् । अत्यन्तमित्यनेन मध्यमविधया दशाकथनम् । तेन च तन्नैराश्यनिषेध इत्युक्तम् । कथमपीत्यनेनाशातन्तुमात्रं तद्रक्षणाय कल्पत इत्युक्तम् । आयताक्ष्या इत्यनेन कटाक्षादिस्मरणेन गुणकीर्तनम् । माधवस्येयं माधवीया ॥ वृद्धाच्छः ॥ उन्मादावस्थेयम् । असंबद्धप्रलापात् । सहर्षत्वं मद्वचनमङ्गीकृत्य प्रचलित इति ।

---

१ A. E. om. मन्द्र; मन्यते इदमेव तावद° B.; यावदर्थये A.; जीमूतनाथ N. २ दैवात्पश्येर्यदि जगति तां मत्प्रियां मालतीं चेदाश्वस्यादौ B.; मालतीं for इच्छया N. ३ °दाश्वस्य E. N.; माधवस्यामवस्थां N.; °तात्यंतविच्छे° C. ४ °ताक्षाः B.; स एव C. ५ अहो for अये A. E.; B. om. अये; प्रचलितस्तावदयं तद° B.; °दन्यत्र संच° A. C. E.; इति परिक्रामति C.

मक० । साकूतम्[1] । कथमिदानीमुन्मादोपरागो माधवेन्दुमास्कन्दति । हा तात हा[2] अम्ब हा भगवति परित्रायस्व परित्रायस्व । पश्य माधवस्यावस्थाम्[3] ।

माध० । [4]विकप्रमादः ।

नवेषु लोध्रप्र[5]सवेषु कान्तिर्दृशः कुरङ्गीषु गतं गजेषु ।
लतासु नम्रत्वमिति प्रमथ्य व्यक्तं विभक्ता विपिने प्रिया मे[6] ॥

हा प्रिये मालति[7] ।

मक० । सुहृदि गुणनिवासे प्रेयसि प्राणनाथे
कथमपि[8] सहपांसुक्रीडनप्रौढसख्ये ।

१५१–१५६. उपरागो राहुग्रासः । शैशवे संकटप्रदेशे पित्रादीनां स्मरणस्य स्वभ्यस्ततया विरहसंकटेपि तदाह हा तातेति । प्रमादोनिष्टम् । नवेष्वित्यादि । नूतनलोध्रपुष्पेषु कान्तिः पाण्डिमा गौरत्वं वा । इह नवपदेन स्निग्धतोक्ता । दृशो विलोकितानि हरिणीषु । गमनं हस्तिषु । नम्रत्वं लतासु । इतिशब्द आद्यर्थे । हेला लीलेत्यमी हावा इतिवत् । प्रमथ्य मारयित्वा मे प्रिया विपिने विभक्ता खण्डखण्डीकृत्य धृता । यद्वा । इतिः प्रकारार्थः । तेन लोध्रप्रसवादिभिर्मे प्रिया विभागीकृता । कान्त्यादिविभागद्वारा प्रियाविभाग एवोन्नीयत इत्यवधेयम् । विपिन इति प्राणिवधस्थानाभिप्रायम् ।

१५८–१६४. सुहृदीत्यादि । हे हतहृदय कथमपि विदीर्य द्विधा त्वं न प्रयासि । हतेति निन्दायाम् । मित्रे गुणनिधानेतिप्रेमवति जीवेश्वरे सहधूलिक्रीडागाढमैत्रे कान्तावियोगमनोव्यथाव्याधिमन्तर्दधाने सति । सुहृ-

---

१ सोद्वेगं A. N. स्वगतं B. for साकूतम्; °राग एव माध° C. N. २ A. E. om. हा; त्रायस्व for परित्रायस्व B.; B. N. om. one परित्रायस्व. ३ माधवावस्थां A. E. माधवस्थामवस्थां N. ४ द्विपदिकया सवैतोवलोक्य after माध° A. ५ लोध्रप्रभवेषु C.; दृशो कुरंगेषु N.; कुरङ्गेषु गजेषु यातं A. C. E. ६ प्रियास्मिन् A. C. E. ७ इति मूर्च्छति after मालति A. ८ कथमिव सह A. E. N.

प्रियजनविरहाधिव्याधि[1]वेगं दधाने
हतहृदय[2] विदीर्य त्वं द्विधा न प्रयासि ॥

माध० । सुलभानुकारः[3] खलु जगति वेधसो निर्माणसंनिवेशः । भवत्वेवं तावत् । उच्चैः[4] । अयमहं भोः प्रणिपत्य भूधरारण्यवासिनः सत्त्वान्विज्ञापयामि मां[5] मुहूर्तमवधानदानेनानुगृह्णन्तु भवन्तः ।

भवद्भिः सर्वाङ्गप्रकृतिरमणीया कुलवधू[6]-
रिहस्थैर्दृष्टा वा विदितम[7]थ वास्याः किमभवत् ।
वयोवस्थां तस्याः शृणुत सुहृदो[8] यत्र मदनः

दित्यादौ हेतुहेतुमद्भावः ॥ धूलिः स्त्रियां पांसुर्नेत्यमरः ॥ प्रियाविभागाशङ्कां निरस्यति सुलभेति । संनिवेशः प्रकारः । अनुकारः सादृश्यम् । तथा च लोध्रप्रसवादीनि प्रियाकान्त्याद्यनुकारीणि न तु सा विभक्तेति भावः । सत्त्वान्प्राणिनो विज्ञापयामीति सानुनयं वचनम् ।

१६५–१६८. भवद्भिरित्यादि । भवद्भिरिहस्थैः सर्वाङ्गेषु स्वभावरम्या सा कुलवधूर्दृष्टा वा । अथवास्या भवद्भिः किं विदितमभवत् । शुभमशुभं वा किं विज्ञातमित्यर्थः । ननु तस्याः किं वय इत्याह । हे सुहृदस्तस्या वयोवस्थां शृणुत । यत्र वयोवस्थायां हृदि मदनः प्रगल्भव्यापारो वपुषि मुग्धो बालश्चरति । एतेन वयःसंधिरुक्ता । सर्वाङ्गेत्यनेनाभिज्ञानप्रकाशनम् । कुलवधूत्वेन चाञ्चल्याभावः । इहस्थैरित्यनेन परिचयचातुरी । वाकारद्वयेन दर्शनवृत्तान्तयोः सफलत्वं दर्शयति ।

१ व्याधिखेदं N. २ हृदय विशीर्य किं वि [द्वि?] धा किं न यासि C.; विदीर्णे for विदीर्य E. ३ आकाशे दृष्ट्वोत्थाय after माध° A.; B. om. खलु. ४ B. N. om. उच्चैः; अयमयं भोः E.; चारिणः for वासिनः A. C. E. ५ ने before मां A. C. E.; अवधानेनानु° C. E.; A. C. E. om. भवन्तः. ६ खलु वधू B. ७ विदितम° E. ८ सुहृदोऽयेत्र B. सुहृदः यत्र E.

प्रगल्भव्यापारश्चरति हृदि मुग्धस्य वपुषि ॥

कष्टं भोः [1]कष्टम् ।

केकाभिर्नीलकण्ठस्ति[2]रयति वचनं ताण्डवादुच्छिखण्डः
का[3]न्तामन्तःप्रमोदादभिसरति मदभ्रान्ततारश्चकोरः ।
गोलाङ्गूलः कपोलं छुरयति रजसा कौ[4]सुमेन प्रियायाः
कं[5] याचे यत्र तत्र ध्रुवमनवसरग्रस्त एवाथिभावः ॥

अयं च । दन्तच्छदारुणिमरञ्जि[6]तकान्तदन्त-
मुत्क्षिप्य चुम्बति वलीवदनः प्रियायाः ।
का[7]म्पिल्लकप्रसवपाटलगण्डपाली-
पाका[8]रुणस्फुटितदाडिमकान्ति वक्त्रम् ।

सुरते निःसाध्वसता प्रागल्भ्यं समुदाहृतम् ॥

इति भरतः ।

१७०—१७३. केकाभिरिति । किं यत्र तत्र याचे । अपि तु न किमपि प्रार्थये । यतोऽप्रस्तावग्रस्तोऽर्थिभावोऽर्थित्वम् । अनवसरमाह । नृत्यादुद्धतापिच्छभारो मयूरः केकाभिर्वचनं छादयति । चकोरः पक्षिभेदो मत्ततया भ्रमत्तारकः संश्लिष्टहर्षात्प्रियामभिसरति । गोलाङ्गूलः श्याममुखो वानरः पुष्पजधूल्या कान्तायाः कपोलौ चित्रयति । अतः सत्त्वानामन्यत्रासक्ततयार्थित्वानवसर इति भावः ॥ प्लवङ्गकीशप्लवगगोलाङ्गूलवलीमुखा इत्यमरमाला ॥ कं याच इति पाठे कं प्राणिनं प्रार्थय इत्यर्थः ।

१७४—१७८. दन्तेत्यादि । वलीवदनो वानरोऽयं कान्ताया मुखमुत्क्षिप्य चुम्बति । कीदृशम् । अधररागेण रक्ता मनोज्ञा दशना यत्र तत् । का-

---

१ A. N. om. कष्टम्. २ स्थगयति for तिरयति N. ३ कांतामत्तप्र° B. C.; °दभिसरति C. ४ कौंकुमेन B. ५ किं याचे B.; तत्र तत्र N. ६ रंजितदंतकांत° N. ७ कांपिल्यक N.; पालि A. B. C. ८ पाकान्तरस्फु° Com.

[1]एष प्रियतमास्कन्धविश्रान्तकरः करी । कथमत्राप्यनवसरः ।

कण्डूकु[2]ड्मलितेक्षणां सहचरीं दन्तस्य कोटया लिख-
न्पर्यायव्यतिकीर्णकर्णपवनैराह्लादिभि[3]र्वीजयन् ।
जग्धार्धैर्नवस[4]ल्लकीकिसलयैरस्याः स्थितिं कल्पय-
न्[5]धन्यो वन्यमतङ्गजः परिचयप्रागल्भ्यमभ्यस्यति ॥

अ[6]न्यतोऽवलोक्य । अयं तु ।

नान्तर्वर्तयति ध्वनत्सु जलदेष्वामन्द्रमुद्गर्जितं
नासन्नास्सरसः करोति कवला[7]नावर्जितैः शैवलैः ।

म्पिल्लो रोचनीवृक्षः ॥ स्वार्थे कन् ॥ तस्य प्रसवेन पुष्पेण फलेन वा रक्त-
गण्डप्रदेशः । पाकान्तरमान्तिमपाकस्ततः स्फुटितं विदीर्णं यद्दाडिमफलं
तत्कान्ति । तत्समभित्यर्थः । तदिहाप्यनवसर एव ॥ शाखामृगवक्त्री-
मुखा इत्यमरः । काम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपीत्यमरः ॥
रोहिणानोकहो रोहणवृक्षः ।

१७९–१८२. कण्डूेत्यादि । अयं सुकृती वन्यहस्त्यस्याः प्रिया-
याः परिचयप्रागल्भ्यं सुरतनिःसाध्वसतामनुतिष्ठति । कीदृशः । कण्डूकुड्-
मलितेक्षणां प्रियां दन्ताग्रेणालिखन्नीषदुल्लिखन् । कण्डूयन्नित्यर्थः । अत एव
कण्डूकाले कुड्मलितेक्षणत्वं जातिः । पर्यायेण क्रमेण निक्षिप्तौ कर्णौ तयोर्वातैः
सुखदैर्वीजयन् । कवलितार्धैर्नवशल्लकीपल्लवैरस्याः प्राणधारणं कल्पयन् ।

१८३–१८७. नान्तरित्यादि । अयं स्तम्बेरमो हस्ती ताम्यति
ग्लानो भवति । नूनं निश्चितं प्रेयसीविश्लेषेण विह्वलः । जलदेषु स्तनत्सु

१ अन्यतोऽवलोक्य । अये एष प्रियतमा B.; अये अयं च रोहिणानोकहस्कंध N.; विश्रांतकरः C.; रोहिणानोकहस्कन्धविश्रान्तकन्धरः before करी A. E.; अत्र for अत्र B. २ कुड्म° A. N.; °क्षणामनुचरीं A. E. ३ जीवयन् C. ४ वल्लकी A. E.; किशल° E.; कारयन् for कल्पयन् N. ५ मन्यो for धन्यो B., प्रारंभ for प्रागल्भ्य N. ६ A. E. om. अन्यतोऽवलोक्य. ७ कवलान्यावर्जितैः A कवलान्या° E.

दानज्यानिविषादमूकमधुपव्यासङ्गदीनाननो

नूनं प्राणसमावियोग[1]विधुरः स्तम्बेरमस्ताम्यति ॥ ७ ॥

[2]अलमनेनायासितेन । एष सानन्दसहचरीसमाकर्ण्यमानमधुरगम्भीर[3]कण्ठगर्जितध्वनिरपरो मत्तमातङ्गयूथपालः प्रत्यग्रविकसितकदम्बसंघात[4]सुरभिशीतलामोदबहलसंवालितमांसलकपोलनिष्यन्दकर्दमितकषायै[5]मुद्दलितकमलिनीखण्डविप्रकीर्णपर्णकमलकेसरमृ[6]णालबि-

सरस्वीषद्गम्भीरमुद्गतकण्ठगर्जनं नान्तर्वर्तयति न करोति । समीपस्थात्सरस आवर्जितैर्मिलितैः शैवलैः कवलान्न करोति । मदहान्या यो विषादस्तेन मूकानां भ्रमराणां व्यासङ्गेनान्यचित्ततया शोच्यमुखः । यद्वा । व्यासङ्गो विशेषेणासङ्ग इत्यर्थः । तदिह मदहानिश्चिन्तया संतापात् । दीनत्वमधोमुखचिन्तनात् । एतेनानुस्मृतिसंजाता विषयव्यावृत्तिरुक्ता ।

१८८–१९५. अहमिवायमपि कान्तातिरिक्तमन्यन्न वेत्तीत्यत आह । अलमिति । रतौत्सुक्यान्मधुरकण्ठगर्जितश्रवणाद्वा सानन्देति । मातङ्गो हस्ती । संपातः संपर्कः । संवालितो मिलितः । मांसलः पीनः । निष्यन्दो मदः । कषायः सुगन्धिः । करटो गण्डदेशः ॥ सुरभौ च कषायः स्यादिति शाश्वतः ॥ समुद्दलितमुन्मूलितम् । पर्णं पत्रम् ॥ तालो

१ °योगमधु° E. २ तदलम° C.; °नेनाध्याया° N.; अन्यतः संचरामि । विलोक्य । before एष A. सानंदं before एष N.; सानंदं सह° C. ३ गंभीरध्वनिकंठध्वनिः प्रवृद्धनवयौवनोन्मादमस्तुनामंदसप्तपर्णप्रसूनमकरंदसुंदरमदवारिसंस्वादहृत्तचित्तोन्मत्तानुरक्तेदिंदिरनिकरझणझणायमानरणत्करझंकारसंभारश्रवणालंबितकर्णो गोदावरींदीवरवासितामंदमकरंदतुंदिलमलयानिलोल्लासितामलानिंदलितललितकमलभरपरागपुंजपरिमलप्राग्भारघ्राणसुखितेंद्रियवर्गोऽरन्मित्तमातंगवर्गपालः प्रत्यग्रविकासित B.; °रपरोत्तममातंग C.; °रपरोऽति मत्तमातंगवर्गपालकः प्रत्यग्र N.; विकाशित A. E. ४ संघात C. संघाटि N. for संघात; बहुल for बहल A.; संकालि [त] E. संमीलित B. for संवलित; °मोदमेदुरकपोल N. ५ कषायं समुद्द° C. कषायकरटः समुद्द° A. कर्दमितकरटः समुद्द° E. खंडप्रकीर्णकेसर N.; विकीर्ण A. प्रकीर्ण C. for विप्रकीर्ण; पत्र for पर्ण C.; B. om. मृणाल; N. om. बिस.

सकन्द[1]कोमलाङ्कुरनिकरमनवरतप्रवृत्तकमनीयकर्णतालताण्डवप्रचल[2]जर्जरितजलतरंगावितननीहारमुत्तस्तकुररसारसं सरोवगाह्य विहरति। भवत्वाभाषे[3]। महाभाग नागपते श्लाघ्ययौवनः खल्वसि कान्तानुवृत्तिचातुर्यमप्यस्ति भवतः। किं[4] तु। सापवादम्।

लीलोत्खातमृणालकाण्ड[5]कवलच्छेदेषु संपातिताः
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः।
सेकः सीकरि[6]णा करेण विहितः कामं विरामे पुन-
र्न[7] स्नेहादनरालनालनलिनीपत्त्रातपत्रं धृतम्॥ ३१॥

गीतक्रियामाने मध्यमाङ्गुलिसंमित इत्यमरमाला। नीहारस्तु कुहेलिकेति हारावली॥ कुररः पक्षिभेदः। अनुवृत्तिः सेवा। सापवादं सदोषम्।

१९६–२००. लीलेत्यादि। क्रीडोन्मूलितबिसदण्डकवलसमाप्तिषु विकसत्पद्मसुरभितस्य जलस्य गण्डूषसक्रान्तयः संबन्धाः संपादिता दत्ताः। पुष्यदिति पाठे पुष्टीभवदित्यर्थः। अम्भःकणवता स्थूलहस्तेन सेकः कृतः। तदिदं द्वयं कामं युक्तमेव। दोषमाह। विरामे सरोवगाहविरतौ गमनकाले पुनरकुटिलनालपद्मपत्त्रच्छत्रं न स्नेहाद्धृतम्। एतदयुक्तमित्यर्थः। अतः कान्तानुवृत्तिं न जानासीति भावः॥ पुष्करम्भोरुहाणि चेत्यमरः॥ गण्डूषपदेन स्वयं पीत्वा जलदानं ध्वनितम्॥ नलिनी पद्मिनी पद्म-

---

१ N. om. कोमळ; °रमनोहरम° C. °रागिक्रिरम° B. for °रनिकरम° °लाङ्कुरमाहरन्ननवरत A. E.; N. om. कमनीय; A. E. om. कर्ण; प्रचलकर्णजर्जरि° A. B. E. तांडवबळजर्ज° C. २ जर्झरिततरळजळ N.; नीहारसमुद्रस्त A.; नीहारसमु° E. नीहारं समु C.; क्रीडति for विहरति B. N. ३ °त्वाभाषे B.; °त्वेवमाभाषे A. °त्वेनमाभाषे E.; A. om. महाभाग. ४ A. E. N. om. किं तु; तु after सापवादम् N. ५ खंड for काण्ड B.; संपादिताः A. E. N ६ शीकर° A. E. N. ७ नन् for न N. बाळ for नाल A. B. E.; रूप for पत्त्र N.

[1]कथमवधीरणानीरसं [1]व्रजति। हन्त मूढ एवास्मि योस्मिन्वनेचरे वयस्यमकरन्दोचितं [2]व्यवहरामि। हा प्रियवयस्य

धिगुच्छ्वसित[3]वैशसं मम यदित्थमेकाकिनो
[4]धिगेव रमणीयतां त्वदनुभावभावादृते।
त्वया सह न [5]भाति योत्र दिवसोपि स ध्वंसतां ३९

मित्यमरलता। अरालः कुटिले मत इति मेदिनीकारः॥ आतपात्तायत इत्यातपत्नामित्युचितं पदम्। चलचित्तत्वेन पार्श्वस्थं मित्रमपश्यन्सखेदमाह कथमिति।

२०२–२०५. धिगित्यादि। इत्थमेकाकिनो मम यदुच्छ्वासितवैशसं प्राणधारणदुःखं तद्धिग्वृथा। एकाकित्वमत्र हेतुः। धिगेव रमणीयवस्त्वनुभवान्वृथाभाविन इति मुख्यपाठः। रम्यपदार्थविषयानुभवान्निष्फलोत्पादशीलान्धिक्। रमणीयवस्त्वनुभवादिति पाठे वृथाभाविनोनुभवाद्रम्यवस्तु धिक् निष्फलं तज्ज्ञानमित्यर्थः। धिगेव रमणीयतां त्वदनुभावभावादृत इति पाठे मम सौन्दर्यादिकं धिक्। कुतः। तवानुभावः सहभावस्तत्र भावोभिप्रायस्तं विना। यद्वा। अनुभावे वागङ्गसत्त्वाभिनये भावः सत्त्वं तं विना।

वागङ्गसत्त्वाभिनयेनुभावस्तु स्मृतो बुधैः॥

इति भरतः। भावादित्यृते योगे पञ्चमी॥ त्वया मकरन्देन तया मालत्या च सह यो दिवसो नास्ति सोपि दिवसो विलीयताम्। अन्यत्र मालतीमकरन्दाभ्यां या प्रमोदमृगतृष्णा मम जायते तामपि धिक्। युवाभ्यां विना दैवान्मे

१ निरूप्य before कथम° B.; व्रजसि B. जनयति for व्रजति E.; मूढ एवास्मिन्वने° A.; वनचरेपि वयस्य N. २ न before व्यवह° E.; A. E. om. प्रिय; मकरंद after °वयस्य N. ३ °च्छ्वसितमि N. वैशसं समघटीत्यमे° E. ४ (2nd line)—धिगेविरमणीयवस्त्वनुभवाद्वृथाभाविनः N. धिगेव रमणीयवस्त्वनुभवां वृथाभाविनं G. धिगेव रमणीयवस्त्वनुभवान्वृथाभाविनः Com. °नुभवाद्वृथा° noticed by Com.; तदनुभाव E. ५ न यस्तया न दिवसः स निर्ध्वंसतां A. E. N.; याति for भाति C.

प्रमोद[1]मृगतृष्णिकां धिगपरत्र या जायते ॥

मक० । अये उन्मादमोहान्तरितोपि[2] मां प्रति कुतश्चिद्व्यञ्जकात्प्रबुद्ध एवास्य सहजस्नेहसंस्कारस्त[3]त्संनिहितमेव मां मन्यते । पुरः स्थित्वा । एष पार्श्वचर एव ते[4] मकरन्दो मन्दभाग्यः ।

माध० । प्रियवयस्य संभाव[5]य परिष्वजस्व माम् । प्रियां तु मालतीं प्र[6]ति निराशः परिश्रान्तोस्मि । इति मूर्छति ।

मक० । स[7]हर्षम् । एष संभावयामि जीवितेश्वरम् । विलोक्य सकरुणम् । हा कष्टम् । आ[8]विर्भूतमत्परिष्वङ्गोत्कण्ठ एव निश्चेतनः संवृत्तः । तत्कृत[9]मिदानीमाशाव्यसनेन । सर्वथैव मे नास्ति वयस्य इति युक्तः परिच्छेदः । हा वयस्य

यत्स्नेहसंज्वरवता हृदयेन नित्य-
मावद्धवेपथु विनापि निमित्तयोगात् ।

हर्षोप्याभासीभूत इति भावः । अत एव प्रमोदस्य मृगतृष्णाया रूपकेणालीकत्वमुक्तम् ।

२०६—२१४. उन्माददशायामनिश्चयावतः कुतश्चिदित्युक्तम् । व्यञ्जकात्संस्काराभिव्यञ्जकात् । प्रबुद्ध उद्बुद्धः । संभावय पालय । श्रमाद्वैराग्याच्च मूर्छेत्येतदर्थं निराश इत्युक्तम् । जीवितेश्वरमित्यनेन वुन्या जीवनसामर्थ्युक्ता । निश्चेष्टः प्रलययुक्तजनाकृतिः । परिच्छेदो निश्चयः ।

२१५—२१८. यदित्यादि । स्नेहरूपसंतापवता हृदा विनापि भय-

---

१ प्रमोहमृग N.; या मानुषे A. E. का मानुषे N. for या जायते. २ °तोपि संप्रत्यय मां प्रत्यप्रतिकूलः यतः कुतश्चिद्व्यञ्जकात्प्रबुद्धः A. °तोपि मां प्रत्यविकलः यतः कुतश्चिद् C. °तोपि संप्रत्ययं यतः कुतश्चिद्व्यंजकात्प्रबुद्धः E. ३ तत्संनिहितमेव मां न मन्यते N. ४ स after ते N.; ते वयस्यमकरंदो मंददैवः B. ५ परिष्वज्य संभावय मां N.; B. om. तु. ६ प्रति.निराशपरिश्रमसंवृत्तोस्मि B. निराश एव संवृत्तोस्मि N.; मूर्छितः पतति for इति—°ति B., E. om. इति, N. om. इति—°ति. ७ A. N. om. सर्व; स्थान एष N.; एवं for एष A. E. ८ कष्टं कथमाविर्भूतेन N.; निश्चेष्टः संवृत्तः B.; वृत्तः for संवृत्तः A. E. ९ तत्किमिदानीमा° A. E.; B. om. एव; प्रियवयः C.; सर्वथा नास्ति प्रियवयस्यो मम N.

त्वद्व्यापदो[1] गणयता भयमन्वभावि

तत्सर्वमेकपद एव मम प्रशान्तम्[2] ॥

सखे वरं तै[3] एवातिक्रान्ता मुहूर्तास्तथाविधमपि भवन्तं येषु
चेतयमानमनुभूतवानास्मि। इदानीं तु २२०
भारः कायो जीवितं[4] वज्रकीलं काष्ठाः शून्या निष्फलानीन्द्रियाणि।
कष्टः कालो मां प्रति त्वत्प्रयाणे शान्तालोकः सर्वतो जीवलोकः ॥७॥

कारणेन सकम्पं भयं निश्यमन्वभाव्यनुभूतं यत्तत्सर्वं मम भयं त्वदीयविपत्तीर्गणयतः संभावयत एकस्मिन्क्षणे परिसमाप्तम्। कदा ते किं स्यादित्यादिभयं प्रकृतदशया प्रशान्तमिति भावः। एतत्पक्षे गणयतेति पाठे विधिनेत्यर्थोऽवृ। यद्वा। त्वय्यापदो गणयता हृदा यद्भयमनुभूतं तदधुना गतमित्यर्थः। तथा च त्वन्निमित्तमधुना तु सहेतुकैव विपदिति भावः।

२१९–२२२. वरं मनागिष्टे॥ मनागिष्टे वरं पत्तु कश्चिदाह तदव्ययमिति शाश्वतः॥ अव्ययानामनेकार्थत्वादुक्तोर्थः सुलभ एव। चेतयमानं चेतनावन्तम्। भार इत्यादि। कायो भारो धर्तुमशक्यः। धारणाशक्यतया व्याधिः। जीवनं वज्रकीलकमनुच्छेदात्। अनेन मर्मच्छेदः। मर्मच्छेदेन चिन्ता। दिशः शून्या इति जडता। इन्द्रियाणि नेत्रादीन्यफलानि कार्याक्षमाणि। बाह्यविषयाग्रहाद्दैन्यम्। कालः कष्टो दुःखदः। दैन्येन जीवनाक्षमता। संसारः सर्वत्र प्रशान्तदर्शनः। तथा च त्वां विना न मज्जीवनमिति भावः। त्वत्प्रयाणे तव गमने विनाश इति यावत्। सतिसप्तमीयम्। मां प्रतीति सर्वत्र योज्यम्। यद्वा। पृथिव्यादिद्रव्यनवके प्रधानद्रव्यदूषणेन दोषमाह। तत्र काय इति पृथिव्या जीवन-

१ त्वय्यापदो A. E.; गणयतो भय B.; त्वय for भय N. २ प्रणष्टं for प्रशान्तम् N. ३ तावन्त for त A. E.; अथवा वरतो for सखे वरं त एव N. अतिक्रान्तवन्तः C.; दिवस before मुहूर्ताः B.; C. om. भवंतं; चेतयानम° N.; अहं for अस्मि C.; B. om. अस्मि and has मयेदानीं तु. N. om. इदानीं तु—जीवलोकः. ४ जीवितं शल्यभूतं B. कीलः C.

विचिन्त्य[1]। तत्किं नु खलु माधवास्तमयसाक्षिणा मया भवितव्यमिति जीवामि । भवत्वमुष्माद्गिरिशिखरात्पाटलावत्यां[2] निपत्य माधवस्य मरणाग्रेसरो[3] भवामि । किंचित्परिक्रम्य सकरुणं निवृत्यावलोक्य च । कष्टं भोः कष्टम् ।

तदेतदसितोत्पलद्युतिशरीरमस्मिन्नभू-
न्मम[4] मातिदृढपीडनैरपि न तृप्तिरालिङ्गनैः ।
यदुच्छ्वसितविभ्रमया[5] बत निपीतवत्यः पुरा
नवप्रणयविभ्रमाकुलितमालतीदृष्टयः ॥

मित्यात्मनः काष्ठा इति दिश इन्द्रियाणीतीन्द्रियाणां काल इति कालस्य लोक इति विषयाणां दोष उक्तः । शान्तालोकोनुपभोग्य इत्यर्थः ।

२२३–२३०. अस्तमयो विनाशः । व्याधिदशायामयम् । यदाह ।

निर्वेदश्चैव चिन्ता च दैन्यं ग्लानिः श्रमस्तथा ।
जडता मरणं चैव व्याधौ तु करुणेपि च ॥

पाटलावती नदीभेदः । प्रियदर्शनार्थं निवर्तनम् । मूर्छां दृष्ट्वा सकरुणम् । तादृशं दृष्ट्वा सखेदमाह । तदित्यादि । सखे यत्तवाङ्गं नीलनलिनश्यामं तदेतत् । अस्मिन्नङ्गे गाढासङ्गैरप्यालिङ्गनैर्मम तृप्तिर्नाभूत् । यदङ्गं नवस्नेहविलासव्याकुलमालतीदृष्टय उपचिताद्भुताः पूर्वं निपीतवत्यो नित्यादरेणावलोकितवत्य इत्यर्थः । बत खेदे ।

---

१ A. B. E. om. विचिन्त्य; C. om. खलु; B. N. om. मया; E. om. इति जीवामि; °मित्यतो जीवामि N. २ E. has lost भवत्व°—भवामि; तत्तस्माद् for भवत्वमुष्माद् N.; एव before गिरि A. E.; °लावतीं N.; B. om. पाटलावत्यां; N. om. माधवस्य. ३ °ग्रसरो N. माधवमरणस्याग्रेसरो B.; भविष्यामि for भवामि C.; A. E. N. om. किंचित्परिक्रम्य; परिवृत्य for निवृत्य N.; आलोक्य A. E.; A. E. N. om. च. ४ °स्तमाति° B.; पीडितैरपि B. N; °लिंगितैः B. ५ °सितविभ्रमं मधु निपीत° B. E. N.

श्चर्यम्[1]। एतस्यां तनावचरमे वयसि तावतो गुणसमाहारस्य संनिवेशः कथमिवाभूत्। सखे[2] माधव

आपूर्णश्च कलाभिरिन्दुरमलो यातश्च राहोर्मुखं
संजातश्च घनाघनो जलधरः शीर्णश्च वातोर्जवात्।
निर्वृत्तश्च फलेग्रहिर्द्रुमवरो[3] दग्धश्च दावाग्निना
त्वं चूडामणितां गतश्च जगतः[4] प्राप्तश्च मृत्योर्वशम्॥

तत्परिष्वजेऽहं[5] तावदेवं गतमपि वयस्यम्। अर्थितश्चानेन संप्रत्येवायमर्थः। परिष्वज्य। हा[6] वयस्य विमलविद्यानिधे गुणगुरो मालती-

२२१–२२६. अचरमे नूतने। समाहारो मेलकः। आपूर्ण इत्यादि। सखे त्वं संसारस्य चूडामणीभूतश्च मरणं प्राप्तश्च। अत्र तुल्ययोगितया दृष्टान्तमाह। निर्मलश्चन्द्रः कलाभिः पूर्णश्च राहुग्रस्तश्च। मेघो घनाघनो वर्षुकाब्दश्च वातवेगाद्विशकलितश्च। द्रुमश्रेष्ठः फलेग्रहिः फलभारवान्निर्वृत्तो जातश्च वनाग्निना दग्धश्च। यथा त्वमपीत्यर्थः॥ घनाघनो मत्तगजे वर्षुकाब्दमहेन्द्रयोरित्यमरमाला॥ यद्वा। घनाघनोतिनिबिडः। घनशब्दस्यैवावृत्त्या प्रयोगाद्वदावद इतिवत्। फलेग्रहिर्निपातनात्। फलानि गृह्णाति धारयतीति फलेग्रहिः॥ स्यादवन्ध्यः फलेग्रहिरित्यमरः॥

२३७–२४८. एवं गतं मूर्छितम्। अयमर्थ आलिङ्गनरूपः। मया सहेति शेषः। अपश्चिमो दुर्लभः। पश्चिमावस्था शेषावस्था। आजन्मेत्यादि। हे पद्मास्य जन्मन आरभ्य मयैव समं तुल्यगृहतया मातुः

१ आश्चर्यम् twice C.; एकस्यामचरमे A. एकस्यां तनौ अचरमे B. एकत्राचरमे E. तनाविसावतो N.; वयसि स्थितस्य गुण B. २ स एष माधवः स एव माधवः for सखे माधव B. ३ °ग्रहिद्रुम A. C. ४ जगतां B.; प्राप्तोसि मृत्यो° A. E.; मुख for वशं B. C. ५ चिरं तस्य before तत् A.; A. E. N. om. अहं; एवं for तावत् B.; प्रियवयस्यं N.; एव for च N.; संप्रत्ययमेवार्थः N. ६ C. om हा; प्रियवयस्य N.; हा before गु°, मा°, का° N.

स्वयंग्राहजीवितेश्वर[1] कामन्दकीमकरन्दानन्दनमुखचन्द्र माधव अयमत्र[2] ते जन्मन्यपश्चिमः पश्चिमावस्थाप्रार्थितो मकरन्दबाहुपरिष्वङ्गः। संप्रति[3] मुहूर्तमपि मकरन्दो जीवतीति मैव मंस्थाः।

आजन्मनः सहनिवासितया[4] मयैव
मातुः पयोधरपयोपि समं निपीय[5]।
त्वं[6] पुण्डरीकमुख बन्धुतया निरस्त-
मेको निवापसलिलं पिबसीत्ययुक्तम् ॥

सकरुणं विमुच्य परिक्रम्य[7] च। इयमधस्तात्पाटलावती। भगवति आपगे प्रियस्य[8] सुहृदो यत्र मम तत्रैव संभवो भूयादमुष्य भूयोपि भूयासमनुसंचरः। इति पतितुमिच्छति।

प्रविश्य[9] सौदामिनी। वारयित्वा। वत्स कृतं साहसेन।

स्तन्यं पीत्वाधुनात्वमेको निवापसलिलं प्रेतोदकाञ्जलिं बन्धुसमूहेन दत्तं पिबसीत्येतदयोग्यम्। सहपानार्थमहमप्यागच्छामीत्यर्थः॥ निवापः पितृदानं स्यादित्यमरः॥ आपगा नदी। प्रियस्येत्यादि। मित्रस्य संभव उत्पत्तिस्तत्र ममापि तत्रैव भूयात्। अमुत्रापरस्मिंल्लोके पुनरप्यस्यानुचरो भूयासमित्यर्थः॥ भूयादित्यादौ प्रार्थनायां लिङ्॥

---

१ जीवितेश्वर हा सौन्दर्यविनिर्जितरतिरमणच्छाय हा कामिनीहृदयमन्मथ हा पान्थवपयोनिधिशरच्चन्द्र हा कामन्दकी° A. E.; °नंदचंद्र B.; °नंदनचंद्रमुख C.; °नंदमुग्धचंद्रमः N. २ स for अत्र B.; B. om. अपश्चिमः; N. om. अत्र and जन्मन्यपश्चिमः; °वस्था प्रार्थितो मक° A. B. E. ३ स एव A. E. for संप्रति; सखे before संप्रति C. N.; मैवं A. एवं मा C.; B. om. एवं; कुतः after मंस्थाः N. ४ °वासनया A.; सदैव for मयैव B. ५ निपीतं N. ६ तत् for त्वं N. ७ N. om. परिक्रम्य च; भगवत्यापगे for भगवति आपगे A. E. ८ प्रियसुहृदो A.; अमुत्र for अमुष्य A. ९ सहसा after प्रविश्य A. B.; वारयंती for वारयित्वा B.; वत्स वत्स C.; कृतं कृतं N.; अलं for कृतं A. E.

मक० । विलोक्य । अयि[1] कासि । किमहं त्वया प्रतिषिद्धः ।

सौदा० । आयुष्मन् किं[2] त्वं मकरन्दः ।

मक० । मुञ्च[3] स एवास्मि मन्दभाग्यः ।

सौदा० । वत्स योगिन्यस्मि मालत्यभिज्ञानं च[4] धारयामि । इति बकुलमालां दर्शयति ।

मक० । सोच्छ्वासं[5] सकरुणम् । आर्ये अपि जीवति मालती ।

सौदा० । अथ किम् । अपि[6] च वत्स किमत्याहितं माधवस्य यदनिष्टं व्यवसितोसीत्याकम्पितास्मि[7] । अथ माधवः क्व ।

मक० । आर्ये[8] तमहं प्रमुग्धमेव वैराग्यात्परित्यज्यागतस्तदेहि तूर्णं[9] संभावयावः । इति त्वरितं परिक्रामतः ।

माध० । आश्वस्य[10] । अये प्रतिबोधित एवास्मि केनापि । विचि-

२५६–२६४. अत्याहितं प्रमोहोभूत् । प्रभञ्जनो वायुः । उभयोर्माधवमकरन्दयोः ।

---

१ अये B. अम्ब A. E. for अयि; किमर्थम° for किम° B. N.; प्रतिहतः A. E. वारितः B. for प्रतिषिद्धः २ न before किं B.; N. om. आयुष्मन्; अपि for किं N. ३ मुंच मां स B. मुंच मुंच स C.; अहं after अस्मि E. ४ C. om. च; चावधारयामीति A. चावधारयेति E.; °ज्ञानं च जानामि । इति B.; N. om. इति. ५ सोच्छ्वासकरुणं C. सकरुणं च N.; A. E. N. om. आर्ये; अयि for अपि A. E. ६ A. E. N. om. अपि च. त्वरते मे चेतः after वत्स B. ७ °तोसीत्याशंकितास्मि B. °तोसि भीत्याकंपितास्मि C., A. E. om. इत्या–स्मि; C. N. om. अथ–क्व. ८ भगवति for आर्ये B.; E. om. आर्ये; B. om. वैराग्यात्; N. gives तदेहि &c. to सौदा°. ९ त्वरितं for तूर्णं B.; A. E. N. om. इति; उपसर्पतः for परिक्रामतः N. १० द्विपदिकया before आश्वस्य B.; N. omits this speech here and puts it before भगवन् घोरस्य; आश्चर्यं for आश्वस्य N.; अयं for अये A.; आश्वासित B. बोधित C. for प्रतिबोधित; प्रतिबोधितवानस्मि N.; इत्याघोरघण्टस्य विलोक्य before विचिन्त्य B., A. E. om. विचिन्त्य.

न्य । नूनमस्या[1]यमभिनवजीमूतजलबिन्दुवाहिनः प्रभञ्जनस्यानपे- क्षितास्मदवस्थो[2] व्यापारः ।

मक० । [3]विलोक्य । दिष्ट्या पुनः प्रत्यापन्नचेतनो वयस्यः ।

सौदा० । विलोक्य । संवदत्युभयो[4]र्मालतीनिवेदितः शरीराकारः ।

माध० । भगवन् पौरस्त्यप[5]वन ।

भ्रमय जलदानम्भोगर्भान्प्रमोदय चा[6]तका-
न्कलय शिखिनः केकोत्कण्ठान्कठोरय केत[7]कान् ।
विरहिणि जने मूर्छां लब्ध्वा विनोदयति व्यथा-
मकरुण पुनः संज्ञाव्याधिं विधाय किमीहसे ॥

२६५–२६९. मूर्छैव तं सोपालम्भमाह । भगवन्निति । पौरस्त्य- त्यनेन भिन्नदेशकथनम् । तेन सहजकृत्रिमवैरशङ्का निरस्ता । न विर- हिदुःखमेव न कृत्यम् । अपि त्वन्यदपीत्याह । भ्रमयेत्यादि । जलपूर्णान्मे- घांश्चालय । कोकिलान्हर्षय । केकयोत्कण्ठानूर्ध्वगलान्सेच्छान्वा मयूरा- न्कलय नर्तय । कलेरनेकार्थत्वात् । केतकान्केतकीवृक्षान्कठोरय सजा- रकितान्कुरु । कोरकितत्वेन निम्नोन्नततया कठोरत्वम् । केतकमपि केतक इति शब्दभेदः । अत एव केतकाधानहेतोरिति मेघदूते । यद्वा केतकीपुष्पाणि कठोरय विकासय ॥ तत्करोतीति णिच् । अस्मिन्पक्षे लिङ्गमशिष्यम् । लोकाश्रयत्वाल्लिङ्गव्यत्यय इत्यवधेयम् ॥ विरहिजने मूर्छां प्राप्य व्यथां स्फोटयति सति पुनः संज्ञाव्याधिं चेतनाख्यं रोगं कृत्वा किं त्वमिच्छसि । महता दुःखितदुःखशान्तिः क्रियते । त्वं प्रबोध्य दुःखयसीत्यनर्हम् । अत एवाकरुण इत्युक्तम् । प्रमोदय चातका-

१ A. E. om. अयम् ; बहल before जीमूत B.; A. E. om. बिन्दु. २ °वस्थोयं व्या° A. E.; नूनमयमस्य नवजलभरपवनस्यानवेक्षितास्मदवस्थो N. ३ समुच्छ्वासं for विलोक्य B., A. E. om. विलोक्य. ४ संभवत्युभ° B.; अनयोः for उभयोः N. ५ वायो for पवन N. ६ कोकिलान् or मौलिकान् N. ७ केतकं N.

मक० । सुवृत्तम[1]खिलजन्तुजीवनेन मातरिश्वना ।

माध० । देवे[2] वायो तथापि भवन्तमेवं प्रार्थये ।

विकसत्कदम्बनिकुरम्ब[3]पांसुना सह जीवितं वह मम प्रिया यतः ।
अथ वा[4] तदङ्गपरिवासशीतलं मयि किंचिदर्पय भवान्हि मे गतिः ॥

कृताञ्जलिः प्रणमति ।

नित्यपि पाठः । प्रथमपाठे तु कोकिलप्रमोदो वर्षास्वपि कविसंप्रदाये वर्ण्यत इत्यवधेयम् ।

२७०—२७३. मातरिश्वा वायुः । वातीति वायुरित्युचितपदन्यासेन जीवनयोग्यतोक्ता । तथाप्यनिष्टकरणादपि । विकसदित्यादि । मम प्रिया यतो यत्र तं देशं मम जीवितं प्रफुल्लकदम्बसमूहधूल्या सह प्रापय । घटय मे इति वा पाठः । सा विरहदीना प्रियेतातस्तज्जीवनाय मज्जीवितं नयेति भावः । पांसुना सहेत्यनेन परमाणुरूपं मे मनोपि तत्समूहे गमिष्यतीति न ते प्रयासोपि स्यादित्युक्तम् । नो वा प्रियाङ्गसदावस्थितिहिमं यत्किंचिद्वस्तु मयि तदर्पय देहि । ईरयेति पाठे प्रेरयेत्यर्थः । तदेव मे तापशान्त्यै स्यादिति भावः । अत्र हेतुमाह । यतो मम भवान्गतिराश्रयः । आश्रयस्याश्रितजीवनं युक्तमेवेति भावः । अपि वेति पाठेपि संभावनायाम् ।

---

१ नूनमनेनाखिलजनजीवनेन कृतं जीवनं for सुवृत्त—श्वना B. सुकृतमनेन स. कलजंतु N.; after मातरिश्वना N. adds,

अपि च । एते कैतकसूनसौरभजुषः पौरप्रगल्भांगना-
व्यालोलालकवल्लरीविलुठनव्याजोपभुक्तानना: ।
किं चोन्निद्रकदंबकुट्मलपुटीधूलीलुठत्षट्पद-
व्यूहव्याहृतिहारिणो विरहिणः कर्षंति वर्षानिलाः ।

२ भगवन् before देव B. N.; एतावत् for एवं B. ३ °रम्ब A. B.; पांशुना A.; जीवितं घटय मे प्रिया N. ४ अपि वा B.; किंचिदीरय भवान्नु मे गतिः A. E.; भवांस्तु मे N.

सौदा॰ । सुसमाहितः खल्वभिज्ञानार्पणस्यावसरः । अञ्जलौ मालां मुञ्चति ।

माध॰ । साकूतविस्मयहर्षम् । कथमियमस्मद्विरचिता प्रियतमास्तनोत्साहदुर्ललितमूर्त्तिरनङ्गमन्दिराङ्गनबकुलप्रसवमाला । निरूप्य सहर्षम् । कः संदेहः । तथा हि । स एवायमस्याः ।

मुग्धेन्दुसुन्दरतदीयमुखावलोक-
हेलाविशृङ्खलकुतूहलनिह्नवाय ।

२७५–२८३. समाहितो युक्तः । वाप्युप्रार्थनाप्रकरणात् । प्रियाङ्कसङ्गिमालालोकात्सहर्षत्वम् । यदाह ।

प्राप्ये वाप्यप्राप्ये लब्धेऽर्थे प्रियसमागमे वापि ।
हृदयमनोरथलाभे हर्षः संजायते पुंसाम् ॥

उत्साह उत्सेध उपरिवहनं वा । दुर्ललितमतिप्रिया । अनङ्ग एव मन्दिरमनङ्गस्य वा मन्दिरम् । मुग्धेत्यादि । अस्या मालायाः स एवायं भागो यो लवङ्गिकाया अपि संतोषमकरोत् । अपिपदान्मालत्या अपीत्यर्थः । विषमं ग्रथितं ग्रन्थना यत्र सः । विषमेण ग्रथित इति वा । अत्र हेतुमाह । मुग्धं मनोज्ञमिन्दुकान्तं यन्मालतीमुखम् । यद्वा । विरहाक्षामत्वादिना बालेन्दुवत्कान्तं यत्तदास्यं तदालोके सति हेलया शृङ्गारचेष्टया विशृङ्खलं सर्वत्र वर्तमानं यत्कौतुकं तद्गोपनाय दुर्न्यस्तैः पूर्वप्र-

---

१ सुसमीहितः C.; °ज्ञानस्यार्पणावसरः B. °ज्ञानदर्शनस्या° A. E.; मालामञ्जलौ बकुलमालां B. अंजली बकुलमालामर्पयति N. २ विलोक्य before साकूत B.; विस्मयसहर्षं C.; साकूतं सविस्मयं सहर्षं च N.; प्रियतमायाः स्तनो° C.; प्रियायाः स्तनोद्वहदुर्ललित A. E. स्तनोद्वहनदुर्ललित N. ३ °राङ्गण A. °राङ्कण N. °राङ्गणबालप्रसव E.; पादपकुसुम for प्रसव N.; सम्यङ्निरूप्य N. सत्वरं निरूप्य B. ४ B. N. om. सहर्षं; B. om. अयं; एवमस्याः for स—अस्याः N. ५ हेला for हेला C.

दुर्न्यस्तपुष्पैररचितोपि[1] लवङ्गिकाया-

स्तोषं ततान विषमग्रथितोपि[2] भागः ॥

सहर्षोन्मादमुत्थाय । प्रिये[3] मालति इयं वीक्ष्यसे । सकोपमिव । अयि मदवस्थानभिज्ञे[4] २८५

प्रयान्तीव प्राणाः सुतनु हृदयं ध्वंसत इव

ज्वलन्तीवाङ्गानि प्रसरति समन्तादिव तमः ।

थनादन्यथा दत्तैः पुष्पै रचितः । एतत्तु प्रथमाङ्क एव व्यक्तम् । ननु हेला स्त्रीविषया । यदाह भरतः ।

यौवने त्रिदश स्त्रीणां विकारा नेत्रपातजाः ।

आदौ त्रयोङ्गजास्तेषां दश स्वाभाविकास्तथा ॥

तत्राङ्गजेषु हावहेलालक्षणम् ।

अक्षिभ्रुवोर्विकाराद्याः शृङ्गारस्य च सूचकाः ।

सग्रीवारेचका भावा हावास्तेभ्यः समुत्थिताः ॥

य एव हावः सैवासौ शृङ्गाररससंभवा ।

समाख्याता बुधैर्हेला ललिताभिनयात्मिका ॥

अतो माधवे हेलेत्ययुक्तम् । मैवम् । स्त्रीणामित्यस्योपलक्षणत्वात्पुरुषेपि कामावस्थासाम्याद्धेलावचनात् । यदाह ।

हेला हावश्च भावश्च व्याजो विश्रम्भभाषणम् ।

चाटुः प्रेमाभिसंधानं चकितं च विलासितम् ॥

तत्र रागतः सहसा प्रवृत्तौ हेतुश्चित्तोल्लासो हेलेति । यद्वा । अवलोक्यत इत्यवलोकः ॥ कर्मणि घञ् ॥ इन्दुसुन्दरमालतीमुखेवलोक्या दृश्या या हेला तया विशृङ्खलं यन्माधवस्य कुतूहलं तद्गोपनायेत्यर्थः ।

---

१ पुष्परचनोपि A. C. E. २ ग्रथितैकभागः A. E. ग्रथितो विभागः G. ३ चंडि for प्रिये N.; ननु before इयं B.; विज्ञोक्यसे for वीक्ष्यसे N. ४ मदनावस्था° B.

[1]त्वराप्रस्तावोयं न खलु परिहासस्य विषय-
स्तदक्ष्णोरानन्दं वितर मयि मा भूरकरुणा[2] ॥

[3]सर्वतो दृष्ट्वा सनिर्वेदम्। कुतोत्र मालती। बकुलमालामुद्दिश्य।
[4]अयि प्रियाप्रणयिनि बकुलमाले उपकारिण्यसि। अतः स्वागतं भवत्याः।

[5]निष्प्रत्यूहाः प्रियसखि यदा दुःसहाः संबभूवु-
[6]र्देहोद्दाहव्यसनगुरवो मन्मथोन्माथवेगाः।

२८४–२८९. संकल्पलिखितप्रियादर्शनाद्दर्षः। दर्शनाप्राप्त्या पुनराह। नन्विति। अत्राप्यलाभादुपालम्भस्तेपीति। परिहासाददर्शनमाशङ्क्य तदनवसरमाह। प्रयान्तीत्यादि। प्राणाः प्रयान्तीव सर्वतः शून्यत्वात्। हे सुतनु मनो ध्वंसत इव। मोहात्। अङ्गज्वलनेमतिदाहात्। एतेन व्याधिरुक्तः। सर्वतस्तमः प्रसरतीव। अनेन जडता। सकलेन्द्रियाणामग्रहात्। जडतानन्तरं मरणशङ्कायामाश्वास एव युक्त इत्याह त्वरेति। खलु निश्चये। यत एवं ततो नेत्रप्रीतिं देहि। स्वं दर्शयेत्यर्थः। मद्विषये निर्दया मा भविष्यसि। यद्वा। अकरुणा मा भूर्न भवसि॥ माङि लुङिति कालसामान्ये लुङ्॥ पूर्वकरुणेदानीमपि निर्वाह्यतामित्यर्थः। इवशब्द उत्प्रेक्षायाम्।

२९२–२९६. निरित्यादि। यदा मालत्याः पद्माक्ष्याः कामोन्मादोद्वेगा निर्विघ्ना अत्यर्थं दुःसहा अङ्गदाहदुःखमहान्तस्तद्दुःखोपदेशकाराः संबभूवुः संभूयोद्गतास्तत्र काले तस्यास्त्वदालिङ्गनमेव शीघ्रं प्राणरक्षकमभूत्। अत एव मदालिङ्गनतुल्यः। उन्माथ उन्मथनमुद्वेग इति यावत्।

---

१ प्रिये for त्वरा B. २ भूरकरुणा N. ३ इति दिशोवलोक्य for सर्वतो दृष्ट्वा B.; प्रति for उद्दिश्य B. N. उपविश्य बकुलावलीमुद्दिश्य C. ४. N. om. अयि प्रिया—भवत्याः; अये for अयि C.; यतः before अतः A.; B. om. अतः; C. om. अतः स्वागतं भवत्याः. ५, निष्प्रत्यूहं A. ६ देहे दाह E. देहोन्मादप्रथनगुरवो B. ॰प्रथन for ॰व्यसन noticed by Com.; ॰न्मादवेगाः N.

तस्मिन्काले कुवलयदृशस्त्वत्समाश्लेष एव
प्राणत्राणं प्रगुणमभवन्मत्परिष्वङ्गकल्पः ॥ २९९

सकरुणं निर्वर्ण्य ।

आनन्दमिश्रमदनज्वरदीपनानि
गाढानुरागरसवन्ति तदा तदा च ।
स्नेहाङ्कनानि मम मुग्धदृशश्च कण्ठे
कष्टं स्मरामि तव तानि गतागतानि ॥ ३००

इति हृदये निधाय मूर्छति ।

मक० । उपसृत्य वीजयन् । सखे समाश्वसिहि समाश्वसिहि ।

माध० । आश्वस्य । मकरन्द किं न पश्यसि कुतोपि सहसैव मा-

प्रगुणमिति पाठे प्रकृष्टगुणमित्यर्थः । क्रियाविशेषणं वा । कामदुःखोद्वेगस्य प्रियसङ्गस्यालाभादाविष्टत्वम् । मालतीप्रणयित्वात्प्रियसखि इति । दुःसहत्वमधृतिकरणात् । उद्दाह उद्गतदाहः । व्यसनस्थाने व्यथन इति पाठे व्यथनं पीडा । अधुना मालां विनास्याः कथं जीवनं भविष्यतीति भावः । निर्वर्ण्य निरूप्य ।

२९७–३०५. आनन्देत्यादि । मम मालत्याश्च कण्ठे तव तानि गतागतानि स्मरामि । स्मरणस्यातिदुःखदत्वात्कष्टम् । तदा तदा तस्मिंस्तस्मिन्काले । तत्र चोरिकाविवाहात्पूर्वं मालतीकण्ठगतेति गतं लवङ्गिकाबुद्ध्या माधवकण्ठमागतेत्यागतमित्येकम् । चोरिकाविवाहे मालत्या माध-

---

१ प्रगुणनमभून्म° A. E.; त्राणं त्वरितमभवन्म° B. २ आनंदमंदमदन B. आनंदनानि मदन N. ३ तदा च तस्याः E. ४ स्नेहाकराणि मम A. E. स्नेहाकमिश्रितममुग्ध B. स्नेहाङ्कनानि मम G. ५ A. E. N. om. इति; विधाय E.; मूर्छितः पतति B. ६ वीजयति B.; वयस्य for सखे B. ७ निश्वस्योपविश्य । सखे मकरंद B.; वयस्य for मकरंद N.; नं after पश्यसि B.; कुतोपि मालतीस्नेहस्य हस्तलाभः A. E. मालतीस्नेहस्वहस्तस्य लाभः N. मालतीस्नेहवल्ली बकुलमालाबाली C.

छतीत्स्नेहं वहतो बकुलदाम्नो लाभः । तत्कथं नु[1] मन्यसे कुत एतदिति ।

मक० । वयस्य[2] इयमार्या योगीश्वर्यस्य मालत्यभिज्ञानस्योपनेत्री ।

माध० । विलोक्य सकरुणं[3] कृताञ्जलिः । आर्ये प्रसीद कथय जीवति मे प्रिया[4] ।

सौदा० । वत्स[5] समाश्वसिहि समाश्वसिहि जीवति सा कल्याणी ।

माधवमकरन्दौ[6] । समुच्छ्वस्य । आर्ये यद्येवं तत्कथय क एष वृत्तान्त इति ।

सौदा० । पुरा किल[7] करालायतने मालतीमुपहरन्नघोरघण्टः करवालपाणिमाधवेन[8] व्यापादितः ।

वकण्ठनीतातो गतमथ तन्मुखदर्शनात्स्वकण्ठेऽर्पितेत्यागतमिति द्वितीयम् । पुनस्तत्र प्रणयवशान्माधवेन मालत्यै दत्तेति गतमिदानीं तु सौदामिन्या मालतीसकाशादानीय दत्तेति त्रीणि गतागतानि । अत एव बहुवचनम् । कीदृशानि । तद्दशायामन्तरान्तरा हर्षलाभादानन्दमिश्रितकामतापप्रकाशनानि । दृढानुरागरसयोगीनि । स्नेहस्याकरो येषु तानि । स्नेहं प्रीतिमाकुर्वन्ति व्याकुर्वन्तीति स्नेहाकराणि ॥ कृञो हेत्वित्यादिना टप्रत्ययः ॥ तदा तदा चेति चकारात्कालान्तरपरिग्रहः । आर्या मान्या ।

---

१ न for नु A.; तत्कथं मन्ये B. तत्किं मन्यसे N.; किम् for कुतः A. N. २ B. om. वयस्य; योगीश्वरि A. B. C.; N. om. अस्य; नेत्री for उपनेत्री A. ३ B. om. सकरुणं, सकरुणमंजलिं बद्ध्वा N.; प्रसीद प्रसीद B.; N. om. प्रसीद; अपि before जीवति B. ४ प्रियतमा for प्रिया C. ५ वत्स समाश्वसिहि जीवति E. वत्स समाश्वसिह्याश्वसिहि C.; कल्याणिनी for कल्याणी A. C. E. ६ माध० । आर्ये यद्येवं B.; दृष्ट्वोच्छ्वस्य for समुच्छ्वस्य A. E.; N. om. आर्ये and तत्; सर्वतः C. सर्वं नः N. after कथय; कथम् for कः A. E. ७ A. E. N. om. किल; पुरा हि किल B.; आहरन् for उपहरन् N.; कृपाण for करवाल N. ८ पाणिना माधवेन A. E.

माध०। [1] सावेगम्। आर्ये विरम विरम विज्ञातो वृत्तान्तः।

मक०। [2] सखे क इव।

माध०। सखे किमन्यत्। सकामा कपालकुण्डलेति।

मक०। आर्ये अप्येवम्।

सौदा०। एवं यथा विदितं[3] वत्सेन।

मक०। [4] भोः कष्टम्।

कुमुदाकरेण शरदिन्दुचन्द्रिका
यदि रामणीयकगुणाय[5] संगता।
सुकृतं[6] तदस्तु कतमस्त्वयं विधि-
र्यदकालमेघविततिर्व्ययूयुजत्[7]।

माध०। [8] हा प्रिये मालति कष्टमतिबीभत्समापन्नासि।
[9] कथमिव तदाभवस्त्वं कमलमुखि कपालकुण्डलाग्रस्ता।

२१५–२२२. सकामा मदपकारेण सिद्धप्रतिज्ञेत्यर्थः। कुमुदेत्यादि। कुमुदसमूहेन यदि शरच्चन्द्रचन्द्रिका सौन्दर्यगुणार्थं संगता प्राप्ता तत्सुकृतं शोभनकरणमस्तु। द्वयोरपि रम्यत्वात्। अयं पुनः कः प्रकारः कुत्सितप्रकारो वा यदकालमेघपङ्क्तिर्व्ययूयुजद्वियोजयामास विच्छेदं कृतवतीत्यर्थः। ध्वनिनात्र कुमुदाकरो माधवश्चन्द्रिका मालती मेघसंततिः कपालकुण्डलेत्युक्तम्।

२२३–२२५. अतिबीभत्समिति। उद्वेगहेतुकपालकुण्डलादर्शनाद्बीभत्सः। यदाह।

---

१ सोद्वेगं A., E. om. सावेगं; अये for आर्ये N.; A. E. om. one विरम; परिज्ञातो A. ज्ञातो N. for विज्ञातो २ A. E. om. सखे. ३ निवेदितं for विदितं A. E. ४ कष्टं भोः कष्टं A. E.; कष्टं भोः twice N. ५ गुणेन N. ६ सुकृते यदस्तु C. ७ वितति व्ययूयुजत् N. विततिर्व्ययूयुजत् B. ८ B. om. हा and कष्टमति. ९ कथमपि तदा° B.; तदा भवेस्त्वं C.

उत्पातधूमले[1]खाक्रान्तेव कला शशधरस्य ॥

भगवति कपालकुण्डले

निर्माणमेव हि [2]तदादरलालनीयं

मा पू[3]तनात्वमुपगाः शि[3]वतातिरेधि ।

नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा

मूर्ध्नि स्थितिर्न [4]मुसलैरवताडनानि ॥

उद्वेजनैश्च बहुभिर्बीभत्सरसः समुद्भवति ॥

कथमित्यादि । त्वत्कवलिता हे पद्ममुखि तदा त्वमपि कथमभवः । मयात्कथं त्वमासीः किं त्वयोक्तं कस्ते त्राताभूदित्यादिज्ञापनाय कथमिति सामान्यनिर्देशः । केतुकवलिता चन्द्रकलेव । एवदुपमया बीभत्सजविषादसंभवा ग्लानिरप्युक्ता । यदाह ।

अपस्मारस्तथोन्मादो विषादो मद एव च ।

मृत्युर्व्याधिर्भयं चैव भावा बीभत्ससंभवाः ॥

३२६–३३०. स्त्रीबालं नैव घातयेदिति निजधर्मं जानत्यपि सा घातितेति सोल्लुण्ठमाह भगवति इति । निर्माणमित्यादि । तन्निर्माणं मालतीरूपादिकमेव तदादरेण रक्षणीयं भवति । रम्यत्वादेव । पूतनात्वं राक्षसीत्वं तन्नाशेन मोपगा मा गमिष्यसि । यद्वा । मांसं मे त्वया भक्षयितव्यं किमिति चिन्तकत्वं पूतनात्वम् । पूतनत्वमिति पाठे राक्षसत्वमित्यर्थः ॥ पूतना राक्षसीभेदे हरीतक्यां च पूतनेति विश्वः ॥ शिवतातिः कल्याणकर्त्र्येधि भव । शिव इत्यवोधीरिति पाठे तन्निर्माणं शिवे कल्याणनिमित्तमित्यज्ञासीः । शिवतामुपैतीति पाठे तन्निर्माणम् ॥ कर्तृ ॥ शिवतां कल्याणत्वं गच्छति । अतः पालनमस्य । भद्रवस्तुपुरस्कारः स्वभावादेवेत्याह । मनोहरस्य

---

१ रेखा for लेखा N.; लेखाभ्रान्तेव B. २ तदा तव माननीयं A. E. तदा तव लालनीयं N. ३ पूतनत्वमु° G. शिवतातिरीधि A. C. E.; °मुपगाः शिवतातिरेव N.; शिव इत्यबोधीः and शिवतामुपैति noticed by Com. ४ चरणैरवताडनानि A. चरणैरवताडितानि C.

सौदा० । वत्स[1] अलमावेगेन ।

अकरिष्यदसौ पापमतिनिष्करुणैव[2] सा ।

नाभविष्यमहं[3] तत्र यदि तत्परिपन्थिनी ॥

उभौ[4] । प्रणम्य । अतिप्रसन्नमार्यापादैः । तत्कथय का पुनस्त्वमस्माक-मेवंविधा बन्धुः ।

सौदा० । ज्ञास्यथः[5] खल्वेतत् । उत्थाय । इयमहमिदानीं

गुरुचर्यातपस्तन्त्रमन्त्रयोगाभियोगजाम्[6] ।

इमामाक्षेपिणीं[7] सिद्धिमातनोमि शिवाय वः ॥

इति[8] समाधवा निष्क्रान्ता ।

व्यातस्य सुगन्धस्य वा पुष्पस्य मस्तके धृतिः स्वभावसिद्धा । न पादैः पीडनानि स्वभावसिद्धानीत्यर्थः ।

३३२–३३४. अकरिष्यदित्यादि । असौ कपालकुण्डला पापं वद्ध-धरूपमकरिष्यदेव । अतिनिष्करुणा यतः सा । यदि तत्र स्थाने वधे वा तस्या विरोधिनी नाहमभविष्यम् ॥ क्रियातिपत्तौ लृङ् ॥ बुद्धिप्रत्यक्षतया-साविति । अतिप्रसन्नं प्रसादः कृतः ।

३३६–३३८. ज्ञास्यथः । युवामित्यर्थात् । गुर्वित्यादि । गुरुचर्या गुरुसेवा गुर्वी चर्या विशिष्टमनुष्ठानम् । तपश्चान्द्रायणादि । तन्त्रं मण्ड-लवर्तनादि । मन्त्रस्तारप्रभृतिदेवीनां तन्त्रस्य वागमस्य वा मन्त्रः । योगः समाधिः । एष्वभियोगादभ्यासाज्जातामिमामाकर्षणीं सिद्धिं युष्माकं कल्याणाय विस्तारयामि ।

---

१ N. om. वत्स. २ पापं यतो निष्ककरुणैव B. ३ मा भविष्यमहं A. ४ माधवम-करन्दौ for उभौ A. E.; यद् before अति N.; चरणैः for पादैः A. E.; तत्कथय कथं पुनस्त्वमेवास्माकं बन्धुः A. अस्माकमकारणबंधुः B.; N. om. विधा. ५ ज्ञास्यथ C. E.; ज्ञास्यते N. ६ मंत्रचर्याभियोगतः C. मंत्रसिद्ध्यभियोगजां N. ७ °क्षेपिणीं विद्यां विदधामि शिवाय B. °क्षेपणीं विद्यामातनोमि A. E. इमामाकर्षिणीं सिद्धिमा° N. ८ N. om. इति; सौदामिनी after समाधवा N.

मक० । आश्चर्यमाश्चर्यम्[1] ।

व्यतिकर इव भीमस्तामसो वैद्युतश्च
क्षणमुपहत[2]चक्षुर्वृत्तिरुद्भूय शान्तः ।

विलोक्य सभयम् ।

कथमिह न वयस्यस्तत्किमेतत्[3] । विचिन्त्य । किमन्य-
त्प्रभवति हि महिम्ना[4] स्वेन योगीश्वरीयम् ॥

सवितर्कम् । किमर्थमर्थोनर्थ[5] इति संप्रति प्रमुग्धोस्मि ।

अपि[6] च । अस्तोकविस्मयमपस्मृतपूर्ववृत्त-
मुद्भूतनूतनभय[7]ज्वरजर्जरं नः ।

३४१–३४६. व्यतिकर इत्यादि । मालतीवार्ताया अप्यज्ञानादयं तामसोन्धकारजः । अत एव भीमः । तज्जीवनज्ञानाद्वैद्युतश्चायं विद्युत्संबन्धी । व्यतिकरः संपर्कः । अत एवानन्दाश्रुसंभारेणोपहतनेत्रवृत्तिः । कीदृशः । क्षणमुद्भूय शान्तः । अत एव विद्युद्विद्योतो वितर्कः । कथमिह स्थाने वयस्यो माधवोपि नास्ति । तत्किमिदं क्व गतः केन वा स नीत इति विचिन्त्येत्यर्थः । निर्णयमाह । अन्यत्किम् । यत इयं योगीश्वरी निजस्य प्रभावेण प्रभवति । अनया नीत इति भावः । संशय्याह किमर्थमिति । सौदामिनीनयनेर्थः प्रयोजनं कपालकुण्डलानयनेनर्थ इति भावः ।

३४७–३५२. अस्तोकेत्यादि । अस्माकं चित्तम् ॥ कर्तृ ॥ हर्षशोकाभ्यां शबलत्वं मिश्रत्वं गच्छति । कीदृशम् । अनल्पाश्चर्यम् । एकदैव नानारससंभवात् । अपस्मृतं विस्मृतं पूर्ववृत्तं मालतीहरणरूपं

---

१ N. om. one आश्चर्यम्. २ °मुपगत N. ३ तत्किमेतद्विचिन्त्य । विचिन्त्य । प्रभवति B. ४ हि किमन्यत्स्वेन योगे° E.; योगेश्वरी A. B. ५ तत् before किम् B.; किमयमनर्थ इति A. E.; C. om. संप्रति; मुग्धोस्मि A. संमुग्धोस्मि C. मूढोस्मि N. ६ किं च N.; विचिंत्य after अपि च N. °यमविस्मृत N. ७ भय for भव B.; जर्झरं N.

एकक्षणत्रुटितसंघटित[1]प्रमोह-
मानन्दशोकशबलत्वमुपैति चेतः ॥

तदत्र[2] कान्तारगहने सहास्मद्वर्गेण प्रविष्टां भगवतीमन्विष्य तस्या वृत्तान्तमेनं कथयामि[3]। इति निष्क्रान्तः।

॥ [4]सौदामिनीदर्शनो नाम नवमोऽङ्कः ॥

यत्र। अत एवानन्दः। उद्भूतं नवं भयं माधवापकारशङ्काकृतं तेन ज्वरेण जीर्णम्। अत एव शोकः। यद्वा। माधवानवलोकनेनोद्भूतनवशङ्काज्वरजर्जरतया शोकः। एकक्षण एव त्रुटितो घटितश्च प्रमोहो यत्र तत्। मालतीलाभसंभावनया त्रुटितो माधवापकारसंभावनया घटित इति भावः। अत एवाश्चर्यम्। स्तोकशब्दोऽल्पपर्यायः। अस्मद्वर्गेण मदयन्तिकालवङ्गिकाभ्याम्। विप्रनष्टामिति कस्मिंश्चित्पुस्तके पाठो दृश्यते तत्रादृश्यमानामित्यर्थः। भगवतीं कामन्दकीम्। अनेनाग्रिमाङ्कावतारस्यापि सूचनादङ्कावतारोऽयम्।

प्रासूत यं रत्नधरोतिविद्यो विद्योतिविद्या दमयन्तिकापि।
जगद्धरं तत्कृतटिप्पणेऽङ्को गलन्नवीनो नवमोऽनवद्यः ॥

॥ इति नवमोऽङ्कः ॥

---

१ संघटितप्रबोध N. संघटितप्रमोद B. २ तदत्रैव A. E.; विप्रनष्टां for प्रविष्टां noticed by Com.; उपसृत्य for अन्विष्य N.; मालतीमाधव for तस्याः B., N. om. तस्याः. ३ कथयिष्यामि A. E. निवेदयामि B. for कथयामि; सर्वे च after निष्क्रान्तः B.; निष्क्रान्ताः सर्वे C. ४ A. C. E. N. om. सौदामिनीदर्शनो नाम, इति मालतीमाधवे नवमोऽङ्कः A. नवमोऽङ्कः समाप्तिमगात् C.

॥ दशमोऽङ्कः ॥

ततः [1]प्रविशति कामन्दकी लवङ्गिका मदयन्तिका च ।

काम० । सकरुणं [2]सास्रम् । हा वत्से मालति मदङ्कालंकारिणि क्वासि देहि मे [3]प्रतिवचनम् ।

[4]आ जन्मनः प्रतिमुहूर्तविशेषरम्या-
ण्याचे[5]ष्टितानि तव संप्रति तानि तानि ।
चाटूनि [6]चारुमधुराणि च संस्मृतानि
देहं दहन्ति हृदयं च विदारयन्ति ॥

१–७. सहास्मद्वर्गेणेत्यव्यवधान एव सूचनात्तत्प्रवेशमाह । तत इति । मालतीविश्लेषं श्रुत्वा विलपति हेत्यादि । आ जन्मन इत्यादि । जन्मन आरभ्य प्रतिक्षणाधिक्यमनोज्ञानि तव तानि तानि पूर्वानुभूतान्याचेष्टितानि विनयादीनि संस्मृतानि सन्ति मेऽङ्गं दहन्ति चित्तं च दारयन्ति । अनेन बाह्या मानसी च पीडोक्ता । तथा चाटूनि वाक्कौशलानि स्मृतानि दाहादिकं कुर्वन्ति । विनयादीनामद्वेषकारित्वया रम्यत्वम् । चाटूनि कीदृशानि । चारूणि शोभावन्ति मधुराण्यनुल्बणानि च । यदाह ।

सर्वावस्थाविशेषेषु दीप्तेषु ललितेषु च ।
अनुल्बणत्वं चेष्टानां माधुर्यमिति संज्ञितम् ॥

---

१ प्रविशन्ति कामंदकीमदयंतिकालवंगिकाः B. २ A. E. om. सकरुणं; C. om. सास्रम्; N. om. सकरुणं सास्रम्; हा after मालति N.; मदलंकारकारिणि A. B. C. ३ N. om. प्रति. ४ आ जन्मनःप्रभृति यानि विशेष B. ५ °चेष्टितानि वचनानि च चाटुनेत्रे E. ६ चारुमधुराणि N.

अपि च[1] । पुत्रि

अनियतरुदित[2]स्मितं विराजत्कतिपयकोमलदन्तकुड्मलाग्रम् ।
वदनकमलकं शिशोः स्मरामि स्खलद[3]समञ्जसमुग्धजल्पितं ते ॥ १०

इतरे[4] । सास्रम् । हा पिअसहि सुप्पसण्णमुहअन्दसुन्दरि कहिं गदासि को वा सिरीसकुसुमसुउमारस्स दे सरीरस्स देव्वदुव्विणअप-

---

९–१०. अनियतेत्यादि । बालायास्तवास्यपद्मं स्मरामि । कीदृशम् । अस्थिरे क्रन्दनहास्ये यत्र तत् । शोभमानकिंचिन्मृदुदशनकलिकाग्रम् । सम्यक्स्थानप्रयत्नाभावात्स्खलत् । तत्त्वहान्यासमञ्जसं संख्यातिक्रमादज्ञानाद्वासमञ्जसम् । मुग्धमर्थाभावात् । जल्पितं मन्दोक्तिर्यत्र तत् । सर्वत्र शैशवमेव हेतुः ॥ कमलकमित्यत्राल्पार्थे कन् ॥ सम्यगञ्जसा तत्त्वेन वर्तत इति समञ्जसमिति ॥ अञ्जसा तत्त्वतूर्णयोरिति विश्वः ॥ मञ्जु जल्पितमिति पाठे मञ्जु मनोहरम् ।

१३–१८. अनेकाकिन्या एकमात्रस्वरूपायाः । आदावुपस्थितोऽथास्तमितो महोत्सवो यत्र सः । अभिनवेत्यादि । अभिनवे रागेऽनुरागे रसे इच्छा यत्र । यद्वा । अभिनवरागो नूतनासक्तो रसः शृङ्गारो यत्र । कुर्वं कौतुके हर्षो नर्मोत्सवो वा यत्र । सोयं भवतोर्युवयोः परिष्वङ्ग आलिङ्गनं नियतिर्दैवं सैव महावात्या तयाभिहतः । लवली लताभेदः । लवङ्गो वृक्षभेदः । तयोः परिष्वङ्गः संपर्क इव । अभिनवो लौहित्यरसो यत्र सः । रस

---

१ आकाशे before अपि च A. E.; C. N. om. पुत्रि. २ रुचिर for रुदित N.; कुड्मला° A. N. ३ °दसमञ्जसमञ्जजल्पितं तत् A. °दसमंजसमंजुमुंजितं ते E. ४ मदयन्तिकालवङ्गिके for इतरे A. E.; इतराः N.; C. N. om. सास्रम्; आकाशे after सास्रम् A. E.; मुहचन्द A. ५ N. om. गदा; सुकुमारस्स C.; C. om. सरीरस्स, सरीरस्साअं A.; दुइदेव्व C. अत्ति देव्व E. को वा दे सरीरअणस्स विहिदुव्विलाससारिणामो N.

रिणामो एक्कलिआए[1] उवणदो । महाभाअ माहव उवत्थिदत्थमिदम- हूसओ दे जीअलोओ संवुत्तो । (क)

काम० । सविशेषखेदम्[2] । हा वत्सौ ।

अभिनवरागरसोयं[3] भवतोः कृतकौतुकः परिष्वङ्गः ।
लवलीलवङ्गयोरिव नियतिमहावात्ययाभिहतः[4] ॥ ७

लव० । सोद्वेगम्[5] । हदास वज्जमअ सव्वहा णिसंसोसि हिअअ । (ख) इति हृदयमाहत्य पतति ।

मद० । सहि[6] लवङ्गिए णं भणामि क्खणमेत्तअं वि दाव समस्सस । (ग)

(क) हा प्रियसखि सुप्रसन्नमुखचन्द्रसुन्दरि क गतासि कीदृशः शिरीषकुसुमसुकुमारस्य ते शरीरस्य दैवदुर्विनयपरिणाम एकाकिन्या उपनतः । महाभाग माधव उपस्थितास्तमितमहोत्सवस्ते जीवलोकः संवृत्तः ।

[ख] हताश वज्रमय सर्वथा नृशंसमसि हृदय ।

[ग] सखि लवङ्गिके ननु भणामि क्षणमात्रमपि तावत्समाश्वसिहि ।

आर्द्रता । कृतं कौतुकं कुतूहलं द्रष्टृणां येन सः ॥ रागोनुरागे क्लेशे च इति विश्वः । शृङ्गारादौ द्रवे चापीच्छायामप्यर्थे रस इति भरणिः । कौतुकं त्वभिलाषे स्यादुत्सवे नर्महर्षयोः । कुतूहलेपि तत्प्रोक्तमिति मेदिः

---

१ अक्कलिआए A. अक्कोलिआए E. एक्कलाए B.; उवगदो A.; हा before महाभाअ C. N.; महाणुभाअ B. महाभाग E.; उवत्थि° A. E.; °दत्थमिद C. उवट्ठिअत्थमिअमहूसवो जीवलोओ N. २ B. om. सविशेषखेदम्. ३ रसरसोयं B. ४ वात्यया विहतः A. E. N. ५ सावेगं B. N.; हा हदास B.; सव्वथा A. E.; णिसंसोसि A. C. णिरासोसि E.; हद before हिअअ. ६ सखं before सहि C.; N. om. सहि; लवङ्गिके A. °मेत्तकम्पि A. E. °मेत्तं किं पि B.; समस्सस E. समस्ससिहि N.

लव० । सहि किं करोमि दिढवज्जलेवपडिबद्धणिच्चलं विअ जीविदं[2] ण मं परिच्चआदि । (क)

काम० । वत्से मालति जन्मनः[3] प्रभृति वल्लभा ते लवङ्गिका तत्किमुज्जिहानजीविता[4] वराकीं नानुकम्पसे ।

इयं हि । उज्ज्वलालोकया स्निग्धा त्वया त्यक्ता न राजते ।
मलीमसमुखी वर्तिः प्रदीपशिखया यथा ॥ ५

कथं च[5] कल्याणि कामन्दकीं त्यजसि नन्वकरुणे मदीयचीवरोष्मणैव ते प्रगुणीकृतान्यङ्गानि ।

[क] सखि किं करोमि दृढवज्रलेपप्रतिबद्धनिश्चलमिव जीवितं न मां परित्यजति ।

नीकारः ॥ तदिहाचेतनोपमया तयोरपि बालयोर्वृक्षविवाह इव मया विवाहोऽप्यकारि दैवेन स न सोढ इत्युक्तम् । देशान्तरनयनान्मियतेर्वा त्वया सह रूपकम् । अत्र नृशंसं नाशकम् ।

२२. अत्र प्रतिबद्धं घटितमत एव निश्चलम् ।

२५–२९. उज्जिहानमूर्ध्वं गतम् । कण्ठोपगतमिति यावत् । उज्ज्वलेत्यादि लवङ्गिकामुद्दिश्य । त्वया त्यक्तेयं न शोभते प्रदीपशिखया त्यक्ता वर्तिरिव दशेव । उज्ज्वल आलोको दर्शनं यस्यास्तया । शिखापक्षे आलोक उद्द्योतः । स्निग्धा प्रीता । स्नेहवती तैलादियोगात् । मलीमसं म्लानं मुखमाननं यस्याः सा । मलीमसं दग्धतया श्यामं मुखमग्रं

---

१ मदर्थेनिए for सहि N.; करोमि A. N.; दढ for दिढ C.; ज्जेव E.; पडिवद्धं B. पडिबंध N.; B. om. विअ, व C. मम A. E. for विअ. २ °विअं N.; N. om. मं. ३ जन्मनः प्रभृति A. आ जन्मनःप्रभृति वल्लभतमा ते B.; दुर्लभतरा for वल्लभा N. ४ एनां A. एतां C. E. after किम्; वराकीं नानुमन्यसे C. ५ A. E. om. च; जहासि A. E. परित्यजसि C. for त्यजसि; चीरोष्म° E. चीरांचलोष्म° N.

स्तन्यत्यागात्प्रभृति सुमुखी[1] दन्तपाञ्चालिकेव
क्रीडायोगं तदनु विनयं प्रापिता वर्धिता च ।
लोकश्रेष्ठे गुणवति वरे स्थापिता त्वं मयैव
स्नेहो मातुर्मयि[2] समधिकस्तेन युक्तस्तवापि ॥

सवैलक्ष्यम् । चन्द्रमुखि[3] संप्रति निराशास्मि ।

यस्याः सा च । प्रगुणीकृतान्यृजूकृतानि । उत्पत्त्यनन्तरं नाडीनां मृदु-द्रव्येणर्जुकरणात् । यद्वा । प्रगुणता पुष्टिः ।

३०—३३. स्तन्येत्यादि । तेन हेतुना मातुः सकाशादधिकः स्नेहोयं मयि तव युक्तः । यद्वा । तेन हेतुनायं वियोगस्तव युक्त इति कौ-लुण्ठम् । यतः स्तनपानत्यागादारभ्य क्रीडायोगं खेलम् । यद्वा । क्रीडा कला योगो विद्याप्रयोगस्तं प्रापिता । ततः पश्चाद्विनयमनौद्धत्यं प्रापिता वृद्धिं प्रापिता च । दन्तपाञ्चालिकेव दन्तमयकृत्रिमपुत्रिकेव । जनेषु श्रेष्ठे शोभादिगुणयुक्ते जामातरि त्वं स्थिरीकृता । परिणयात् । मयैव न तु पित्रादिनेत्यर्थः । बाल्य एव कान्तिमत्त्वात्सुमुखीत्युक्तम् ॥ पाञ्चा-लिका पुत्रिकायामिति विश्वः ॥ पाञ्चालिकापि क्रीडादिकं कार्येव [illegible] प्रसिद्धमेव । विद्याभ्यासो बाल्य एव स्त्रीणाम् । यदाह ।

बाल्येधीयीत विद्यां स्त्री कामशास्त्रादिकं पुनः ॥

पुरुषगुणा अपि भरते ।

शोभा विलासो माधुर्यं स्थैर्यं गाम्भीर्यमेव च ।
ललितौदार्यतेजांसि पौरुषेया गुणा अपि ॥

३४—३८. करुणस्नेहाद्रिक्तवता । अकारणेत्यादि । [illegible] मया तव पुत्रो न दृष्टः । कीदृशः । अकारणेनालक्षितहेतुकं [illegible]

---

१ प्रभृति सुखिनी दंत B. २ मम for मयि B.; तथा for तव E. ३ [illegible] N. °शासि E.

अकारणस्मेरमनोहराननः ३५
शिखाललाटार्पितगौरसर्षपः[1]।
तवाङ्कशायी[2] परिवृत्तभाग्यया
मया न दृष्टस्तनयः स्तनंधयः॥ ८

लव०[3]। भअवदि पसीद णीसहह्मि संपदं जीविदुव्वहणेण। साहं इमादो गिरिसिहरादो[4] अत्ताणअं अवधुणिअ णिव्वुदा भविस्सं। तहा[5] मे भअवदी आसिसं करेदु जेण जम्मन्तरेवि पिअसहिं पेक्खिस्सं। (क)

[क] भगवति प्रसीद[6] निःसहास्मि सांप्रतं जीवितोद्वहनेन। साहमस्माद्गिरिशिखरादात्मानमवधूय[7] निर्वृता भविष्यामि। तथा मे भगवत्याशिषं करोतु येन[8] जन्मान्तरेपि प्रियसखीं प्रेक्षिष्ये।

षद्धसनं मनोज्ञं मुखं यस्य सः। शिखायां ललाटे च दत्तश्वेतसर्षपः। एतत्तु रक्षायै। क्रोडे सुप्तः। स्तनपायी च।

३९—४४. अत्र जीवितेति। तां विना जीवनमनर्हमिति भावः। निर्वृतेति। मरणे तद्वियोगदुःखापनयादिति भावः। उत्कण्ठेति।

---

१ शिलाजलाट° C.; शेखरः for सर्षपः G. २ तवांगगामी E. तवाङ्कगामि A. ३ मद° for लव° N.; ण सहामि B. N. असमत्थाह्मि C. for णीसहह्मि; जीवणुव्वहणे A. जीवणुव्वहणस्स E. जीवितुव्वहाणसहासेण C. जीविदं दुव्वहणं N.; ता for साहं A. ४ शिखरादो C. गिरिवरादो E. गिरिप्पवादादो N.; अत्ताणं B. N.; अवधूणिअ N. ५ ता before तहा C.; तधा E.; आसिप्पसादं करेदु A. आसीसं पसादीकरेदु B. असिसं करेदु C. E.; N. om. तहा मे—पेक्खिस्सं and has instead प्रपातादात्मानं क्षेप्तुकामा; पि for वि E.; दाव after वि C. E.; °सहीं A. B. C. N. ६ प्रसीद twice Com.; °नेन तदस्माद्गिरि Com. ७ पातयित्वा for अवधूय Com.; आशीःप्रसादं for आशिषं Com. ८ यथा for येन Com.

काम०[1] । ननु लवङ्गिके कामन्दक्यपि नातः परं वत्साविप्रयोगेन जीविष्यति[2] समश्वायमुत्कण्ठावेग आवयोः ।

४५ किं च । संगमः कर्मणां भेदाद्यदि न स्यात्[3] नाम सः ।
प्राणानां तु परित्यागे संतापोपशमः[4] फलम् ॥

लव० । जहा तुह्मे आणवेध । (क) उत्तिष्ठदि[5] ।

काम० । सदयं[6] वीक्ष्य । वत्से मदयन्तिके ।

[क] यथा यूयमाज्ञापयथ ।

जन्मान्तरे तां द्रक्ष्यामीत्युत्कण्ठा ममापीत्यर्थः । तत्कथं मयापि स्वतोसिद्धतया त्वय्याशीर्दातव्येति भावः ।

४५–४६. संगमेत्यादि । कर्मणां वैचित्र्यादस्माकं मालत्या सह संगमो न स्यात् । अनागमो निर्युक्तिको यतः सः । मालत्या मम च कर्मणां साम्ये मानाभावाज्जन्मान्तरे संगमो निर्युक्तिक इति भावः । तर्हि प्राणत्यागेनालमत आह । प्राणत्यागः पुनस्तापशान्तिफलकः । तथा च तदर्थं स क्रियत इति भावः । संगमाभावे तु मानम् ।

मृतोपि मानुषः शक्तो नानुगन्तुं मृतं जनम् ।
जायावर्जं च सर्वस्य याम्यः पन्था विभिद्यते ॥

इति स्मृतिः ।

४९–५६. मातिवाक्यमुन्नीयाह किमिति । अत्राग्रेसरी मरणे प्रथमा । अवहिता मर्तुम् । [लव०वा०] अत्राहं प्रिय इत्याशयः । अप इसांवदायत्ता । ते वचो न करिष्यामीत्यर्थः । निश्चितं निश्चयः कृतः । सकलं

1 N. om. काम० । ननु लवंगिके–आणवेध । उत्तिष्ठति; B. om. ननु; काम-न्दक्यपि A. E. 2 जीवितव्यं A. E.; समानश्वायमावयोरुत्कंठाप्रसंगः B. इत्कंठावि-योगः C. 3 न स्यादनागमः A. कर्मणां योगान्न हि सः स्यादनागमः B. न स्यान्नौस्तु मा C. नत् for सः E.; text with G. 4 सन्तापोपरमः फलं A. E. संतापोप-शमः फलं C. 5 इत्युत्तिष्ठंति B, E. om. उत्तिष्ठति. 6 मदयन्तिका for सदयं B.

मद० । किं आणवेध । अग्गेसरी होहि त्ति । अवहिदह्मि । (क)

लव० । सहि पसीद विरम एत्तो अत्तणो वावादणादो । मा एदं जणं विसुमरेसि । (ख)

मद० । सकोपमिव । अवेहि णह्मि दे वसंगदा (ग)

काम० । हन्त निश्चितं वराकया ।

मद० । स्वगतम् । णाह मअरन्द णमो णमो दे । (घ)

लव० । भअवदि अअं उज्जेव्व मधुमदीसोत्तसंदाणिदपवित्तमेहलो महीहरविडङ्को । (ङ)

[क] किमाज्ञापयथ । अग्रेसरी भवेति । अवहितास्मि ।

[ख] सखि प्रसीद विरमैतस्मादात्मनो व्यापादनात् । मैतं जनं विस्मरसि ।

[ग] अपेहि नास्मि ते वशंगता ।

(घ) नाथ मकरन्द नमो नमस्ते ।

(ङ) भगवति अयमेव मधुमतीस्रोतःसंदानितपवित्रमेखलो महीधरविटङ्कः ।

गुरुसमीपे प्रियस्मरणस्यायुक्तत्वात् । अत्र जन्मान्तरेप्ययं प्रियः स्यादिति तत्कालस्य स्मरणमिति भावः । अत्र मधुमती नदी । संदानितं बद्धम् । विटङ्को निम्नोन्नतप्रदेशः ॥ विटङ्क उन्नते देश इति रत्नकोशः ॥

---

१ होदु त्ति ता जाव अवहिदह्मि A. अग्गे सकामा होमि त्ति N.; E. divides this speech as follows:—मद० । किं आणवेध । काम० । अग्गेसरी भवेति । मद० । अवहिदह्मि । २ ण° A.; विरम twice N.; N. om. एत्तो, एतो C. E.; अत्ताणअवावादणादो B. अत्तणो अणअण्णवाहादो N. ३ ° रेसु C. ४ B. om. इव; अवेहि N.; हेणत्थि for णह्मि दे E.; वसंवदा A. E. ५ स्वगतं after काम° । A. E.; हंत आत्मपथे निश्चितं C. विनिश्चितं B. हंत व्यवसितं किं वराकया N. ६ नाथ मअरंदअ B.; णमो दे twice N. ७ एव्व for उज्जेव्व N.; महुमदी B.; °णिअ A. E. ८ विटङ्को A. विडओ B. विटंओ E. ९ इयमवहितास्मि Com. १० प्रसीद twice Com.; मा खल्वेनं जनं विस्मरिष्यसि Com. ११ वशंवदा Com.

काम० । कृतमिदानीं प्रस्तुतान्तरायेण[1] । सर्वाः प्रतिनुमिच्छन्ति ।

नेपथ्ये । आश्चर्यमाश्चर्यम् ।

व्यतिकर इव भीमस्तामसो वैद्युतश्च[4]
क्षणमुपहतचक्षुर्वृत्तिरुद्भूय[2] शान्तः ।

काम० । विलोक्य[3] । साद्भुतहर्षम् ।

कथमिह[4] मम वत्सस्तत्किमेतत्
प्रविश्य मकरन्दः । किमन्यत्
प्रभवति हि महिम्ना स्वेन योगीश्वरी[5]यम् ॥

नेपथ्ये । कथमतिदारुणो जनसंमर्दो[6] वर्तते ।

मालत्यपायमधिगम्य विरक्तचेताः[7]
सांसारिकेषु विषयेषु च जीवितेषु[8] ।
निश्चित्य वह्निपतनाय सुवर्णबिन्दु-
मभ्येति भूरिवसुरित्यधुना हताः[9] स्मः ।

